।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ श्रीउपदेशमालाटीका ॥

मूलकर्त्ता—श्रीधर्मदासगणि—टीकाकार—श्रीरामविजयगणि.

छपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल हंसराज. (जामनगरवाला)

संवत्—१९६६. सने १९०९

किं. रु.—९—०—०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ अथ श्रीउपदेशमालाटीका प्रारभ्यते ॥

उपाधी प्रसिद्ध करनार–पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा

श्रेयस्करं कामितदानदक्षं । प्रणम्य वीरं जितकर्मपक्षं ॥ पदार्थमात्रस्फुटदर्शनेनो–पदेशमालां विवृणोमि किंचित् ॥ १ ॥ यद्यप्यनेकाः किल संति टीका–स्तथाप्यनिंद्या क्रियते मयैषा ॥ सति प्रकाशेऽपि विधोर्जगत्यां । न युज्यते किं सदने प्रदीपः ॥ २ ॥ श्रीधर्मदासेन किलात्मसूनु–प्रबोधनार्थं विदधे सुबोधः ॥ ग्रंथो बहूनामुपकारकारी । भव्यात्मनां भावितसर्वभावः ॥ ३ ॥ पूर्वं तदंगजातस्य । रणसिंहस्य कथ्यते ॥ चरित्रं चारुचरितं । कर्मक्षयविधायकं ॥ ४ ॥ अत्र रणसिंहोदाहरणं निगद्यते—

जंबूद्वीपे समृद्धं विजयपुरं पुरमस्ति, तत्र विजयसेनो नृपः, तद्गृहे अजयाविजयानाम्न्यौ द्वे राज्ञ्यौ, तयोर्मध्ये विजयानाम्नी राज्ञोऽतीववल्लभा, भर्त्रा सार्द्धं विषयसुखमुपभुंजा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ना विजया गर्भवती जाता, तामापन्नसत्त्वां दृष्ट्वा अजयया चिंतितं मम पुत्रो नास्ति, यदि विजयायाः पुत्रो भविष्यति तदा स राज्याधिपतिर्भविष्यतीति विज्ञाय द्वेषवशेन सूतिकारिकामाहूय बहुधनदानं प्रतिश्रुत्य कथयतिस्म, यदा विजयायाः पुत्रो भवेत्तदवसरे कमप्यन्यसत्कं मृतपुत्रमानीय तस्या दर्शयेः, तदीयमंगजं च ममार्पयेरित्यग्रतस्तया साकं विचारः कृतः, पश्चाद्विजयाराज्ञ्या संपूर्णकाले पुत्रः प्रसूतः, तदवसरे पापीयस्या सूतिकारिकया मृतोऽन्यसत्कः कश्चिद्बालस्तस्यै दर्शितः, तदीयोंगजश्च सपत्न्यै अजयाराज्ञ्यै समर्पितः, तयापि दासीमाकार्य कथितं एनं बालं वनेंधकूपे प्रक्षिपेति सापि तं गृहीत्वा वनं गता, कूपसमीपे च समागत्यैवं विचारयतिस्म—धिग्मां दुष्कर्मकारिकां यदयं लघुबालो मया निहन्यते, इदं महत्पापं, एतदाचरणेन मम न काप्यर्थसिद्धिः, प्रत्युतानर्थो नरकादिगतिरूपः स्फुटतर एवेति विचार्य कूपकंठे बहुतृणान्यादिते भूप्रदेशे तं मुक्त्वा पश्चादागत्य तत्कार्यं कृतमित्यजयायै राज्ञ्यै निरूपितं. तत् श्रुत्वा साऽतीवहृष्टाऽचिंतयद्भव्यं कृतं मया यत्सपत्नीपुत्रो मारितः ।

अथ तदवसरे सुग्रामवासी कश्चित्सुंदरनामा कौटुंबिकस्तत्र तृणार्थमागतस्तेन च तत्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुदंतं बालं दृष्ट्वा संजातकारुण्येनोत्पन्नहर्षप्रकर्षेण समानीय निजगृहे स्वप्रियायै समर्पितः स बालः, कथितं च नो सुलोचने समर्पितोऽयं वनदेवतयास्माकमतोऽयं यत्नेन रक्षणीयः स्वपुत्रवत्पालनीयश्च. सापि तं सम्यक् पालयति, रणमध्ये लब्धत्वात्तस्य रणसिंह इति नाम दत्तं, द्वितीयोदितचंद्रवत्स प्रतिदिनमेधते. अथ कियत्सु दिनेषु गतेषु विजयसेनराज्ञोऽग्रे केनापि तत्सर्वं पुत्रमारणस्वरूपं निरूपितं तेन तस्य महद्दुःखं समुत्पन्नं, हा हा धिगस्त्विमां दुष्टां राज्ञीं यया पुत्ररत्नं विनाशितं, अहो धिक् संसारस्वरूपं यत्र रागद्वेषाक्रान्ताः स्वार्थवशत एतादृक्कर्म समाचरंति; अतोऽस्मिन्नवस्थानमघटमानं, चलेयं लक्ष्मीः, चलाः प्राणाः, अस्थिरोऽयं गृहवासः पाशरूपः, अतः प्रमादमुत्सृज्य धर्मोद्यमो विधेयः, यदुक्तं—संपदो जलतरंगविलोला । यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चंचलमायुः । किं धनैः कुरुत धर्ममनिंद्यं ॥ १ ॥ सा नत्थि कला तं नत्थि नुसहं । तं नत्थि किंपि विन्नाणं ॥ जेण धरिज्जइ काया । खज्जंती कालसप्पेण ॥ २ ॥

॥ ३ ॥

इत्यादिवैराग्यपरायणेन विजयसेनराज्ञा स्वप्रियया विजयराज्ञ्या तद्बंधुना सुजयनाम्ना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कुमारेण सार्द्धं, कस्यापि गोत्रिणः स्वराज्यं समर्पयित्वा श्रीवीरसमीपे चारित्रं गृहीतं. भगवतापि स्थविराणां समर्पितो विजयसेननामा नवदीक्षितमुनिः सिद्धांताध्ययनेन क्रमेण महाज्ञानी जातस्तेन तस्य धर्मदासगणिरिति नाम दत्तं, स्वकीयशालकेन सुजयनाम्ना तु जिनदासगणिरिति नाम दत्तं. पश्चादेकदा भगवंतमापृच्छ्य ते बहुसाधुपरिवृता भूमितले भव्यजीवान् बोधयंतो विहरंति. अथासौ रणसिंहनामा बालो बाल्ये राजक्रीडां कुर्वन् यौवनमनुप्राप्तः सुंदरगृहे क्षेत्रकार्याणि करोति. अथ तत्क्षेत्रसमीपे चिंतामणियक्षाधिष्ठितमेकं श्रीपार्श्वनाथचैत्यं वर्त्तते, तत्र विजयपुरवासिनो बहवो लोकाः समागत्य श्रद्धापूर्वकं प्रतिदिनं पूजास्नात्रादि कुर्वंति, तेषां मनोऽनीष्टं यक्षः पूरयति. इत्थमेकवारं कौतुकविलोकनार्थं रणसिंहोऽपि तत्र गतः, तत्र च प्रतिमान्निमुखं विलोकयन् स्थितोऽस्ति; एतदवसरे चारणऋषयो जिनवंदनार्थमागताः, तानभिवंद्य रणसिंहोऽपि तत्पार्श्वे स्थितः, साधुनापि योग्योऽयमिति विज्ञाय तस्मै धर्मोपदेशो दत्तः, यदुक्तं—दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां । बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयःपानमिश्रं ॥ तारुण्ये चापि दुःखं भवति वि-

॥ ४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रहजं वृक्षनावोऽप्यसारः । संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ १ ॥ एतत् श्रुत्वा रणसिंहेनोक्तं सत्यमेतत्. साधुनापि तं रुचितधर्मं विज्ञाय पृष्टं हे वत्स प्रतिदिनमत्र प्रासादे पूजार्थमागच्छसि ? तेनोक्तं क्वेदृशं मम भाग्यं यदत्रागत्य पूजां करोमि. साधुनोक्तं जिनपूजाया महत्फलमस्ति. यदुक्तं—सयं पमज्जणे पुप्फं । सहस्सं च विलेवणे॥ सयसहस्सिया माला । अणंतं गीयवाइए ॥ १ ॥ इति. अतः प्रतिदिनं यदि पूजां कर्तुमसमर्थस्तदा देवदर्शनं कृत्वा भोजनं विधेयमित्यभिग्रहतोऽपि त्वं सुखभाग् भविष्यसीति श्रुत्वा तेनापि तत्प्रतिपन्नं.

अथ चारणर्षयोऽप्याकाशे समुत्पतिताः, रणसिंहोऽपि प्रतिदिनं क्षेत्रे यदा भोजनमायाति, तदा हलं मुक्त्वा कूरकरंबादिनैवेद्यं गृहीत्वा श्रीपार्श्वप्रभुदर्शनं कृत्वा पश्चादागत्य भोजनं करोति. एवमभिग्रहं पालयतस्तस्य बहूनि दिनानि गतानि. एकदा चिंतामणियक्षः परीक्षाकरणार्थं सिंहरूपेण द्वारे स्थितः, मध्याह्ने रणसिंहकुमारोऽपि नैवेद्यं गृहीत्वा जिनदर्शनार्थमागतः, सिंहं दृष्ट्वा च चिंतयतिस्म गृहीतनियमस्तु प्राणांतेऽपि न भंक्तव्यः, यद्ययं सिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

होऽस्ति तदाहमपि रणसिंहोऽस्मि, किं करिष्यति ममायमिति शूरत्वेन तेन सिंहो हक्कितः, सोऽपि तत्साहसं दृष्ट्वा तिरोबभूव. पश्चाज्जिनभक्तिं कृत्वा रणसिंहः स्वक्षेत्रमागत्य भोजनं चकार, इत्थमेकदा दिनत्रयं यावदतिवृष्टिर्जाता, नदीपूरेण दिनत्रयं यावद् गृहाभक्तमपि नागतं, चतुर्थदिवसे भक्तमागतं, जिनगृहे गत्वा नैवेद्यं ढोकयित्वा जिनदर्शनं कृत्वा स्वक्षेत्रमागत्य चिंतयतिस्म. यदि कोऽप्यतिथिरद्याऽयाति तर्हि तस्मै भावपूर्वकं दत्वा पश्चात्पारणकं करोमि. इति यावच्चिंतयति तावदतिथिद्वयं भाग्यवशात्तत्र समागतं, तच्चरणयोर्निपत्य तेन तस्मै शुद्धान्नं दत्तं, मनस्यतीवानंदस्तस्य समभूत्. धन्योऽहं यदस्मिन्नवसरे साधुदर्शनं जातं, तद्भक्तिश्च तेन कृता. तन्माहात्म्याच्चिंतामणिनामा यक्षः प्रत्यक्षीभूय तमुवाच हे वत्स त्वदीयसत्त्वं दृष्ट्वाहं तुष्टस्ततो वृणीष्व वरं, रणसिंहेनोक्तं स्वामिंस्त्वदीयदर्शनेन मम नवनिधयः संपन्नाः, कापि न्यूनता नास्ति; तथापि मम राज्यं समर्पय? यक्षः कथयति इतः सप्तमे दिवसे तव राज्यप्राप्तिर्भविष्यति. परं त्वया कनकपुरनगरे कनकशेखरराज्ञः कनकमालाराज्ञीसमुद्भूतकनकवतीनाम्न्या राजपुत्र्याः स्वयंवरो भविष्यति तत्र गंतव्यं; अग्रे च यत्तवाश्चर्यं द-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्शयामि तद्दर्शनीयं. अथ पुनरपि यदा तव कार्यमापतति तदा मम स्मरणं विधेयमित्युक्त्वा यक्षोंतर्भूतः ।

पश्चाद्रणसिंहकुमारोऽपि लघुवत्सकौ हले योजयित्वा तदुपरि च स्वयं स्थित्वा कनकपुरमागतः, तत्र पूर्वमनेके राजकुमारा मिलिताः संति तत्र गत्वा स्वयमपि दूरे स्थितः, एतदवसरे कनकवती षोडशशृंगारोपशोभिता रणन्नूपुरकंकणा बहुचेटीपरिवृता स्वयंवरमागता. उन्नयतः स्थितान् राजन्यानवलोकयंती सर्वानप्यनिच्छंती यत्र रणसिंहो हलं मुक्त्वा हालिकवेषेण स्थितोऽस्ति तत्रागत्य तत्कंठे वरमालामारोपयामास. तद् दृष्ट्वा सर्वेषामपि चेतांसि कषायकलुषितानि संजातानि. आगत्य सर्वेऽपि कनकशेखरस्योपालंभं दत्तवंतः, राजन् यदि तव हालिकस्य पुत्रीसमर्पणेच्छाऽऽसीत् तदा कथं वयमाकार्य हेपिताः, कनकशेखरेणोक्तं नायं ममात्राऽपराधः, यत्रेच्छया पुत्री वरं वृणीते तत्र किमयुक्तं ? एतत् श्रुत्वा सर्वेऽपि कुपितास्ताम्रवदना उदायुधा रणसिंहमुपवेष्टयामासुः, कथितं च तैः रे रंक त्वं कोऽसि ? किं तव कुलं ? रणसिंहेनोक्तं अधुना कुलकथनप्रस्तावो नास्ति, यद्यपि कथयामि तथापि भवतां ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विश्वासो नायाति; ततः संग्रामकरणेन मम कुलपरीक्षा भविष्यति.

इति श्रुत्वा सर्वेऽपि योद्धुं सज्जीभूताः, रणसिंहोऽपि हलमादाय धावतिस्म, परस्परं युद्धे जायमाने देवप्रभावेण हलप्रहाराज्जर्जरीभूता नष्टाश्च सर्वेपि राजानः, तद् दृष्ट्वा चमत्कृतांतःकरणः कनकशेखरो व्यजिज्ञपत् स्वामिन्मद्दाश्चर्यं कृतं, प्रकाशय निजस्वरूपं? तदैव यक्षेण प्रत्यक्षीभूय सर्वमपि रणसिंहकुमारचरितं निरूपितं. तत् श्रुत्वा कनशेखरोऽतीवहृष्टो, महताडंबरेण च पुत्री विवाहिता. सर्वानपि राजन्यान् परिधापनिकापूर्वकं स बहु सन्मानयामास; ततस्ते सर्वेऽपि स्वदेशं जग्मुः, पश्चात्कनकशेखरेण जामातुरेकदेशराज्यं समर्पितं, तत्र स्थितः कनकवत्या साई विषयसुखमनुभवन् स सुंदरकौटुंबिकं समाकार्य भचितराज्यकार्याधिकारिणं चकार. एतस्मिन्नवसरे सोमानाम्न्यां महापुर्यां पुरुषोत्तमनामा नृपः, तद्गृहे च रत्नवती पुत्री वर्त्तते, सा च कनकशेखरनृपभगिनीसुता, तया सर्वमपि कनकवतीपाणिग्रहणस्वरूपं ज्ञातं, रणसिंहं विनाऽन्यवरणे च नियमो गृहीतः, एतादृशं सुतामनो ज्ञात्वा पुरुषोत्तमराज्ञा स्वकीयप्रधानपुरुषा रणसिंहमाकारयितुं प्रेषिताः, तैरपि तत्र गत्वा तथैवोक्तं.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रणसिंहेनोक्तं सर्वमपीदं कनकशेखरो जानाति, नाहं किमपि वेद्मीति प्रधानपुरुषैः कनकशेखरनृपाग्रे कथितं. तदा कनकशेखरेण चिंतितं; एतत्सत्यं यदियं रत्नवती मम ज्ञागिनेया, तदस्या अपि विवाहो मम कर्तुं युक्त एवेति रणसिंहमाकार्य स प्रोवाच गम्यतां रत्नवतीपाणिग्रहणार्थं, तेनापि तत्प्रतिपन्नं, महता परिवारेण रणसिंहोऽपि रत्नवतीपरिणयनार्थं चलितः, मार्गे गच्छन्नेकदा पाडलीखंमपुरसमीपोपवने चिंतामणियक्षायतनसमीपे समागत्य स्थितः, यक्षप्रासादमध्ये यक्षाय प्रणामं कृत्वा स्थितः, तदवसरे रणसिंहकुमारस्य दक्षिणं चक्षुः स्फुरितं, तदा स मनसि व्यचिंतयत् अत्र कोऽपीष्टमेलापको ज्ञविष्यतीति.

तस्मिन्नवसरे पाडलीखंडपुराधिपस्य कमलसेननृपस्य कमलिनीकुक्षिसमुज्ञवा कमलवतीसुता सुगंधपुष्पादिपूजोपकरणान्यादाय सुमंगलादासीसहिता यक्षप्रासादे समागता, आगत्य रणसिंहकुमारं दृष्ट्वा कामविह्वला जाता, कुमारोऽपि तां दृष्ट्वाऽतीवव्यामोहितः, परस्परमनिमेषलोचनौ क्षणमथ सस्नेहमवलोकयितुं लग्नौ. पश्चाद्यक्षपूजां कृत्वा विज्ञपयतिस्म, स्वामिंस्तव प्रसादतोऽयं मम ज्ञर्त्ता ज्ञवतु, एतद्दर्शनेनाहमतीव रागवती जाता, अतः प्रसन्नीज्ञूय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ममैनं राजकुमारं प्रियत्वेन समर्पय? तदा यक्षेणोक्तं नो वत्से समर्पितोऽयं मया, भुंक्ष्वानेन साकं यथेप्सितं सांसारिकं सुखं? एतत् श्रुत्वाऽानंदमापन्ना कमलवती सेवकांतिके तन्नामादि परिपृच्छय स्नेहदृष्ट्या पुनः पुनः सन्मुखमवलोकयंती स्वगृहमागता. कुमारोऽपि स्वकीयपटावासे समागतः, अथ द्वितीयदिवसेऽपि तथैव कमलवती यक्षपूजार्थमागता, कुमारेणापि दृष्टा; पूजां विधाय मधुरस्वरेण सम्यग् वीणावादनपूर्वकं तदग्रे संगीतकं कृत्वा गृहं गता; कुमारोऽपि तदीयं गानमथ वीणास्वरं श्रुत्वा मनसि चिंतयतिस्म, यद्येनां विवाहयामि तदा मे सफलं जन्म, नो चेत्किमनेन जीवनेनेति तद्भागवाहितः स्थितः, तदा पुरुषोत्तमनृपप्रधानैरागत्य विज्ञप्तं, स्वामिन् कोऽत्र विलंबहेतुः? कुमारेणोक्तं ममात्र किंचित्कार्यमस्ति, यूयमग्रतो गच्छत? अहमपि पृष्टतः शीघ्रमागच्छामि. इति श्रुत्वा ते प्रधानपुरुषाः सोमापुर्यां पुरुषोत्तमनृपसमीपे गताः, कथितं च कुमारागमनस्वरूपं, रणसिंहकुमारस्तु कमलवतीरूपमोहितस्तत्रैव स्थितः।

एतदवसरे एको श्रीमन्नृपपुत्रोऽपि कनकसेननृपसेवां करोति. सोऽपि कमलवतीरूपं दृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्ट्वा मोहितोऽस्ति, परं कमलवती मनागपि तं नेच्छति. एकवारं कमलवतीं यक्षपूजार्थं गतां विज्ञाय सोऽपि श्रीमपुत्रस्तत्पृष्ठतो जगाम. चिंतितं च तेन प्रासादद्वाराच्निस्सरंत्यास्तस्याः सर्वमपि मनोऽभिलषितं कथयिष्यामीति संचिंत्य स प्रासादद्वारे स्थितः, कमलवत्यापि स दृष्टः, तदा सा सुमंगलां स्वदासीं कथयतिस्म, योऽयं द्वारस्थितोऽस्ति स यदि प्रासादांतः समागच्छति तदा वारणीय इति शिक्षयित्वा तया सा द्वारप्रदेशे स्थापिता, स्वयं चैकांते समागत्यैकां जटिकां कर्णयोर्बध्ध्वा पुरुषरूपेण भूत्वा प्रासादद्वारे समायाता. तदा तेन कुमारेणोक्तं भो देवपूजक! कमलवती कथं बहिर्न निर्गता? तेनोक्तं मया त्वत्र प्रासादे एकैवेयं दृष्टा, अन्या तु कापि नास्तीति कथयित्वा स्वमंदिरमागता; जटिका कर्णतो दूरीकृता, मूलरूपेण जाता; पश्चाद् द्वारस्थितो श्रीमसुतोऽपि प्रासादमध्ये बहुवारमवलोकयन्नपि तामदृष्ट्वा विषण्णो भूतः स्वस्थानं गतः, दास्यापि समागत्य कमलवत्यै पृष्टं स्वामिनि कथमत्रागता त्वं? मया तु निर्गच्छंती न दृष्टा. तया सर्वमपि जटिकास्वरूपं कथितं. तदा दासी प्रोवाच भो स्वामिनि! एतादृशीयं जटिका कुतस्त्वया लब्धा? कमलवती प्राह शृणु?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्वमेकदाहं यक्षायतने गता, तदा तत्रैकं विद्याधरविद्याधरीयुग्ममागतं, तदा मां दृष्ट्वा विद्याधरस्त्रिया चिंतितं यद्यत्यद्भुतरूपामिमां मदीयो भर्त्ता द्रक्ष्यति तदैतद्रूपमोहितो भविष्यतीति ज्ञात्वा यथाहं न जानामि तथा मम कर्णे सैकां जटिकां बबंध. पश्चाद्यक्षपूजार्थं गताहं स्वात्मनः पुरुषवेशं दृष्ट्वा विस्मयमापन्ना, सर्वं शरीरमवलोकयंत्या मया कर्णे जटिका दृष्टा, सा ततो दूरतो मुक्ता, मूलरूपेण च जाता; पश्चात्सा जटिका मयाऽत्यादरेण गृहीता, सैव च मम पार्श्वे वर्त्तते. तत्प्रभावेण चाद्य पुरुषवेषं कृत्वाहं प्रासादात्समागतेति जटिकास्वरूपं दास्यै निवेदितं. अथ श्रीमनृपपुत्रेण बहवोऽप्युपायाः कृताः, परं कोऽपि न लगति, तदा तेन कमलवतीमातुरग्रे स्वाभिप्रायो निवेदितस्तयापि चिंतितं महानयं राजपुत्रोऽस्ति, अतो युक्तमनेन सार्द्धं स्वपुत्रीविवाहकरणमिति विचार्य भर्त्तुर्निवेदितं, तेनापि प्रतिपन्नं, द्वितीयस्मिन्नेव दिने लग्नं गृहीतं. कमलवत्यापि तद् ज्ञातं, महद्दुःखमुत्पन्नं, अतो सा न भुंक्ते न शेते न जल्पति न हसति, मनसि चिंतयति गत्वा तमेव यक्षं सोपालंभपूर्वकमाश्रयामि, नान्या मे गतिरिति विचिंत्य रात्रौ प्रच्छन्नं निर्गत्य यक्षायतनमागत्य तमेवमुपालंभं ददाति. हे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यक्ष न घटते चैतन्नवादृशानां प्रधानसुराणां वाचोऽन्यथाकरणं, सतां त्वेकैव जिह्वा. यदुक्तं—
जिह्वैकैव सतामुन्ने फणभृतां सप्तुश्चतस्रोऽथवा । ताः सप्तैव विन्नावसौ निगदिताः षट् कार्त्ति-
केयस्य च ॥ पौलस्तस्य दशैव ताः फणिपतौ जिह्वासहस्रद्वयं । जिह्वा लक्षसहस्रकोटिगुणि-
तास्ता दुर्जनानां मुखे ॥ १ ॥ इति, यद्यप्येवं न्नवता न्नवद्भागन्यथा कृता परं मदायत्तोऽस्ति
मदीयजीव इति कथयित्वा रणसिंहकुमारस्य पटावासपार्श्वे समागत्य महति वृक्षे गलपाशं
बध्ध्वा कथयामास, न्नो न्नो वनेदेवता मदीयं वचनं शृणुत? मया रणसिंहकुमारस्य वरणे-
न्नयाऽयं चिंतामणिनामा यक्षो बहुधाऽराधितो, दत्ताप्यनेन स्ववाक् न पालिता, तदर्थमहमा-
त्मघातं करोमि. यदि मयाऽस्मिन् न्नवेऽयं न्नर्त्ता न प्राप्तस्तर्ह्यागामिन्यपि न्नवे ममायं वल्ल-
न्नो न्नूयादित्युक्त्वा साहसं कृत्वा वृक्षोपरि चटित्वा कंठे पाशं क्षिप्त्वांतराले स्थिता. ताव-
त्सुमंगला नाम्नी तस्या दासी पदे पदे तामवलोकयंती तत्रागता, तस्याश्च तदवस्थां दृष्ट्वा त-
या हाहारवः कृतः, तत् श्रुत्वा सुमित्रनाम्ना मित्रेण सार्द्धं रणसिंहकुमारोऽपि तत्र सत्वरमा-
गतः, दास्या गलपाशश्छिन्नः, कमलवती अचेतना जाता, शीतलवातायुपचारतश्च स्वस्थी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूता, तदा कुमारेण पृष्टं भो सुभगे त्वं कासि? किं कारणं कंठपाशग्रहणे? किमर्थमिदमियत्साहसं च? सुमंगला प्राह स्वामिन्नद्यापि किमिमां न जानीथ?

इयं त्वल्लीनचित्ता कमलवती, पित्रा भीमनृपपुत्राय दीयमानाऽात्मघातेन म्रियमाणा मया कंठपाशच्छेदेन रक्षितेत्याकर्ण्य रणसिंहो हर्षमापन्नः, पश्चात्सुमित्रेणोक्तं भो मित्र मिष्टान्नभोजने मिलिते कः क्षुधातुरो विलंबं करोति? अतःकारणादिमां पाणिग्रहणतः समुद्धर मन्मथोदधेः, इति मित्रवाक्यं श्रुत्वा गांधर्वविवाहेन तेन सा परिणीता; कमलवत्यपि मनसि महानंदं प्राप्ता; रात्रौ च सुमित्रेण साकं स्वगृहमागता. तदवसरे विवाहकार्यहर्षातिरेकेण व्यग्रचित्तं स्वपरिवारं ज्ञात्वा कमलवती स्ववेषं सुमित्राय समर्पयित्वा स्वयं चान्यवेषं परिधाय रणसिंहकुमारपार्श्वे समागता; सर्वापि प्रवृत्तिः स्वभर्त्तुरग्रे कथिता. कुमारोऽपि स्नेहदृष्ट्या गाढं दोर्भ्यां तां परिरभ्य पार्श्वे स्थापयामास. अथ लग्नवेलायां भीमसुतोऽपि हस्तिस्कंधमारुह्य महताडंबरेणागतो महोत्सवपूर्वकं कमलवतीवेषधारकस्य सुमित्रकुमारस्य पाणिग्रहणं कृत्वा स्वावासमागतः, कामवशेन कोमलालापपूर्वकं नवीनवधूं पुनः पुनरालापयति, परं म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नागपि न जल्पति न्यग्भूयस्थिता. तदाऽतिमदनातुरेण तेन तदीयमंगं हस्तेन स्पृष्टं, तदा पुरुषस्पर्शो ज्ञातः, पृष्टं त्वं कोऽसि? तेनोक्तमहं त्वदीयवधूः, कुमारेणोक्तं त्वं कुतो वधूः? त्वदीयः कायस्पर्शः पुरुषस्येव दृश्यते. तदा वधूवेषधारकेण सुमित्रेणोक्तं हे प्राणनाथ किमिदं जल्पितं? किं भवदीयं चेष्टितं स्पष्टीकरोषि? यद्विवाहोत्सवेन नवपरिणीतां मां चेटकविद्यया पुरुषरूपेण करोषि! अहं त्वधुना गत्वा मदीयपित्रोः समीपे कथयिष्यामि, यदहं कुमारप्रभावेण पुत्रीत्वं विहाय पुत्रो जातः, एवमुक्ते स भीमपुत्रो व्यग्रचित्तो बभूव; किमिदं जातमिति; सुमित्रोऽपि स्त्रीवेषधारक एव रणसिंहकुमारपार्श्वे समागतः, सर्वं रजनीव्यतिकरं चाऽचीकथत्, तत्कौतुकं श्रुत्वा सर्वेऽपि परस्परं हस्ततालं दत्वा हसितवंतः, पश्चाद्भीमपुत्रेणापि समागत्य कनकसेननृपाग्रे कथितं, या भवदीया पुत्री मया साऽहं विवाहिता स तु पुत्रो दृश्यते. तत् श्रुत्वा श्वसुराभ्यामुक्तं किमयं जामाता ग्रथिलो जातः! यदेवं जल्पति, किं वा भूताद्यावेषवान्! यदेवमसंबद्धं वक्ति. एतादृशी तु प्रवृत्तिः कदापि न जाता, न भाविनी, नापि श्रूयते; यदेकत्रैव भवे जीवः स्त्रीत्वं विहाय पुरुषत्वं प्राप्नोति. किंच जामातापि कथमस-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यं वदति! परं स कोऽपि धूर्त्तो दृश्यते. एवमुक्त्वा राज्ञा सर्वत्र कमलवत्याः शुद्धिः कारापिता, परं कुत्रापि सा न दृष्टा, तदा राजाऽतीवशोकातुरो जातो, राज्ञ्यपि पुत्रीमोहेन रुदंती सेवकानेवं वदतिस्म, यः कोऽपि मदीयां तनयामानयति तस्य मनोऽभीष्टं पूरयामीति चरा अपि सर्वत्र ग्रामं ग्रामं विषण्णा निरुत्साहाः पुनरागताः, एवं सति प्रातः केनापि लब्धावदातेन कनकसेननृपाग्रे कथितं, स्वामिन् कमलवती परिणीतवेषेण रणसिंहकुमारपटावासे क्रीडां कुर्वंती दृष्टा. तत् श्रुत्वा क्रोधारुणनयनो श्रीमनृपकुमारसहितो बहुदलवृतः स तत्रागतः, कुमारेण सार्द्धं च तेन युद्धमारब्धं. रणसिंहोऽपि सिंहवद्योद्धुमारेभे. एकाकिनापि रणसिंहेन देवसाहाय्याद्भीमपुत्रेण सार्द्धं कनकसेननृपो जीवन् गृहीतः, तदा कमलवतीदास्या सुमंगलया समागत्य सर्वोऽपि वृत्तांतो निवेदितः, पश्चात्कमलवत्यपि समागता, पितुः प्रणामं कृत्वा करौ मुकुलीकृत्य स्थिता. कनकसेननृपेणापि सर्वं श्रीमनृपसुतस्वरूपं श्रुतं. अतीवक्रुद्धेन तेन तस्य बहुतर्जनादि क्रियमाणे कमलवत्या सोऽपि मोचितः, कनकसेनोऽपि रणसिंहस्य कुलधैर्यादि विज्ञायातीवहृष्टो, महता विस्तरेण कमलवतीविवाहः कृतः, जामातुः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करमोचनावसरे बहुगजाश्वादि दत्तं. रणसिंहोऽपि बहुकालं तत्रैव स्थितः, कियता कालेन कमलवतीं गृहीत्वा स्वदेशंप्रत्यायातो, द्वाभ्यां कनकवतीकमलवतीभ्यां सार्द्धं विषयमुपभुंजानः सुखेन कालमतिवाहयतिस्म. एतदवसरे सोमापुर्यां पुरुषोत्तमनृपपुत्री रत्नवती नाम्नी चिंतयति, अहो मम पाणिग्रहणार्थमागच्छन् रणसिंहकुमारोंतरा कमलवतीं परिणीतवान्. तया सार्द्धमतीवलुब्धो मम वल्लभो मां विस्मारितवान्; अत्र मदुद्वाहार्थं नाऽायाति. कमलवतीं विना नान्यत्किमपि पश्यति; अतस्तया किमपि कार्मणं कृतं विलोक्यते. कमलवतीस्नेहेनातीवनिर्भृतं भर्तृहृदयं दृश्यते, तेन च मत्स्नेहावकाशो न जायते; परमहं तार्हि सत्या यदि केनाप्युपायेन तद्विरसि कलंकं दत्वा भर्तृचित्तं समुत्तारयामीति संचिंत्य स्वकीयमातुरग्रे कथितं, तयापि यथेष्टं कुर्वित्यनुज्ञा दत्ता. पश्चात्तत्रैका गंधमूषिका नाम्नी दुष्टा कार्मणवशीकरणकर्मकुशला काचित्स्त्री वर्त्तते, तामाहूय रत्नवती कथयतिस्म; मातर्मदीयमेकं कार्यं कुरु? यद्रणसिंहकुमारः कमलवत्यामतीवलीनो वर्त्तते, तत्तथा कुरु? यथैनां कलंकदूषितां कुमारो गृहान्निष्कासयति. ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तत् श्रुत्वा तया प्रतिपन्नं कियन्मात्रमिदं ! स्वल्प कालेनैतत्करिष्यामीति प्रतिश्रुत्य स्तोकैरेव दिनै रणसिंहनगरमागता, समागत्यांतःपुरमध्ये कनकवतीमंदिरं गता. कनकवत्याः पुरो रत्नवतीकुशलादिवृत्तांतं कथयामास. रत्नवतीप्रवृत्तिकथनेन कनकवत्यापि तस्या बहु सन्मानं दत्तं. प्रतिदिनमंतःपुरे समायाति, कुतूहलविनोदादिवार्त्तां कथयति; कमलवतीं च विशेषेण जल्पयति. यथा यथा कमलवत्या विश्वासः समुत्पद्यते तथा तथा करोति. एवं सर्वदा गमनागमने क्रियमाणे कदाचित्कूटविद्यया कमलवतीमंदिरमध्ये परपुरुषः समागच्छन् कुमाराय दर्शितः, परं मनागपि तस्य मनसि शंका नाऽायाता, चिंतयति च कमलवतीशीलं सर्वथैव निष्कलंकं वर्त्तते. एवं बहुवारं परपुरुषदर्शनेन कुमारेण चिंतितं किमियं खंभितशीला जाता ? यतः प्रत्यक्षमेतदेवं पश्यामि. ततस्तेन कमलवत्यै प्रोक्तमहं प्रत्यहं पुरपुरुषं तव मंदिरे समागच्छंतं गच्छंतं च पश्यामि. तदा कमलवती प्रोवाच, नो प्राणनाथ नाहं किमपि जानामि पुरपुरुषसंचारस्वरूपं, यदि यूयं पृच्छथ तदा मम कर्मणामेवायं दोषः, अहं मंदभाग्यवती यद्यूयमेतादृशं पश्यथ. यदीयं धरा विवरं ददाति तदा प्रवेशं करोमि; नूनमेतदश्रा-

॥ १८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्यं मया न श्रूयते.

तत् श्रुत्वा कुमारश्चिंतयति, अवश्यमिदं नूतादिविलसितं विलोक्यते; नास्यां कापि कुचेष्टा. यद्यपि वामभ्रुवो यौवने तीक्ष्णकटाक्षविक्षेपतः परमनांसि हरंति, तथापि तैः पुरुषैः प्रतिदिनं संगमः कथं संयुज्यते? अंतःपुरे तु नैतद्विशेषेण संज्ञाव्यते. कोऽकालमरणान्निलाषी? यः प्रत्यहमत्रायाति. इति सम्यग् विचारयतः कुमारस्य मनसि न सत्यं प्रतिभासते, परं स दुर्मनस्को भूत्वा स्थितः, तदा दुष्टया तया चिंतितं, अद्याप्येतच्चित्तं तदुपरि न सम्यग् विरक्तीभूतं, द्वितीयेनोपायेन स्नेहभेदं करोमीति विचार्य तांबूलभोजनादिषु केनाप्युपायेन मंत्रचूर्णादियोगं कृत्वा कुमारचित्तं विरक्तीकृतं; तेन पूर्वं गाढानुरक्तं तद्दृश्यमपि कुमारमनो मंत्रचूर्णादिप्रयोगेण तदुपरि ज्वलितुं लग्नं. लोकापवादतो बिभ्यता तेनैवं चिंतितं इमां कमलवतीं तत्पितृगृहे प्रेषयामि, अत्र न रक्षणीयेति विचार्य स्वसेवकानादूयोक्तवान्. गच्छतैनां कमलवतीं रथमारोप्य तत्पितृकुले मुक्त्वा समागच्छतेति श्रुत्वा सेवकैश्चिंतितं किमनुचितमयं करोति! स्वामिवाक्यमनुल्लंघ्यमिति विज्ञाय कमलवतीसमीपमागत्योक्तं भो स्वामिनि वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

टिकायां स्थिताः स्वामिनो युष्मानाकारयंति, रथे स्थित्वा शिघ्रमागम्यतामित्यसत्यमुक्त्वा तैः सा रथे समारोपिता, तावत्कमलवत्या दक्षिणं चक्षुः स्फुरितं, चिंतितं च तया किमद्य अनविष्यति? परं अत्रा समादूतास्मि, तत्र यन्नाव्यं तन्नवतु; इति व्यग्रचित्ता रथे स्थिता. रथोऽपि सत्वरं सेवकेन चालितः, कमलवत्या पृष्टं कियद्दूरं कांतालंकृतमुपवनमस्ति? तेनोक्तं क्व वनं! क्व कांतः! कुमारेण पितृगृहे मोचनाय तवाज्ञा दत्तास्ति. कमलवत्या कथितं अनव्यं, यदि कुमारेणाऽविमृष्टमपरीक्षितमेतादृशमकार्यं कृतं तर्हि पश्चादेतस्य महाननुशयो अनविष्यति; मम तु यदुदितं तन्नोक्तव्यमेव. यदुक्तं—

कृतकर्मक्षयो नास्ति । कल्पकोटिशतैरपि ॥ अवश्यमेव भोक्तव्यं । कृतं कर्म शुभाशुभं ॥ १ ॥ मयि निरपराधायां किमनेनाचरितमिति चिंतयंती स्तोकैरेव दिनैः पाडलीखंडपुरसमीपे समागता. तदा कमलवती प्रोवाच भो सारथे त्वमितो रथं पश्चाद्वालय? यतोऽत्र तव किमपि कार्यं नास्ति, परिचितोऽयं मम भूप्रदेशः, इतः सन्मुखं पाडलीखंडपुरोपवनं दृश्यते, अहमेकाकिनी सुखेन गमिष्यामि; एवमुक्ते सारथिरपि प्रणतिपूर्वकं साश्रुलोचनो विज्ञ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पयति नो स्वामिनि त्वं साक्षात् शीलालंकृतिधारिणी लक्ष्मीरसि, परमहमधमाङ्गाकारकः चांडालोऽस्मि, येन मया त्वमरण्ये मुक्ता; धिग्मां दुष्कर्मकारिणमिति ब्रुवंतं तं कमलवती प्राह नो सत्पुरुष नायं तवात्रापराधः, यः सेवको नवति स स्वनर्तुराज्ञां करोत्येव; परं मंदनाग्यवतस्तस्यैकं वचनं कथनीयं, येदेतत्कार्यं किं त्वया कुलोचितं कृतमस्तीति. तत् श्रुत्वा कमलवतीं वटतरोरधो मुक्त्वा रथं गृहीत्वा स पश्चाद्चलितः, पश्चादेकाकिनी तत्र स्थिता सा रुदंती विलपंत्येवं कथयतिस्म, अरे विधातः किमतिकर्कशमाचरितं त्वया! किमकाले वज्रपातोपमं प्रियविरहजं दुःखं दत्तं? किं मया तवापराद्धं? अन्यत्सर्वमपि सोढुं शक्यते, परमस्मत्कलंकारोपणतो नर्त्रा मम गृहनिष्कासनं महद्दुःखं नाति, किं करोमि? क्व यामि? अतो मातरत्रागत्य दुःखदावाग्निना दह्यमानां स्वपुत्रीं पालय? अथवा नागंतव्यं, मदीयदुःखदर्शनेन तव हृदयस्फोटो नविष्यति, अहं मंदनाग्यवती, पूर्वं पितुरपि मया कुमार्यवस्थायां वरचिंता कारिता, पाणिग्रहणवेलायामपि बंधनादिकष्टमुत्पादितं, अधुनाप्येतत् श्रुत्वा मन्निमित्तेन दुःखनाक् नविष्यति.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवमनेकधा विलापं कुर्वाणा मनसि सा विचारयतिस्म, अहं पूर्वं भर्तुः सुपरीक्षितशीलाऽभूवं, परं ज्ञायते केनापि निष्कारणवैरिणा, अथवा भूतराक्षसादिना एतदिंद्रजालस्वरूपं दर्शयित्वा भर्तुश्चित्तं व्युद्ग्राहितं कृतं, तदधुना कलंकसहिताया मम पितृगृहगमनं सर्वथा न युक्तं; जटिकाप्रभावेण पुरुषो भूत्वा तिष्ठामि. यत एकं बदरीफलोपमं स्त्रीशरीरं दृष्ट्वा को न भोक्तुमुत्सहते? यतः—तटाकवारि तांबूलं। स्त्रीशरीरं च यौवने ॥ को न पातुं न भोक्तुं नो। विलोकयितुमुत्सुकः ॥ १ ॥ मम तु प्राणत्यागेऽपि शीलरक्षणं वरं, यदस्मिन्संसारे शीलादपरं परमपवित्रमकारणमित्रं नास्ति. यतः—निर्धनानां धनं शील–मनलंकारभूषणं ॥ विदेशे परमं मित्रं। प्रेत्यामुत्र सुखप्रदं ॥ १ ॥ पुनः शीलप्रभावतः प्रदिप्तो वह्निः शाम्यति, सर्पादिकभयं नश्यति. यदुक्तमागमे—देवदाणवगंधव्वा। जक्खरक्खसकिन्नरा ॥ बंभयारिं नमंसंति। दुक्करं जे करिंति भ ॥ १ ॥ जो देइ कणयकोडिं। अहवा कारेइ कणयजिणभुवणं ॥ तस्स न तत्तियं पुण्णं। जत्तियं बंभव्वए धरिए ॥ २ ॥ इत्यालोच्य जटिकाप्रभावेण ब्राह्मणवेषं विधाय पाटलीखंडपुरतः पश्चिमायां दिशि चक्रधरनाम्नो ग्रामस्य समीपे चक्रधरदेवा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यतने पूजकत्वेन स्थिता; सुखेन कालमतिवाहयति. इतस्तदवसरे सारथिनापि तत्र गत्वा सर्वोऽपि कमलवतीसंबंधः कुमाराग्रे कथितः, कुमारोऽपि तत् श्रुत्वा सर्वमपि गंधमूषिकामंत्रादिमाहात्म्यं ज्ञात्वा पश्चात्तापं कर्तुं लग्नो, हा हा किमाचरितमधमेन मयाऽधमकुलोचितं! यन्निर्दूषणायाः प्राणप्रियायाः कलंको दत्तः, सा मदीया प्राणप्रिया कमलाक्षी कमलवती किं करिष्यति! किमहं करोमि! तयाविना सर्वमपि शून्यं. यतः—

सति प्रदीपे सत्यग्नौ। सत्सु नानामणीषु च॥ विनैकां मृगशावाक्षीं। तमोभूतमिदं जगत् ॥ १ ॥ को जानाति! कदा मम वल्लभा मिलिष्यति! कथमहमधन्यो लोकानां मुखं दर्शयिता! धिगस्तुमां, मम हृदयं कथं न स्फुटितं येन हृदयेनैवं चिंतितं. सा मदीया जिह्वा कथं शतखंडवती न जाता ययैवमनुज्ञा दत्ता. इदमकार्यं कुर्वतो मम शिरसि ब्रह्मांडं कथं त्रुटित्वा न पतितं? अहो अविमृश्य कृतं कार्यं महाऽनर्थायते! यदुक्तं नीतिशास्त्रेऽपि—सहसा विदधीत न क्रिया—मविवेकः परमापदां पदं ॥ वृणुते हि विमृश्यकारिणं। गुणलुब्धाः स्वयमेव संपदः ॥ १ ॥ अतः किमनेन शोचनेन, परमिदं केन कृतमिति चिंतयता तेन गं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धमूषिकागमनं श्रुतं, चिंतितं च सत्यमनयैवेदमाचरितमिति सनिःश्वासं स चिंतयतिस्म, तावद्गंधमूषिकापि सोमापुर्यां गत्वा रत्नवत्याः पुरः सर्वमपि कुमारस्वरूपं कमलवतीस्वरूपं चाऽकथयत्. रत्नवत्यपि प्रमोदवती जाता, स्वकीयपितरं पुरुषोत्तमनृपं कथयतिस्म, स्वामिन् समाकार्यतां रणसिंहकुमारः, पुरुषोत्तमेनापि कुमाराकारणार्थं कनकपुरे नगरे कनकशेखरनृपपार्श्वे प्रेषिताः स्वसेवकाः, तैरपि तत्र गत्वोक्तं स्वामिन् रत्नवतीपाणिग्रहणमकृत्वांतरालमार्गत एव प्रत्यागच्छता रणसिंहकुमारेणातीवाऽयुक्तमाचरितं, वयं ह्येपिताः, परं रत्नवती तदेकाग्रचित्ता स्थितास्ति.

ततः प्रेष्यतां रत्नवतीपाणिगृहणार्थं कुमारः, कनकशेखरोऽपि रणसिंहमाहूयोक्तवान् गम्यतां रत्नवतीविवाहार्थं; कमलवतीविरहव्यग्रचित्तेनापि तेन कनकशेखरनृपोपरोधेन तत्प्रतिपन्नं. शुभे दिवसे ससैन्यश्चलितः, शुभशकुनैः प्रेर्यमाणः प्रयाणं कुर्वन् पाडलीखंडपुरंप्रति प्रियाशुद्ध्यर्थं चलन् कियता कालेन परिभ्रमन् चक्रधरग्राममसमीपोद्यानमाजगाम, तत्र पटावासे स्थितश्चक्रधरदेवार्चनार्थं गतः, तावत्कुमारस्य दक्षिणं चक्षुः स्फुरितं; चिंतितवांश्च अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

य कोऽपीष्टसंयोगो भावी; मम तु कमलवतीं विना न किमपीष्टं, सा यदि मिलति तदा सर्वेष्टलाभः संपन्नः, एवं विमृशति सति कमलवत्यपि पुष्पबटुकरूपं धृत्वा पुष्पाणि लात्वा कुमारहस्तयोः समर्पयतिस्म. कुमारेणापि यथोचितं मूल्यमर्पितं. पश्चाद्देवपूजकेन चिंतितमयं रणसिंहकुमारो रत्नवतीपरिणयनार्थं गच्छन् विलोक्यते. कमलवती कुमारं दृष्ट्वाऽतीवहृष्टा बभूव. कुमारोऽपि पुष्पबटुकरूपधारिणीं कमलवतीं पुनः पुनरवलोकयन्नेवं चिंतयति, अयं प्राणवल्लभाकमलवतीसदृशो दृश्यते. एतद्दर्शनेन ममातीव मनो हृष्टं. इत्थं चिंतयन् सविस्मयं पुनः पुनरवलोकयन् स न तृप्तिं प्राप. कमलवत्यपि स्नेहवशतः स्वकांतं निरीक्षतेस्म. पश्चात्कुमारोऽपि बटुकेन साकं निजावासे समागतः, भोजनादिभक्तिपूर्वं बहु सन्मानितो बटुकः पुरतः स्थापितश्च. कुमारः कथयति भो बटुक तवांगं मुहुर्मुहुः सम्यगवलोकयतोऽपि मम न तृप्तिर्जायते, अतीवाभीष्टं तव दर्शनं लगति, बटुकः प्राह स्वामिन् सत्यमिदं; यथा चंद्रकांतिदर्शनेन चांद्रोपलादमृतस्रावो नान्यस्मात्तथा संसारेऽपि यो यस्य वल्लभो भवति सोऽपि तं दृष्ट्वापि न तृप्तो भवति. कुमारः प्राह ममाग्रे गमनं विधेयमस्ति, परं त्वत्प्रेमशृंख-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लाया त्रहं मम मनः पदमपि गंतुं नोत्सहते, अतः कृपां विधाय मया साईमागम्यतां; पुनरहं त्वामत्रानेष्याम्यवश्यमिति श्रुत्वा बटुकः प्राह मम तु प्रत्यहं चक्रधरदेवपूजनं विधेयमस्ति, तत्कथं मया समागम्यते?

अथ च निर्दंभव्रतधारिणो मम किं तत्रागमने प्रयोजनं? कुमारेणोक्तं यद्यपि कार्यं नास्ति तथापि ममोपरि कृपां विधायागंतव्यमिति कुमारोपरोधतस्तेन प्रतिपन्नं, तेन साईमग्रतश्चचाल सः, मार्गे गच्छतः कुमारस्य बटुकेन साईमतीव प्रीतिर्जाता, क्षणमपि तदीयसंगं न मुंचति; तेन सहावस्थानमुत्थानं चलनं शयनं, शरीरच्छायावत् क्षणमपि तौ न भिन्नौ भवतः, दुग्धजलयोरिव तयोर्मैत्र्यमभूत्. यदुक्तं—क्षीरेणात्मगता दकाय हि गुणा दत्ताः पुरा तेऽखिलाः। क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः॥ गंतुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं। युक्तं तेन जलेन शाम्यति पुनर्मैत्री सतामीदृशी॥ १॥ एकदा कुमारः कथयति भो मित्र मदीयं मनो मम पार्श्वे नास्ति, तेनोक्तं क्व गतं? कुमारेणोक्तं मम वल्लभया कमलवत्या साई, तेनोक्तं सा कमलवती क्व गता? कुमारः प्राह मम मंदभा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ग्यस्य गृहे कथमेतादृशं स्त्रीरत्नं तिष्ठति? मयैव दैवविलुप्तचेतसा सा निष्कासिता, सा क गता भविष्यति! बटुकेनोक्तं सा कीदृशी वर्त्तते? यदर्थमेवं खेदं कुरुथ.

कुमारोऽपि साश्रुलोचनः कथयति. भो मित्र तदीया गुणाः कथमेकजिह्वया गणितुं शक्यंते? सकलगुणभाजनं सा दयिता. अधुना तु तयाविना सर्वोऽपि संसारः शून्य एव. परं तु तव दर्शनेन ममाह्लादः समुत्पद्यते. तदा बटुकेनोक्तं भो सुंदर नैतावान् पश्चात्तापः कार्यो, यद्विधिना निर्मितं तत्को निवारयितुं शक्तः? यदुक्तं—अघटितघटितानि घटयति । सुघटितघटितानि जर्जरीकुरुते ॥ विधिरेव तानि घटयति । यानि पुमान्नैव चिंतयति ॥ १ ॥ अतः किमनेन बहुशोचकरणेनेत्युत्तरं दत्तवान्. अथ बहुभिर्दिनैः कुमारः सोमां पुरीं प्राप, पुरुषोत्तमोऽपि समहोत्सवः सन्मुखमागतः, महताडंबरेण जामाता नगरमानीतः, शुभलग्ने च स रत्नवतीकरपीडनं करोतिस्म. पुरुषोत्तमेन बहुगजाश्वादियौतकं दत्तं. श्वसुरदत्तावासे स्थितोऽसौ रत्नवत्या वैषयिकं सुखमनुभवन्नेकदा रात्रौ रत्नवत्या पृष्टः, भो प्राणनाथ! सा कमलवती कीदृश्यभूत्? या गतापि भवतां चित्तं न मुंचति. अथ पुनर्मदुद्वाहार्थमागच्छंतोऽपि भवंतो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यया स्ववशीकृत्य पश्चाद्वालिताः, कुमारः प्राह हे प्रिये एतादृशी त्रिभुवने काचिन्नास्ति या तदुपमां प्राप्नोति; किं वर्ण्यते तदीयांगलावण्यं! तस्यां मृतायां यत्त्वं परिणीतासि तत्तु यथा दुर्भिक्षे गोधूमतंडुलादिसुधान्याऽप्राप्तौ कुत्सितकंगूरालकद्रयामाकादितृणधान्याऽशनेनापि जीवनं तथा त्वया साई विषयोपभोगः, यदुक्तं—हेलवीनं हीरे । रूमे रयणायरतणे ॥ फुटेर फटिकतणे । मणीए मन माने नहीं ॥ १ ॥ एतत् श्रुत्वा रत्नवती रोषातुरा प्राह, कीदृशं मया कृतं? तस्या दुष्टायाः शिक्षा दापिता, गंधमूषिका प्रेषिता, सर्वमप्येतन्मया कृतं, यादृशी सा तवेष्टाऽभूत् तादृशं मया कृतं. किं पुनः पुनर्दासवत्तदीयगुणान् जल्पसि?

एतत् श्रुत्वा कुमारो निःकलंकां कमलवतीमाकलय्य क्रोधातुरमना रक्तनयनो रत्नवतीं हस्ते गृहीत्वा चपेटया हत्वा निर्भर्त्स्य धिगधिग् त्वामसित्कर्मकारिणीं; ययाऽज्ञा दत्वा कुकर्म कारितं, त्वया स्वकीयो जीवो दुःखसमुद्रे क्षिप्तः, तस्याः स्त्रियः कुर्कुर्यापि वरं या भ्रष- ॥ २८ ॥ माणा अन्नप्रदानेन वशीभवति, न जल्पति. परं मानिनी बहुमानितापि स्वकीया न भवतीति कथयतिस्म. पुनः स चिंतयामास हा हा मदीया दयिता कमलवती मिथ्याकलंकचिता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यां पतिता, मरणं प्राप्ता भविष्यति, तर्हि ममाप्यनेन जीवनेन सृतमिति स्वसेवकानादिदेश, मदीयावासद्वारप्रदेशे महतीमेकां चितां रचयत? यथाहं कमलवतीविरहदुःखतो म्रिये, एवमुक्त्वा बलात्कारेण चिता कारिता. सैर्वार्यमाणोऽपि ज्वलितुं चलितः, एतत् श्रुत्वा राज्ञापि कूटकपटपेटिका मिथ्याकलंकदायिका अकार्यकारिका नरकगतिगामिनी गंधमूषिकानाम्नी बहुकदर्थ्यमाना विगलितमाना लब्धापमाना रासभारोहणादिप्रकारेण नगरान्निष्कासिता, स्त्रीत्वान्न मारिता.

अथ कुमारोऽपि बहुप्रकारं राजप्रधानसार्थवाहादिभिर्वार्यमाणोऽपि चितासमीपमागतो, राजादयश्चिंतयंति हाहा महानर्थो भविष्यति, स्त्रीवियोगेनैतादृक् पुरुषरत्नं मरिष्यति. कुमारं चितायां पतितुमुद्यतं ज्ञात्वा पुरुषोत्तमनृपो बटुकांतिकं गत्वा कथयति, भो देव त्वदीयं वाक्यं नायमुल्लंघयति, ततस्तथा विज्ञप्तिकां कुरु यथायमस्मात्पापान्निवर्त्तते, तदा बटुकः कुमारमाह भो भद्र उत्तमकुलोत्पन्नोऽपि त्वं किं नीचकुलोचितं कर्माचरसि? नैतद्घटते तव सदाचारस्य, यतोऽग्निप्रवेशादिनाऽनंतसंसारवृद्धिः, तत्रापि मोहातुरेण मरणं बहुदुःखदा- ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यि. अथ नो मित्र त्वया मम पूर्वमुक्तमासीत् यत्त्वां चक्रधरग्रामे समानेष्यामीति, तच्च तव वाक्यमन्यथा जायते, यन्मृतां कमलवतीमनुमर्त्तुमिच्छसि तदपि व्यर्थं, जीवः स्वकीयकर्मवशतः परभवं याति, चतुरशीतिलक्षाणि जीवानां योनयः संति, परमेका कर्मानुसारिणी गतिर्भवति. अतो यत्कार्यं क्रियते तत्पंडितेनागामिफलविपाकविचारणपूर्वकं विधेयं रभसवृत्त्याऽविमृष्टं विहितं कार्यमायत्यां शल्यवद्दुःखदायि भवति; ततो निवृत्तो भव तस्मात्साहसात्, यतो जीवन्नरो भद्राणि पश्यति. ततो मदीयवार्त्तां श्रुत्वा यदि स्वप्राणान् पालयिष्यसि तदा कदाचित्कमलवत्या अपि संयोगो भविष्यति. अथ यदि मूढत्वेन प्राणत्यागं करिष्यसि तदा तस्याः संगमो दुर्लभ एव. एतद्वटुकवाक्यश्रवणेन किंचित्संजातकमलवतीमिलनमनोरथः कुमारः कथयतिस्म, हे मित्र किं मदीया प्रिया त्वया दृष्टास्ति? किं वा जीवंती केनापि कथितास्ति? अथवा ज्ञानबलेन किमपि जानासि? सा मिलिष्यति वा न वेति, यत्त्वं ममाग्निप्रवेशेंतरायं करोषि तत्किं कारणं?

विप्रेणोक्तं नो कुमार त्वदीया कमलवती प्रिया विधातुः पार्श्वे वर्त्तते, ज्ञानेनाहं जाना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मि, ततो यदि भवान् कथयति तदा ममात्मानं विधातृपार्श्वे प्रेषयित्वा कमलवतीमत्रानयामि, तदा कुमारेणोक्तमत्रार्थे विलंबो न विधेयः, यदीदं सर्वं सत्यं भवति कमलवतीं च पश्यामि, तदायं ममावतारः कृतार्थः, तदा बटुकेनोक्तं भो सुंदर दक्षिणां विना किमपि मंत्रविद्यादि न सिद्ध्यति, तदा कुमारेणोक्तं भो मित्र! पूर्वं तव मया मनः समर्पितमस्ति, अधुना तु जीवोऽपि त्वदायत्तः, अतःपरं का दक्षिणा? बटुकेनोक्तं त्वदीयो जीवश्चिरायुः, अहं यदा यन्मार्गयामि तत्त्वया तदा समर्पणीयं, कुमारेणोक्तं मया वरो दत्तस्तत्करिष्यामि; किं बहु कथनेन? परं मम प्रियां सत्वरमानय? एवमुक्ते तेन संजीविनी नाम्नी जटिका सर्वेषां दर्शिता, जवनिकांतरस्थितो ध्यानं कर्तुं स्थितः, कुमारोऽपि प्रमोदमेदुरमनाः संजातः, राजादयोऽपि कमलवतीमवलोकयितुं सोत्साहाः संजाताः, महदाश्चर्यं भविष्यति यदियं मृतापि कमलवती जीवंती समागमिष्यतीति. महानयं ज्ञानी विप्र इति लोका अपि परस्परं प्रवृत्तिं कुर्वंति. तदवसरे तेन जटिका कर्णादूरतो मुक्ता, तावता कमलवती जाता; जवनिकातो निर्गता, कुमारेण हर्षोत्फुल्लनयनेन दृष्टा, सत्येयं मदीया कमलवतीप्रिया, ततः सा समागत्य ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वभर्तुः प्रणामं चकार. सर्वैरपि दृष्टा, तदीयं रूपलावण्यसौभाग्यादि दृष्ट्वा लोका अपि सविस्मयमाचख्युः, यथा स्वर्णांतिके पित्तलकं न शोभते तथैतस्याः कमलवत्याः पुरो रत्नवत्यपि न शोभते; युक्तमेतत्कुमारस्याप्येतदर्थमिदं साहसं. धन्योऽयं कुमारो, धन्येयं कमलवतीति स्तुतवंतो जनाः स्वस्थानं जग्मुः, कुमारोऽपि सहर्षं सपरिवारः समहोत्सवं कमलवतीं स्वावासमानयतिस्म; दिव्याभरणवस्त्रविभूषितया तया सह पंचविषयसुखोपभोगेन सार्थं जन्म मेने.

एकदा कुमारेणोक्तं भो सुलोचने कश्चिदेको विप्रस्तवाकारणार्थं विधातृपार्श्वे समागतः, स त्वया दृष्टो वा नवेति श्रुत्वा सविस्मयं कमलवती प्राह भो प्राणेश स एवाहं, सर्वोऽपि जटिकावदातो निवेदितः, श्रुत्वा चातीव स संतुष्टः । अथ कमलवत्या चिंतितमयं वल्लभो रत्नवतीं मनागपि नावलोकयति, अत्यंतनिःस्नेहो जातोऽस्ति, अतोऽयं ममैवाऽवर्णवादः प्रवर्त्स्यति, यद्यप्यनयाऽपराद्धं तथापि मया तन्निवारणीयं, यतः—कृतोपकारस्य प्रत्युपकारकरणे किमाश्चर्यं ? अपकारिण्यप्युपकारकरणं सत्पुरुषाणं; उक्तंच—उपकारिणि वीतमत्सरे वा । स- ॥ ३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दयत्वं यदि तत्कुतोऽतिरेकः ॥ अहिते सहसाऽपराधलुब्धे । सरलं यस्य मनः सतां स धुर्यः ॥ १ ॥ इति विचिंत्य कमलवत्या कुमारपार्श्वे वरो मार्गितः, कुमारेणोक्तं यदीप्सितं तद्वृणु? कमलवती प्रोवाच यदीप्सितमर्पयथ तदा रत्नवत्यामपि मयीव सस्नेहा भवथ? यदप्यनयाऽपराधः कृतस्तथापि क्षंतव्यमेव. यतो यूयमुत्तमकुलसमुद्भवाः; न घटते चैतत्कुलीनानां बहुकालक्रोधरक्षणं. यदुक्तं—

न भवति भवति च न चिरं । भवति चिरं चेत्फले विसंवदति ॥ कोपः सत्पुरुषाणां । तुल्यः स्नेहेन नीचानां ॥ १ ॥ स्त्रीणां हृदयं तु प्रायो निर्दयं भवति, यदुक्तं—अनृतं साहसं माया । मूर्खत्वमतिलोभता ॥ अशौचं निर्दयत्वं च । स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥ स्वकार्यतत्परा सती नीचमप्याचरते, इदं कमलवतीकथनतो रत्नवत्यपि कुमारेण सन्मानिता. अथ स कियद्दिनानि तत्र स्थित्वा पुरुषोत्तमनृपाज्ञामादाय कनकपुरं प्रति चलितः, पित्रा बहुदासीदासालंकृतिवस्त्रादि समर्पयित्वा स्वपुत्री संप्रेषिता. कुमारस्यापि बहुहस्त्यश्वरथपदातिस्वर्णमुक्ताफलादि समर्पितं. रणसिंहो रत्नवतीमादाय कमलवत्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साईं शुभदिवसे चलितः, पाडलीखंडपुरसमीपं चागतः, तत्र ज्ञातसकलपुत्रीस्वरूपेण कमलसेनराज्ञा सन्मुखमागत्य समहोत्सवं जामाता गृहमानीतः, कमलवती बहु सन्मानिता प्रशंसिता च पुरलोकैः, जनन्यापि सस्नेहमालिंगिता स्वपुत्री. बहुदिनानि तत्र स्थित्वा कुमारः कनकपुरंप्रति चलितः, कनकशेखरोऽपि कुमारागमनं श्रुत्वा सानंदः सन्मुखमागतः, सविस्मयं मिलितः कुमारो नगरप्रवेशं कारितः, तदवसरे बहवो लोकाः पौरस्त्रियो निरीक्षितुमागताः सानंदाः परस्परमेवं वदंति पश्यतैनां कमलवतीं या शीलप्रभावेण यमसमीपं गतापि यममुखे धूलिं दत्वा पुनरत्रागता, यकुणरंजितो रणसिंहोऽपि मरणमंगीकृतवान्न. धन्येयं सतीमुख्या कमलवतीति प्रशंसां शृण्वन् स स्वावासमागतः, तिसृन्निर्वामलोचनान्निर्दोगुंदकसुर इव विषयसुखं बुभुजे. अथैकदा विजयपुरनगरसमीपवर्त्तिनि श्रीपार्श्वप्रभुप्रासादे समागत्याष्टाह्निकामहः कुमारेण कृतः; तदा चिंतामणियक्षः प्रत्यक्षीभूयोवाच वत्स गच्छ स्वकीयपितृराज्यमुपभुंक्ष्वेति.

एतद्यक्षवाक्यं श्रुत्वा महता दलेन स विजयपुरमागतः, तदा स्वल्पसैन्यो राजा दुर्गम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ध्ये एव स्थितो, न तु बहिर्निर्गतो, नगरं च न मुंचति, तदा यक्षेण कुमारसेनाकाशे समवतरंती दर्शिता, तां दृष्ट्वा नगरं मुक्त्वा स नष्टः, पश्चात्कुमारेण नगरप्रवेशः कृतः, सर्वैरपि प्रधानपुरुषैः कुमारो विजयसेनपट्टे स्थापितः, रणसिंहनामा राजा जातः, सज्जनान् सन्मानयति, दुर्जनांस्तर्जयति रामचंद्रवन्नीतिकारकः स्वकीयं राज्यं पालयति. एतदवसरे समीपवर्त्तिग्रामात्कश्चिदर्जुननामा कौटुंबिको नगरमागच्छन् मार्गे क्षुत्तृषातुरः स्वामिशून्यमेकं चिर्भटीक्षेत्रं दृष्ट्वा, तत्र द्विगुणं मूल्यं मुक्त्वा एकं चिर्भटकं लात्वा वस्त्रेणावेष्टय कटौ बध्ध्वा यावन्नगरमायाति तावत्कस्यचित् श्रेष्टिसुतस्य कोऽपि विनाशं कृत्वा मस्तकं गृहीत्वा गतः, तच्छुद्ध्यर्थं दुर्गपालसेवका इतस्ततो भ्रमंति, तदवसरेऽर्जुनो दृष्टः, पृष्टं किमिदं तव कटौ, तेनोक्तं चिर्भटकं, राजसेवकैरवलोकितं मस्तकं दृष्टं, चौरवत्पश्चाद्बध्ध्वा प्रधाननिकटमानीतः, प्रधानेनोक्तं धिक् किमाचरितमिदं? बालमारणं दुर्गतिकारणं; तेनोक्तं नाहं किमपि जानामि. स्वामिन् ' घडइघडित्ति ' एतदुत्तरं दत्तवान्. तदा राज्ञः पार्श्वे समानीतः, राजा प्रोवाच कथमिदं कृतं तेनापि तथैव ' घडइघडित्ति ' इत्युत्तरं दत्तं. राज्ञोक्तं रे मूर्ख किं पुनः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुनः ' घरुइघडित्ति ' इति वदसि ? परमार्थं कथय ? अर्जुनेनोक्तं भो स्वामिन् एतदवस्थायां परमार्थकथनेऽपि कः सत्यं मानयिष्यति ? को जनाति पुनर्मदीयकर्मणा किं भविष्यति तदहं न जानामि. तदा दुर्गपालपुरुषैरुक्तं भो स्वामिन् कोऽपि महाधृष्टो विलोक्यते, यदेतस्योत्संगतः प्रत्यक्षमेवेदं मस्तकमस्माभिर्निष्कासितं तथापि सत्यं न जल्पति. ' घरुइघडित्ति ' इत्युत्तरं ददाति. राज्ञापि रोषवशेन शूलिकायामेनं प्रक्षेपयतेत्यादेशो दत्तः, सेवका अपि तं गृहीत्वा शूलिकापार्श्वे समागताः.

एतस्मिन्नवसरे कश्चिदेको विकरालरूपधारी पुरुषः समागत्य वदतिस्म अरे पुरुषा यद्येनं हनिष्यथ तर्हि सर्वानहं हनिष्यामि; इत्युक्ते तेन सार्द्धं संग्रामो जातः, सर्वेऽपि हक्किता नष्टा राजांतिकमागताः, तत् श्रुत्वा स्वयं नृपो योद्धुमुद्यतो निर्जगाम. तदा तेनैकक्रोशप्रमाणं शरीरं विकुर्वितं, राज्ञा चिंतितं नायं मनुष्यः, कोऽपि यक्षराक्षसादिजातीयो विलोक्यते. धूपोत्क्षेपादिपुर्वकं क्षमस्वापराधमित्यभिवंदितः स प्रत्यक्षीभूय शरीरं लघु कृत्वा वदतिस्म- भो राजन् अहं दुःखमाकालनामा, लोका मां कलिरिति कथयंति; अधुना भरतक्षेत्रे मम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राज्यं प्रवर्त्तितमस्ति; श्रीमद्वीरनिर्वाणात्साद्धाष्टमाससहितैस्त्रिभिर्वर्षैर्मम राज्यं प्रवर्त्तितं, अतो मम राज्ये कथमनेन कृषीवलेनैतादृशोऽन्यायः कृतो यत् शून्यक्षेत्रे द्विगुणं मूल्यं मुक्त्वा चिर्भटकं गृहीतमतोऽयमचौरः प्रत्यक्षेण मयाप्येतस्य शिक्षा दत्ता यच्चिर्भटकस्य मस्तकं दर्शितं, अतः प्रभृति यः कोऽप्येतादृशमन्यायं करिष्यति तमपि कष्टे पातयिष्यामि. तावत् श्रेष्ठिसुतोऽपि सजीवो जातः, राज्ञः समीपमागतः, समाहूय स्वांके स्थापितः; अर्जुनस्य बहु सन्मानं दत्तं, पश्चात्कलिपुरुषेण सर्वं स्वमाहात्म्यं कथितं, राजन् मदीयराज्यमध्ये कथं न्यायधर्मं पालयसि? अहं त्वां न्यायधर्माचरणनिमित्तेन दुःखिनं करिष्यामीति कथनेन राजा गलितः, पश्चात्कलिरदृश्यो बभूव. सर्वेऽपि स्वस्थानं गताः, अर्जुनोऽपि स्वस्थानं गतः, राजापि दुर्नीतिदृष्ट्या न्यायधर्मं मुक्त्वाऽन्यायाचरणतत्परो बभूव. लोकैर्विचारितं राज्ञः किं संजातं? यदेतादृशमन्यायं करोति, न कोऽपि वारयितुं समर्थः। तदवसरे तादृशं स्वप्नागिनेयं रणसिंहनृपं दृष्ट्वा प्रतिबोधयितुं श्रीजिनदासगणिनस्तत्रोपवने समवसृताः, नृपोऽपि सपरिवारो वंदनार्थमागतो विनयपूर्वकमभिवंद्य करौ मुत्कलीकृत्याग्रतः स्थितः, गुरुभिरपि सकल- ॥ ३७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्लेशनाशिनी देशना प्रारब्धा, भो राजन् कलिरूपं दृष्ट्वा त्वदीयं मनश्चलितं, परमस्मिन्नसारे संसारे पुण्यपापनिमित्तानि सुखदुःखानि. यदुक्तं—कर्मोदयाद्भवगति—र्भगवतिमूला शरीर-निवृत्तिः ॥ तस्मादिंद्रियविषया । विषयनिमित्ते च सुखदुःखे ॥१॥ प्राणातिपातादीनि पंचाश्रवद्वाराणि समाचरन्नयं जीवो नितांतं पापकर्मणा लिप्यते; भवसमुद्रे निमज्जति, हिंसाद्याश्रववर्जनं विना कुतो धर्मः? यदुक्तं—

लक्ष्म्या गार्हस्थ्यमक्षणा मुखममृतरुचिः श्यामयांभोरुहाक्षी । भर्त्रा न्यायेन राज्यं वितरणकलया श्रीर्नृपो विक्रमेण ॥ नीरोगत्वेन कायः कुलममलतया निर्मदत्वेन विद्या । निर्दंभत्वेन मैत्री किमपि करुणया भाति धर्मोऽन्यथा न ॥ १ ॥ अतःकारणादाश्रवो भवहेतुरेव, संवर एव निवृत्तेरसाधारणकारणमिति सिद्धांतः, ततो हे वत्स तवायं सज्जनस्वभावोऽपि कलिपुरुषछलेन विपरीतो जातः, परं न युक्तं दुर्जनत्वं यदुक्तं—वरं क्षिप्तः पाणिः कुपितफणिनो वक्त्रकुहरे । वरं झंपापातो ज्वलदनलकुंडे विरचितः ॥ वरं प्रासप्रांतः सपदि जठरांतर्विनिहितो । न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषा ॥ १ ॥ कलिपुरुषकथनेन त्वं पाप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मतिं धारयसि, परं न विचारयसि यत्किं दुःखमाकालरूपः कलिर्जल्पति? अयं कोऽपि दुष्टदेवाद्युपद्रवो दृश्यते, तेन त्वं छलितोऽसि. अपि च कलिपुरुषोपदेशेन समाचरितानि हिंसादिकर्माणि किं नरकगतिं न नयंति? किं कलौ विषन्नक्षणेन न म्रियते? यादृशं समाचरति तादृक् तत्फलं कलावप्यवाप्यते. एतादृक् श्रीजिनदासगणिवचनं श्रुत्वा चक्षुर्विकस्वरं विधाय स न्यग्वदनो बभूव. तदा श्रीजिनदासगणिनोक्तं हे वत्स त्वत्पितृवाक्यं श्रुत्वा प्रतिबोधमवाप्नुहि? कलिपुरुषदर्शनहेतुकं तव स्खलनस्वरूपमवधिज्ञानेन पूर्वमेव विज्ञाय श्रीधर्मदासगणिनाम्ना त्वत्पित्रा त्वत्प्रतिबोधनार्थमुपदेशमाला कृतास्ति, सा श्रोतव्या. यतः—' जं आणवेइ राया ' यदाज्ञापयति राजा, तद्वाक्यं प्रकृतयः सामान्यपौरलोकाश्च शिरसा मस्तकेन वांछंति, तद्वद्गुरुवाक्यमपि योजितकरकमलेनैव श्रोतव्यं. यतः—' अब्भिगमणवंदणनमंसणेण० ' साधूनां सन्मुखं गमनं, वंदनं, नमस्कारकरणं, समाधिपृच्छनं, एतैः कृत्वा चिरकालं संचितमपि पापकर्मैकस्मिन् क्षणे क्षयं याति.

अथान्यदपि—' नवसयसहस्सदुलहो ' नवानां शतसहस्राणि लक्षाणि तेषु दुर्लभे दुः-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रापे जातिर्जन्म, जरा वयोहानिर्मरणं प्राणवियोगस्तद्रूपो यः समुद्रस्तं नुत्तारयति यस्तस्मिन्नेतादृशे जिनवचने हे वत्स गुणानामाकर क्षणमपि प्रमादो न कार्यः, एवं यावत्कथयति, तदवसरे विजयानाम्नी साध्वी रणसिंहनृपजननी, सापि तत्रागता, तयाप्युक्तं हे वत्स तव जनकेन श्रीधर्मदासगणिना त्वदर्थमियमुपदेशमाला कृतास्ति, तां प्रथमतोऽधीष्व? तदर्थं ज्ञापय? विज्ञाप्य चाऽन्यायधर्मं विमुच्य प्रधानमोक्षसुखमुपार्जय? स्वकीयपितुरादेशं कुरु? एतन्मातृवचनं श्रुत्वा रणसिंहेन तदध्ययनं प्रतिपन्नं. प्रथमतः श्रीजिनदासगणयः कथयंति, तदनु नृपोऽपि तादृशमेव कथयति; एवं द्वित्रिवारं गणनेन संपूर्णापि तेन तत्कालमधीतोपदेशमाला, तदर्थं चेतसि विचारयन् ज्ञावितात्मा संजातो वैराग्यमापन्नश्चिंतयति धिग्मां किमाचरितं मयाऽज्ञानवशेन, धन्योऽयं मम पिता, येन मदुद्धारार्थमवधिज्ञानेनागामिस्वरूपं विज्ञाय प्रथमत एवायं ग्रंथो निर्मितः, तदलमनेन विद्युत्पातचंचलेन विषयसुखेन. यतः— चला लक्ष्मीश्चलाः प्राणा—श्चलं चंचलयौवनं ॥ चलाऽचलेऽस्मिन् संसारे। धर्म एको हि निश्चलः ॥ १ ॥ इति विचार्य गृहमागतो न्यायधर्मं पालयन् कियता कालेन कमलवतीपुत्रं

॥ ४० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राज्येऽधिरोप्य श्रीमुनिचंद्रांतिके चारित्रं गृहीतवान्. शुद्धचरणाराधनेनाऽकलंकं कालं कृत्वा देवत्वे समुत्पन्नः, पश्चात्कमलवतीपुत्रेणापीयमुपदेशमाला पठिता, सर्वलोकैरपि परस्परं पठिता च, इयमनुक्रमेण पठ्यमाना पाठ्यमाना चाद्ययावद्विजयते. इदमुपदेशमालाप्रकरणं स्वपुत्रप्रतिबोधार्थमिदं विरचितं श्रीधर्मदासगणिना, अन्यैरपि सकर्णैरेतद्धस्यं सम्यगवधारणीयमित्यादौ वृद्धोक्तः संप्रदायः समुपदार्शितः, अधुना तु ' नमिऊण जिणवरिंदे ' इत्यादि सूत्रार्थः प्रस्तूयते.

इत्युपदेशमालायां प्रथमो रणसिंहनृपस्य मूलसंबंधः ॥ इत्युपदेशमालायां प्रथमपीठिका समाप्ता ॥ श्रीरस्तु ॥

नत्वा विभुं सकलकामितदानदक्षं । शंखेश्वरं जिनवरं जनतासुपक्षं ॥
कुर्वे सुबोधितपदामुपदेशमालां । बालावबोधकरणक्षमटिप्पनेन ॥ १ ॥

॥ मूलम् ॥—नमिऊण जिणवरिंदे । इंदनरिंदच्चिए तिलोअगुरु ॥ नवएसमालमिणमो । वुच्चामि गुरूवएसेणं ॥ १ ॥ व्याख्या—' नमिऊण ' इति—नमिऊणशब्देन नमस्कारं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृत्वा, कान् जिनवरेंद्रान् तीर्थंकरान्, इंद्रैर्देवेंद्रैर्नरेंद्रैः राजभिरर्चितान् पूजितान्, पुनः कथंभूतान्? त्रिलोकस्य त्रिभुवनस्य गुरून् हितोपदेशकान्, एतादृशान् जिनवरेंद्रान् अहं धर्मदासगणिक्षमाश्रमणः, 'इणमोइति' इमां नपदेशमालामुपदेशानां श्रेणिं वृत्तामिशब्देन कथयिष्यामि, केन कृत्वा? गुरूपदेशेन गुरूणां श्रीतीर्थंकरगणधरादीनामुपदेशेन, न तु स्वकीयबुद्ध्या, एतेन ग्रंथस्यात्तता ॥ १ ॥ द्वितीयगाथायामपि मंगलाचरणं करोति—

॥ मूलम् ॥—जगचूडामणिभूनं । नसन्नो वीरो तिलोअसिरतिलनं ॥ एगो लोगाइच्चो । एगो चक्खू तिहुअणजणस्स ॥ २ ॥ व्याख्या—'जग इति' जगन्मध्ये चूडामणिभूतो मुकुटसदृशः, एतादृशः श्रीऋषभदेवश्चतुर्विंशतितमः श्रीवीरस्वामी, स कीदृशः? त्रिलोकस्य त्रिभुवनस्य शिरसि मस्तके तिलकसदृशः, यथा तिलकेन मुखं शोभते इत्यर्थः, द्वयोस्तीर्थंकरयोर्मध्ये एकः श्रीऋषभदेवो लोकादित्यो लोकमध्ये सूर्यतुल्यः सकलमार्गदर्शकत्वात्. एकोऽन्यः श्रीवीरस्वामी त्रिभुवनस्य चक्षूरूपो नेत्रतुल्यः, केषां? जनानां ज्ञाननेत्रदायकत्वात् ।२।

॥ मूलम् ॥—संवच्छरमुसभजिणो । छम्मासा वद्धमाणजिणचंदो ॥ इअ विहरिया नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रसणा । जइज्ज एत्तवमाणेणं ॥ ३ ॥ व्याख्या—' संवच्छरेत्ति ' संवत्सरं वर्षं यावद् ऋषभो जिनः श्रीप्रथमतीर्थंकरः, षण्मासान् यावत् श्रीवर्द्धमानजिनचंद्रो वर्द्धमानाभिधानस्तीर्थंकरः, सर्वगुणैः प्रधानत्वाज्जिनचंद इति पदं दत्तं. अनया रीत्या एतौ द्वावपि तीर्थंकरौ ' विहरिया ' इति विहृतौ पर्यटितौ, निरशनौ भोजनरहितौ उपोषिताविति यावत्. शिष्यं प्रत्युपदेशमाह—' जइज्जएत्ति ' यतेत तत्र कर्मणि यत्नं कुर्यात्, भगवद्दृष्टांतेन वीरवदन्येनापि तपः कर्त्तव्यं ॥ ३ ॥

॥ मूलम् ॥—जइ ता तिलोअनाहो । विसहइ बहुहाइं असरिसजणस्स ॥ इअ जीयंतकराइं । एस खमा सव्वसाहूणं ॥४॥ व्याख्या—' जइताइति ' यदि तावत्प्रथमं त्रिलोकनाथस्त्रिभुवनस्वामी 'विसहइ इति' क्षमते सहते, 'बहुहाइं इति ' बहूनि प्रचुराणि ' असरिसजणस्सेत्ति' नीचजनस्य संबंधीनि दुष्टचेष्टितानि येन भगवता क्षांतानि, कीदृशानि? जीवितस्यांतो विनाशस्तत्करणशीलानि, एतादृशानि संगमादिसुरकृतानि. एषा क्षमा सर्वसाधूनां विधेया भगवदनुष्ठानं हृदि निधाय सर्वसाधुभिरपि प्राकृतजनकृतं ताडनादिकं सहनीयमित्यर्थः.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—न चइज्जइ चालेउं । महइ महावद्धमाणजिणचंदो ॥ उवसग्गसहस्सेहिंवि । मेरु जहा वायगुंजाहिं ॥ ५ ॥ व्याख्या—' न चइज्जइ इति ' न शक्यते चालयितुं, कंपयितुं ध्यानात्क्षोभयितुं, अत एव वीर इति नाम सुरैर्दत्तं. ' महइति ' महति मोक्षे कृतमतिर्महानेतादृशः श्रीवर्द्धमानजिनचंद्रो ध्यानात्केनापि न चालित इत्यर्थः, कैर्न चालित इत्याशंक्याह—उपसर्गाणां नरामरविहितानां कदर्थनानां सहस्रैरपि यः प्रभुश्चालयितुं नाऽशक्यत, तद्वदन्येनापि साधुना प्राणांतकारिणि उपसर्गे जायमानेऽपि ध्यानान्न चलितव्यमित्युपदेश इत्यर्थः, क इव मेरुरिव, यथा मेरुनामा पर्वतो वायुगुंजाभिः सशब्दप्रबलवायुसमूहैरपि चालयितुं न शक्यते तद्वद्वीर इत्यर्थः ॥ ५ ॥ अधुना गणधरदृष्टांतेन शिष्याणां विनयोपदेशमाह—

॥ मूलम् ॥—भद्दो विणीयविणउ । पढमगणहरो समत्तसुअनाणी ॥ जाणंतोवि तमत्थं । विम्हिअहिअउ सुणइ सव्वं ॥ ६ ॥ व्याख्या—' भद्दो इति ' भद्रः कल्याणकारी मंगलरूप इत्यर्थः, विशेषेण नीतः प्राप्तो विनयो येन एतादृशः कः ? प्रथमगणधरः श्रीगौतमस्वा- ॥ ४४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिनामा मुख्यगणधारी, कथं भूतः ? समाप्तं पारं प्राप्तं श्रुतज्ञानं यस्य सर्वशास्त्रपारंगामी, अर्थात् श्रुतकेवलीत्यर्थः एतादृशोऽपि प्रथमगणधरः, ' जाणंतोवि ' सकलभावं जानन्नपि, तं पूर्वं पृष्टमर्थं भगवता च पश्चात्कथ्यमानं विस्मितहृदयः सन् कौतुकोत्फुल्ललोचनः सन्निति भावः, ' सुणइ इति ' शृणोति सर्वमप्यर्थमिति भावः, गौतम इवान्येनापि विनयेन पृष्टव्यं श्रोतव्यं चेत्यर्थः ॥ ६ ॥ विनये लौकिकदृष्टांतं दर्शयति—

॥ मूलम् ॥—जं आणवेइ राया । पगइउ तं सिरेण इच्छंति ॥ इअ गुरुजणमुहभणिअं । कयंजलिउडेहिं सोयव्वं ॥ ७ ॥ व्याख्या—' जं इति ' यत्कार्यं ' आणवेइ इति ' आज्ञापयति कथयति राजा सप्तांगस्वामी, प्रकृतयस्तदनुचरलोकाः सेवकास्तत्कार्यं शिरसा मस्तकेन कर्तुमिच्छंति, करकमलयोजनेन तत्कार्यं प्रमाणीकुर्वंतीत्यर्थः, इति राजदृष्टांतेन गुरुजनमुखेन यद्भणितमुक्तं यद्गुरुभिरादिष्टं शास्त्रे सदुपदेशादिकं कृत्यजातं तद्विनयेन श्रोतव्यं कृतांजलिपुटैः, भक्तिगुणेन योजितकरसंपुटैरेवंभूतैर्विनयैस्तद्वचः श्रोतव्यं, एतेन शिष्याणां विनय एव प्रधान इत्युपदेशः ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जह सुरगणाण इंदो । गहगणतारगणाण जह चंदो ॥ जह य पयाण नरिंदो । गणस्सवि गुरु तहाणंदो ॥ ८ ॥ व्याख्या—' जह इति ' यथेति दृष्टांते, सुरगणानां देवसमूहानां मध्ये इंद्रः श्रेष्टः, सर्वेषां देवानां मध्ये यथेंद्रः श्रेष्टः, ' जह इति ' यथा ग्रहा मंगलादयोऽष्टाशीतिसंख्याः, गणा अश्वीन्यादीनि नक्षत्राणि, ताराः कोटाकोटीसंख्यास्तासां गणः समूहस्तन्मध्ये यथा चंद्रः स्वामी, सर्वेषां च ज्योतिषां मध्ये यथा चंद्रोऽधिकतरः ' जहय ' शब्देन यथा च ' पयाणत्ति ' प्रजानां लोकानां मध्ये नरेंद्रो, यथाऽाज्ञापकनृपाज्ञां सर्वेऽपि कुर्वंतीत्यर्थः, ' तह ' शब्देन तथा गणस्यापि साधुसमूहस्यापि मध्ये गुरुराचार्यः, कथंभूत आचार्यः? आनंदयतीत्यानंद आह्लादकारीत्यर्थः ॥८॥ पुनरपि गुरुं वर्णयति—

॥ मूलम् ॥—बालुत्ति महीपालो । न पया परिभवइ एस गुरुभवमा ॥ जंवा पुरुकाउं । विहरंति मुणी तहा सोवि ॥ ए ॥ व्याख्या—' बालुत्ति ' बालुत्ति बालक इति बुद्ध्या यथा महीपालः पृथ्वीपालो बालकस्तथापि प्रजालोकस्तं राजानं न पराभवति, न तिरस्करोति, बालकोपि राजा प्रजानां मान्यो भवति. ' एस इति ' एषा गुरोराचार्यस्योपमा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देया, वयसा बालोऽपि गुरुः शिष्येण नावगणनीय इत्यर्थः, वयःपर्यायान्यां हीनमपि गीतार्थं प्रदीपकल्पं ' पुरउ काउं इति ' पुरतः कृत्वा तं गीतार्थं गुरुत्वेन गृहीत्वेत्यर्थः, मुनयो निःस्पृहाः साधवो विहरंति विहारं कुर्वंति, एवं प्रकृत्यादिभिर्नृप इव गीतार्थो मुनिभिर्माननीयः, गुरुस्तु विशेषेण मान्यः ॥ ९ ॥ अधुना गुरोः स्वरूपमाह—

॥ मूलम् ॥—पडिरूवो तेयस्सी । जुगप्पहाणागमो महुरवक्को ॥ गंभीरो धिइमंतो । उवएसपरो अ आयरिउ ॥ १० ॥ व्याख्या—' पडिरूवो इति ' प्रतिरूपस्तीर्थंकरादीनां प्रतिबिंबाकारः, पुनः कथंभूतो गुरुः ? तेजस्वी दीप्तिमान्, पुनः कथंभूतः ? मधुरवाक्यः पेशलवचनः, पुनः कथंभूतो गंभीरोऽतुच्छः परैरज्ञातहृदयः, पुनः कथंभूतः ? धृतिमान् संतोषवान् निःप्रकंपचित्तः, पुनः कथंभूतः ? उपदेशपरः सद्वचनैर्मार्गप्रवर्त्तकः, भव्यानामुपदेशदाने तत्परः, एतादृशः ' आयरिउत्ति ' आचार्यो भवतीत्यर्थः ॥ १० ॥

॥ मूलम् ॥—अपरिसावी सोमो । संगहसीलो अभिग्गहमइय ॥ अविकत्थणो अचवलो । पसंतहियउ गुरू होइ ॥ ११ ॥ व्याख्या—' अपरीसावी इति ' पुनः कथंभूतः ? अप्रति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रावी निश्छिद्रशैलभाजनवत्परकथितात्मगुह्यलक्षणं जलं न श्रवति यस्य हृदयात्, परगुह्यमन्यस्मै न प्रकाशयतीत्यर्थः, सौम्यो दर्शनमात्रेणैवाह्लादकारी, वाचा तु विशेषेणेत्यर्थः, शिष्यादिहेतवे वस्त्रपात्रपुस्तकादिसंग्रहतत्परः, धर्मवृद्धिहेतवे, न तु लौल्येन; द्रव्यक्षेत्रकालभावाख्यचतुर्विधेष्वभिग्रहेषु मतिं रक्षति, अभिग्रहस्यापि तपोरूपत्वात्. अविकत्थनो न बहु भाषते, स्वकीयां प्रशंसां न करोति वा, अचपलः स्थिरस्वभावः, न तु चंचलपरिणाम इत्यर्थः, प्रशांतहृदयः क्रोधादिभिरस्पृष्टचित्तः शांतमूर्त्तिरित्यर्थः, एवंभूतो गुरुगुणैर्विराजमानो गुरुर्भवति. एतादृशो गुरुर्विशेषेण माननीयः ॥ ११ ॥

॥ मूलम् ॥—कइयावि जिणवरिंदा । पत्ता अयरामरं पहं दाउं ॥ आयरिएहिं पवयणं । धारिज्जइ संपयं सयलं ॥ १२ ॥ व्याख्या—कदाचिदपि कस्मिन्नपि काले जिनवरेंद्रास्तीर्थंकराः प्रवचने मर्यादाविधायिन इत्यर्थः, पथं ज्ञानदर्शनचारित्ररूपं मार्गं ' दाउं इति ' भव्येभ्यो दत्वा अजरामरं जरामरणरहितं अर्थान्मोक्षं प्राप्ता भवंति. तदा तीर्थंकरविरहे आचार्यैः प्रवचनं तीर्थं चतुर्वर्णसंघरूपं द्वादशांगीश्रुतरूपं वा ' धारिज्जइ इति ' धार्यते, अव्यु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ञ्चित्या स्मर्यते, संप्रति तीर्थंकरविरहेण सकलं प्रवचनमाचार्ये तिष्ठति, तीर्थंकराऽभावे आचार्या एव प्रवर्त्तका इत्यर्थः ॥ १२ ॥ अधुना साध्वीनां विनयोपदेशमाह—

॥ मूलम् ॥—अणुगम्मइ भगवई । रायसु अज्जा सहस्सविंदेहिं ॥ तहवि न करेइ माणं । परियच्चइ तं तहा नूणं ॥ १३ ॥ व्याख्या—' अणुगम्मइ इति ' अनुगम्यते, भक्तिसेवार्थं यां लोकाः पश्चाद्गमंतीत्यर्थः, अनुगता वृंदसहस्रैः, समूहसहस्रैः, लोकभाषया ' सहसगमे टोलें परवरी ' तहवि तथापि साऽार्यचंदना मानं न करोति, गर्वं न विदधाति, एतादृशी पूज्यापि गर्वं न करोतीत्याश्चर्यमित्यर्थः ' परियच्चइत्ति ' पर्यवस्यति जानाति तत्तथा नूनं निश्चितं यत्रेदं ज्ञानदर्शनचारित्रादिगुणानां माहात्म्यं, परं मम माहात्म्यं नेति सा गर्वं न करोति, तद्वदन्यान्निरपि गर्वो न कर्त्तव्य इत्युपदेशः ॥ १३ ॥

॥ मूलम् ॥—दिणदिक्खियस्स इमगस्स । अन्निमुहा अज्जचंदणा अज्जा ॥ नेच्छइ आसणगहणं । सो विणउ सव्व अज्जाणं ॥ १४ ॥ व्याख्या—' दिणदिक्खियस्स इति ' दिनदिक्षितस्यापि तद्दिवसप्रव्रजितस्यापि इमकस्य भिक्षोः साधुवेषं धृत्वा समीपे समागतस्येत्यर्थः, ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अभिमुखं सन्मुखं स्थितेति यावत्. आर्यचंदनाभिधाना साध्वी एकदिवसप्रव्रजितस्यापि भिक्षोः सन्मुखमागता, तथा साधौ सन्मुखं स्थिते आसनग्रहणमपि न वांछति, आसने न स्थितेत्यर्थः, एतादृशो विनयः सर्वसाध्वीनामपि कथितः, अयं साध्वीनां विनयोपदेशः ॥ १४ ॥

अथात्र कथानकं लिख्यते—

जंबूद्वीपे भरतक्षेत्रे कौशांबीनाम्नी पुरी ऋद्धिपूर्णा जनाकीर्णा च वर्त्तते. एकस्मिन्नवसरे आर्यचंदनाभिधाना भगवतो वर्द्धमानस्य प्रथमांतेवासिनी बहुसाध्वीपरिवृता श्रावकलोकपूजिता धर्ममूर्त्तिराजसामंतश्रेष्टिपौरजनैरभिवंदिता, एतादृशी कौशांबीनगरीचतुष्पथमध्ये महता लोकसमूहेन सार्द्धं गच्छति, तस्मिन्नवसरे काकंदीपुरात्कोऽपि दरिद्री तत्र समागतः, सोऽतीवदुर्बलो मलिनमूर्त्तिः, मक्षिकाकोटयो यस्य मुखे लग्नाः संति, भग्नं भांडं करे कृत्वा स गृहे गृहे भिक्षार्थं पर्यटति, तेन क्रमेण मार्गे व्रजंती आर्यचंदना दृष्टा, तस्य विस्मयो जातः, किमिदं कौतुकं वर्त्तते! किमर्थं बहवो लोका मिलिताः संति, इति बुद्ध्या कौतुकदर्शनार्थं स साध्वीसमीपमागतः, तदा मस्तके लुंचितकेशा गताभिनिवेशा पवित्रितभूप्रदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शा शांतमूर्त्तिरेतादृशी आर्यचंदना साध्वी तेन दृष्टा. तां बहुसाध्वीपरिकरितां बहुराजलोकवंदितां च दृष्ट्वा स मनसि सकुतूहलो जातः, कंचन पार्श्ववर्त्तिनं वृद्धपुरुषं पृच्छतिस्म. इयं का वर्त्तते? क्व च गच्छति? तदा वृद्धपुरुषेणोक्तं त्वं सावधानमनाः शृणु? चंपायां नगर्यां दधिवाहनो राजा, तस्येयं पुत्री वसुमतीनाम्नी अतीवरूपलावण्यादिगुणोपेता शीलालंकृता मातृपित्रोः प्राणतोऽप्यतीव वल्लभा.

एकस्मिन्नवसरे केनापि कारणेन दधिवाहनस्य कौशांबीपुरस्वामिना शतानिकनृपेण साई कलहो जातः, शतानिको महता दलेन चंपाया नृपर्यागतः, दधिवाहनोऽपि सपरिवारो दलं मेलयित्वा सन्मुखं चटितः, महति युद्धे जायमाने बहवो लोकाः क्षयमापन्नाः, दधिवाहनो नग्नः, सैन्यमपि नष्टं, परानीकैर्निर्नीकैर्गतनाथा कामिनीव चंपापुरी नृद्धूसिता, राज्ञोंतःपुरमप्युद्धूसितं, तस्मिन्नवसरेंतःपुरान्निर्गच्छंती नयचंचलनेत्रा यूथभ्रष्टा कुरंगीवेतस्ततः पलायंती राजकन्या वसुमतीनाम्नी केनापि पुरुषेण गृहीता; सैन्यं पश्चाद्धलितं, वसुमत्यपि कौशांब्यां बंदिमध्ये समागता, चतुष्पथमध्ये विक्रयार्थं समानीता, तस्मिन्नवसरे कौशांबीपुर- ॥ ५१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वासिना धनावहश्रेष्ठिना मूल्यं दत्वा वसुमती गृहीता, तां दृष्ट्वाऽतीवहर्षितो जातः, पुत्रीत्वेन च प्रतिपद्य तां गृहीत्वा स्वगृहमागतः, श्रेष्ठिनश्चरणक्षालनावसरे वसुमत्या वेणीपाशो भूमौ निपतन् श्रेष्ठिनोऽध्वं स्थापितः, तदवसरे तद्भार्यया मूलानाम्न्या मनसि चिंतितं, एषाऽतीवरूपवती सौभाग्यादिगुणोपेतास्ति, एतस्या रूपमोहितो मदीयो भर्त्ता मामवगणिष्यतीति तया चिंतितं. अत इमां कदर्थयित्वा गृहान्निष्कासयामि तदा वरमिति विचार्यैकस्मिन्नवसरे श्रेष्ठिनि कस्मैचित्कार्याय गते सति गृहस्थितया मूलया वसुमती मुंडितकेशा निगडबद्धचरणा निविडतरबद्धहस्ता कृता, कस्मिंश्चिदपि गुप्तेऽपवरके च क्षिप्ता. श्रेष्ठिना गृहमागतेन भार्यायै पृष्टं क्व गता वसुमतीति. तयोक्तमहं न जानामि, कुत्रापि गता भविष्यतीति. एवं त्रयो दिवसा जाताः.

चतुर्थे दिवसे केनापि प्रातिवेश्मिकेन श्रेष्ठिने निवेदितं वसुमती क्व गता? तद्दुःखदुःखितेन श्रेष्ठिनोक्तमहं न जानामि कुत्रापि गता, तदा तेनोक्तं भवदीयभार्यया ताड्यमानाऽक्रोशं कुर्वंती अपवरके क्षिप्यमाणा अद्यदिवसाग्रते चतुर्थेऽह्नि दृष्टा, अतो गृहं विलोकयत?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रेष्ठिना गृहं विलोकितं, सा निर्गता; निगडबद्धचरणा मुंडितकेशपाशाऽतीवक्षुधातुरा दृष्टा. श्रेष्ठी दुःखितश्चिंतयति अहो! स्त्रीणां दुश्चित्तत्वं कोऽपि न जानाति; धिक्कामांधामिमां. श्रेष्ठिना वसुमत्यै प्रोक्तं हे पुत्रि! इयं का तवाऽवस्था! तयोक्तं सर्वोऽपि कर्मणां दोषः, श्रेष्ठिनोक्तं त्वं तावत्तिष्ठस्व निगडभंजनाय लोहकारमाकार्यागच्छामि; तयोक्तं मम महती बुभुक्षा लग्नास्ति, किमपि प्रयच्छत? तदवसरे घोटकनिमित्तं गृहे माषा राज्ञः संति, तान् सूर्पकोणे क्षिप्त्वा वसुमत्यै अर्पिताः, साप्येकं पादं गृहदेहल्या बहिरेकं पादं च मध्ये निधाय स्थिता, तत्संगस्थितसूर्पकोणस्थितान् माषान् यावद्भक्षयति, तस्मिन्नवसरे श्रीमान् वीरस्वामी द्वयस्थत्वेन विहरन् स्वकर्मक्षयनिमित्तं अभिग्रहतपो जग्राह. यदि राजकन्या, मुंडितकेशा, निगडयुगलनियंत्रितचरणा, बद्धहस्ता, बंदिमध्ये समागता, मूल्येन गृहीता, एकं देहल्या बहिरेकं च चरणं मध्ये निधाय स्थिता प्रहरद्वयातिक्रमे सूर्पकोणस्थितान् माषान् यद्यर्पयति तदा गृह्णामीति गृहीताभिग्रहस्य भगवतः पंचदिवसोना षण्मासी व्यतिक्रांता. ॥ ५३ ॥

एतस्मिन्नवसरे ग्रामाद्ग्रामं विहरन् भगवान् कौशांब्यां समागतः, प्रतिगृहं पर्यटति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परंत्वन्निग्रहितन्निक्का न मिलति. तदवसरे धनावहश्रेष्टिगृहसमीपमागतो भगवान्. वसुमत्या चिंतितं धन्याहं ययैतदवस्थायां भगवद्दर्शनं प्राप्तं. वसुमत्योक्तं हे त्रिलोकीविभो! माषन्निक्कानिमित्तं करप्रसारणेन मां भवदुःखात्समुद्धर निस्तारयेति वचो निशम्य भगवता चिंतितं मदीयोऽभिग्रहः संपूर्णः, परं सा रुदंती नास्ति, अतो न गृह्णामीति बुद्ध्या पश्चाद्वलितो भगवान्. तदा वसुमत्यश्रुजलाविललोचना चिंतयति धिग् मंदभाग्याहं, मद्गृहमागतोऽपि भगवान् मामनुद्धृत्य गतः, तदा भगवताऽभिग्रहं पूर्णं जातं दृष्ट्वा पश्चाद्वलित्वा माषन्निक्का गृहीता, साऽतीवहर्षोत्फुल्ललोचना विकसितरोमकूपा समुत्तीर्णभवकूपा जाता, तद्दानप्रभावेण चरणयोर्निगडे स्वयमेव त्रुटिते, शिरसि विस्तृतः श्यामलो वेणीपाशः संजातः, हस्तयोर्बंधनं त्रुटितं, तद्गृहे पंचदिव्यानि जातानि. सार्द्धद्वादशकोटिप्रमाणा सुवर्णवृष्टिः १ सुगंधपंचवर्णपुष्पवृष्टिः २ चेलोत्क्षेपः ३ सुगंध्युदकवृष्टिः ४ अहो दानमहो दानमित्युद्घोषणं ५ सुरैः कृतं, जयजयकारः संजातः, सुरैर्वसुमत्याश्चंदनेति नाम दत्तं चंदनमिव शीतलस्वभावत्वात्. प्रभुः षण्मासीतपःपारणं कृत्वाऽन्यत्र विजहार. चंदनापि धन्या धन्येति लोकैः प्रशंसिता; ए-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्मिन्नवसरे शक्रेणागत्य शतानिकनृपाग्रे नक्तं, इयं दधिवाहनपुत्री वसुमती नाम्नी स्वगुणोपार्जितचंदनाऽपरनाम्नी यत्नेन रक्षणीया, अग्रे इयं धर्मोद्योतकारिणी नविष्यति, नगवतः प्रथमशिष्यणीति शिक्षां दत्वा गतः सौधर्मं. चंदनापि तत्र तिष्ठति. शतानिकेनातीव सन्मानिता, लोकैः सन्मानिता च; कियत्सु दिवसेषु गतेषु नगवतः केवलं समुत्पन्नं ज्ञात्वा नगवतो हस्ते चंदनया चारित्रं गृहीतं, प्रथमशिष्यणी च जाता. सेयमार्यचंदना साध्वी मार्गे गछति. श्रीआर्यसुस्थिताचार्या अत्रोपाश्रये संति, तेषां वंदनार्थमियं गछति, एवं सर्वमपि तच्चरितं तेन वृद्धपुरुषेण तस्य श्मकस्याग्रे निवेदितं. तदानंदोत्कलितमना श्मकः साधूपाश्रयं जगाम, चंदनापि गुरुं वंदित्वा स्वकीयमुपाश्रयं जगाम. गुरुणा श्मको दृष्टः, ज्ञानेन चासन्नसिद्धिको ज्ञातः, गुरुणा चिंतितमसौ धर्मे नियोजनीय इति विचार्य तस्मै मिष्टान्नन्नोजनं दत्तं. सोऽतीवहृष्टो मनसि चिंतयति—अहो करुणापरा एते, नन्नयलोकहितोऽयं मार्गः, इह लोके मिष्टान्नादिन्नोजनं प्राप्यते, परन्नवे च स्वर्गादि सुखं प्राप्यते.

इति विचार्य तेन श्मकेण दीक्षा गृहीता. गुरुणापि तस्य प्रव्रज्यायां स्थिरीकरणार्थं ब-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हुसाधुपरिवृतो इमकः साधुश्चंदनोपाश्रये प्रेषितः, अन्ये साधवो बहिः स्थिताः, इमकसाधुस्तूपाश्रयमध्ये गतः, चंदनया नवदीक्षितं इमकमागच्छंतं दृष्ट्वा सन्मुखं गत्वाऽासनं दत्तं, बहुसन्मानं च कृतं, करकमलं योजयित्वाऽग्रे स्थिता. इमकेण चिंतितं अहो धन्योऽयं वेषः, यन्नवदीक्षितस्यापि मम पूज्येयं चंदना एतावत्सन्मानं ददाति. एवं स धर्मे स्थिरीजातः, चंदनया पृष्टं किं भवतामागमनप्रयोजनं? इमकसाधुनोक्तं युष्मदुदंतान्वेषणनिमित्तं गुरुभिः प्रहितोऽहमित्युक्त्वा स्थिरीभूतमानसो बहुकालं निरतिचारं चारित्रं पालयामासेत्युपनयो बोध्यः, एवमन्यान्निरपि विनयो विधेय इत्युपदेशः ॥ इति चंदनाचरित्रं विनयोपरि ॥

॥ मूलम् ॥—वरिससयदिक्खियाए । अज्जाए अज्जदिक्खिउ साहू ॥ अब्भिगमणवंदणनमं–सणेणं विणएण सो पुज्जो ॥ १५ ॥ व्याख्या—' वरिससय इति ' विशेषितदीक्षितयापि आर्यया साध्व्या, यस्या दीक्षाग्रहणानंतरं शतवर्षाणि जातानि, एतेन वृद्धयापीत्यर्थः, ' अज्जाए इति ' आर्यया साध्व्या अद्यदीक्षितः साधुर्मुनिरेकदिवसप्रव्रजितोऽपि मुनिरार्यया वंदनीय इत्यर्थः, अब्भिगमनमागमनकाले सन्मुखं गमनं, वंदनं द्वादशावर्त्तादिना नमस्करणं, नमंसणं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमस्करणमांतरप्रीतितः, एतेषां द्वंद्वः, विनयेनाऽासनदानादिना स साधुः पूज्यः पूजनीयः, एकदिवसप्रव्रजितोऽपि मुनिः साध्वीभिः पूजनीय इति ॥ १५ ॥ तत्कारणमाह—

॥ मूलम् ॥—धम्मो पुरिसप्पन्नवो । पुरिसवरदेसिन पुरिसजिट्ठो ॥ लोएवि पहू पुरिसो । किं पुण लोगुत्तमे धम्मे ॥ १६ ॥ व्याख्या—' धम्मो इति ' दुर्गते रक्षति योऽसौ धर्मः पुरुषप्रन्नवः पुरुषाद्उत्पन्नः, पुरुषा गणधराः, पुरुषवरास्तीर्थंकरास्तैर्दर्शितः कथितः, एतादृशो धर्मः श्रुतचारित्ररूपः, अतः पुरुषस्वामिकत्वात्पुरुषोत्तमः पुरुषज्येष्टः, लोकमध्येऽपि प्रभुः स्वामी पुरुषो नवति, न तु स्त्री, धर्मे तु विशेषेण पुरुषः प्रभुः, यदि लोकेऽपि पुरुषः श्रेष्ठस्तर्हि लोकोत्तमे लोकश्रेष्ठे धर्मे पुनः किं वाच्यं! तत्र धर्मे तु विशेषेण पुरुष एव श्रेष्टः ॥

॥ मूलम् ॥—संबाहणस्स रन्नो। तइया वाणारसीयनयरीए ॥ कन्नासहस्समहिअं । आसी किर रूववंतीणं ॥ १७ ॥ व्याख्या—' संबाहणस्सेति ' संबाधनाभिधानस्य राज्ञो नृपस्य ' तइया इति ' तदा काले वाणारस्यां नाम्न्यां नगर्यामधिकं रूपश्रिया, एतादृशं कन्यानां सहस्रं, सहस्रसंख्याः कन्या इत्यर्थः, आसीदभूत्, किलेति श्रूयते, कथंभूतानां कन्यानां?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रूपवतीनां महासौंदर्यसहितानां ॥ १७ ॥

॥ मूलम् ॥—तहवि य राययसीरी । उज्झट्टंती न ताइया ताहिं ॥ उयरट्ठिएण इक्केण । ताइया अंगवीरेण ॥ १८ ॥ व्याख्या—' तहवि इति ' तथापि सा राजश्री राज्यलक्ष्मीः समग्रैश्वर्यसंपत् उज्झटंती गच्छंती नश्यंती ' न ताइया इति ' न रक्षिता, तेन कन्यासहस्रेणापि न रक्षिता सा राज्यलक्ष्मीर्गच्छंती, उदरस्थितेन गर्भस्थितेनैकेनापि ' ताइया इति ' रक्षिता अंगवीर्यनाम्ना पुत्रेण, अतो लोकेऽपि पुरुष एव प्रधानः ॥ १८ ॥ अत्र कथानकं—

वाणारस्यां नगर्यां संबाधनो नामा राजा राज्यं करोति, तस्य कन्यानामेकसप्तशतमासीत्, परं पुत्रो न जातः, बहव उपायाः कृताः परं पुत्रो न जातः, राज्ञा चिंतितमहो पुत्रं विना किं राज्यश्रिया! यस्य गृहे पुत्रो नास्ति तस्य गृहमपि शून्यं. यदुक्तं वेदेऽपि—अपुत्रस्य गतिर्नास्ति । स्वर्गो नैव च नैव च ॥ तस्मात्पुत्रमुखं दृष्ट्वा । स्वर्गे गच्छंति बांधवाः ॥१॥ लोका अप्येवं वदंति—चोसठ दीवा जो बळे । बारे रवि उगंत ॥ तस घर तोहें अंधारडुं । जस घरिं पुत्र न हुंत ॥ १ ॥ अतः किं क्रियते पुत्रविहीनया राज्यलक्ष्म्या! अनेके मांत्रिका-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तांत्रिका यांत्रिकाश्च तेन पृष्टाः, परंतु केनापि प्रकारेण पुत्रो न जातः, यदुक्तं—प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः। सोऽवश्यं भवति नृणां शुभोऽशुभो वा॥ भूतानां महति कृतेऽपि हि प्रयत्ने। नाऽभाव्यं भवति न भाविनोऽस्ति नाशः॥ १॥ राजा वर्द्धकत्वं प्राप्तः, एतस्मिन्नवसरे कोऽपि जीवः पट्टराइयाः कुक्षौ पुत्रत्वेनोत्पन्नः, पुत्रमुखमदृष्ट्वैव राजा परलोकं प्राप्तः, सर्वेऽपि पौरजनाः मिलिताः, किं भविष्यति! अपुत्रस्य राज्यं कथं स्थास्यति! एवं सर्वेऽपि पुरवासिनो लोकाः शोकाकुलाः संजाताः।

तस्मिन्नवसरे वैरिभिः श्रुतं यत्संबाधनोऽपुत्रो मृत इति ते सर्वेऽपि वैरिणो मिलिताः, एकीभूय विचारं कृत्वा महतीं धाटीं मेलयित्वा सर्वेऽपि सज्जा अभूवन्. वाणारस्या उपरि चलिताः, सर्वेऽपि लोकास्त्रस्ता इयं निजगृहान्निष्कासयामासुः, तदवसरे तैर्वैरिभिः कस्मै चिन्नैमित्तिकाय पृष्टं अस्माकं जयो भविष्यति वा न वा? तदा नैमित्तिकेन लग्नबलमालोक्योक्तं यूयं मिलित्वा जयवांछया तत्र प्रयाणेच्छां कुरुथ, परंतु संबाधनराज्ञः पट्टराइया उदरस्थगर्भमाहात्म्येन भवतां मुखभंगो भविष्यति, परंतु जयो न भविष्यतीति श्रुत्वा सर्वेऽपि वै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिणः पश्चाद्गलिताः, सर्वेऽपि जना हृष्टाः, अहो गर्भस्थितस्यापि पुत्रस्य माहात्म्यं! यत्प्रभावेण सर्वेऽपि शत्रवो नष्टा इति लोका जहर्षुः, गर्भस्थितौ पूर्णायां पुत्रजन्म जातं, अशुचिकर्मनिष्कासनानंतरं तस्यांगवीर्य इति नाम दत्तं. अनुक्रमेण स यौवनं प्राप्तः, चिरकालं प्रजां पालयामासेत्युपनयः. एवं सहस्रसंख्यान्निरपि कन्यान्नी राज्यं न रक्षितं, इति कर्मव्यवहारे. अथ च धर्मव्यवहारे सर्वत्रापि पुरुष एव श्रेयान्, अतो दिनदीक्षितस्यापि साधोः साध्वीन्निर्विनयो विधेयः, इति पूर्वगाथया सह सांगत्यं ॥ इति कथानकं ॥ अधुनाप्यग्रेतनगाथायां तदेव विविच्य दर्शयति—

॥ मूलम् ॥—महिलाण सुबहुयाणवि । मज्झाउ इह समत्तघरसारो ॥ रायपुरिसेहिं निज्जइ । जणेवि पुरिसो जहिं नत्थि ॥ १९ ॥ व्याख्या—' महिलाणेति ' महिलानां स्त्रीणां सुबहूनामपि सहस्रसंख्याकानामपीत्यर्थः, मध्यात् इहेत्यस्मिन् लोकेऽपीत्यर्थः, समस्तगृहसारः सर्वद्रव्यनिचयो राजपुरुषै राजसेवकैर्नीयते राजकुले प्राप्यते, अपुत्रस्य धनं राजा गृह्णातीत्यर्थः, जनेऽपि लोकेऽपि ' जहिंइति ' यस्मिन् गृहे पुरुषो नास्ति तस्य धनं राजकुले

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यातीति पुरुष एव प्रधानः ॥ १९ ॥

॥ मूलम् ॥—परजणस्स बहुजाणा—वणाहिं वरमप्पसक्खियं सुकयं ॥ इह भरहचक्कवट्टी । पसन्नचंदो य दिट्ठंता ॥ २० ॥ व्याख्या—' परजणस्सेति ' परजनस्य परलोकस्य बहुभिर्ज्ञापनाभिः किं? किमपि तदनुष्ठानं कृतमिति परस्मै निवेदनेन किं स्यात्? हे आत्मन् आत्मसाक्षिकं यत्सुकृतं कृतं तदेव वरं प्रधानं, किं परस्य कथनेन? अत्रार्थे भरतचक्रिणो दृष्टांतो येनात्मसाक्षिकानुष्ठानेन सिद्धिसुखं प्राप्तं. चः समुच्चये, प्रसन्नचंद्रस्याप्यत्र दृष्टांतो बोध्यः ॥ २० ॥ तत्र प्रथमं भरतचक्रिणो निदर्शनं लिख्यते—

अयोध्यायां नगर्यां ऋषभात्मजो भरतनामा चक्री बभूव. श्रीऋषभस्वामिना संयमग्रहणवेलायां शतसंख्येभ्यो निजपुत्रेभ्यो निजनिजनामांकिता देशा दत्ताः, बाहुबलये बहलीदेशे तक्षशिलाराज्यं दत्तं, भरताय चाऽयोध्याराज्यं दत्तं. स भरत एकदा सभायां स्थितोऽस्ति, तस्मिन्नवसरे यमकशमकनामानौ द्वौ नरौ वर्धापनिकां दातुं सभामुखप्रतोल्यामागतौ, प्रतिहारेणागत्य भरताय निवेदितं. भ्रूसंज्ञयाऽनुज्ञापितो दौवारिकस्तौ यमकशमकावाकारया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मास. तौ चागत्य करकमलौ मुकुलीकृत्य भरतमाशीर्वचनपुरस्सरं तुष्टुवतुः, तयोर्मध्यादेको यमकनामा विज्ञपयति देव! पुरिमतालपुरे शकटोद्याने श्रीऋषभस्वामिनः केवलमुत्पन्नं, अतोऽनया वर्द्धापनिकया वर्द्धाप्यसे; अन्यः शमकनामा वक्ति देव! आयुधशालायां सहस्रसुरसेवितं कोटिसूर्यप्रकाशसंकाशं चक्ररत्नं समुत्पन्नं. एतन्नरद्वयमुखाद्वर्द्धापनिकाद्वयं श्रुत्वाऽतीवहर्षितो भरत आजीवितांतं दत्तभोगाऽक्षयं धनं दत्वा तेन तौ सन्मानितौ. भरतश्चिंतयति प्रथमं कस्योत्सवं करोमि? ज्ञानस्य वा चक्रस्येति विचारणायां पुनरपि विचारितं, धिग्मया किं चिंतितं? अक्षयसुखविधायी तातः क्व? संसारसुखहेतुकं चक्रं क्व? तातेपूजिते चक्रमपि पूजितमिति निश्चित्य महाडंबरेण मरुदेवां सुतमोहविह्वलां ऋषभऋषभेति नाम जपंतीं स्वां पितामहीं गजस्कंधमारोप्य भरतो वंदनार्थं चलितः, भरतो मार्गे मरुदेवां वक्ति मातर्विलोकय निजपुत्रार्द्धिं? त्वं प्रतिदिनं मामेवमवादीः यन्मदीयोंगजो वने पर्यटति, दुःखं सहते, त्वं तु तस्य सपर्यां न करोषि, इति प्रतिदिनमुपालंभं दत्तवती. अधुना सुतैश्वर्यं विलोकय?

एतस्मिन्समये चतुःषष्टिसंख्यैः सुरेंद्रैर्मिलित्वा समवसरणं विरचितं, देवदेवीनां कोटयो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिलिताः संति. अनेकवाजित्ररवापूर्णदिगंतरालगगनमंडलं जयजयशब्दध्वनिगीतगानादि-
पुरस्सरं प्रभुः सिंहासने स्थित्वा देशनां ददाति. तदा देवदुंदुभिनिर्घोषं जयजयारवं च श्रु-
त्वा मरुदेवा वक्ति किमेतत्कौतुकं? भरतो वक्ति एतत्तवांगजस्यैश्वर्यं. मरुदेवा चिंतयति अ-
हो पुत्रेणैतावती ऋद्धिर्लब्धास्तीत्युत्कंठावशादानंदाश्रुनिर्गमनेन नयनयोः पटलदोषो गतः, स-
र्वमपि प्रत्यक्षेण दृष्टं. अहो अयं त्वेतादृशमैश्वर्यं भुनक्ति, परं त्वेकवारमप्यहमनेन पुत्रेण न
स्मृता; अहं त्वेकवर्षसहस्रं यावत्पुत्रमोहेन दुःखिता, एतस्य तु मनसि किमपि मोहकारणं
नास्ति, अहो धिग्मोहचेष्टितं! मोहांधाः किमपि न जानंति इति वैराग्यरसैकमग्नया क्षपक-
श्रेणिमासाद्याष्टकर्मक्षयं कृत्वांतकृत्केवलित्वेन मोक्षं गता. सुरैर्महोत्सवो निर्मितः, इंद्राद्याः
सर्वेऽपि सुराः समवसरणादवतीर्य मरुदेवाशरीरं क्षीरोदधिप्रवाहे वाहयामासुः, सशोकं भर-
तमग्रेसरं कृत्वा समवसरणमागताः, प्रभुं त्रिःप्रदक्षिणीकृत्य भरतोऽपि यथास्थाने निविष्टः, ॥ ६३ ॥
प्रभोर्देशना श्रुत्वा गतशोकश्च जातः, देशनांते प्रभुं वंदित्वा श्राद्धधर्मं प्रतिपद्य भरतोऽयो-
ध्यामागत्य चक्ररत्नोत्सवं करोतिस्म. अष्टसु दिवसेषु गतेषु चक्रं पूर्वाभिमुखं चलितं; भरतो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽपि देशसाधनार्थं तदनु ससैन्यो निर्गतः, योजनावधिप्रयाणं कुर्वन् कतिभिर्दिनैः पूर्वोदधितटं प्राप्य सैन्यं स्थापयामास; अष्टमं तपश्चकार; मागधनामानं सुरं मनसि कृत्वा तस्थौ. दिवसत्रयानंतरं रथमारुह्य समुड्डलं रथनाभिपर्यंतमवगाह्य निजनामांकितं बाणं धनुषा संयोज्य मुमोच, द्वादशयोजनानि यावद्गत्वा तद्बाणं मागधसभायां सिंहासने निपत्य भूमौ पपात. तत्पातदर्शनादेव जातकोपो मागधस्तं बाणं करे धृत्वा अक्षराणि वाचयामास. भरतचक्रिणमागतं ज्ञात्वा गतकोपः प्राभृतं गृहीत्वा सन्मुखं सपरिकरश्चलितः, आगत्य चक्रिणश्चरणयोः पतन् स्वामिन् क्षमस्व मदीयापराधं? तव सेवकोऽहं इयंति दिनानि यावदनाथोऽधुना त्वद्दर्शनेन सनाथो जात इति नमस्कृत्य चक्रिणमावर्जयित्वाऽनुज्ञातः सन् स्वस्थानं जगाम. चक्रिणापि पश्चादेत्याष्टमतपःपारणं कृतं. तदनु चक्रमाकाशे चलितं, सैन्यमपि तदनु चलितं, दक्षिणोदधितटं प्राप्तं च. पूर्ववत्तद्दिक्स्वामी वरदामोऽपि जितः, तदनु पश्चिमदिशि प्रयासं विजित्योत्तराभिमुखं चक्रं चलितं. तस्यां दिशि वैताढ्यनगमासाद्याऽष्टमतपो विधाय तमिस्रागुहाधिष्ठातारं देवं मनसि धृत्वा तस्थौ. अष्टमतपोंते देवेन प्रत्यक्षीभूय तमिस्राविव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रमुद्घाटितं. ससैन्यश्चक्री तमिस्रामध्ये चचाल. मणिरत्नप्रकाशेन सैन्यं गच्छति. अग्रे गुहामध्ये निम्नगोन्मिग्नगे द्वे नद्यौ समागते, चर्मरत्नेन च ते द्वे नद्यौ समुत्तीर्णे. अग्रेतनं गुहाद्वारमासाद्य सैन्यं स्थापितं. तत्र म्लेच्छाराजानो बहवो मिलिताः, चक्रिणा सार्द्धं च युद्धं कर्त्तुं लग्नाः, चक्रिणा ते सर्वेऽपि जिताः, सर्वेऽपि सेवकाश्च जाताः, तत्रत्यं खंडत्रयं च जित्वा पश्चाद्वलितश्चक्री, मार्गे समागच्छता तेन गंगातीरमासाद्य सैन्यं स्थापितं, तत्तीरे च नवनिधानानि प्रकटितानि; तन्निधानस्वरूपं च किंचिद्गाथया लिख्यते. तत्र प्रथमं तन्नामानि—नसप्पे १ पंडुए २ । पिंगलए ३ सव्वरयणं ४ महपउमे ५ ॥ काले अ ६ महाकाले ७ । माणवग ८ महानिहीसंखे ए ॥ १ ॥ चक्करूपइट्ठाणा । अट्ठुस्सेहा य नव विरकंन्ने ॥ बारसदीहा मंजूससंठिआ जान्हवीमुहे ॥ २ ॥ वेरुलियमणिकबाडा । कणगमया विविहरयणपरिपुन्ना ॥ पलिउचउमठिईणं । देवाणं ते अ आवासा ॥ ३ ॥ इति निधानगाथाः. तत्राष्टौ दिवसान् यावन्महोत्सवं कृत्वा तत्र गंगातीरे स तस्थौ, तदधिष्ठायिकया गंगया नाम्न्या देव्या च वर्षसहस्रं यावद्भोगान् बुभुजे. ततोऽनंतरं चक्रं चलितं. वैताढ्यपर्वते तेन नमिविनमिनामानौ वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्याधरौ जितौ. तेन नमिविद्याधरेण स्वकीया पुत्री चक्रिणे दत्ता, सा च स्त्रीरत्नं जाता. एवं षष्टिवर्षसहस्राणि यावद्दिग्विजयं कृत्वाऽयोध्यायां पुनराजगाम षट्खंडाधिपतिर्महाऋद्धिमान्. ऋद्धिस्वरूपं किंचिल्लिख्यते—

चतुरशीतिर्लक्षाणि गजाः, तावंत एव रथाः, तावंत एवाश्वाः, षण्णवतिकोटयः पदातीनां, द्वात्रिंशत्सहस्रसंख्या देशाः, द्वात्रिंशत्सहस्रसंख्या मुकुटधरा राजानो यस्य सेवकाः, अष्टचत्वारिंशत्सहस्राणि पत्तनानां, द्विसप्ततिसहस्राणि नगराणि, षण्णवतिकोटयो ग्रामाः, चतुर्दश रत्नानि, नव निधानानि, षष्टिसहस्रसंख्या नटा यस्याग्रे वर्णावलीकथकाः, षष्टिसहस्रसंख्याः पंडिताः, दशकोटिसंख्या ध्वजधारकाः, पंचलक्षसंख्या दीपिकाधारकाः, विंशतिसहस्रसंख्याः सुवर्णादिधात्वाकराः, पंचविंशतिसहस्रसंख्या देवा यस्य सेवकाः, अष्टादशकोटयोऽश्ववारा यस्यानुचलंति. एतादृशी ऋद्धिर्येन प्राप्ता, तथापि स मनसि विरक्त एवास्ते. अथ स भरतनामा चक्री बहुषु पूर्वलक्षेषु गतेषु एकस्मिन् दिने शृंगारशालायां निजतनुप्रमाणादर्शमग्रे निधाय स्वकीयं रूपं विलोकयति. प्रत्यवयवसुंदरतां विलोकयन् एकामंगुलिमंगुलीय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करहितामतीवनिःश्रीकां दृष्ट्वा मनसि दध्यौ, अहो असारता देहस्य! परपुद्गलैरेव शरीरं शोभते, न तु स्वकीयपुद्गलैः, किं कृतं मया एतदसारदेहनिमित्तं! बहव आरंभाः कृताः, अस्मिन्नसारे संसारे सर्वमप्यनित्यं. कोऽपि कस्यापि नास्ति, धन्या मदनुजा ये तडिल्लताचंचलं राज्यसुखं त्यक्त्वा संयमं भेजुः, अहं तु अधन्यो यदनित्ये सांसारिके सुखे नित्यबुद्ध्या मोहितोस्मि. धिगिमं देहं! धिगिमान् विषयान् भोगिभोगोपमान्! हे आत्मन् त्वमेक एव संसारे, तवान्यः कोऽपि नास्तीति ध्यायन् परमपदाध्यारोहणनिःश्रेणीकल्पां क्षपकश्रेणिमारुरोह, घनघातिक्षयं विधायोज्ज्वलं केवलं प्राप, तस्मिन्नवसरे शासनदेव्या समेत्य वेषोऽर्पितः, साधुवेषं गृहीत्वा केवलित्वेन भूमौ विजहार, क्रमेण मोक्षसुखं प्रापेत्यत आत्मसाक्षिकमेवानुष्ठानं फलदायि, न तु परसाक्षिकं ॥ इत्याध्यात्मिकेऽनुष्ठाने भरतचक्रिदृष्टांतः, अधुना प्रसन्नचंद्रराजर्षेरपि दृष्टांतो लिख्यते—

पोतनपुरे नगरे प्रसन्नचंद्रो राजा बभूव, सोऽतीवधार्मिकः सत्यवादी न्यायधर्मैकनिपुणः, स एकदा संध्यायां गवाक्षस्थितो नगरस्वरूपं विलोकयति, तस्मिन्नवसरे नानावर्णान्यभ्राणि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जातानि, संध्यारागः संजातः, तं दृष्ट्वाऽतीवहर्षितो राजा मुहुर्मुहुर्विलोकयति, तत्संध्यास्वरूपं क्षणिकं दृष्टनष्टमिव नष्टं, राज्ञा चिंतितं क्व गतं संध्यारागसौंदर्यं? अनित्यता पुद्गलानां, संध्याराग इव देहोऽप्यनित्यः, संसारे प्राणिनां किमपि सुखं नास्ति, यदुक्तं—दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां। बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयःपानमिश्रं ॥ तारुण्ये चापि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः। संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥ १ ॥ एवं वैराग्यरंगेण रंजितमना राजा चिंतयति संसारे वैराग्योपमं सुखं नास्ति. यदुक्तं—भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं। दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयं ॥ माने म्लानिभयं जये रिपुभयं काये कृतांताद्भयं। सर्वं नाम भयं भवेच्च भुविनां वैराग्यमेवाभयं ॥ १ ॥ एवं वैराग्यपरायणो राजा स्वं पुत्रं राज्ये स्थापयित्वा स्वयं दीक्षां जग्राह. तत्कालकृतलोचो भूमौ विहरन् राजगृहोद्याने कायोत्सर्गमुद्रया तस्थौ. तस्मिन्नवसरे श्रीमान् वर्द्धमानस्वामी ग्रामाद्ग्रामं विहरन् चतुर्दशसहस्रसाधुपरिकरितः सुरनिर्मितकांचनकमलोपरि चरणौ धारयन् राजगृहे गुणशैले

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चैत्ये समवासार्षीत्; सुरैरागत्य समवसरणं निर्मितं. वनपालका ऊटिति नगरे समेत्य श्रेणिकं विज्ञपयामासुः, स्वामिन् भवदीयमनोवल्लभाः श्रीवर्द्धमानस्वामिनो वने समवसृताः, एतद्वनपालकवचनं श्रुत्वा राजाऽतीवहृष्टः कोटिप्रमितं धनं तस्मै ददौ, स्वर्णजिह्वां च ददौ. तदनंतरं राजा महताडंबरेण जिनवंदनार्थं चलितः, तस्य राज्ञः सैन्यमुखे सुमुखदुर्मुखनामानौ द्वौ दंडधरौ चलितौ; तदनु तान्यां प्रसन्नचंद्रो मुनिर्वने कायोत्सर्गमुद्रया स्थितो दृष्टः, सुमुखेनोक्तं धन्योऽयं मुनिः, येनैतादृशी महती राज्यलक्ष्मीस्त्यक्ता, संयमश्रीश्च गृहीता, एतस्य नाम्नापि पापं याति; किं पुनः सेवनेन? तदा दुर्मुखेनोक्तं अधन्योऽयं महापापोऽयं मुनिः, किमिमं पुनः पुनर्वर्णयसि? एतेन समः कोऽपि पापभाक् नास्ति. सुमुखेन मनसि चिंतितं अहो दुर्जनस्वभावोऽयं, यदुक्तेषु दोषमेव गृह्णाति. यदुक्तं—आक्रांतेव महोपलेन मुनिना शप्तेव दुर्वाससा। सातत्यं बत मुष्टितेव जतुना नीतेव मूर्छां विषैः॥ बद्धेवाऽतनुरज्जुभिः परगुणान् वक्तुं न शक्ता सती। जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥१॥ तथा चोक्तं—आर्योऽपि दोषान् खलवत्परेषां। वक्तुं हि जानाति परं न वक्ति॥ किं काक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्तीव्रतराननोऽपि । कीरः करोत्यस्थिविघट्टनानि ॥ २ ॥ ततः सुमुखेनोक्तं भो दुर्मुख किमर्थमेनं मुनीश्वरं महात्मानं निंदसि? तदा दुर्मुखेनोक्तं भो एतस्य नामापि न गृहीतव्यं. यदयं पंचवार्षिकं बालं राज्ये स्थापयित्वा निर्गतः, परंत्वेतद्वैरिभिर्मिलित्वा एतन्नगरमुज्जूसितं, एतदीयाः पौरजनाः क्रंदंति, विलापं कुर्वंति, महद्युद्धं जायते, अधुना ते एतदीयं बालकं निहत्य राज्यं गृहीष्यंति, एतत्सर्वं पापमेतन्निरसि; इति श्रुत्वा ध्यानस्थितेन प्रसन्नचंद्रराजर्षिणा चिंतितं अहो मयि स्थितेऽपि मदीयाः शत्रवो यदि बालकं निहत्य राज्यं गृह्णंति तर्ह्येषा मानहानिर्ममैवेति स ध्यानाच्चलितः, मनसैव वैरिभिः सार्द्धं तेन युद्धं कर्त्तुमारब्धं. अतीवरौद्ररूपतामापन्नस्तन्मना रौद्रं ध्यानं ध्यायति, मनसैव वैरिणं निहंति, हता इमे इति बुद्ध्या समीचीनं जातमिति मुखेनापि जल्पते, अधुनान्यं मारयामीति पुनरपि मनसा युद्धाय प्रवर्त्तते. एतस्मिन्नवसरे श्रेणिकेन हस्तिस्कंधाधिरूढेन प्रसन्नचंद्रो दृष्टः, अहो धन्योऽयं राजर्षिर्य एकाग्रमनसा ध्यानं करोति. श्रेणिकोऽपि गजादुत्तीर्य त्रिःप्रदक्षिणीकृत्य पुनः पुनर्वंदति स्तौति च. तं वंदित्वा मनसा स्तुवन् गजमारुह्य स्वामिसमीपमागतः, समवसरणं च दृष्ट्वा पं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चान्निगमनविधिना जिनं वंदित्वा करकमलौ मुकुलीकृत्यैवं स्तौतिस्म. यदुक्तं—अद्याऽनवत्सफलता नयनद्वयस्य । देव त्वदीयचरणांबुजवीक्षणेन ॥ अद्य त्रिलोकतिलक प्रतिभासते मे । संसारवारिधिरयं चुलुकप्रमाणः ॥ १ ॥ दिट्ठे तुह मुहकमले । तिन्निवि णट्ठाइं निरवसेसाइं ॥ दारिद्दं दोहग्गं । जम्मंतरसंचियं पावं ॥ २ ॥ इत्याद्यष्टाधिकशतसंख्यैः काव्यैर्जिनं स्तुत्वा यथास्थानमुपविष्टः, प्रभुणा क्लेशनाशिनी धर्मदेशना प्रारब्धा. देशनांते श्रेणिकः स्वामिनं पृच्छतिस्म. हे विभो यदवसरे मया प्रसन्नचंद्रो वंदितस्तदवसरे यदि स कालधर्मं प्राप्नोति तदा क्व गच्छति? स्वामिनोक्तं तदा सप्तमीं नरकपृथ्वीं याति. श्रेणिकेनोक्तं स्वामिन्नधुना क्व गच्छति? भगवतोक्तं षष्ठीं नरकपृथ्वीं याति, पुनरपि श्रेणिकेन क्षणं विलंब्य पृष्टं अधुना क्व गच्छति? भगवतोक्तं पंचमीं पृथ्वीं याति. पुनरपि क्षणं विलंब्य पृष्टं, भगवतोक्तं चतुर्थीं पृथ्वीं याति. एवं तृतीयायां द्वितीयायां प्रथमायां; पुनरपि श्रेणिकेन पृष्टं प्रभो अधुना क्व गच्छति? भगवतोक्तं प्रथमदेवलोके, एवं द्वितीये तृतीये चतुर्थे पंचमे षष्टे सप्तमे अष्टमे नवमे दशमे एकादशे द्वादशे च; एवमनुक्रमेण नवसु ग्रैवेयकेषु यावत्पंचानुत्तरविमानानि ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्पर्यंतं श्रेणिकप्रश्नानंतरं भगवता तत्प्रश्नोत्तरं दत्तं. अनया रीत्या सभायां प्रश्नोत्तरनिर्णये जायमाने, अस्मिन्नवसरे नभसि देवदुंदुभिनिनादं निशम्य श्रेणिकेन पृष्टं, प्रभो क्वायं दुंदुभिनिनादः? प्रभुणोक्तं प्रसन्नचंद्रराजर्षेः केवलज्ञानं समुत्पन्नं, तत्र सुरा दुंदुभिं ताडयंति, जयजयारावः संजायते; श्रेणिकेनोक्तं प्रभो किमेतत्कौतुकं? मया न ज्ञातं, किमिदं स्वरूपं? स्वामिन् कृपां विधायैतदुदंतं प्रसादीकुरु? प्रभुणोक्तं श्रेणिक सर्वत्रापि मन एव प्रधानं. यदुक्तं—मन एव मनुष्याणां । कारणं बंधमोक्षयोः ॥ क्षणेन सप्तमीं याति । जीवस्तंदुलमत्स्यवत् ॥ १ ॥ तथा चोक्तं—मणमरणेंदियमरणं । इंदिअमरणे मरंति कम्माइं ॥ कम्ममरणेण मुक्को । तम्हा मणमारणं पवरं ॥ २ ॥

भो श्रेणिक! यदवसरे त्वया प्रसन्नचंद्रोऽभिवंदितस्तदवसरे त्वदीयदंभधरदुर्मुखवचनं श्रुत्वा स ध्यानाच्चलितः, परसेनया युद्धं मनसैव करोतिस्म. त्वया त्वेवं ज्ञातं यन्महामुनीश्वरोऽयं एकाग्रमनसा ध्यानं ध्यायति, परंतु तेन तदवसरे वैरिभिः साद्धं मनसा महद्युद्धमारब्धमभूत्, ततो युद्धेन सप्तमनरकगमनयोग्या आयुःपुद्गला मेलिताः, न तु निकाचितबंधेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बद्धः, तदनु त्वं तं वंदित्वाऽत्रागतः, तेन तु मनसा युद्धे क्रियमाणे शस्त्रैः सर्वेऽपि शत्रवो निहताः, शस्त्राणि सर्वाण्यपि च व्ययितानि, शत्रवोऽपि सर्वे क्षयं नीताः, एतदवसरे एकः शत्रुः सन्मुखं स्थितः, शस्त्रं तु पार्श्वे न स्थितं, तदा प्रसन्नचंद्रेण रौद्रध्यानपरायणेन मनसि विचारितं, शिरःस्थलोहमयेन पट्टेन वैरिणं ताडयामीति बुद्ध्या साक्षादेव हस्तौ तेन शिरसि न्यस्तौ. तत्काले कृतकेशलुंचनं स्वं शिरो दृष्ट्वा स पश्चात्तापितः, अहो धिग्मयाऽज्ञानांधितधिया रौद्रध्यानपरायणेन किं चिंतितं? त्यक्तसावद्यसंगस्य गृहीतयोगस्य वांतभोगस्य ममैतद्युद्धं न घटते. कस्य सुताः! कस्य प्रजाः! कस्यांतःपुरं! अरे दुरात्मन्! त्वया किं विचारितं? सर्वमप्यनित्यं. यदुक्तं—चला विभूतिः क्षणभंगि यौवनं । कृतांतदंतांतर्वर्त्ति जीवितं॥ तथाप्यवज्ञा परलोकसाधने । अहो नृणां विस्मयकारि चेष्टितं ॥ १ ॥

एवं शुभध्यानमापन्नः प्रतिक्षणं निकृष्टनिकृष्टतराध्यवसायबद्धानि कर्मदलिकान्युन्मूलयामास, शुभतराध्यवसायवशेन सप्तानामपि पृथिवीनां गमनयोग्यानि दलिकानि स्फेटयित्वोर्ध्वं यावत्सर्वार्थसिद्धविमानगमनयोग्यं कर्मदलिकं मेलयित्वोत्तरोत्तरपरिणामधारया प-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रमपदप्राप्तिपरमकारणं क्षपकश्रेणिशरणमाश्रित्य घातिकर्मक्षयं विधाय तत्कालमेवोज्ज्वलं केवलज्ञानमाप. अतस्तत्प्रभावात्सुरा एकीभूय गीतगानाद्युत्सवं कुर्वंतीति प्रभुमुखात् श्रुत्वा श्रेणिकः सविस्मयं मुहुर्मुहुः शिरो धुन्वन् प्रभुं वंदित्वा निस्संदेहो भूत्वा स्वस्थानं जगाम; प्रभुरप्यन्यत्र विजहार. प्रसन्नचंद्रोऽपि बहुकालं यावत्केवलित्वेन भूमौ विहृत्य शिवपदमलंकृतवानित्युपनयः, अत एवात्मनः साक्षिकमाचरितं पुण्यपापं फलदायीति दृष्टांतः ॥

॥ मूलम् ॥—वेसोवि अप्पमाणो । असंजमपहेसु वट्टमाणस्स ॥ किं परियत्तियवेसं । विसं न मारेइ खज्जंतं ॥ २१ ॥ व्याख्या—' वेसोवि इति ' वेषोऽपि रजोहरणादिरूपोऽपि अप्रमाणः, न केवलं वेषेणात्मशुद्धिरित्यर्थः, अत्र दृष्टांतमाह—परिवर्त्तितवेषं गृहीतवेषांतरं, एकं वेषं मुक्त्वाऽन्यो वेषो येन गृहीत एतादृशं पुरुषं विषं कालकूटादि किं न मारयति? अपितु मारयत्येव. कथंभूतं विषं? खाद्यंतं भक्ष्यमाणं, तथा संक्लिष्टचित्तं विषं असंयमप्रवृत्तं नरं मारयति ॥२१॥ तर्हि कोऽप्येवं कथयति यत्केवलं भावशुद्धिरेव विधेया, किं वेषेणेत्याह—

॥ मूलम् ॥—धम्मं रक्खइ वेसो । संकइ वेसेण दिक्खिओमि अहं ॥ उभग्गेण पगंतं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रक्कइ राया जणवन्नव ॥ २२ ॥ व्याख्या—' धम्मं इति ' वेषोऽपि धर्महेतुत्वान्मुख्यः, धर्मं चारित्ररूपं रक्षति वेषः, अथ च वेषेण कृत्वा शंकते, पापमाचरितुं लज्जां प्राप्नोतीत्यर्थः, अहं मुनिवेषधारी दीक्षितोऽस्मि, दीक्षां प्रपन्नोऽस्मि. अतो ममैतत्कर्तुं न घटते; इत्युन्मार्गेणोत्पथेन पतंतमेतादृशं नरं वेषो वारयति रक्षतीत्यर्थः, तत्र दृष्टांतमाह—राजा इव यथा राजा जनपदं जनपदस्थितं पुरुषजातमुन्मार्गेण पततं रक्षति, प्रवृत्तोऽपि राजन्नयान्निवर्त्तते. ॥२२॥

॥ मूलम् ॥—अप्पा जाणइ अप्पा । जहट्ठिन अप्पसक्खिन धम्मो ॥ अप्पा करेइ तं तह । जह अप्पसुहावहं होइ ॥ २३ ॥ ' अप्पा इति ' अयमात्मा शुन्नपरिणामो वाऽशुन्नपरिणामो वा? एतदात्मा जानाति, न तु परः, परचेतोवृत्तीनां दुर्लक्ष्यत्वात्. ' जहट्ठिन इति ' यथाऽवस्थितः शुन्नोऽशुन्नो वा आत्मा, आत्मा साक्षी यस्मिन्नसावात्मसाक्षिक एतादृशो धर्मः प्रमाणः, आत्मा तत्तथा तत्क्रियानुष्ठानादिकं तथा तेन प्रकारेण करोतु ' जहा इति ' यथाऽऽत्मनः सुखावहं सुखकारकं नवति, यदात्मनः परन्नवे सुखकारि तदेवानुष्ठानं विधेहीत्यर्थः ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जं जं समयं जीवो। आवसइ जेण जेण भावेण ॥ सो तम्मि तम्मि समए। सुहासुहं बंधए कम्मं ॥२४॥ व्याख्या—'जं जं इति' यस्मिन् यस्मिन् समये सूक्ष्मतरपरिमाणे काले जीवोऽयमात्माऽवसति वर्त्तते, आसक्तो भवतीति यावत्, येन येन भावेन परिणामेनात्मा यस्मिन् यस्मिन् समये वर्त्तते 'सो इति' स आत्मा तस्मिन् समये तद्रूपतया परिणमन् शुभाशुभं कर्म बध्नाति, शुभपरिणामे वर्त्तमानः शुभं बध्नाति, अशुभपरिणामे च वर्त्तमानोऽशुभं कर्म बध्नातीत्यर्थः ॥ २४ ॥ तस्मात् शुभ एव भावो विधेयो, न गर्वादिदूषित इत्याशंक्याह—

॥ मूलम् ॥—धम्मो मएण हुंतो। तो नवि सीउण्हवायविज्झडिओ ॥ संवच्छरमणसिओ। बाहुबली तह किलिस्संतो ॥ २५ ॥ व्याख्या—'धम्मो इति' धर्मश्चारित्ररूपो यदि मदेनाहंकारेणाऽभविष्यत् 'तो इति' तर्हि 'नवि इति' नैव संभाव्यते यत् शीतोष्णवातैर्विझटित व्याहतः पराभूत इति यावत्, येन शीतोष्णवातादिसहनरूपा बहवः परिषहाः क्रांता इति भावः, संवत्सरं एकं वर्षं यावत्, अनशितोऽशनं विना स्थितः, वर्षं यावदुपोषित

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यर्थः, बाहुबलीनामा मुनिलघुबंधून् कथं नमस्करोमीति स्थितः, ' तेहति ' तथाऽक्लिष्य-द्वाधामन्वभविष्यत्, यद्यहंकारेणापि धर्मोऽभविष्यत्तर्हि वर्षं यावद्बाहुबलिर्नाऽस्थास्यत् ॥२५॥ कथानकगम्योऽयं विस्तरार्थः, स चेत्थं—

भरतचक्रिणा षट्खंडविजयः कृतः, सर्वेषामष्टनवतिसंख्याकानां बांधवानामाकारणार्थं दूताः प्रेषिताः, दूतैस्तत्र गत्वोक्तं भवतो भरतः समाह्वयति, ततः सर्वेऽपि बांधवा मिलिता मनसि विचारं कर्तुं लग्नाः, यदयं भरतो लोभपिशाचेन ग्रस्तो मत्तो जातः, षट्खंडराज्यं गृहे प्राप्तं, तथाप्यस्य लोभतृष्णा न शांता, अहो लोभांधता! यदुक्तं—लोभमूलानि पापानि। रसमूलाश्च व्याधयः ॥ स्नेहमूलानि दुःखानि। त्रीणि त्यक्त्वा सुखी भव ॥ १ ॥ तथा चोक्तं—भोगा न भुक्ता वयमेव भुक्ता—स्तपो न तप्तं वयमेव तप्ताः ॥ कालो न यातो वयमेव याता—स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ २ ॥ अतो बलात्कारेणाप्ययं राज्यं गृहीष्यति, ततश्च तस्य सेवा कर्त्तव्या भविष्यति; एवं तस्य सेवां तु वयं न करिष्याम इति सर्वैरपि बांधवैरंगीकृतं; सर्वेऽपि श्रीऋषभस्वामिसमीपं निजवृत्तांतं निवेदनार्थं गताः, तत्र प्रभुं वंदित्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करौ योजयित्वा विज्ञपयामासुः, प्रभो मत्तोऽयं भरतोऽस्माकं राज्यं गृहीतुमुद्यतो, वयं क्व यामः? वयं तु श्रीतातदत्तैकदेशराज्येनापि संतुष्टाः स्मः, स तु षट्खंडराज्येनापि न संतुष्टः, इति तेषां वचनं श्रुत्वा प्रभुः प्राह किमेतया नरकांतया राज्यलक्ष्म्या? अनेन जीवेनानंतशो राज्यलक्ष्मीरनुभूता, तथापि न तृप्तो जातः, स्वप्नोपमोऽयं राज्यलीलाविलासः, यदुक्तं—

संपदो जलतरंगविलोला। यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चंचलमायुः। किं धनैः कुरुत धर्ममनिंद्यं ॥ १ ॥ अतो भो पुत्राः कोऽयं मोहविलासः? कस्य सुताः? कस्य राज्यं? कस्य नार्यः? किमपि सार्थे नागमिष्यतीति. यदुक्तं—श्वयाणि तिष्ठंति गृहेषु नार्यो। विश्रामभूमौ स्वजनाः स्मशाने॥ देहं चितायां परलोकमार्गे। कर्मानुगो याति स एव जीवः ॥ १ ॥ अतो राज्यं त्यजध्वं? कुरुध्वमक्षयं मोक्षराज्यं? इति प्रभोर्देशनां श्रुत्वा सर्वेऽपि प्रव्रजिताः. निरतिचारं चारित्रं च प्रपन्नाः, दूतैरागत्य भरताय तन्निवेदितं, तदा तेनापि बंधुसुतानाकार्य निजं निजं राज्यं दत्तं. अथोऽयोधायामागतस्यापि भरतस्य चक्रमायुधशालायां न प्रविशति, तदा सुषेणसेनापतिनागत्य नृपाग्रे प्रोक्तं, प्रभो चक्रमायुधशालायां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नायाति, चक्रिणोक्तं किं कारणं? सुषेणेनोक्तं स्वामिन्नद्यापि कोऽपि रिपुः स्थितो विलोक्यते; चक्रिणोक्तं षट्खंडमध्ये मम शिरसि कोऽपि रिपुर्नास्ति. सुषेणेनोक्तं स्वामिन् भवतामनुजो बाहुबलिनामा भवदाज्ञां न मन्यते. अतोऽनुजोऽपि सन् यो वृद्धभ्रातुराज्ञां न मन्यते, स रिपुरेव ज्ञेयः, यस्याज्ञा स्वगृहेऽपि न चलति स किं स्वामी? अतः स आज्ञावर्त्ती विधेयः, भरतेन चिंतितं मन्नयात्सर्वैरपि बांधवैश्चारित्रं गृहीतं, अधुना तु मद्बाहुरेक एव बंधुरास्ते, सोऽप्यनुजस्तस्योपरि किं विधीयते? सुषेणेनोक्तं स्वामिन्नत्र विचारो न विधेयः, किं तेन गुणहीनेन बंधुना? स्वर्णमय्यपि च्छुरिका हृदये क्षेप्तुं न योग्या; अतो दूतं मुक्त्वा तमाकारयत? परं तु सर्वथापि स नाऽऽयास्यति; इति सुषेणवचनात्संजातामर्षो भरतः सुवेगनामानं दूतमाहूय प्रोक्तवान्, तक्षशिलायां मदीयानुजबाहुबलिसमीपं व्रज? तमाकार्यं समागच्छेति भरतवचनं श्रुत्वा शिरस्याज्ञां माल्यमिव निधाय रथमारुह्य सपरिकरः सुवेगश्चचाल, मार्गे व्रजतस्तस्य प्रथमं बहून्यपशकुनानि जातानि, तैर्वार्यमाणोऽपि स्वाम्याज्ञापालनोद्यतश्चचाल, कियद्भिर्दिनैर्बहलीदेशं प्राप. तन्निवासिभिर्लोकैः पृष्टं कोऽयं? क्व व्रजति? तदनुच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रैरुक्तं सुवेगनामायं भरतदूतो बाहुबलेराकारणार्थं व्रजति. तदा लोकैः पुनरप्युक्तं कोऽयं भरतः? सुवेगसेवकैरुक्तं षट्खंडाधिपतिर्जगद्विभुर्भरतो लोके विख्यातोऽस्ति. तदा लोकैरुक्तं एतावद्दिनपर्यंतमस्माभिस्तु न श्रुतः, क्व स्थितः? अस्माकं तु देशे स्त्रीणां स्तनोपरिवर्त्तिनीषु कंचकीषु भरतचित्रं यद्वर्त्तते तत् श्रूयते, परं तु स न श्रुतः, अस्माकं विभुः क्व? क्व चायं भरतः? योऽस्मत्स्वामिभुजदंडप्रहारं सहते तादृशः कोऽपि नास्तीति लोकमुखाद्बाहुबलिबलप्रकर्षं शृण्वन् स चकितः सन् तक्षशिलायां प्राप. बाहुबलेरास्थानसन्नायामागतः, दौवारिकेण नृपाग्रे दूतागमनं निवेदितं, तदाज्ञया रथादुत्तीर्य दूतो बाहुबलिसमीपमेत्य तच्चरणौ ननाम.

बाहुबलिना दूताय सर्वमपि भ्रातृकुशलादिकं पृष्टं, दूतेनोक्तं कुशली तव सोदरो भरतः, कुशलिनी चाऽयोध्यापुरी, कुशलिनस्तस्य सपादकोटयः पुत्राः, यस्य गृहे चतुर्दशरत्ननवनिधानादिमहत्यैश्वर्यसंपत्, तस्याऽकुशलं विधातुं कः क्रमः? परंतु सर्वापि संपत्प्राप्ता, तथापि स्वकीयसहोदरदर्शनाय तस्य महत्युत्कंठास्ति. अतस्त्वं तत्रागत्य स्वसंगमजनितसुखातिरेकेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं परमप्रमोदयुक्तं कुरु? यदि नागमिष्यसि तदा तवोपरि कुपितः सन् स महतीं बाधामुत्पादयिष्यति. यस्य द्वात्रिंशत्सहस्रराजानः सेवां कुर्वंति, तस्य चरणसेवनया तवापि न कोऽप्युपहासः, न दुःखं पंचत्रिः सहेति वचनात्. अतो मानं त्यक्त्वा समागच्छेति वचो निशम्य क्रुद्धो ललाटे त्रिवलिं विधाय भुजास्फोटं कुर्वन् जगाद. भोः कियन्मात्रं भरतः? कियन्मात्राणि तस्य चतुर्दश रत्नानि? कियन्मात्रास्तस्य सेवकाः? एतस्य भरतस्य किं तद्विस्मृतं? यत्पूर्वं गंगातीरे बाल्यावस्थायामाकाशे कंदुकवदुल्लालितः, पश्चाद्गगनान्निपतन् कराभ्यां च धृतः, तन्मदीयं बलमेतस्य विस्मृतं विलोक्यते, यत्त्वं प्रेषितोऽसि. एतावद्दिनपर्यंतं मया स वृद्धभ्राता पितेवाराधितः, अधुना तु मयोपेक्षितः, किं तेन गुणहीनेन लोभातुरेण वृद्धेनापि भ्रात्रा? येनाष्टानवतिसंख्यानामपि सोदराणां राज्यानि गृहीतानि, ते तु कातरत्वेन लोकापवादभीत्या राज्यं त्यक्त्वा संयमं ललुः, परं त्वहं न सहिष्यामि, मदीयभुजप्रहारं केवलं स एव भरतः सहिष्यति, परंतु तत्सहनार्थमन्यः कोऽपि नाऽऽयास्यति; ततो याहि? अवध्योऽसि, मदीयदृष्टेरपसरेति क्रोधारुणलोचनं सूर्यमंडलमिवोद्दीप्तं तदीयमुखमालोक्य सुवेगो भी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तः सन् शनैः शनैरपससार. पश्चाद्वलित्वा कृतमानो भूत्वा रथमारुह्य निर्गच्छतिस्म.

बहलीदेशं विलोकयन् लोकवाक्यानि शुश्राव. अहो कियन्मात्रं भरतः! यदस्मत्स्वामिना सार्द्धं युद्धं कर्त्तुं वांछति, परमेतत्समानः कोऽपि मूर्खो नास्ति, येन सुप्तसिंहोद्बापनं कृतमिति लोकानां वाक्यानि शृण्वन् सुवेगो विस्मयं प्राप. अहो! यद्देशनिवासिनो लोका अप्येवं शौर्यं रक्षंति तत्खलु स्वामिप्रभावोऽयं, न त्वेषां प्रभावः, भरतेन किमिदं कृतं? असमंजसमेतत्कृतं, इति विचारयन् कियद्भिर्दिनैर्लोकान् भापयन् सोऽयोध्यां पुरीं प्राप. भरताय तेन सर्वमपि निवेदितं, स त्वदीयोऽनुजस्त्वां तृणवन्मन्यते. किं बहुनेति दूतवाक्यं श्रुत्वा ससैन्यो भरतस्तंप्रति चचाल, महती भरतसेना चलिता, दिक्चक्रं चलितं यदुक्तं सैन्यस्वरूपं —दिक्चक्रं चलितं भयाज्जलनिधिर्जातो महाव्याकुलः। पाताले चकितो भुजंगमपतिः क्षोणीधराः कंपिताः॥ भ्रांता सा पृथिवी महाविषधराः क्ष्वेडं वमंत्युत्कटं। वृत्तं सर्वमनेकधा दलपतेरेवं चमूनिर्गमे॥१॥ अष्टादशकोटीप्रमिताश्ववारं दलं मेलयित्वा भरतः स्वहस्तिरत्नमारुह्य बाहुबलिजयार्थं निर्गतः, कियद्भिर्दिनैर्बहलीदेशं प्राप्तः, बाहुबलिनापि श्रुतं भरतः समा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गतः, महतीं सेनां मेलयित्वा त्रिलक्षपुत्रपरिवृतः सोमयशानामानं स्वपुत्रं सेनापतिं स्थापयित्वा स महता दलेन निर्गतः, नग्नयमपि सैन्यं सन्मुखं मिलितं, नग्नयोरपि सैन्ययोश्चतुरशीतिसहस्राणि रणतूर्याणां निनादैर्नेरीणां नांकारैर्निस्वनानां निर्घोषैः कर्णयोः पतितः शब्दोऽपि न श्रूयते, नग्नटै रणभुवि विकटैर्गाहितानेकसंघट्टैर्मर्दितपंचाननन्नटैर्विस्तारितयशःपटैर्नटैर्युद्धमारब्धं, महान् वीरध्वनिरभूत्, शब्दाद्वैतमयं जगज्जातं.

'एके वै हन्यमाना रणभुवि सुनटा जीवशेषाः पतंति । ह्येके मूर्छां प्रपन्नाः स्युरपि च पुनरुन्मूर्छिता वै पतंति ॥ मुंचंत्येकेऽट्टहासान्निजपतिकृतसन्मानमाद्यं प्रसादं । स्मृत्वा धावंति मार्गे जितसमरनयाः प्रौढिवंतो हि नक्त्या ॥ १ ॥ एवं महति युद्धे केचिन्नटा गजघटां चरणे गृहीत्वा नभसि भ्रामयंति; केचिदुछलंतो नटान् भूमौ पातयंति, केचित्सिंहनादं कुर्वंति, केचिद्भुजास्फोटेन वैरिहृदयं विदारयंति, एवं स्वामिना भ्रूसंज्ञया हक्कारितं नटैरुत्कटं रणमारब्धं, यदुक्तं—राजा तुष्टोऽपि नृत्यानां । मानमात्रं प्रयच्छति ॥ ते तु सन्मानमात्रेण । प्राणैरप्युपकुर्वते ॥ १ ॥ मित्रं मित्राय वक्ति कातरो मा भव? रणे नग्नयथा सौख्यं, जिते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सति इह लोके सौख्यं मृते सति सुरवल्लभालिंगनादिजनितं सौख्यं लभ्यते. तथा चोक्तं— जिते च लभ्यते लक्ष्मी–र्मृते चापि सुरांगना ॥ क्षणविध्वंसिनी काया । का चिंता मरणे रणे ॥ १ ॥ एवं युद्धे जायमाने द्वादश वर्षाणि व्यतीतानि. किमपि सैन्यं न पश्चाद्वलितं; एतस्मिन्नवसरे देवानां कोटयो युद्धविलोकनार्थं नभोमंडलमार्गेणागताः, सौधर्मेंद्रेणागत्य चिंतितं अहो विषमा कर्मणां गतिः! यत्सोदरावपि राज्यलवनिमित्तं मनुष्याणां कोटिं विघट्टयतः, अहोऽहं तत्र गत्वा युद्धं निवारयामीति बुद्ध्या इंद्रेणागत्य भरताय निवेदितं, भो षट्खंडाधिपते! किंकरीभूताऽनेकभूमिपते हे प्रभो किमिदमारब्धं त्वया? हेलया किं जगत्संहरणं करोषि? श्रीऋषभेण या चिरकालं पालिता, तां प्रजां किं संहरसि? सुपुत्रस्य तवैतदाचरणं न घटते; यत्पित्राऽाचरितं तत्पुत्रेणाप्याचरितव्यं; इत्यपसर लोकसंहरणात्. भरतेनोक्तं तातभक्तैर्भवद्भिर्यदुक्तं तत्सत्यं, अहमपि जानामि, परं किं करोमि? चक्रमायुधशालायां नाऽागच्छति, एकवारं यदि मम समीपेऽयं समागच्छति तदाऽन्यत्किमपि मम कृत्यं नास्ति, अस्य राज्येन मम कृत्यं नास्ति, अतो गत्वा तमेव मदनुजं कथयध्वं? इति भरतवाक्यं श्रुत्वा श-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रो बाहुबलिपार्श्वे गतः, बाहुबलिना महती भक्तिः कृता, भक्तं च स्वामिन्नादिश्यतां किमागमनप्रयोजनं? इंद्रेणोक्तं तवैतन्न घटते यत्पितृतुल्येन वृद्धभ्रात्रा सार्द्धं युद्धं करोषि. अतस्तं गत्वा नमस्वापराधं च क्षामय? लोकसंहरणादपसर? बाहुबलिनोक्तमेतस्यैवायं दोषः, केनात्राहूतोऽयं भरतः? किमर्थमत्रागतः? अतृप्तस्यैतस्य लज्जा नास्ति, सर्वेषां बंधूनां राज्यानि गृहीत्वा मदीयं राज्यं गृहीतुमयमागतोऽस्ति; परंत्वनेन न ज्ञातं, यन्नहि सर्वेषु विलेषु मूषका एव, अतोऽहं नापसरामि, मानहानेः प्राणहानिरेव वरं, तथा चोक्तं—

अधमा धनमिच्छंति । धनमानौ च मध्यमाः ॥ उत्तमा मानमिच्छंति । मानो हि महतां धनं ॥ १ ॥ वरं प्राणपरित्यागो । मा मानपरिखंडनं ॥ मृत्योस्तत्क्षणिका पीडा । मानखंडे दिने दिने ॥ २ ॥ इति बाहुबलेर्नैश्चयिकं वचः श्रुत्वा इंद्रेणोक्तं, एवं चेन्निश्चयस्तर्हि ज्ञान्यामेव बंधुभ्यां द्वंद्वयुद्धं विधेयं, किमर्थं लोकसंहारोऽयं? पंचयुद्धानि स्थापितानि, दृष्टियुद्धं, वाग्युद्धं, बाहुयुद्धं, मुष्टियुद्धं दंडयुद्धं चेति. भरतेनापि तान्यंगीकृतानि, द्वौ बांधवौ सैन्यं मुक्त्वा सन्मुखमागतौ. प्रथमं दृग्युद्धं प्रारब्धं, दृष्ट्या दृष्टौ मिलितायां सत्यां प्रथमं चक्रिनयने

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अश्रुजलाविले जाते. साक्षिकैर्देवैः कथितं पराजितोऽयं चक्री, जितोऽयं बाहुबलिः, एवं पंचभिरपि युद्धैर्जितो बाहुबलिः, विलक्षीभूतेन चक्रिणा मर्यादां मुक्त्वा चक्रं मुक्तं, बाहुबलिनोक्तं मैवं कुरु? सतां मर्यादातिक्रमो नैव युक्तः, तथापि तेन चक्रं मुक्तं, बाहुबलिना मुष्टिरुत्पाटिता, चिंतितं चानया मुष्ट्या सचक्रमेनं चूर्णयामि. चक्रं बाहुबलिसमीपमागत्य त्रिःप्रदक्षिणीकृत्य पश्चाद्वलितं, गोत्रमध्ये चक्रं न चलतीति. अथ बाहुबलिना चिंतितमनया वज्रतुल्यया मुष्ट्यैनं भरतं मृन्मयभांडमिव चूर्णीकरोमीति. पुनरपि तेन विचारितमहो सुखलवनिमित्तं किमियं बांधवहानिर्विमृष्टा! धिक् नरकांतं राज्यं! धिग्विषयान्, धन्या मदनुजा येऽनर्थहेतुकं राज्यं त्यक्त्वा जगृहुः संयमं. इति जातवैराग्येण बाहुबलिना मुष्टिर्मस्तके न्यस्ता, पंचमुष्टिको लोचः कृतः, अर्पितो देवतया रजोहरणादिसाधुवेषः, चारित्रं गृहीतं.

गृहीतवेषं निजसहोदरं दृष्ट्वा भरतः स्वकर्मणा लज्जितः, नयनयोरश्रूणि वर्षन्मुहुर्मुहुश्चरणयोः पपात धन्यस्त्वं क्षमस्व मदीयापराधं? अनुगृहाण राज्यलक्ष्मीं? बाहुबलिसाधुनोक्तं अनित्योऽयं राज्यलक्ष्मीविलासः, अनित्यं यौवनमनित्यं शरीरं, क्षुरंता विषयाः, इत्याद्यु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पदेशदानेन भरतं वैराग्यवासनावशं विधाय स तत्रैव ध्यानमुद्रया तस्थौ. मनसि विचारयति अहमस्थोऽहं कथं लघुबांधवान् वंदिष्ये? इति मानोद्धुरकंधरः स कायोत्सर्गेण तस्थौ. भरतोऽपि तं वंदित्वा सोमयशसे बाहुबलिराज्यं दत्वा स्वस्थानं गतः, बाहुबलिरपि वर्षं यावत् शीतवातातपादिपरिषहान् सहन् सन् दवदग्धस्थाणुकल्पं शरीरं कृतवान्, वल्लिभिरन्निवेष्टिता तनुः, प्ररूढा दर्भशून्यः, चरणयोर्वल्मिकाः समुद्गताः, प्रसूताः कूर्चादौ शकुनयश्चेति. ततो भगवता बाहुबलिभगिन्यौ ब्राह्मीसुंदरीनाम्न्यौ तत्प्रतिबोधनार्थमादिष्टौ, तत्र गत्वा भगवतीभ्यामेवं वक्तव्यं, हे बांधव गजादवतरेत्युपदिश्य तत्पार्श्वं प्रहिते. ते भगिन्यौ तत्र गत्वा भ्रातरं वंदित्वैवं कथयतःस्म, हे बंधो गजादवतर? इति भगिनीवचनं श्रुत्वा स मनसा दध्यौ अहो मुक्तसंगस्य मे हस्ती कुतः? भगिन्यौ किं कथयतः! आ ज्ञातं मान इति हस्ती, सत्यमेवोक्तं, धिग्मां दुष्टचित्तधारकं! वंद्यास्ते मदनुजाः, व्रजामि वंदितुमित्युत्पाटितचरणः केवलज्ञानमापदिति तत्र गत्वा प्रभुं वंदित्वा स केवलिसभायामुपविष्ट इति. अतो मदेन धर्मो न भवतीति युक्तमुक्तं. मुक्तिसुखाभिलाषिणा धर्मकर्मणि विनय एव विधेयो न तु मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न इत्युपदेशः ॥

॥ मूलम् ॥—निअगमइविगप्पिअ–चिंतिएण सच्छंदबुद्धिरइएण ॥ कत्तो पारत्त हियं । कीरइ गुरुअणुवएसेणं ॥ २६ ॥ व्याख्या—' निअगमइ इति ' निजकमत्या स्वकीयबुद्ध्या विकल्पितं स्थूलावलोकनं, चिंतनं सूक्ष्मावलोकनं, तेन स्वकीयमतिकल्पनयेत्यर्थः, स्वच्छंदबुद्धिचरितेन स्वतंत्रमतिचेष्टितेनेत्यर्थः । ' कत्तो इति ' कुतः ' पारत्त ' परत्र परे लोके हितमात्मनो हितं ' कीरइ इति ' क्रियते? गुरुअनुपदेशत उपदेशाऽयोग्येन गुरुकर्मणेति भावः, स्वेच्छाचारिणः परत्र हितं न प्राप्नुवंतीत्यर्थः ॥ २६ ॥

॥ मूलम् ॥—अद्धो निरोवयारी । अविणीअ गव्विअ निरुवणामो ॥ साहूजणस्स गरहिअ । जणेवि वयणिज्जयं लहइ ॥ २७ ॥ व्याख्या—' अद्धो ' इति. स्तब्धोऽनमनशील इत्यर्थः, निरुपकारी कृतमुपकारं न जानाति, कृतघ्न इत्यर्थः, अविनीत आसनदानादिविनयविकल इत्यर्थः, गर्वितः स्वगुणोत्सेकवान्, निरुवनामो गुरुष्वपि न प्रणतिं विदधाति, एवंभूतः साधुजनस्य गर्हितो भवति, साधवस्तस्य गर्हां कुर्वंति, जनेऽपि लोकमध्येऽपि वचनीयतां,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अयं दुष्टशील इति हीलनां प्राप्नोति, अतो विनीत एव श्लाघां प्राप्नोति. ॥ २७ ॥

॥ मूलम् ॥—थोवेणवि सप्पुरिसा । सणंकुमारव्व केइ बुझंति ॥ देहरुक्खणपरिहाणी । जं किर देवेहिं से कहियं ॥ २८ ॥ व्याख्या—' थोवेण इति ' स्तोकेनापि निमित्तेनेत्यर्थः, सत्पुरुषाः सज्जनाः सुलभबोधिन इत्यर्थः, सनत्कुमार इव तुर्यचक्रिवत् केचिदुत्तमा बुद्ध्यंते, प्रतिबोधं प्राप्नुवंति. देहे शरीरे क्षणेन स्वल्पकालेन परिहानिरुपहानिर्यस्मात्कारणात् किलेति श्रूयते, ' देवेहिं इति ' देवाभ्यां ' से इति ' तस्य सनत्कुमारस्य कथितं, इदमेव तस्य बोधकारणं ॥ २८ ॥ कथानकगम्योऽयं विस्तरार्थः, स चेत्थं—

गजपुरनगरे सनत्कुमारनामा चक्री बभूव, सोऽतीवरूपवान् षट्खंडराज्यं करोति. एकस्मिन्नवसरे शक्रः सभायां सनत्कुमारचक्रवर्त्तिरूपं वर्णयामास, एतेन समः कोऽपि भूतले रूपवान्नास्ति. ततो द्वाभ्यां देवाभ्यामिंद्रवचनं नांगीकृतं. तत्कुतूहलावलोकनार्थं द्विजरूपौ भूत्वा तौ गजपुरमागतौ. एतस्मिन्नवसरे स्नानकरणवेलायामासनस्थितमाभूषणरहितं सुगंधितैलेनाभ्यक्तांगं सनत्कुमारं दृष्ट्वा तद्रूपमोहितौ तौ मुहुर्मुहुः शिरसी धूनयामासतुः, चक्रिणा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृष्टं किं कारणं शिरोधूनने ? ताभ्यामुक्तं देव यादृशं ऋषभदर्शनकौतुकं श्रुतं तादृशमेव दृष्टं, इति द्विजवचनं श्रुत्वा चक्री प्राह भो अधुना एतदवस्थायां मदीयं रूपं किं विलोक्यते? स्नानकरणानंतरं परिहितोत्तमनेपथ्यस्य धृतालंकारस्य शिरसि धृतछत्रस्य चामरैर्वीज्यमानस्य द्वात्रिंशत्सहस्रै राजभिः सेव्यमानस्य मम रूपं विलोकनीयं; अधुना किं विलोक्यते ? इति चक्रिवचः श्रुत्वा ताभ्यां चिंतितं, अहो! उत्तमस्य स्वमुखेन स्वप्रशंसां कर्त्तुं न युज्यते. यदुक्तं—न सौख्यसौभाग्यकरा नृणां गुणाः । स्वयं गृहीता युवतीकुचा इव ॥ परैर्गृहीता हितयं वितन्वते । न तेन गृह्णंति निजं गुणं बुधाः ॥ १ ॥

चक्रिवचः प्रमाणीकृत्य गतौ विप्रौ. चक्रिणि सभायामुपविष्टे पुनरप्यागतौ, रूपं विलोकयित्वा विषण्णौ जातौ. चक्रिणा प्रोक्तं किं विषादकारणं ? तावाहतुः संसारविलसितं. चक्री प्राह कथं ? ताभ्यामुक्तं यद्भवतः प्राग् रूपं दृष्टं ततोऽनंतगुणहीनमिदानीं ते रूपं वर्त्तते. चक्रिणोक्तं कथं जानीतः ? ताबाहतुरवधिज्ञानेनेति. चक्रिणोक्तं तत्र प्रमाणं किं ? तावूचतुः भो चक्रिन् मुखस्थं तांबूलरसं भूमौ थूत्कृतं विलोकय ? मक्षिकास्तदुपरि स्थित्वा मरणं प्राप्नुवं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति. अनेनाऽनुमानेन जानीहि तव शरीरं विषरूपं जातं. सप्त महांतो रोगाः शरीरे समुद्भूताः, इति देववचः श्रुत्वा चक्री चिंतयति, अनित्योऽयं देहः, अस्मिन्नसारे देहे किमपि सारं नास्ति. यदुक्तं—इदं शरीरं परिणामदुर्बलं । पतत्यवश्यं श्लथसंधिजर्जरं ॥ किमौषधैः क्लिष्यसि मूढ दुर्मते । निरामयं धर्मरसायनं पिब ॥ १ ॥ पुनरप्युक्तं—कस्तूरी पृषतां रदाः करटिनां कृत्तिः पशूनां पयो । धेनूनां बदमंमलानि शिखिनां रोमाण्यवीनामपि ॥ पुंस्त्नायुवशाविषाणनखरस्वेदादिकं किंचन। स्यात्कस्याप्युपकारि मर्त्यवपुषो नाऽमुष्य किंचित्पुनः ।२।

इति वैराग्यपरायणेन राज्ञा राज्यश्रियं त्यक्त्वा संयमश्रीर्गृहीता. भुजंगः कंचुकीमिव पश्चात्तृणमपि निजर्द्धिं न विलोकयति. सुनंदादीनां निजस्त्रीणां विलापान् शृण्वन्नपि मनाग् न चचाल. षण्मासीं यावन्निधयो रत्नानि सेवकाश्च पृष्ठे लग्नाः, परंतु तेन पश्चादपि नावलोकितं. षष्ठक्षपणस्यांते पारणं करोति. पारणकेऽपि विकृतित्यागी धर्मानुरागी रोगाक्रांतकायो निर्मायो भूमौ विजहार. एतस्मिन्नवसरे पुनरपि सौधर्मेंद्रेणोक्तं अहो धन्योऽयं सनत्कुमारनामा मुनिः, महता रोगेण दूयमानेऽपि शरीरे औषधादिस्पृहां न करोति. धन्योऽयमितींद्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वचः श्रुत्वा अश्रद्दधानौ सुरौ द्विजरूपं विधाय तत्रागतौ. सनत्कुमारमुनेः पार्श्वमेत्यैवमूचतुः, भो मुने तव शरीरं रोगजर्जरं, अतीवपीडितं विलोक्यते, आवां वैद्यौ स्वः, त्वदाज्ञा चेत्प्रतीकारं कुर्वः, मुनिनोक्तं कोऽयमनित्यस्य प्रतीकारः? भवतां देहरोगापनयने शक्तिर्न तु कर्मरोगापनयने. तादृशी तु शक्तिर्ममाप्यस्तीति अंगुलिका थूत्कृतेन लेपयित्वा दर्शिता. हिरण्मयी जाता. एतादृशी शक्तिर्वर्त्तते, परं त्वनया का सिद्धिः? यावत्पर्यंतं कर्मरोगक्षयो न जातस्तावत्पर्यंतं देहरोगक्षयेण किं? अतो नास्ति मे कृत्यं रोगप्रतीकारेण, सुरौ चमत्कृतौ, मुनिं वंदित्वा स्वस्वरूपं निवेदयित्वा स्वर्गं गतौ. सनत्कुमारोऽपि वर्षाणां सप्तशतीं यावद्रोगाननुन्नूय वर्षाणामेकं लक्षं यावन्निरतिचारं चारित्रं पालयित्वैकावतारित्वेन तृतीये स्वर्गे समुत्पन्नः, ततोऽनंतरं महाविदेहे सिद्धिं प्राप्स्यतीत्युपनयः ॥ अथायुरनित्यतां दर्शयति—

॥ मूलम् ॥—जइ ता लवसत्तमसुरा । विमाणवासिवि परिवुडंति सुरा ॥ चिंतिज्जंतं सेसं । संसारे सासयं कयरं ॥ २९ ॥ व्याख्या—' जइ इति ' यदि तावल्लवसप्तमाः सुराः सर्वानुत्तरविमानवासिनो देवाः, तेषां विमानान्यनुत्तरविमानानि तन्निवासिनोऽपि, अर्थादनुत्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रविमानस्थिता अपि देवा इत्यर्थः, एतादृशा अपि सुरा देवा यदि तावत्प्रतिपतंति, आयुषः क्षये ततश्च्यवंति, तान्यायूंष्यपि पूर्णानि नवंति, तर्हि चिंत्यमानं विचार्यमाणं शेषमसारं, अनुत्तरसुरापेक्षया हीनं, संसारेऽस्मिन् जीवलोके शाश्वतं स्थिरं कतरं? किं वस्तु शाश्वतं? अपि तु न किमपीत्यर्थः, अतो धर्म एव नित्यः ॥ २ए ॥

॥ मूलम् ॥—कह तं नसइ सुक्कं । चिरेणवि जस्स दुक्कमल्लिअइ ॥ जं च मरणावसाणे । नवसंसाराणुबंधि च ॥ ३० ॥ व्याख्या—' कह इति ' कथं तन्नण्यते सुखं? अपि तु तत्सुखं सुखं न कस्य; सुचिरेणापि बहुकालेनापि पल्योपमसागरोपमानंतरमित्यर्थः, यस्य सुखस्यांते दुःखमालीयते आश्लिष्यते, तत्सुखानंतरं दुःखं, तत्सुखं दुःखमेवेत्यर्थः, यत् यस्मात्कारणात् मरणावसाने मरणप्रांते मरणावस्थायामित्यर्थः, तत्सुखं कथं नूतं? नवो नारकाद्यवतारस्तस्मिन् संसारः परिभ्रमणं, तमनुबंधते इत्येवंशीलं, यदनंतरं गर्भावासादि दुःखं प्राप्यते तत्कथं सुराणामपि सुखं? ॥ ३० ॥ गुरुणा कथ्यमानमपि गुरुकर्मणां न लभ्यते इत्याह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—उवएससहस्सेहिंवि । बोहिज्जंतोवि न बुज्झइ गुरुकम्मा ॥ जह बंभदत्तराया । उदाइनिवमारगो चेव ॥ ३१ ॥ व्याख्या—' उवएस इति ' उपदेशानां सहस्रैरपि सहस्रसंख्याकैरप्युपदेशैरित्यर्थः, बोध्यमानोऽपि प्रतिबोध्यमानोऽपि न बुध्यते, न प्रतिबोधं प्राप्नोति कोऽपि गुरुकर्मा जीवः, ' जहेति ' यथा ब्रह्मदत्तराजा उपदेशसहस्रैरपि प्रतिबोधं न प्राप्तः, चाऽपरमुदायिराज्ञो मारकस्येव, येन द्वादश वर्षाणि तपस्तप्तं, परंतु न भव्यत्वं प्राप्तं, एतौ दृष्टांतौ संप्रदायगम्यौ ॥ ३१ ॥ अथ दृष्टांतद्वयं लिख्यते, तत्र प्रथमं ब्रह्मदत्तभवनिबद्धं चित्रसंभूतिमुनिस्वरूपं किंचिल्लिख्यते, तत्रापि पूर्वभवस्वरूपं—

पूर्वभवे कस्मिंश्चिद् ग्रामे चत्वारो गोपा अभूवन्, ते भद्रकपरिणामिनः, एकदा ते चत्वारोऽपि गोपा ग्रीष्मकाले गाश्चारितुं वने गताः, चत्वारोऽपि मध्याह्नसमये एकीभूय गोष्ठीं कुर्वंति; एतस्मिन्नवसरे कश्चित्साधुर्मार्गभ्रष्टस्तस्मिन् वने मार्गमलभमानो घनपिपासया रुद्धकंठः शुष्यत्तालुपुटो वृक्षछायायामासीनस्तैर्दृष्टः, चिंतितं च तैरहो कोऽयं भविष्यतीति चत्वारोऽपि मुनिसमीपमागताः, ते गोपास्तृषातुरं महतीं बाधां प्राप्तं कंठगतप्राणं एतादृशं मु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निं दृष्ट्वा मनसि चिंतयंति, अहोऽयं जंगमतीर्थभूतो मुनिः पानीयेन विना मरणं प्राप्स्यतीति, अतः पानीयमानीय यद्येतस्यार्प्यते तदा महत्पुण्यं भवति, पानीयार्थं वनमवलोकितं, परं पानीयं न मिलितं, तदा ते एकीभूय गा दोहयित्वा दुग्धं च गृहीत्वा साधुसमीपमागताः, साधुमुखे दुग्धबिंदून् सिंचयित्वा सावधानः कृतः, साधुः सचेतनो भूत्वा मनसि चिंतयति, अहो एतैर्महानुपकारः कृतः, यज्जीवितदानं दत्तं, तेन साधुना तान् सरलस्वभावान् दृष्ट्वा देशना दत्ता, तां देशनां श्रुत्वा ते सर्वेऽपि वैराग्यमापन्नाः, चतुर्भिरपि दीक्षा गृहीता, सम्यक्त्वं प्रतिपन्नं, तान् सार्थे गृहीत्वा साधुरन्यत्र विजहार; ते चत्वारोऽपि चारित्रं पालयंति.

तन्मध्ये द्वौ चारित्राऽवज्ञां कुरुतः, अहो साधुवेषः समीचिनोऽस्ति परं स्नानादि विना देहशुद्धिः कथं स्यात्? मलिनवस्त्रधारणं, दंतानामशौचं, एतत्कष्टमिति चारित्रं विराधितं. द्वाभ्यां तु निरतिचारं चारित्रं पालितं. ताभ्यां तस्मिन्नेव भवे केवलज्ञानं प्राप्य सिद्धिसुखं प्राप्तं. यौ च चारित्रविराधकौ ताभ्यामंतकालेऽनालोच्यैव मृत्वा स्वर्गसुखं प्राप्तं. तौ चिरकालं यावत्तत्र देवलोके सुखं भुंक्त्वा ततश्च्युत्वा, दशार्णदेशे कस्यचिद्विप्रस्य गृहे एका दासी वर्त्तते,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

या च गृहकर्म करोति, साधुवेषनिंदनात्तस्या दास्याः कुक्षौ पुत्रत्वेनोत्पन्नौ तौ गोपजीवौ. अनुक्रमेण यौवनं प्राप्तौ गृहकर्म कुरुतः, एकस्मिन् काले वर्षासमये क्षेत्ररक्षणार्थं द्वावपि भ्रातरौ गतौ. मध्याह्नसमये द्वयोर्मध्यादेको दासः क्षेत्रसमीपस्थवटद्रुमतले शीतलछायायां सुप्तोऽस्ति. तस्मिन् समये वटकोटरमध्यादेकः सर्पो निर्गतः, तेन सर्पेणागत्य स चरणयोर्दष्टः, तस्मिन्नवसरे दैवयोगादन्योऽपि भ्राता तत्रागतः, तेन सर्पो दृष्टः, गालिर्दत्ता, अरे दुरात्मन् मदीयं सहोदरं हत्वा क्व यासीति वचनं श्रुत्वा क्रुद्धेन सर्पेणोत्प्लुत्य सोऽपि दष्टः, द्वावपि बांधवौ मृतौ. द्वितीयभवे कालिंजरनाम्नि पर्वते एकस्या हरिण्याः कुक्षौ मृगत्वेनोत्पन्नौ. अतीव परस्परं स्नेहलौ जातौ. एकस्मिन्नवसरे केनापि व्याधेन बाणप्रहारेण तौ द्वावपि हतौ. ततस्तृतीये भवे गंगानदीतीरे हंसीकुक्षौ हंसत्वेनोत्पन्नौ. तत्रापि परमस्नेहयुक्तौ गंगातीरस्थानां कमलानां बिसानि भक्षयतः, सुखेन कालं च गमयतः, एतस्मिन्नवसरे केनापि व्याधेन प्रसारिते जाले तद्धंसयुगलं पतितं; तेन तौ द्वावपि हंसौ हतौ. ततश्चतुर्थे भवे साधुवेषजुगुप्साफलेन काशीभूमौ कस्यापि चाण्डालस्य गृहे पुत्रत्वेनोत्पन्नौ. तेन चांडालेन बहु धनं व्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यित्वा तयोः पुत्रयोश्चित्र इति संभूत इति च द्वयोर्नामनी दत्ते. पूर्वभवस्नेहेन परस्परमतीव-रागयुक्तौ क्षणमात्रमप्येकैकस्य वियोगं न सहतः। एतस्मिन्नवसरे तस्य नगरस्य यो राजा वर्त्तते, तस्य सभायां नमुचिनामा प्रधानो वर्त्तते, स राज्ञोऽतीवविश्वासपात्रं. अथ स नमुचिनामा मंत्री नृपस्य पट्टराज्ञया साई लग्नः, प्रतिदिनं तया साई भोगान् विलसति, एवं तया साई तस्यातीवस्नेहानुबंधो जातः, सा पट्टराज्ञ्यपि स्वं भर्त्तारमवगणय्य तेन नमुचिना साई भोगान् भुंक्ते. अहो अपूर्वेयं कामांधता! यदुक्तं—

दिवा पश्यति नो घूकः। काको नक्तं न पश्यति ॥ अपूर्वः कोऽपि कामांधो। दिवा नक्तं न पश्यति ॥ १ ॥ पुनरप्युक्तं—यां चिंतयामि सततं मयि सा न रक्ता। साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥ अस्मत्कृते च परितुष्यति काचिदन्या। धिक् तां च तं च मदनं च इमां च मां च ॥ २ ॥ एवं बहुषु दिनेषु गतेषु तत्पापं कुष्ठमिव स्फुटित्वा निर्गतं. एकदा राज्ञा तद् ज्ञातं. अहो दुष्टोऽयं पापात्मा, येनैतादृशं कर्म कृतं. अनेन स्वहस्तेनैव मरणं मार्गितं. बुद्धिमानप्ययं खलत्वादुपेक्ष्यः, यदुक्तं—खूणइ घूणइ कुमाणस। ए त्रिहुं एक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सदान ॥ जिहां जिहां करे निवासमो । तिहां तिहां फेमे गान ॥ १ ॥ अतोऽयं वध्य इति विचार्य चांमालमाहूयोक्तमेनं वध्यभूमौ नीत्वा मारय ? तेन चांमालेनापि स नमुचिर्वध्यभूमौ नीतः, तत्र चांमालेन विचारितमहो कर्मवशादेतज्जातं, विनाशकाले बुद्धिमतामपि बुद्धिर्नश्यति. यदुक्तं—न निर्मिता केन न दृष्टपूर्वा । न श्रूयते हैममयी कुरंगी ॥ तथापि तृष्णा रघुनंदनस्य । विनाशकाले विपरीतबुद्धिः ॥ १ ॥ पुनरप्युक्तं—रावणतणे कपाल । अदृत्तरसो बुद्धि वसे ॥ लंकाफोटणकाल । एको बुद्धि न संभरी ॥ २ ॥ चांडालेन विचारितं महाबुद्धिमानयं, मद्गृहे पुत्रौ पठनयोग्यौ जातौ, अन्यस्तु कोऽपि तौ न पाठयिष्यति, अयं पाठयति चेदेनं रक्षामीति तस्मै नमुचये पृष्टं, त्वं मदीयं पुत्रद्वयं यदि पाठयसि तदा त्वां रक्षामि, तेनापि तत्प्रतिपन्नं, तदा प्रच्छन्नरीत्या तेन स स्वगृहमानीतः, राजभयाच्च गुप्त भूमीगृहे स्थापितः, तत्र स्थितश्चित्रसंभूतौ स पाठयति. तावपि बुद्धिमंतौ स्तोकेनापि कालेन सकलशास्त्रपारं प्राप्तौ. नमुचिरपि तत्र स्थितः सन् चित्रसंभूतमात्रा सार्द्धं लग्नः, अहो दुस्त्यजोऽयं कामस्वभावः, यदवस्थामापन्नोऽपि नीचो विषयाशंसां न त्यजति. यदुक्तं—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृशः काणः खंजः श्रवणरहितः पुच्छविकलो । व्रणी पूतिक्लिन्नः कृमिकुलशतैरावृततनुः ॥ क्षुधाक्रांतो जीर्णः पिठरककपालार्पितगलः । शुनीमन्वेति श्वा हतमपि च हंत्येव मदनः ॥१॥ दुस्त्यजेयं प्रकृतिः, यदुक्तं=नखल करे धबुकडा । घरहर करे घरट्ट ॥ जिहां जे अंगसन्नावडा । तिहां ते मरण निकट्ट ॥ २ ॥ एवं बहुदिनेषु गतेषु चांडालेन तद् ज्ञातं. अहो धिगिमं मंत्रिणं विषयांधं! कृतोऽप्युपकारोऽनेन विस्मृतः, अस्मात्कुर्कुरोऽपि वरो यः कृतमुपकारं न मुंचति. यदुक्तं=अशनमात्रकृतज्ञतया गुरो—र्न पिशुनोऽपि शुनो लग्नते तुलां ॥ अपि बहूपकृते सखिता खले । न खलु खेलति खे लतिका यथा ॥ १ ॥ तद्विरुद्धं कृतं यदयं पूर्वं रक्षितः, अतोऽयं वध्य एवेति हननाय स बहिर्निष्कासितः, चित्रसंज्ञूतान्यां विचारितं यदयं महानर्थो जायते, यदस्माकं विद्यागुरुरस्मत्समीपे पित्रा निहन्यते.

ततो मनसि तद्रक्षणोपायं विचार्य ताभ्यां पितुरग्रे प्रोक्तं, नो स्वामिन्! एतस्य महदुश्चरितं, अयं मारणीय एव न तु रक्षणीयः, अतोऽस्मानाज्ञापय? यत्रावां स्मशाने नीत्वैनं मारयावः, पित्राऽऽज्ञा दत्ता, तं गृहीत्वा निर्गतौ, रात्रिसमये एकांते गत्वोक्तं, त्वमस्माकं वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्यागुरुरतोऽस्मान्निर्मुक्तः, नगरं त्यज ? दूरं व्रजेति निर्गतो नमुचिः, क्रमेण हस्तिनागपुरं प्राप्तः, सनत्कुमारस्य च सेवको भूत्वा स्थितः, तौ चित्रसंभूतावतीवगीतकलाकुशलौ गानं कुर्वंतौ वीणाहस्तौ नगरचतुष्पथे प्रतिदिनमटतः, तत्र बहवो लोका तन्नादमोहिताः समायांति, असूर्यंपश्या अपि युवतयस्तन्नादमोहिता लज्जां मुक्त्वा श्रोतुं समायांति. काश्चित्कृताऽशृंगाराः, काश्चिदलक्तकरंजितैकचरणाः, काश्चिदंजितैकनयनाः, काश्चिद्गतोद्भूतशिरोंशुकाः, काश्चित्परिहितैकस्तनकंचुकीकाः, काश्चित्स्वकीयबुद्ध्योत्पाटिताऽन्यस्तनंधयाः, काश्चिद्भर्त्तारं प्रेषयंत्याऽागच्छामीति कृत्वाऽागताः, काश्चिज्जिमंती भोजनस्थालं मुक्त्वैव विलोकनार्थं निर्गताः, काश्चिद्भोदोहनार्थं वत्सान् स्तनेषु बलगापयित्वा निर्गताः, काश्चित्स्वभर्त्तुः समीपे ऊर्ध्वं मुखं कृत्वा विलोकयंति. एवं नादपरवशाः कामिन्यः सकलगृहकार्यं त्यक्त्वा तत्र समायांति, अहो नादस्य पारवश्यं ! यदुक्तं—सुखिनि सुखनिदानं दुःखितानां विनोदः । श्रवणहृदयहारी मन्मथस्याग्रदूतः ॥ रणरणकविधाता वल्लभः कामिनीनां । जयति जयति नादः पंचमश्चोपवेदः ॥ १ ॥ एवं सर्वा अपि युवतयो नादमोहितास्तयोरनुलग्ना एव भ्रमंति. लोकैर्विचा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रितं चांडालकुलोत्पन्नाभ्यामाभ्यां सर्वमपि नगरं मलिनीकृतं, राज्ञे विज्ञप्तिः कृता, देव इमौ चांडालपुत्रौ चित्रसंभूतिनामानौ नगरान्निष्कासनीयौ. एताभ्यां नगरं दूषितं, आचारशुद्धिर्न तिष्ठति, राज्ञापि तथैव कृतं. नगरान्निष्कासितौ तौ बहिर्गतौ मनसि विचारं कुरुतः, किमावयोः कलान्निर्दुःकुलदोषेण दूषितान्नैः ? किमनेन मानहीनेन जीवितेन ? इति विचार्य कस्मिंश्चित्पर्वते ऊंपां गृहीतुं तौ चटितौ, उपरि चटित्वा हस्तयोस्तालं दत्वा यावत्पतनायोद्यतौ, तावद् गुहायां तपस्यता केनापि साधुना दृष्टौ; साधुनोक्तं भो मा पतनं कुरुतं? इति वारत्रयं साधुवाक्यं श्रुत्वा विलंबितौ सतौ तौ विलोकयितुं लग्नौ, यत्कोऽयं वारयति ? तावद्गुहायां तपस्यंतं मुनिं विलोक्य तौ तत्र गतौ. मुनिना पृष्टं किं दुःखकारणं? सर्वमपि ताभ्यां निवेदितं. साधुनोक्तं कुलेन का सिद्धिः ? किमनेनाऽज्ञानमृत्युना ? जिनोक्तं धर्मं कुरुतं ? येनेह लोके परत्रापि कार्यसिद्धिः स्यात्. इति साधुवाक्येन जातवैराग्याभ्यां ताभ्यां दीक्षा गृहीता; निरतिचारं दुःकरं च तपः कर्तुमारब्धं. उग्रविहारं कुर्वंतौ प्रत्याख्यातमासक्षपणकौ ग्रामाद्ग्रामं विहरंतौ गजपुरोद्याने समवसृतौ. तत्र मासक्षपणपारणके संभूतनामा मुनिरा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हारनिमित्तं गजपुरमागतः, तत्र भिक्षार्थमुच्चनीचकुलानि पर्यटन् नमुचिमंत्रिणा दृष्टः, अहोऽयं संभूतनामा चांडालपुत्रः समागतः, मा मदीयं चरित्रं नृपाय निवेदयत्विति विचार्य सेवकपार्श्वात्तं गलहस्तदानादिपूर्वकं तर्जयित्वा नगरप्रतोल्यां मोचयामास. संभूतमुनिना चिंतितमहो नमुचिना चांडालेन किं कृतं ? पूर्वं मरणशंकितस्तथाप्येतस्य दुष्टस्य लज्जा नाऽऽगता, अधुनैनं ज्वालयामीति दीप्तक्रोधानलेन साधुना तेजोलेश्यामोचनायोद्योगः कृतः, मुखाद्धूमकोटयो निस्सरितुं लग्नाः, ताभिः समस्तं नगरमाच्छादितं.

किमेतदिति लोकाः शोकाकुलास्तत्र मिलिताः, सनत्कुमारचक्रिणापि तत् श्रुतं, भयाकुलहृदयस्तत्रागत्य स मुनिचरणयोः पपात. प्रभो क्षमस्वापराधं ? लोकसंहरणादपसरणेन मामनुगृही ? त्वं कृपारससमुद्रोऽसि, 'नतवत्सलोऽसि,' क्षमापरोऽसि, दीने योजितकरकमले मयि कृपां विधाय क्रोधं त्यज ? अस्मिन्नवसरे चित्रेण तद्भ्रातृचरित्रं ज्ञातं. तत्रागत्य बहूनि शांतवचनानि कथितानि, शांतवचनामृतरसधारया संभूतमुनेर्मनः शांतं कृतं. सोऽपि क्रोधान्निवृतः शांतभावं प्राप्तः, सनत्कुमारेण नमुचिचरित्रं ज्ञात्वा तं पश्चाद्बध्वा मुनिचरणयोर्ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मितः, चक्रिणोक्तं मुने आदिश्यतां? किमेतस्य करोमि? साधुन्यामुक्तं, अस्माकं केनापि सह वैरन्नावो नास्ति, सनत्कुमारेण नमुचिर्देशान्निष्कासितः, मुनिन्यां चिंतितं क्रोधांधाः पुरुषाः किमपि न जानंति, महानर्थकारी अयं क्रोधः, यदुक्तं—जं अज्जियं चरित्तं। देसूणाए य पुव्वकोडिए ॥ तंपि अ कसायमित्तो । हारेइ नरो मुहुत्तेणं ॥ १ ॥ पुनरप्युक्तं—कोह पइट्ठो देहघरि । तिन्नि विकार करेइ ॥ आपो तावें पर तवे । पर तह हाणि करेइ ॥ २ ॥

अतस्तदाश्रयो देह एव त्याज्यः, किमनेनाऽवगुणनिवासेन देहेनेति विचार्य ह्यान्यां वने गत्वाऽनशनं गृहीतं. लोकैः प्रशंसितौ धन्यौ धन्यौ, बहवो लोकास्तद्वंदनार्थं व्रजंति, सनत्कुमारोऽपि सपरिवारस्तौ वंदितुं जगाम. वंदित्वा प्रशंसां कृत्वा पुनरागतः, तदनंतरं चक्रवर्त्तिनः स्त्रीरत्नं सुनंदा बह्वीभिः कामिनीभिः परिवृता तौ वंदितुं जगाम. भक्त्या करकमलयोजनपूर्वकं चित्रचरणौ नत्वा संभूतचरणयोः पपात. तस्मिन्नवसरे कज्जलसंकाशश्यामलस्तस्याः केशपाशः संभूतचरणयोर्लग्नः, तस्य स्पर्शेन जातरागातिरेकः संभूतो निदानं चकार, यदि मे तपसः फलं तदैतादृशं स्त्रीरत्नं परभवे प्राप्नुयां, इति तेन निकाचितनिदानं कृतं. चि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रेणोक्तं यन्मया निबिडमनसा निदानं कृतं तन्न चलति. अतो मा वेदीति. ततस्तौ द्वावप्यनशनं पालयित्वा स्वर्गं गतौ. द्वावप्येकविमाने समुत्पन्नौ, तत्र चिरकालं यावद्भोगान् भुंक्त्वा, द्वयोर्मध्याच्चित्रजीवस्ततश्च्युत्वा पुरिमतालपुरे इभ्यगृहे पुत्रत्वेनोत्पन्नः द्वितीयस्तु निदानमाहात्म्येन कांपिल्यपुरे द्वादशश्चक्री ब्रह्मदत्तनामा बभूव. तदुत्पत्तिस्वरूपमग्रे वक्ष्यामः तेन षट्खंडविजयः कृतः, एकदा सभायां स्थितेन ब्रह्मदत्तेन पुष्पगुच्छं दृष्ट्वा जातिस्मरणं प्राप्तं. पूर्वभवानुभूतं नलिनीगुल्मविमानं स्मृतं; पंचापि पूर्वजातयः स्मृताः, मनसा चिंतितं येन सार्द्धं पंचभवसंबंधोऽभूत् स कथं मिलिष्यति? क्व गतौ भविष्यति? तद्बंधुमिलनार्थं तेन गाथार्द्धं निर्मितं, तद्यथा—आस्व दासौ मृगौ हंसौ । मातंगावमरौ तथा ॥ इति. य एनं गाथार्द्धं पूरयिष्यति स मद्बंधुरेव, नान्य इति निश्चित्य स लोकानां कथयति. य एतस्या गाथाया उत्तरार्द्धं पूरयति तस्मै मनोवांछितं प्रयच्छामि. लोकैस्तद्गाथार्द्धं पठितं, सर्वैरपि लोकैस्तद्गाथार्द्धं पठितं. परं कोऽपि तत्समश्यां न पूरयति, एवं बहूनि दिनानि गतानि.

एतस्मिन्नवसरे पुरिमतालपुरे इभ्यकुलोत्पन्नेन चित्रजीवेन गुरुसमीपे चारित्रं गृहीतं.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जातिस्मरणं च प्राप्तं; तेन चित्रजीवेनापि पंचभवसंबंधो ज्ञातः, मनसि विचारितं, मम बांधवेन निदानं कृतं, तेन स भिन्नकुले समुत्पन्नः चक्री च जातः, अतस्तं बोधयामीति ध्यायन् स कांपिल्यपुरोद्याने समागतः, तत्रारहट्टकवाहकमुखाज्जाथार्द्धं श्रुत्वा मुनिनोत्तरार्द्धं पूरितं. एषा नौ षष्टिका जाति—रन्योऽन्याभ्यां वियुक्तयोः ॥ इति मुनिमुखादुत्तरार्द्धं श्रुत्वाऽरहट्टवाहको नृपाग्रे गत्वा गाथाया उत्तरार्द्धं पूरयामास. तत् श्रुत्वा स्नेहातिरेकेण राजा मूर्छां प्राप्तः, सावधानो भूत्वा पृच्छति भो केनेयं समश्या पूरिता ? तेनोक्तं ममारहट्टसमीपे एको मुनिरागतस्तेनैतदुत्तरार्द्धं पूरितं. राजा तदागमनं श्रुत्वाऽतीवहर्षितः सपरिकरो वंदनार्थमागतः, तेन मुनिना देशना दत्ता, संसाराऽनित्यता च वर्णिता, कथितं च त्यज त्वं तद्भिल्लताचंचलं विषयसुखं ? भज जिनोक्तं धर्मं ? दुरंतोऽयं विषयानुरागः, त्वया पूर्वभवे निदानं कृतं, मया बहुशो वारितोऽपि त्वं मोक्षसुखहेतुकं चारित्रं त्यक्त्वा राज्यस्त्रीसुखलवनिमित्तं हारितवान्; अधुनापि नरकांते राज्ये विरक्तो भव ? इति बंधुवचनं श्रुत्वा चक्री प्राह, केन दृष्टं मोक्षादिसुखं ? विषयादिजनितं सुखं तु प्रत्यक्षं. अतो बंधो त्वमपि मद्गृहे समागच्छ ? सांसा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिकं सुखं चाऽनुभव? किं मुंडभावेन? आवां भुक्तभोगिनौ भूत्वा पश्चात्संयमं गृहीष्यावः, इति संभूतवचनं श्रुत्वा चित्रः कथयति, को मूढो भस्मकृते चंदनं ज्वालयति? को मूर्खो जीवितवांछया कालकूटं भुंक्ते, को नीचो लोहकीलकनिमित्तं यानं भंक्ति? कः सूत्रदवरकनिमित्तं मुक्ताहारं त्रोटयति? अतो बंधो बुद्ध्यस्व? इति बंधुवचनानि तेन बहुशः श्रुतानि, तथापि स वैराग्यं नापन्नः, तं दुर्बोधिं विज्ञाय चित्रो बंधुमनुज्ञाप्य मोक्षमार्गमलंचकार. ब्रह्मदत्तोऽपि कृतनिदानोऽप्राप्तधर्मो बहुसावद्यो वर्षाणां सप्तशतीं यावदायुः प्रपाल्य सप्तमीं नरकपृथ्वीं गतः, एवमन्योऽपि गुरुकर्मा प्रतिबोधं न प्राप्नोति. अतः सुलभबोधिता दुर्लभेत्युपनयः ॥ अधुना द्वितीयो दृष्टांतः कथ्यते. उदायिनृपमारकदृष्टांतो लिख्यते—

पाटलीपुत्रनगरे कोणिकसुत उदायिराजा बभूव, तेनोदायिराज्ञा कस्यापि नृपस्य राज्यमपहृतं, तदा तेन वैरिराजेनोक्तं यः कोऽप्युदायिराजानं मारयित्वा समागच्छति तस्य मनोऽभीष्टं ददामीति केनापि तस्य सेवकेन तदंगीकृतं, ततोऽसौ पाटलीपुत्रमागतः, बहूनुपायान् चिंतयति, परं कोऽपि न लगति. तदा तेन दुष्टेन चिंतितं उदायिराजा विश्वासेन विना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मरणं न प्राप्स्यति, तदा तेन गुरूणां समीपे गत्वा कापट्येन चारित्रं गृहीतं, ते आचार्या उदायिनृपस्यातीवमान्याः, तेषां समीपे स चारित्रं गृहीत्वाऽध्ययनं करोति, सोऽतीव साधूनां विनयकारको जातः, आचार्यादीनां चित्तानि तेन विनयगुणेन वशीकृतानि; उदायिराजाऽष्टम्यां चतुर्दश्यां चाहोरात्रिकं पौषधं करोति. तदाऽचार्या धर्मदेशनार्थं रात्रौ तत्र गच्छंति, एकस्मिन् दिनेऽष्टम्यां गुरवस्तत्र गंतुं प्रवृत्ताः, तदा नवदीक्षितेन तेनोक्तं स्वामिन् भवतामाज्ञा भवति चेदहं सार्थे समागच्छामि, गुरुभिरप्यज्ञातहृदयोऽयमिति विचार्य स सार्थे न गृहीतः, एवं प्रतिदिनं स वक्ति परं ते तं सार्थे न गृह्णंति. एवं द्वादश वर्षाणि जातानि. एकस्मिन् दिने चतुर्दश्यां विकालवेलायां गुरवस्तत्र गच्छंति, तदवसरे तेन कपटसाधुनाप्युक्तं स्वामिन्नहमप्यद्य सार्थे समागच्छामि. भवितव्यतावशाद्गुरुभिरप्युक्तं आगच्छेति.

एवं स सार्थे समागतः, गुरवोऽपि पौषधशालायामागताः, दर्भसंस्तारकस्थेनोदायिनृपेण वंदिताः, प्रतिक्रमणं कृतं, संस्तारकपौरुषीं पाठयित्वा शयनं कृतं. तदा दुष्टेन तेन कुशिष्येणोद्धाय प्रच्छन्नं रक्षिता कंकलोहच्छुरिका राज्ञो गले दत्ता. तं मारयित्वा छुरिकां तत्र मु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्त्वा स गतः, बहिःस्थितै राजसेवकैरयं साधुरिति मत्वा न निवारितः, एतस्मिन्नवसरे रुधिरप्रवाहो गुरुसंस्तारकपार्श्वमागतः, तत्सेकाकुरवो बुद्धाः, विचारितं च किमेतदिति पार्श्वे शिष्यो न दृष्टः, अयं कुशिष्यो राजानं मारयित्वा गत इति निश्चित्य राजानं मृतं दृष्ट्वा चिंतितं महाऽनर्थोऽयं जातः, महानुड्डाहो भविष्यति, यदेते मुनय एतादृशं कर्म कुर्वंति. गुरुभिरपि च्छुरिका निजगले दत्ता, एवं तौ द्वावपि मृत्वा स्वर्गं गतौ. एवमन्योऽप्यन्यो बहुभिरप्युपदेशैः प्रतिबोधं न प्राप्नोति. स दुष्टकर्मा साधुवेषं मुक्त्वा स्वकीयनृपसमीपं गतः, सर्वमपि निवेदितं, धिक् त्वया किं कृतं? इति तिरस्कृत्य तेन स देशान्निष्कासितः, अतो न गुरुकर्मणा भाव्यमित्युपनयः, इत्युदायिनृपमारकदृष्टांतः ॥

॥ मूलम् ॥—गयकन्नचंचलाए । अपरिचत्ताए रायलच्छीए ॥ जीवा सकम्मकलिमलभरियभरातो पडंति अहे ॥ ३२ ॥ व्याख्या—' गयकन्न इति ' गजकर्णाविव चंचला चपला अस्थिरा, एवंभूतयाऽपरित्यक्तयाऽनिवारितया, एतादृश्या राज्यलक्ष्म्या राज्यश्रिया हेतुभूतया जीवाः संसारिणः, स्वकर्माण्येव कलिमलं कल्मषं तस्य भृतः पूर्णः कृतो भरो यै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्ते एतादृशा नराः स्वकर्मनारेणाऽधोगमनशीलाः, एतादृशा नरा अधो नरकभूमौ पतंति गच्छंति, अतः किं राज्यलक्ष्म्या? ॥ ३२ ॥

॥ मूलम् ॥—वुत्तूणवि जीवाणं । सुदुक्कराइंति पावचरियाइं ॥ नयवं जा सा सा सा । पच्चाएसो हु इणमो ते ॥ ३३ ॥ व्याख्या—' वुत्तूण इति ' वक्तुमपि मुखेन कथयितुमपि जीवानां प्राणिनां सुदुष्कराणि, दुःखेन शक्यानि, एवंभूतानि पापाचरितानि यानि मुखेन कथयितुमप्ययोग्यानीत्यर्थः, अत्र दृष्टांतमाह—हे भगवन् कामिनी या मया धारिता सा मम भगिनी न वा? भगवतोक्तं सा स्त्री तव भगिनी, शिष्यंप्रति कथयति ' हु ' निश्चितं ' इणमो इति ' एवंभूतस्ते तव प्रत्यादेशो दृष्टांतः कथितः, अतः पापाचरितानि न कार्याणीत्यर्थः ॥ ३३ ॥ अत्र दृष्टांतः—

वंसतपुरे नगरेऽनंगसेननामा स्वर्णकारः, सोऽतीवस्त्रीलंपटः, तेन स्वर्णकारेण पंचशतसंख्याकाः स्त्रियः परिणीताः, ता अतीवरूपवत्यः, सोऽनंगसेननामा स्वर्णकारो निजवनिता बहिर्न निष्कासयति, गृहमध्ये एव रक्षति. एकदा स स्वर्णकारो निजमित्रगृहे भोजनार्थं ग- ॥ १०९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तः, तदा स्त्रीभिर्विचारितं, अद्यावसरो लब्धः, इति विचार्य स्नानविलेपनाभरणकज्जलसिं-
दूरतिलकादीनि कृत्वा ताः सर्वा अपि आदर्शान्निजकरेषु धृत्वा स्वं स्वं रूपं विलोकयंति, ह-
सनरमणगीतगानादिकाः क्रीडाः परस्परं कुर्वंति, ताः परस्परं कथयंति नर्त्ता तु यस्या वार-
कस्तामेव भूषणादिना शोभायुक्तां करोति, अन्यासां तु शृंगारादिकमपि कर्त्तुं न ददाति, अ-
तोऽधुना स्वेच्छया क्रीडा कर्त्तव्या; एतस्मिन्नवसरे स्वर्णकारो निजगृहमागतः, तेन स्वर्णकारे-
ण तासां चेष्टां दृष्ट्वा एका स्त्री मर्मस्थानके हता, सा मरणं प्राप्ता, अन्याभिश्चिंतितं, एका
मारिता, अन्या अपि मारयिष्यति, अतोऽस्यैव निग्रहो विधेय इति विचार्य सर्वाभिः सम-
कालमेवादर्शकाः स्वर्णकारसन्मुखं क्षिप्ताः, आदर्शकानां प्रहारेण स्वर्णकारो मृतः, लोकाप-
वादभीताभिः सर्वाभिरपि काष्टभक्षणं कृतं, ताः सर्वा अपि मृताः, एकस्यां चौपड्यां चौ-
रा जाताः, या स्त्री प्रथमं मृता सैकस्मिन् ग्रामे कस्यापि श्रेष्ठिनो गृहे पुत्रो बभूव; सुवर्ण-
कारजीवस्तु तस्यैव गृहे पुत्री समुत्पन्ना. सा पूर्वभवाभ्यस्तविषयाभ्यासबाहुल्येन जातमा-
त्राऽप्यतीवकामातुरा रोदनं करोति; एकदा भ्रातृहस्तस्तस्या योनौ लग्नः, तदा तया रुदनं मुक्तं,

॥११०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उपायो लब्धः, तस्या रुदनवेलायां स एवं प्रतिदिनं करोति, तेन सा रुदनं न करोति; एकदा पित्रा दृष्टो वारितोऽपि न तिष्ठति; गृहान्निष्कासितः, स पल्ल्यां गत्वा पंचशतचौराणां स्वामी जातः. ।

एकदा ते सर्वे चौरा मिलित्वा धाटीं कृत्वा कस्मिंश्चिद्ग्रामे गताः, तस्मिन् ग्रामे सापि प्राप्तयौवना विषयान्निलाषिण्यागतास्ति; चौरैर्दृष्टा, पूर्वस्नेहेन कामातुरतया तया प्रोक्तं मां स्त्रीत्वेन स्वीकुरुतेति प्रार्थनया सा पंचशतचौराणां पत्नी जाता; पंचशतपुरुषैरपि सा तृप्तिं न प्राप्नोति, अहो स्त्रीणां कामलौल्यं! यदुक्तं—नाग्निस्तृप्यति काष्ठौघै—र्नापगाभिर्महोदधिः ॥ नांतकः सर्वभूतेभ्यो । न पुंभिर्वामलोचना ॥ १ ॥ तथा प्रोक्तं—नागरजातिरतुष्टा । शीतो वह्निर्निरामयः कायः ॥ स्वादु च सागरसलिलं । स्त्रीषु सतीत्वं न संभवति ॥ २ ॥ एकदा चौरैर्विचारितमियं पंचशतपुरुषैः सेव्यमाना कष्टं प्राप्नोति, अतोऽन्या स्त्री विधीयते; इति कृपया तैरन्याऽानीता, पूर्वपत्न्या विचारितमहो ममोपर्यन्याऽानीता! मम भागं पातयिष्यतीति बुद्ध्या सैकदा तया कूपे पातिता, मृता सा, पल्लिपतिना श्रुतं, अहो इयं कामविह्वला

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पापकारिणी, मनसि चिंतितं इयं तीव्ररागा मम भगिनी भविष्यतीति संशयनिवारणार्थं स श्रीवर्द्धमानस्वामिसमवसरणं गतः, प्रभुं वंदित्वा पल्लीपतिना पृष्टं ' भगवन् ! या सा सा सेति ' ? भगवतोक्तं ' सा सेति ' श्रुत्वा स वैराग्यपरायणो व्रतं प्रतिपाद्य सुगतिं प्राप्तः, गौतमेनोक्तं भगवन् किमिदं पल्लीपतिना पृष्टं ' या सा सा सेति ' ? भगवतोक्तमनेन समश्रयामध्ये पृष्टं, याऽसौ मद्भगिनी सा किमेषा वा न वेति लज्जया स्वनारीस्वरूपं पृष्टं, तदा हे गौतम ! मयापि समश्रययोत्तरं दत्तं ' या सा सा सेति. ' सा तव भगिन्येवेयमिति. तत् श्रुत्वा बहवो लोकाः प्रतिबुद्धाः, कर्मणा बाधितो जीवोऽनाचरणीयमप्याचरतीत्युपनयः ॥ इति या सा सा सा दृष्टांतः ॥

॥ मूलम् ॥—पडिवज्जिऊण दोसे । नियए सम्मं च पायपडियाए ॥ तो किर मिगावईए । उप्पन्नं केवलं नाणं ॥ ३४ ॥ व्याख्या—' पडिवज्जिऊण इति ' प्रतिपद्यांगीकृत्य ममैवायं दोष इति दोषान् स्वकीयापराधान्, कथंभूतान् ? निजकान्, स्वकीया एव दोषा गृहीता इत्यर्थः, सम्यक् त्रिकरणशुद्ध्या पादयोश्चरणयोः पतितायाः प्रणतायाः, गुरुणीसेवनां कुर्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्याः, तत्तस्मात्कारणात् किलेति सत्यार्थे मृगावत्या मृगावतीनाम्न्याः साध्व्या उत्पन्नं प्रकटितं केवलं निरावरणं पंचमं ज्ञानं समुत्पन्नं, अतो विनय एव सर्वगुणानां निवास इत्यर्थः ॥ ३४ ॥ अथात्र मृगावतीदृष्टांतो लिख्यते—

कौशांब्यां नगर्यां श्रीवर्द्धमानस्वामी समवसृतः, तदा सर्वे सुराऽसुरेंद्राः सुरकोटिभिः परिवृता वंदितुमागताः, तदा चंद्रसूर्यावपि स्वमूलविमानाभ्यां तत्र वंदितुमागतौ; तस्मिन्नवसरे आर्यचंदनापि साध्वी मृगावतीसहिता वंदितुमागता, आर्यचंदनाद्याः साध्व्यः प्रभुं वंदित्वा पश्चात्स्वोपाश्रये समागताः, मृगावती तु समवसरणे स्थिता, तस्मिन्नवसरे संध्यासमयो जातोऽपि सूर्यतेजःप्रकाशेन न ज्ञातः, यत उद्योतस्तु तथैव स्थितः, रजनी प्रचुरा गता, सर्वेऽपि लोका वंदित्वा स्वस्वगृहं प्राप्ताः, मृगावत्या साध्व्या तु रजनी प्रचुरा गतापि न ज्ञाता, यदा चंद्रसूर्यौ स्वस्वविमानमारुह्य स्वस्थानं गतौ, तदा समवसरणमध्ये च पृथिव्यामंधकारे प्रसृते ससंभ्रमा मृगावती रजनीं प्रचुरां गतां ज्ञात्वा नगरमध्ये आर्यचंदनोपाश्रये समागता, एतस्मिन्नवसरे आर्यचंदनाऽार्यापि प्रतिक्रमणं विधाय संस्तारकपौरुषीं पठित्वा सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तारके स्थिता मनस्यालोचयति, मृगावती क्व स्थिता भविष्यतीति. अस्मिन्नवसरे मृगावतीमागतां दृष्ट्वोपालंभं ददातिस्म. हे मृगावति! तवैतन्न घटते, भवादृशीनां प्रधानकुलजातानां रात्रौ बहिःस्थानं न युक्तं, भवत्येदं विरुद्धाचरणं कृतं. एतदार्यचंदनावचनं श्रुत्वा नयनाभ्यां गलदश्रुसलिला सा संतापं वहति, मया गुणवत्याः संताप उत्पादित इति.

पश्चात्तापेनात्मानं निंदंती मृगावती करकमले योजयित्वा प्राह, हे भगवति क्षमस्वैकं ममापराधं, मंदभाग्याहं, प्रमादवशान्मया रात्रिस्वरूपं न ज्ञातं, न पुनरीदृशं करिष्यामीति वारंवारं क्षामयित्वा चरणयोर्नत्वा विश्रामणां चकार. आर्यचंदना संस्तारके सुप्ता, मृगावती च स्वकीयनिंदां करोति, मृगावत्याः शुक्लध्यानानलो वृद्धिं प्राप्तः, ज्वालितं च कठिनमपि कर्मेंधनमंमूलं. मृगावत्याः केवलज्ञानमुत्पन्नं. अस्मिन्नवसरे कश्चिद्विषधर आर्यचंदनासंस्तारकपार्श्वे समागच्छन् मृगावत्या ज्ञानेन दृष्टः, संस्तारकाद्बहिःस्थित आर्यचंदनाहस्तो मृगावत्या संस्तारके निहितः, तदाऽार्यचंदना प्रबुद्धा, पृष्टं च मदीयः करः केन चालितः? तदा मृगावत्योक्तं स्वामिनि क्षमस्व मदीयापराधं? मया करश्चालितः, कथं चालित इति पृष्टे मृगावती

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्राह सर्पः समागच्छति; त्वया कथं ज्ञातं ? मृगावती प्राह अतिशयेन, आर्यचंदनया पृष्टं कोऽयमतिशयः ? मृगावती प्राह केवलज्ञानस्वरूपोऽतिशयः, तत् श्रुत्वाऽार्यचंदना पश्चात्तापं कर्तुं लग्ना, मृगावत्याश्च चरणयोः पतिता, एवमात्मनिंदापरायाः आर्यचंदनायाः अपि केवलज्ञानमुत्पन्नं. यथा मृगावत्या कषायो न कृतस्तथाऽन्यैरपि कषायो न कर्त्तव्य इत्युपनयनोपदेशः ॥ इति कषायोपरि मृगावतीचंदनबालाकथानकं नवमं ॥

॥ मूलम् ॥—किं सक्का वुत्तुं जे । सरागधम्मंमि कोइ अकसाउ ॥ जो पुण धरिज्ज धणियं । डुवयणुज्जालिए स मुणी ॥ ३५ ॥ व्याख्या—' किं इति ' ' वुत्तुं इति ' वक्तुं इदं किं शक्यं ? अपि त्विदं वक्तुं न शक्यते. ' जे इति ' पदं शोभानिमित्तं, यत्सरागधर्मे रागद्वेषसहिते आधुनिके चारित्रे कोऽपि साधुरकषायः सर्वथा कषायरहितः, इदं तु न संभाव्यते, सर्वथा कषायरहितत्वं कुतः ? यः साधुः पुनर्धारयेदुदयमागतानपि कषायान्न प्रकटीकरोति, ' धणियं इति ' अत्यर्थं, कथंभूतान् ? डुर्वचनरूपेण काष्ठसमूहेन प्रज्वालितानपि कषायान् यो विशेषेण न प्रकटीकरोति स मुनिः, स महापुरुषः, सर्वथा तु कषायत्यागो डुर्लभः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—कडुयकसायतरूणं । पुप्फं च फलं च दोवि विरसाइं॥ पुप्फेण ग्राइ कुविन्न । फलेण पावं समायरइ ॥ ३६ ॥ व्याख्या—' कडुय इति ' कटुकाः संयममुखभंगकारकत्वात्, एवंभूता ये कषायतरवः कषायरूपा वृक्षास्तेषां कषायवृक्षाणां पुष्पं प्रसूनं, फलं बीजात्मकं, चः समुच्चयार्थे, द्वे अपि विरसे निःस्वादे, कषायवृक्षाणां पुष्पाणि अथ च फलान्यपि विरसानीत्यर्थः, पुष्पेण कारणेन कुपितः सन् ध्यायति, परेषां मारणाद्युपायं चिंतयति, यन्मनसा परस्याऽनर्थचिंतनं तदेव कषायाणां पुष्पं, फलेन कृत्वा पापं समाचरति, यत्परेषां ताडनतर्जनादिकं तदेव कषायाणां फलमित्यर्थः, अतः कषायवृक्षाणां पुष्पमपि कटुकं, अथ च फलमपि कटुकं, पुष्पेणापि अथ च फलेनापि नरकगतिः ॥ ३६ ॥

॥ मूलम् ॥—संतेवि कोइ नभ्रइ । केवि असंतेवि अहिलसइ भोए ॥ चयइ परपच्चएणवि । पन्नवो दट्ठूण जह जंबू ॥ ३७ ॥ व्याख्या—' संतेवीति ' संतोऽपि विद्यमानानपीत्यर्थः, कोऽपि महापुरुष नभ्रति त्यजति भोगान् विद्यमानान्. कोऽपि नीचकर्मा जीवोऽसतोऽपि अविद्यमानानपीत्यर्थः, अभिलषति वांछति भोगान् सांसारिकसुखानि. ' चयइ इति '

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यजति कश्चिज्जीवः परप्रत्ययेनापि भोगांस्त्यजति, भोगांस्त्यजंतमन्यपुरुषं दृष्ट्वा स्वयमपि बोधं प्राप्नोति. तत्र दृष्टांतमाह—प्रभवनामा चौरः पंचशतचौरपरिवृतः ' दट्ठूण इति ' दृष्ट्वा ' जह इति ' यथा जंबूनामानं दृष्ट्वा प्रभवः प्रतिबोधं प्राप्तः ॥ ३७ ॥ अथात्र जंबूनिदर्शनं लिख्यते, तत्र किंचित्पूर्वभवस्वरूपं—

एकदा राजगृहे श्रीवर्द्धमानः समवसृतः, श्रेणिको वंदनार्थमागतः, तस्मिन्नवसरे कश्चित्सुरः प्रथमदेवलोकादागतः, सूर्याभवन्नाट्यं विधाय तेन निजायुःस्वरूपं पृष्टं, भगवतोक्तमितः सप्तमे दिने च्युत्वा त्वं मनुष्यभवं प्राप्स्यसि; इति श्रुत्वा स स्वस्थानं गतः, श्रेणिकेनोक्तं स्वामिन् क्वायमवतारं प्राप्स्यति ? वीरेणोक्तं राजगृहे जंबूनामाऽयमंतिमः केवली भविष्यति. श्रेणिकेनोक्तं प्रभो अस्य पूर्वभवस्वरूपं मे कथ्यतां ? भगवानाह जंबूद्वीपे भरते सुग्रीवनामनि ग्रामे रावभनामा पामरोऽस्ति, तस्य रेवती पत्नी, तत्कुक्षिसमुत्पन्नौ भवदेवभावदेवौ द्वौ पुत्रौ; एकदा भवदेवेन दीक्षा गृहीता, स विहरन् एकदा निजग्रामे समागतः, नवपरिणीतां नागिलां स्त्रियं मुक्त्वा लज्जया भावदेवेनापि बंधुसमीपे चारित्रं गृहीतं. भवदेवो मृत्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वर्गं गतः, भावदेवो भवदेवमरणानंतरं चारित्रभ्रष्टो जातः, लज्जां त्यक्त्वा नवपरिणीतां नागिलां संस्मरन् भोगाशया स गृहमागतः, ग्रामाद्बहिः प्रथमं जिनेश्वरप्रासादे स्थितः, एतस्मिन्नवसरे तपःकृशांगी नागिलापि जिनयात्रार्थं तत्रागता; तया स्वकीयः पतिरुपलक्षितः, इंगिताकारेण कामातुरश्च ज्ञातः ।

नागिलया पृष्टं किमर्थं मुने आगतोऽसि, साधुरुवाच मदीया नागिला भार्या, तस्या हेतोः समागतोऽस्मि. लज्जया पूर्वं संयमो गृहीतः, परं प्रेमभावः कथं याति? नागिला यदि मिलति तदा सर्वमपि वांछितं फलति; नागिला कथयति चिंतामणिं मुक्त्वा कः कर्करं गृह्णाति? गजं विहाय को रासभारोहणं करोति? प्रवहणं दूरे त्यक्त्वा को महतीं शिलामाश्रयति? कः सुरतरुमुत्क्षिप्य धत्तूरतरुं वपति? इत्याद्युपदेशं दत्वा तया स्वपतिर्बोधितः, तेन स चारित्रे दृढो जातः, चारित्रं पालयित्वा तृतीये स्वर्गे सप्तसागरोपमायुर्देवो जातः, नागिलाप्येकावतारं कृत्वा मोक्षं गमिष्यति, भावदेवजीवस्ततश्च्युत्वा जंबूद्वीपे पूर्वविदेहे वीतशोकानगर्यां पद्मरथनृपगृहे वनमालाराज्ञीकुक्षौ पुत्रत्वेनोत्पन्नः, तस्याभिधानं शिवकुमार इति,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यौवनं प्राप्तः, पंचशतराजकन्यानां पाणिग्रहणं कारितं; एकस्मिन्नवसरे गवाक्षस्थितेन शिवकुमारेण कश्चित्साधुर्दृष्टः, गवाक्षादुत्तीर्य पृष्टं किमर्थं क्लेशसहनं? साधुनोक्तं धर्मनिमित्तं, शिवकुमारेणोक्तं कोऽयं धर्मः? साधुनोक्तं श्रवणेच्छा चेदस्माकं गुरुसमीपे समागच्छ? तेन सार्द्धं स धर्मघोषाचार्यसमीपे आगतः, धर्मं श्रुत्वा तेन जातिस्मरणं प्राप्तं; गुरुं नत्वा स गृहे आगतः, मातृपितृभ्यां दीक्षाज्ञा न दत्ता, गृहवासे एव षष्टभक्तं प्रतिदिनं करोति. पारणे चाचाम्लं करोति.

एवं द्वादशवर्षाणि यावत्तपस्तप्त्वा स प्रथमस्वर्गे चतुःपल्योपमायुर्विद्युन्माली नामा देवो जातः, इति चत्वारो भवा जंबूस्वामिनो भगवता श्रेणिकाग्रे भणिताः, ततः पंचमे भवे ततश्च्युत्वा राजगृहे नगरे ऋषभदत्तश्रेष्ठिनो गृहे धारिणीकुक्षौ शिवकुमारदेवः पुत्रत्वेनोत्पन्नः, स्वप्ने जंबूतरुदर्शनाज्जंबूकुमार इति नाम स्थापितं. बाल्येऽपि तेन कलाः सकला अभ्यस्ताः, यौवनं प्राप्तं, अतीवरूपवान्, तरुणीहरिणीनां पाशरूपः, तस्मिन्नवसरे तन्नगरवासिभिरष्टाभिः श्रेष्ठिभिर्जंबूकुमाराय स्वकीयकन्यादानार्थं सत्यंकारः कृतोऽस्ति, एतस्मिन्नवसरे तत्र श्रीसु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धर्मस्वामिगणभृत्समवसृतः, कोणिको वंदनार्थं समागतः, ऋषभदत्तो जंबूकुमारेण सार्द्धमागतः, श्रीसुधर्मापि भवदवतापोपशांत्यर्थं पुष्करजलधारोपमां देशनां ददाति, संसारस्वरूपस्याऽनित्यता दर्शिता, यथा कामिनां मनश्चंचलं, यथा भूषागतं स्वर्णं, यथा जलसंक्रांतं विधुमंडलं, यथा वायुना हतो ध्वजप्रांतस्तद्वदस्थिरं भवस्वरूपं, यथांगुष्ठलालापानेन बालः सुखं मन्यते, तथाऽयमपि जीवो निंदितैर्भोगैः सुखं मन्यते; अहो! मुग्धत्वं लोकानां, यत्रोत्पन्नस्तत्रैवानुरक्तः, तानेव स्पर्शन् मनसि हृष्यति. इत्यादिदेशनां श्रुत्वा प्रतिबुद्धो जंबूकुमारः सुधर्माग्रे कथयति, स्वामिन् भवतारिणीं दीक्षां दत्वा मां निस्तारय? सुधर्मास्वामिनोक्तं हे देवानां प्रिय! मा प्रमादं कुरु? इति गुरुवचः श्रुत्वा गृहमागच्छन् स राजमार्गे समागतः, तत्र बहवो राजकुमाराः शास्त्रान्यासं कुर्वंति, तत्रैको लोहगोलको जंबूपार्श्वे समागत्य पतितः, जंबूकुमारेण चिंतितं यद्ययं यंत्रगोलको ममाऽलगिष्यत् तदा मनोवांछितं कथमभविष्यत्? एवं ज्ञात्वा पश्चादेत्य गुरुपार्श्वे तेन लघुदीक्षा गृहीता, पश्चात्स गृहमागतः, पित्रोश्चरणौ प्रणम्य कथयति अहं दीक्षां गृहीष्यामि, अनित्योऽयं संसारः, किमनेन कुटुंबेन?

॥ १२० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अहमांतरे कुटुंबेऽनुरक्तोऽस्मि, अहमौदासीन्यगृहे वसिष्यामि; विरतिमातुः सेवां करिष्यामि, योगान्यासो मे पिता, समता धात्रीमाता, नीरागतैवाऽन्नीष्टा मम भगिनी, बंधुर्विनय एवानुयायी, विवेक एवांगजः, सुमतिरेव प्राणप्रिया, ज्ञानमेवामृतं भोजनं, सम्यक्त्वमेवाक्षयो निधिः, अस्मिन् कुटुंबे ममानुरागः, तपस्तुरंगममारुह्य, भावनाकवचं परिधाय, अभयदानादिकैर्मैत्रिभिः सहितः संतोषसेनापतिमग्रेसरं कृत्वा, संयमगुणसेनां सज्जीकृत्य क्षपकश्रेणिरूपया गजघटया परिवृतो गुर्वाज्ञामेव शिरस्त्राणं धृत्वा, धर्मध्यानासिना आंतरां दुःखदायिनीं मोहसेनां हनिष्यामीति पुत्रवचनं श्रुत्वा पितरौ प्राहतुः—

हे पुत्र एकवारमष्टौ कन्याः परिणय? पश्चाद्व्रतमंगीकुरु? अस्मदीयं मनोरथं पूरय? इति पितृवचसा तेन पाणिग्रहणमष्टानां कन्यानां कृतं, परं मनसा निर्विकारः, एकैकया कन्यया नवनवकोटयः स्वर्णानामानीताः, अष्टौ कोटयोऽष्टकन्यानां मातुलपक्षत आगताः, एका कोटिर्जंबूकुमारस्य मातुलपक्षतः, एवमेकाशीतिकोटयः स्वर्णानां, अष्टादशकोटयः स्वगृहस्थाः, एवं नवनवतिकोटिस्वर्णानामधिपतिर्जंबूकुमारो रंगशालायां रात्रौ स्त्रीभिः सार्द्धं स्थि- ॥ १२१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तः, किं तु न स रागदृष्ट्या विलोकयति, न च वचनेनापि संतोषयति सरागवचनैश्चालितोऽपि न चलति, तस्मिन्नवसरे प्रज्ञवनामा चौरो जंबूगृहे समागतः, पंचशतचौरपरिवृतः कंचनकोटिं गृह्णातिस्म. ग्रंथीन् बध्ध्वा मस्तके लात्वा ते यावन्निर्गन्तुं तावज्जंबूकुमारेण स्मृतनमस्कारमंत्रमाहात्म्यात्सर्वेऽपि ते स्तंभिताः, भित्तिलिखितचित्राणीव स्थिताः, तदा प्रज्ञवेणोक्तं हे जंबूकुमार! त्वं जीवदयाप्रतिपालकोऽसि, अन्नयदानात्परमन्यत्पुण्यं नास्ति, प्रातःकाले कोणिकः सर्वानप्यस्मान् मारयिष्यति; अतो मुंच मुंचाऽस्मान्? गृहाण मदीये तालोद्घाटिन्यवस्वापिन्यौ विद्ये? अर्पयैकां त्वदीयां स्तंभिनीं विद्यां? जंबूकुमारेणोक्तं ममैका धर्मकला महती विद्यास्ति, अपराः सर्वा अपि कुविद्याः, अहं तृणवन्नोगानपहाय व्रतं प्रातर्गृहीष्यामि, इमे भोगा मधुबिंदूपमाः, प्रज्ञवेणोक्तं मधुबिंदुदृष्टांतं मे कथय? जंबूकुमारः कथयति—एकस्मिन्नरण्ये सार्थभ्रष्टः कश्चिन्नरो वने परिभ्रमति; एतस्मिन्नवसरे आरण्यो हस्ती हननाय सन्मुखं धावितः, स प्रणष्टः, हस्ती पश्चाल्लग्नः, अग्रे गत्वा गजभयात् कूपमध्ये स्थितां वटशाखामाश्रित्य लंबायमानः स्थितः, तस्याधस्ताद्विकासितमुखौ द्वावजगरौ वर्त्तेते. कू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पकस्य चतुर्षु पार्श्वेषु चत्वारो लंबकायाः स्थिताः संति, शाखायां रसपूरितो मधुमंडपो वर्त्तते. द्वौ मूषकौ तां शाखां कर्त्तयतः, मधुमंडपान्निर्गता मक्षिकास्तं दंशंति, एवं कष्टमापन्नः स मूढश्चिरकालेन मधुबिंदुं मुखे प्राप्य तदास्वादसुखितस्तत्रास्ते. एतस्मिन्नवसरे कश्चिद्विद्याधरः समागतः, तेनोक्तं अस्मिन् विमाने समागच्छ? दुःखान्निष्कासयामि. मूर्खो वक्ति क्षणं यावत्प्रतीक्षस्व? एकं बिंदुमास्वाद्यागच्छामि; स विद्याधरो गतः, मूर्खो दुःखं प्राप्तः, एवं हे प्रज्ञव! मधुबिंदुसदृशोऽयं विषयविपाकः, अत्रोपनयः—ज्ञव एव महत्यटवी, जीवो रंकतुल्यः; जरामरणावतरणरूपोऽयं कूपः, विषयजलेन पूर्णः, नरकगतितिर्यग्गतिरूपावजगरौ, कषाया विषधराः, आयुरेव वटशाखा, द्वौ पक्षौ द्वौ मूषकौ, मृत्युरेव गजः, विषयो मधुमंडपस्थानीयः, तस्य स्पृहां कुर्वन्नयं जीवो रोगशोकवियोगाद्यनेकानुपद्रवान् सहते; अतो धर्म एव महत्सुखं, विद्याधरस्थानीयो गुरुः ॥ इति मधुबिंदूपनयः ॥ पुनरपि प्रज्ञवः कथयति, यौवनवयसि पुत्रकलत्रादि सकलपरिवारस्त्यक्तुं न योग्यः, जंबूकुमारेणोक्तं एकैकस्य जीवस्य परस्परमनंतशः संबंधो जातः, यत्राऽष्टादशनातरासंबंधः, प्रज्ञवेणोक्तं तदष्टादशसंबंधस्वरूपं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मे कथ्यतां? जंबूः कथयति—

मथुरापुर्यां कुबेरसेना वेश्या, तस्याः कुक्षावेकं युगलं जातं, एकस्य कुबेरदत्त इति, अपरस्याश्च कुबेरदत्तेति नाम प्रतिष्ठितं; तद्युगलं मुद्रालंकृतं वस्त्रेण वेष्टयित्वा मंजूषायां च निक्षिप्य यमुनाप्रवाहे प्रवाहितं. प्रातः सा मंजूषा सोरीपुरं गता; द्वाभ्यां श्रेष्ठिभ्यां निष्कासिता; एकेन पुत्रो गृहीतोऽन्येन च पुत्री गृहीता. यौवनं प्राप्तौ, कर्मयोगात्तयोरेव परस्परं विवाहो जातः, सारिपाशकक्रीडां कुर्वत्या कुबेरदत्तया पतिहस्ते मुद्रा दृष्टा, स्वकीयं भ्रातरमुपलक्ष्य विरक्ता सा संयमं जग्राह; अवधिज्ञानं प्राप्ता. एतस्मिन्नवसरे कुबेरदत्तः कार्यार्थं मथुरां गतः, कुबेरसेनया मात्रा सार्द्धं च लग्नः, एकः पुत्रो जातः, कुबेरदत्तासाध्व्या ज्ञानेन ज्ञातं महाऽनर्थो जायते. तत्प्रतिबोधार्थं सा तत्रागत्य वेश्यागृहे समागता. रोदनं कुर्वतो बालस्य पार्श्वे आगता; साध्वी कथयति रे बालक! कथं रोदिषि? मौनं गृहाण? त्वं ममाऽनीष्टोऽसि, त्वया सार्द्धं मम षट् संबंधा वर्त्तंते; त्वं मम पुत्रः १ त्वं मम भ्रातृपुत्रः २ त्वं मम बंधुः ३ त्वं देवरः ४ त्वं मम पितृभ्राता ५ त्वं मम पौत्रः ६ एवं षट् संबंधाः। पुनर्हे वत्स! ॥१२४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तव जनकेनापि सार्द्धं मम षट् संबंधाः, स मम पतिः १ मम पिता २ मम बंधुः ३ मम ज्येष्टः ४ मम श्वसुरः ५ मम पुत्रश्च ६, एवं तव मात्रापि सार्द्धं षट् संबंधाः, सा मम भ्रातृजाया १ मम सपत्नी २ मम माता ३ मम श्वश्रूः ४ मम वधूः ५ मम वृद्धमाता च ६। इति साध्वीवचनं श्रुत्वा पूर्वभवस्वरूपं ज्ञात्वा कुबेरसेनया व्रतं गृहीतं, भवपारं च प्राप्ता. एवं हे प्रभव! अस्मिन् संसारेऽनंतशः संबंधा जाताः, कस्य कः? अतो धर्म एव परमबंधुः ॥ इत्यष्टादशसंबंधदृष्टांतः ॥ प्रभवः पुनरपि कथयति हे जंबु! त्वया यदुक्तं तत्सत्यं, परं— अपुत्रस्य गतिर्नास्ति। स्वर्गो नैव च नैव च ॥ तस्मात्पुत्रमुखं दृष्ट्वा। स्वर्गं गच्छति मानवः ॥ १ ॥ इति पुराणवाक्यं, अतो भोगान् भुंक्त्वा सुतं गृहे स्थापयित्वा संयमे मनो रक्ष? जंबूः प्राह न हि सुतेन सुगतिकुगत्योर्विपर्ययः, सांसारिकजीवानां केवलं मोहभ्रम एवायं. यथा महेश्वरदत्तस्य पुत्रः कार्ये नागतः, प्रभवेण पृष्टं कोऽसौ महेश्वरदत्तः? जंबूः प्राह विजयपुरे नगरे महेश्वरदत्तः श्रेष्टी, तस्य महेश्वरनामा पुत्रः, मरणवेलायां महेश्वरदत्तेनोक्तं मम श्राद्धदिने एकं महिषं हत्वा तदीयेनामिषेण सर्वोऽपि परिजनः पोषितव्यः, स मृतः, पु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रेण पितृवचनं धारितं. स मृत्वा वनमध्ये महिषो जातः, महेश्वरमाता गृहमोहेन मृत्वा गृहे कुर्कुरी जाता. एवं दैवयोगात्स एव महिष आनीतः, अथ महेश्वरस्य स्त्री कुलटा, तया सह रममाणो जारपुरुषो महेश्वरेण मारितः, स मृत्वा तद्गृहे पुत्रत्वेनोत्पन्नः, स लाड्यमानोऽस्ति, स महिषो मारितः, कुटुंबेन तन्मांसं भक्षितं, एतस्मिन्प्रस्तावे श्रीधर्मघोषनामा मुनिर्गोचर्यां तत्रागतः, तद्गृहचरितं ज्ञानेन ज्ञात्वा भणितं—मारितो वल्लभो जातः । पिता पुत्रेण भक्षितः ॥ जननी ताड्यते सेय–महो मोहविजृंभितं ॥ १ ॥ एवं श्लोकं श्रुत्वा महेश्वरेणोक्तं स्वामिन् किमेतत् ? साधुना सर्वमपि कथितं, स न मन्यते, कुर्कुरीपार्श्वान्निधानदर्शनेन प्रत्यय मुत्पादितः, ततो महेश्वरः श्राद्धं मुक्त्वा श्राद्धो जातः, कुर्कुर्यपि जातिस्मरणं प्राप्य मिथ्यात्वं त्यक्त्वा स्वर्गं गता. अतो हे प्रभव ! पुत्रेण का सिद्धिः ? ॥ इति महेश्वरदत्तदृष्टांतस्तृतीयः ॥ ३ ॥

प्रभवः प्राह हे जंबु ! तवैतत्प्रथमं पुण्यं यन्मम जीवितदानं दत्तं, ममायं च परिवारो यदि बंधान्मोक्षं प्राप्नोति, तदाहमपि तव सार्थे चारित्रं गृहीष्यामीति निश्चयं श्रुत्वा समुद्-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीनामा प्रथमस्त्री भणति, हे प्रभव! भवादृशां दुःकर्मकारिणां चारित्रं घटते, दुःखिनः सुखापेक्षया चारित्रं गृह्णंति, परंतु सुखिनां संयमकष्टमनिष्टं, प्रायेण लोकाः परगृहभंजका भवंति; हे प्रभव यदि तव कथनादयं व्रतं गृहीष्यति, तर्हि हालिकस्येव स पश्चात्तापं प्राप्स्यति. प्रभवेणोक्तं कोऽयं हालिकः? समुद्श्रीः कथयति—

मरुमंडले बगनामा पामरो वसति, स कृषिकर्म करोति, कोद्रवकंगुप्रमुखं धान्यं च वपति, स एकदा पुण्याः श्वसुरगृहे गतः, स तत्र मिष्टैर्गुडमंडकैर्भोजितः, स इक्षुतो गुडोत्पत्तिं ज्ञात्वा स्वगृहे समागत्य पुष्पितं फलितं क्षेत्रमुन्मूल्येक्षुखंडं वपतिस्म. स्त्रिया वारितोऽपि न स्थितः, आत्ममतिको जातः, इक्षुक्षेत्रं तु न निष्पन्नं, पुरातनमपि धान्यं गतं, मनसि पश्चात्तापं कृतवान. मिष्टभोजनाशया पुरातनमपि गतं. तद्वत् हे प्राणवल्लभ! त्वमपि पश्चात्तापं प्राप्स्यसि, प्राप्तं सुखं मुक्त्वाऽधिकस्य वांछा न कर्त्तव्या. ॥ इति बगपामरदृष्टांतः ॥ ॥ ४ ॥ जंबूकुमारः कथयति हे प्रिये यत्त्वयोक्तं तत्सत्यं, परं ये ऐहिकसुखान्निलाषिणस्ते दुःखं प्राप्नुवंति, ज्ञानात्परं धनं न, समतासदृशं सुखं न, जीवितसममाशीर्वचनं न, लोभसम- ॥ १२७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृशं दुःखं न, आशासदृशं बंधनं न, स्त्रीसदृशं च जालबंधनं न वर्त्तते. यस्तासु स्त्रीष्वतीव-लोभवान् स वायस इवानर्थं प्राप्नोति. स्त्रिया पृष्टं कोऽयं वायस? जंबूकुमारः कथयति—

मृगुकच्छे रेवानदीतीरे एको गजो मृतः, तत्र बहवः काका मिलिताः संति, गमनागमनं च कुर्वंति, यथा सत्रशालायां द्विजा मिलंति, तद्वत्तत्र वायसा मिलिताः संति. तत्रैको वायसो मृतगजकलेवरस्याऽवमद्वारे प्रविष्टः, तत्रैव च स तिष्टत्यामिषलंपटः, तत्र ग्रीष्मकाले द्वारं मिलितं, काकस्तु तत्रैव स्थितः, वर्षाकाले तद्गजकलेवरं पानीयप्रवाहेण वाहितं, अवमद्वारविकसनात्स वराको निःसृतः, चतुर्दिक्षु पानीयपुरं विलोकयन् तत्रैव मरणमापन्नः, अत्रोपनयः—मृतगजकलेवरतुल्याः कामिन्यः, विषयी नरो वायसतुल्यः, स नवजले ब्रुडति, एवं बहुलोभेन शोकं प्राप्नोति. ॥ इति वायसदृष्टांतः ॥ प्रथमस्त्रीकथा ॥

अथ द्वितीया पद्मश्रीः कथयति—हे स्वामिन्नतिलोभेन वानर इव नरो दुःखं प्राप्नोति, प्रभवचौरः कथयति तं वानरदृष्टांतं कथय? पद्मश्रीः कथयति एकस्मिन् वने कपियुगं वसति सुखेन च तिष्टति, एकस्मिन् दिने देवाधिष्टिते जलह्रदे स वानरः पतितः, मानवरू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पं च प्राप्तः, वानर्यपि पतिता स्त्रीरूपा जाता; वानरेणोक्तमेकवारं ह्रदे पतनेन मनुष्यत्वं प्राप्तं; द्वितीयवारं पतनेन च देवत्वं प्राप्स्यामि, स्त्रिया वारितोऽपि पतितः, पुनरपि वानररूपं प्राप्तः, अस्मिन्नवसरे केनचिद्राज्ञा दिव्यरूपा सा स्त्री स्वगृहमानीता, स वानरश्च कस्यचिन्नटस्य हस्ते चटितः, तेन नृत्ये योजितः, स वानरो नाट्यं कुर्वन् राजद्वारे समागतः, वानरो निजस्त्रियं दृष्ट्वाऽतीवदुःखं चकारेतिदृष्टांतः ॥ इति वानरदृष्टांतः ॥ जंबूः कथयति हे प्रिये ऽनेन जीवेनाऽनंतशो देवभोगा अनुभूतास्तथापि न तृप्तः, तर्हि मानुष्यसुखं कियन्मात्रं, यथैगालिकेन वनमध्यंगतेन मध्याह्नसमये पिपासातुरेण सर्वाणि जलभाजनानि निष्टापितानि, परं तस्य पिपासा न गता, स तरुछायायां सुप्तः, स्वप्ने समुद्रजलं पीतं, परं स न तृप्तः, एकप्रदेशे कर्दमयुतं जलं मुखे दत्तं, तथापि न तुष्टः, समुद्रजलेन तृप्तिं न प्राप्तस्तर्हि कर्दमेन कुतः? समुद्रजलोपमाः सुरभोगाः, कर्दमजलतुल्याश्च मानुषीतनुभोगाः ॥ इति कवाडीदृष्टांतः ॥ इति द्वितीयास्त्रीकथा ॥

॥१२९॥

तृतीयया पद्मसेनया कथितं सहसात्कारेण कार्यकरणेन नूपुरपंडितावत्पश्चात्तापो भवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्यति, अत्र नूपुरपंडितादृष्टांतो वाच्यः, तदुपरि जंबूकुमारेण विद्युन्मालिदृष्टांतः कथितः, येन मातंगीसंगमेन सर्वा अपि विद्या हारिताः, स चायं—भरते कुशवर्द्धनग्रामे विप्रकुले विद्युन्मालिमेघरथनामानौ बांधवौ. एकदा वने गतौ, केनचिद्विद्याधरेण मातंगी विद्या दत्ता. विद्याधरेणोक्तं सा मातंगी देवी भोगप्रार्थनां करिष्यति परं मनसि धैर्यं रक्षणीयं, न चलितव्यं, तदा विद्या सिद्धिं प्राप्स्यति. द्वौ बांधवौ साधयितुं लग्नौ. तत्रैको विह्वलमना विद्युन्माली मातंग्या चालितः, अन्यस्तु गुरुवचनं स्मृत्वा न चलितः, तस्य विद्या सिद्धा, षण्मासमध्ये तेन बहु धनं प्राप्तं. विद्युन्माली तु दुःखी जातः, जंबूकुमारेणोक्तं मातंगीसंगतिसदृशा मानुष्यस्त्रीभोगाः, अतो बहुसुखार्थिना ते त्याज्याः ॥ इति तृतीयस्त्रीकथा ॥ अथ चतुर्थी कनकसेना कथयति—

यदि मातंगीसदृशा वयं तर्हि कथं परिणीताः? पानीयं पीत्वा गृहपृच्छा न कर्त्तव्या. हे स्वामिन् त्वमपि कौटुंबिकवल्लोभेन पश्चात्तापं प्राप्स्यसि. दृष्टांतश्चायं—सुरपुरे एकः कौटुंबिको वसति, तेन कृषिकर्म कृतं, रात्रौ पक्षिणां पलायनार्थं शंखं वादयति, एकस्मिन् दिने

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्करा गोधनं गृहीत्वा तत्क्षेत्रपार्श्वे समागताः, शंखध्वनिं च श्रुत्वा नयातुराः पशून् मुक्त्वा गताः, स कौटुंबिकः पशून् विक्रीय सुखी जातः, एवं वारत्रयं जातं, एकदा तैस्तस्करैस्तत्कौटुंबिकवृत्तांतो ज्ञातः, ते आगताः, कौटुंबिको बद्धः, प्रहारेण च सरलः कृतः, एवं स्वामिन् अतिलोन्नान्निन्नूता दुःखं प्राप्नुवंति ॥ इति शंखधमककौटुंबिकदृष्टांतः ॥ जंबूकुमारः कथयति अतिकामलालसा वानरवद्बंधनं प्राप्नुवंति, वानरदृष्टांतस्त्वयं—एको वानरो ग्रीष्मकाले तृषातुरो जलभ्रांत्या चिक्कणे जलरहिते कर्दमे पतितः, यथा यथा शरीरे कर्दमस्पर्शो जायते तथा तथा शीतलमंग नवति, समग्रं शरीरं कर्दमेन लिप्तं, तथापि तृषा न गता; सूर्यातपयोगेन कर्दमः शुष्कः, शरीरे पीडा जाता, तद्वत् हे प्रिये विषयसुखकर्दमेनाहं शरीरं न लिंपयामीति वानरदृष्टांतः ॥ चतुर्थी स्त्री नन्नःसेना कथयति—

हे स्वामिन् अतिलोन्नो न कर्त्तव्यः, अतिलोन्नेन बुद्धिरंधतां गता, तदुपरि सिद्धिबुद्ध्योर्दृष्टांतो वाच्यः, जंबूकुमारः कथयति हे प्रिये! बहुकथनेनापि अहं जात्यतुरंगम इवोत्पथेन न व्रजामि, जात्यतुरंगमदृष्टांतस्त्वयं—वसंतपुरे नगरे जितशत्रुराजा, तस्य गृहे एकस्तुरंगमः, ॥ १३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स घोटको जिनदत्तश्रावकगृहे मुक्तः, स चातीवलक्षणोपेतः, एकदा केनचित्पल्लीपतिना तद्घोटकग्रहणार्थमेको निजसेवको मुक्तः, तेन क्षात्रं दत्वा स घोटको निष्कासितः, परंतु स घोटको न चलति, उत्पथं न गच्छति, अनुद्भूतं राजमार्गं विनाऽन्यमार्गे न गच्छति. एतस्मिन्नवसरे श्रेष्ठिना ज्ञातं, चौरो बद्धः, घोटकश्च गृहीतः, चौरोऽपि मुक्तः, एवं हे प्रियेऽहमपि स घोटक इव शुद्धं संयममार्गं मुक्त्वा चौरसदृशीन्निर्नवतीन्निराकृष्यमाणः उत्पथेन न गच्छामि. ॥ इति तुरंगमदृष्टांतः ॥

पंचमी स्त्री कनकश्रीः कथयति हे प्रिय अतिहठग्रहणं न युक्तं, आयतिर्विचारणीया, द्विजपुत्र इव रासभपुत्रं न गृहीतव्यं. प्रभवेणोक्तं कोऽयं द्विजः? स्त्री कथयति एकस्मिन् कुलग्रामे एको द्विजपुत्रः, सोऽतीवमूर्खः, तस्य माता कथयति हे पुत्र! यद्गृहीतं तन्न मोचनीयं, एतत्पंडितस्य लक्षणं. तेन मूर्खेण जननीवचनं धारितं; एकस्मिन् दिने कुंभकारगृहीत एको रासभो नष्टः, पश्चाद्भूतेन कुंभकारेण द्विजपुत्रस्य कथितं, अहो एनं खरं गृहाण? मूर्खेण रासभस्य पुच्छं गृहीतं, रासभश्चरणलत्तां ददाति, तथापि स पुच्छं न मुंचति, लोकैरु- ॥ १३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्तं नो मूर्ख! पुत्रं मुंच मुंच? तेनोक्तं मम मात्रा शिक्षा दत्तास्ति यद्गृहीतं तन्न मोचनीयं. स मूर्खो निजकदाग्रहेण कष्टं प्राप्तः ॥ इति विप्रपुत्रदृष्टांतः ॥ जंबूकुमारः कथयति हे प्रिये एतत्सत्यं खरसदृश्यो भवत्यः, भवतीनामंगीकरणं खरपुत्रग्रहणतुल्यं, लज्जास्थानेन परिणीतानां एतद्वाक्यं न युक्तं, एतानि वचनानि स सहते यस्य स्थानं न भवति; यो विप्र इव ऋणधारी भवति स दासो भूत्वा तद्गृहे तिष्टति, विप्रदृष्टांतस्त्वयं—कुशस्थलपुरे एकः क्षत्रियः, तस्य गृहे एका तुरगी, तस्याः सेवार्थमेको नरश्च रक्षितः, स नरोऽहर्निशं तुरगीनिमित्तं यदशनादि, तन्मध्यात्स्वयमपि प्रच्छन्नवृत्त्या भक्षयति. सा तुरगी कृशशरीरा जाता, क्रमेण च मरणं प्राप्य तस्मिन्नेव नगरे वेश्या जाता. स नरश्च विप्रकुले समुत्पन्नः, एकस्मिन् दिने तेन सा वेश्या दृष्टा, पूर्वभवसंबंधात्स तद्गृहे दासो भूत्वा स्थितः, गृहकर्म च करोति. तद्दृष्ट्वाहमपि भोगाशया दासो न भवामीति तुरगीकथा षष्ठी ॥ सप्तमी रूपश्रीः कथयति, हे स्वामिन्नधुनाऽस्मदीयं कथनं न क्रियते परं पश्चान्मासाहसपक्षिवदात्मना दुःखं प्राप्स्यसि.

यथैको मासाहसनामा पक्षी वने वसति, स पक्षी सुप्तव्याघ्रमुखे प्रविश्य दंष्ट्रायां स्थि- ॥१३३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं मांसपिंडं गृहीत्वा बहिरागत्यैवं वदति ' मा साहसं कुर्यात् ' एवं स वदति परं करोति. पक्षिन्निवारितोऽपि मांसलोलुपी पुनःपुनर्दंष्ट्रायां प्रविशति, स पक्षी व्याघ्रेण कवलित इति मासाहसपक्षिदृष्टांतः ॥ जंबूकुमारः कथयति धर्ममित्रमेव शरणे रक्षति, यथा प्रधानस्य धर्ममित्रेण साहाय्यं दत्तं. दृष्टांतश्चायं—सुग्रीवपुरे जितशत्रुराजा, सुबुद्धिश्च मंत्री, तस्य त्रीणि मित्राणि, एको नित्यमित्रः, द्वितीयः पर्वमित्रस्तृतीयस्तु जूहारमित्रः, इत्यवगतमेतत्. तदुपरि श्लोकोऽयं—नित्यमित्रसमो देहः । स्वजनाः पर्वसन्निभाः ॥ जुहारमित्रसमो ज्ञेयो । धर्मः परमबांधवः ॥ १ ॥ इति मित्रत्रयदृष्टांतः ॥ इति सप्तमी कथा ॥

अथ धनावहश्रेष्ठिनः पुत्री जयंतश्रीनामा स्वं भर्त्तारं विज्ञपयति. हे स्वामिन् कोऽयं वचनविवादः? भवद्भिः साकं नवपरिणीतानामस्माकं वक्तुं न युक्तं, परं किं कल्पितवार्त्तया विप्रतारयसि? भवद्भिर्या याः कथाः कथितास्ताः सर्वा अपि कल्पिता एव, यथा ब्राह्मणपुत्र्या कल्पितवार्त्तया राज्ञो मनो रंजितं, तथा त्वमप्यस्माकं कल्पितवार्त्ताभिर्मनोरंजनं करोषि. तस्मिन्नवसरे सर्वाभिरपि कथितं, भो जयंतश्री तां कथां कथय? यां कथां श्रुत्वा प्रिय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तमो गृहे तिष्टति. जयंतश्रीः कथयति, सावधानाः शृणुत?

भरतक्षेत्रे लक्ष्मीपुरनगरे नयसारनामा राजा राज्यं करोति, स राजा गीतकथानाटिकप्रहेलिकांतर्लापिकादिष्वतीवनिपुणः, नवीनकथाश्रवणरसिकः प्रत्यहं नवीनां नवीनां वार्त्तां जनमुखात् शृणोति. एकदा तेन राज्ञा नगरे पटहो वादितो यत्सर्वैरपि लोकैर्वारकेण राज्ञोऽग्रे नवीना कथा कथनीया. एतद्राज्ञो वाक्यं श्रुत्वा यस्य वारकः समायाति स राज्ञोऽग्रे गत्वा कथां कथयति. एकदावसरे एकस्य ब्राह्मणस्य वारकः समायातः, स ब्राह्मणोऽतीवमूर्खराट् कथां वक्तुं न जानाति. तद्गृहे एका पुत्री वर्त्तते, साऽतीवचतुरा, तया पितुरुक्तं त्वं निश्चिंतो भव? अहं राज्ञोऽग्रे गत्वा नवीनां कथां कथयिष्यामीति राज्ञोऽग्रे गता, राज्ञा पृष्टं भो पुत्रि! कथां कथय? यथा मन्मनोरंजनं जायते. ब्राह्मणपुत्र्या कथितं हे राजन्! स्वानुभूतामेव वार्त्तां कथयामि, सावधानतया शृणु? हे स्वामिन्नहं पितृगृहे नवयौवनवती जाता, तदा पित्रा सदृशकुलोत्पन्नेन ब्राह्मणपुत्रेण साई मदीयो विवाहो मेलितः स नवीनमेलितविवाहो मदीयो भर्त्ता मदीयरूपविलोकनार्थं मद्गृहे समायातः, तस्मिन्नवसरे मे मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तापितरौ क्षेत्रं गतौ; अहमेकाकिनी गृहे स्थिता.

मया सम्यक् स्नानभोजनादिना स भर्त्ताऽतीवसंतोषितः, सोऽपि भर्त्ता मदीयमद्भुतं रूपं दृष्ट्वाऽतीवकामज्वरपीडितो जातः, पल्यंकोपरि स्थितोंगमोटनं करोति, सरागवचनं वदति, पुनः पुनर्मामवलोकयति. मया तदीयोऽभिप्रायो ज्ञातः, तदा मया कथितं भो कांत! त्वरा न विधेया, पाणिग्रहणं विना विषयादिकृत्यं न भवति. अतिबुभुक्षितोऽपि पुमान् किं करट्येन भुंक्ते? ततोऽधुना विषयसेवनं न युक्तमेवेति मदीयवाक्यं श्रुत्वाऽतीवकामातुरस्य तस्य कुक्षौ शूलं समुत्पन्नं, तेन व्याधिना च स मदीयो भर्त्ता मृतः, तदा मया स गृहमध्ये भूमौ निक्षिप्तः, केनापि न ज्ञातं, मात्रा पित्रापि न ज्ञातं. हे स्वामिन्नियं मदीयाऽनुभूता वार्त्ता कथिता. तां श्रुत्वा राजातीवसंतुष्टो जातः, सा कन्या गृहे समायाता. जयंतश्रीः कथयति यथा तया कल्पितवार्त्तया राज्ञो मनो रंजितं, तद्वत्त्वमप्यस्माकं मनो रंजयसि, परंतु मिथ्यैवेयं प्रवृत्तिः, अतो यः स्वकीयं चरणं विचार्य धरिष्यति तस्य लज्जा स्थास्यति, अतो हे स्वामिन् भुक्तभोगी भूत्वा पश्चाच्चारित्रं गृहीत्वाऽात्मार्थः साधनीयः ॥ इति ब्राह्मणपुत्रीदृष्टांतः॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति जयंतश्रीवाक्यं श्रुत्वा जंबूकुमारः प्राह—भो जयंतश्री मोहातुरमनाः प्राणी अधर्मे धर्मबुद्धिं निधाय विषयादिकं स्थापयन् कर्माणि बध्नाति, अहो! दुरंता विषयाः, विषेभ्योऽप्यधिका विषया इति सत्यमेव. विषया मृतानपि मारयंति. यदुक्तं—भिक्षाशनं तदपि नीरसमेकवारं । शय्या च भूः परिजनो निजदेहमात्रं ॥ वस्त्रं च जीर्णशतखंडमयी च कंथा । हा हा तथापि विषया न परित्यजंति ॥ १ ॥ अतो भो वनिता यदि जन्मजरामरणवियोगशोकादयः शत्रवो मत्समीपं नायांति तदाहं भवत्संबंधिनो भोगान्भिलषामि; यथा मां बलात्कारेण गृहे स्थापयथ, तथा रोगादिभ्योऽपि रक्षणे किं शक्तिरस्ति? तदा स्त्रीभिरुक्तं स्वामिन्नेतादृशः कः समर्थो यः संसारस्थितिं वारयति, तदा जंबूकुमारेणोक्तमहमशुचिभृतायां मोहकुंडिकायां भवदीयायां तनौ न रतिं प्राप्नोमि, यतोऽनंतपापराशिभवः स्त्रीणां भवनिबंधः, यदुक्तं—अणंता पावरासीउ । जया उदयमागया ॥ तया इच्छित्तणं पत्तं । सम्मं जाणाहि गोयमा ॥ १ ॥ पुनरप्युक्तं—दर्शने हरते चित्तं । स्पर्शने हरते बलं ॥ संगमे हरते वीर्यं । नारी प्रत्यक्षराक्षसी ॥ १ ॥ इति. अतो नाहं ललितांगवन्मोहनिमग्नोऽशुचिकूपे भवकूपे ॥१३७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निवसामि, तदा स्त्रीन्निरुक्तं स्वामिन् कोऽयं ललितांगो यः स्वामिनोपनयं नीतः, जंबूकुमारः कथयति वसंतपुरे नगरे शतप्रभो राजा राज्यं करोति, तद्गृहे रूपवती नाम्नी पट्टराज्ञी, साऽतीवरूपवती यौवनादिगुणाकीर्णा मोहनृपराजधानी राज्ञोऽतीववल्लभा, परंतु सा व्यभिचारिणी; एकदा सा रूपवती गवाक्षस्थिता नगरकौतुकं विलोकयति.

तस्मिन्नवसरे ललितांगनामा कश्चिद्युवाऽतीवरूपपात्रं मार्गे गच्छंस्तया दृष्टः, तद्रूपदर्शनाज्जातमोहोदयाऽतीवकामातुरा रूपवती चेटीप्रति प्राह, भो एनं युवानमानय ? तया तस्मै निवेदितं मदीया स्वामिनी त्वामाकारयति, अतः समागच्छ मया साकं मत्स्वामिनीगेहं ? सोऽपि विषयभिक्षापरिभ्रमणशीलो निःशीलस्तद्गेहं जगाम. साऽप्यागतं ललितांगं दृष्ट्वा हावभावविलासविभ्रमान् विस्तारयंती, अंगमोटनं, कुर्वंती, दोर्मूलं दर्शयंती, नाभिमंडलं विवसनं कुर्वंती तदीयं मनो वशीचकार. यदुक्तं—स्त्री कांतं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपंती कटाक्षान् । दोर्मूलं दर्शयंती रचयति कुसुमापीडमुत्क्षिप्तपाणिः ॥ रोमांचस्वेदजृंभाः श्रयति कुचतटस्रंसि वस्त्रं विधत्ते । सोल्लुंठं वक्ति नीवीं शिथिलयति दशत्योष्ठमंगं भनक्ति ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदीयमेतत्स्वरूपं दृष्ट्वा स्मरोल्लंघितांगो ललितांगनामा तया सार्द्धं भोगान् बुभुजे, विषयलुप्तचेतनो निःशंकतां भुक्तवान्. एतस्मिन्नवसरे तदीयो भर्त्ता राजा समायातः, तदा द्वारस्थितचेटीमुखाद्राजागमनं श्रुत्वा साऽतीवभयविह्वलांगी तं नरमशुचिकूपे स्थापयामास; आगतेन राज्ञा सार्द्धं च हास्यविनोदादिवार्त्तां चकार. सोऽपि ललितांगोऽशुचिकूपे स्थितो महतीं क्षुत्तृषादिबाधां सहते, परवशो जातः, मनसि चिंतयति अहो! विषयलांपट्यं! धिग्मामकृत्यकारिणं! एवं तत्र वसतो बहूनि दिनानि जातानि.

सा राज्ञ्यपि तं विसस्मार, धिक् स्त्रीणां कृत्रिमं प्रेम! ललितांगस्तत्र तिष्ठन् मृततुल्यो जातः, वर्षाकाले जलपूरिताऽशुचिकूपजलप्रवाहेण वाहितो निर्गतो मिलितः स्वजनानां, निवेदितं सर्वमपि स्वरूपं, विषयाभिलाषविमुखो जातः, कियद्भिर्दिनैर्गृहे स्वस्थीभूतः, पुनरेकदा राज्ञ्या दृष्ट उपलक्षित आकारितश्च. ललितांगेनोक्तं न पुनरेवं करिष्यामि, विषयासक्तेन महती मया वेदनाऽनुभूतेति. ततः परं विषयविरक्तो भूत्वा स सुखी जातः, अतो भो वनिता यद्यहं विषयासक्तो भवामि तदा ललितांगवद्दुःखभाजनं स्यां, अतो न रते रतिः कर्त्तुं यु- ॥ १३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्केति ललितांगदृष्टांतः ॥ एवं कुमारेण शिक्षा दत्ता, एवं परस्परमुत्तरप्रत्युत्तरवाक्यै रजनी निर्जगाम. पश्चात्स्त्रीभिरुक्तं, स्वामिन् दुष्करं व्रतपालनं, अनुपमोऽयं वैराग्यरसः, यैरयं सम्यगाराधितस्तैर्मुक्तिपदमलंकृतमिति स्त्रीभिरपि जंबूवचः प्रमाणीकृतं ।

तस्मिन्नवसरे प्रभवेणोक्तं मदीयं महद्भाग्यं यच्चौरेणापि मया वैराग्यवार्त्ता श्रुता. विषमोऽयं विषयाभिलाषः, दुस्त्यजोऽयं विषयरागः, धन्यस्त्वं येन तारुण्येऽपींद्रियाणि वशीकृतानि. जंबूकुमारेणापि तदुद्धाराय बहवो धर्मोपदेशा दत्ताः, वैराग्यवासितेन प्रभवचौरेणोक्तं त्वं महान् ममोपकारकर्त्ता, अहमपि त्वया साई व्रतं गृहीष्यामि. प्रातःकालो जातः, कोणिकेन राज्ञा तत् श्रुतं, कोणिकेनापि बहवो रक्षणोपायाः कृताः, परंतु जंबूकुमारेण मनसि न धारिताः, पश्चात्प्रातः समहोत्सवं सप्तक्षेत्र्यां वित्तं वितीर्य कृतकोणिकनृपोत्सवः प्रभवादिपंचशतीपरिकलितो निजजनकजननीसहितः प्रमदाभिरनुश्रितो निजश्वसुरश्वश्रूसंयुतः श्रीसुधर्मस्वामिनः समीपे चारित्रं जग्राह. अनुक्रमेणाधीतद्वादशांगीकश्चतुर्दशपूर्वधारी चतुर्ज्ञानसहितः स श्रीसुधर्मस्वामिपट्टभूषणं जातो, घातिकर्मक्षयात्केवलमवाप्य मुक्तिकामिनीकंठा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लंकारहारः संजातः, धन्योऽयं सुरराजराजमहितः श्रीजंबूनामा मुनि–स्तारुण्येऽपि पवित्र-रूपकलितो यो निर्जिगाय स्मरं ॥ त्यक्त्वा मोहनिबंधनं निजवधूसंबंधमत्यादरा–न्मुक्तिस्त्री-वरसंगमोद्भवसुखं लेभे मुदा शाश्वतं ॥ १ ॥ एवं जंबूसदृशाः क्षणभंगुरं विषयसुखं त्यक्त्वा शाश्वत एव सुखे रमंते, तत्प्रत्ययेन प्रभवसदृशा अपि सुलभबोधिनः संसारांबुधिपारगा भ-वंतीति सप्तत्रिंशत्तमगाथया संबंधो ज्ञेयः ॥ इति श्रीजंबूकुमारचरित्रं संपूर्णं ॥

॥ मूलम् ॥—दीसंति परमघोरावि । पवरधम्मप्पन्नावपडिबुद्धा ॥ जह सो चिलाइ पु-त्तो । पमिबुद्धो सुसुमाणाए ॥ ३७ ॥ व्याख्या—' दीसंति इति ' दीसंति नाम दृश्यंते पर-मघोरावि प्रवररौद्रध्यानयुक्ता अपि बहवः प्राणिनः प्रवरो विशिष्टो यो धर्मप्रज्ञावस्तेन प्रति-बुद्धाः प्रतिबोधं प्राप्ताः, अर्हद्धर्ममाहात्म्याद्गतमिथ्यात्वनिद्रा एवंभूता जाताः, जह य-था स प्रसिद्धश्चिलातीपुत्रनामा रौद्रकर्मकर्त्ता धनावहश्रेष्ठिनो दासीदारकः प्रतिबोधं प्राप्तः ' सुसुमाणाए ' सुसुमानामकन्या, तस्या ज्ञाते तदाहरणे दृष्टांते ॥ इति समासार्थः ॥३७॥ विस्तरस्तु कथानकगम्यः, स चेत्थं—तत्र किंचिच्चिलातीपुत्रपूर्वभवस्वरूपं—क्षितिप्रतिष्ठितन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गरे एको यज्ञदेवनामा विप्रो वसति, सोऽतीवव्याकर्णकाव्यतर्कमीमांसादिविचारचतुरः सर्वशास्त्रेषु पारगः, तेनैतादृशी प्रतिज्ञा कृता, यो मां वादे जयति तस्याहं शिष्यो भवामि, इति प्रतिज्ञाधारको वादी बहून् प्रतिवादिनो निर्जितवान्. एकदैकेन क्षुल्लकेन स जितः, तदा सत्यप्रतिज्ञेन तेन ब्राह्मणेन क्षुल्लकपार्श्वे चारित्रं गृहीतं, भावयुक्तो व्रतं पालयति. परंतु जातिगुणेन देहवस्त्रादिमलपरिषहं निंदति, अहो एतन्मार्गे सर्वमपि समीचीनं परं त्वेकं स्नानाद्यभावरूपं महज्जुगुप्सास्थानं, इति मलपरिषहसहनाऽसमर्थोऽपि चारित्रभंगभयान्न स्नानादिशुद्धिं करोति.

एकदोपवासस्य पारणके भिक्षार्थमटन् कपोतवृत्तिन्यायेन स्वकीयस्त्रीगेहं प्राप्तः, तया मोहपिशाचग्रस्तया पूर्वस्नेहवशतः स्वकीयपतेर्मुनेः कार्मणं कृतं. तेन कार्मणेन सोऽतीवक्षीणशरीरो जातः, कियति काले गते विहाराऽक्षमो भूत्वाऽनशनं कृत्वा स कालधर्मं प्राप्तः, स्वर्गे च सुरो जातः, सा पतिमरणवार्त्ता स्त्रिया श्रुता, पश्चात्तापं च गता, अहो धिग्मम पतिमारिकाया महत्पापं लग्नं, अहो साधुहत्याकारिकाया मम नो नरकेऽपि स्थानं. अतोऽश- ॥ १४२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रणाया मम तदीयो वेष एव शरणमस्त्विति वैराग्यपरायणेन मनसा सा चारित्रं जग्राह, महदुग्रं तपश्च चकार. सम्यगालोचनां गृहीत्वा, बहुकालं च चारित्रमनुश्रित्य सा स्वर्गमलंचकार. द्वितीयभवे स यक्षदेवब्राह्मणजीवो देवलोकतश्च्युत्वा चारित्रजुगुप्सोपार्जितनीचगोत्रकर्मा राजगृहनगरे धनावहश्रेष्ठिनो गृहे चिलातीनाम्नी दासी, तस्याः कुक्षौ पुत्रत्वेनोत्पन्नः, तस्य चिलातीपुत्र इति नाम दत्तं. स्त्रिया जीवस्तु देवलोकतश्च्युत्वा तस्यैव गृहे भद्रानाम्नी भार्या, तस्याः कुक्षौ पुत्रीत्वेनोत्पन्नः, तस्याः सुसमा इति नाम दत्तं. चिलातीपुत्रस्तां बालिकां प्रतिदिनं क्रीडापयति. सा तस्य प्राणतोऽप्यतीववल्लभा जाता, एकवारं स चिलातीपुत्रश्चेष्टां कुर्वन् मात्रा पित्रा च दृष्टः, अयोग्योऽयं व्यसनान्निभृतत्वान्मद्यपानरतत्वात्कलहकारित्वाच्चेति विचार्य स गृहान्निष्कासितः, चौरपल्लीं गतः, चौराणां मिलितः, तैरपि साहसिकोऽयमिति ज्ञात्वा पल्लीपतित्वेन स्थापितः, सोऽतीवपापक्रियानिरतो जीववधतो नाऽपसरतिस्म.

एकदा तेन चौरानादूयोक्तं, धनं युष्माकं सुसमा कन्या च मदीयेत्यागम्यतां धनावहश्रेष्ठिनो गृहे, इति बहूंश्चौरान्मेलयित्वा स राजगृहे श्रेष्ठिनो गृहे समायातो, गृहं विलुप्तं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चिलातीपुत्रेण कन्या गृहीता, अन्यैश्च बहु धनं गृहीतं. सर्वेऽपि पश्चाद्चलिताः, पश्चाद्धनश्रेष्टिना बुंबारवो दत्तः, दुर्गपालोऽपि विकटभटकोटीभिः परिकलितश्चौराणां पश्चाल्लग्नः, सपुत्रपरिकरो धनोऽपि दुर्गपालेन सार्द्धं चटितः, ते चौरा अपि शिरसि भारं वोढुमक्षमा मंदक्रमा भारं भूमौ त्यक्त्वा पलायितुं लग्नाः, केचिन्नष्टाः, केचिद्दुर्गपालेन भूमौ धृष्टाः, केचिद्दंतांतस्तृणनिवेशनोत्पादितधनश्रेष्टिसंतोषा जाताः, चिलातीपुत्रोऽपि सुसमां गृहीत्वा कांचिद्दिशमुद्दिश्य नष्टः, सपुत्रो धनस्तत्पृष्टौ लग्नः, दुर्गपालस्तु द्रव्यरक्षार्थं तत्रैव स्थितः, ततो धनश्रेष्टिनयात्तां निर्वोढुमशक्नुवताऽग्रे गच्छता तेन चिलातीपुत्रेण चिंतितं मत्प्राणवल्लभेयं कन्या माऽन्यस्यापि भवत्विति विचार्य दुष्टेनासिना छिन्नं तदीयं शिरो गृहीत्वा नष्टः, धनादयो गतप्रयोजनाः पश्चाद्चलिताः, अग्रे गच्छता तेन कायोत्सर्गस्थितो मुनिर्दृष्टः, मुनिसमीपे समागत्य तेनोक्तं कथय धर्ममिति सोऽवदत् स भवाच. साधुनाप्यतिशयेन ज्ञातमयं बहुपापोऽपि धर्मं प्राप्स्यतीति मुनिनोपदेशो दत्तः, भवशमो विवेकः संवरश्च कर्त्तव्य इति पदत्रयं प्रापितरत्नत्रयमुक्त्वा मुनिः खे समुत्पपात.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चिलातीपुत्रेण चिंतितं नायं मां विप्रतारयति, सत्यं बहुकृतपापस्य मम धर्मं विनाऽन्यथा शुद्धिर्न भविष्यतीत्यवश्यं साधुवचनं मया करणीयं, किमनेन साधुनोक्तं? ज्ञातं मया, उपशमः क्रोधादीनां त्यागो विधेयो, धिग्मां क्रोधांधचेतसमनर्थकारिणं. पुनर्विवेकस्त्यागो बाह्यानां विधेय इति विचार्य तेन मुक्तं करवालेन साकं करस्थितस्त्रीमस्तकं, पुनः संवरो विधेयो, दुष्टयोगानां संवरणं कर्त्तव्यमिति निरुद्धस्तेन दुष्टमनोवाक्कायव्यापारः, एवं पदत्रयं मनसि चिंतयन् स तत्रैव कायोत्सर्गेण स्थितः, तत्र शोणितगंधेन बहवो वज्रतुंडाः पिपीलिका आगताः, तस्य रुधिरं मांसं च भक्षयितुं लग्नाः, समंततः शरीरं चालिनीतुल्यं कृतं. तथाऽप्यसौ ध्यानान्न चलितः, नायं मदीयो देहो, नाहं कस्यापीति ध्यायन् अर्द्धतृतीयाहोरात्रैर्बहुपापक्षयं कृत्वा जगाम देवलोकं चिलातीपुत्रः, धन्योऽयं धर्मो यदीयप्रज्ञावेणैतादृशो नरः स्वर्गसुखभाजनं बभूव. उक्तं च—दुर्गतिप्रपतत्प्राणि–धारणाद्धर्म उच्यते ॥ संयमादिदशविधः । सर्वज्ञोक्तो विमुक्तये ॥ १ ॥ इति न हि बहुपापाद्धर्मस्तारयतीति मुग्धशंकानिरासार्थं धर्मप्रज्ञावोपरि चिलातीपुत्रदृष्टांतो बोध्यः ॥ इति चिलातीपुत्रदृष्टांतः ॥ पूर्वगाथायां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथा चिलातीपुत्रेण प्रतिज्ञा निर्वाहिता तथान्येऽपि विवेकिनः प्रवर्त्तंते इत्याह—

॥ मूलम् ॥—पुप्फिए फलिए तह । पिउघरंमि तण्हा छुहा समणुबद्धा ॥ ढंढणेण तहा विसढा । विसढा जह सफलया जाया ॥ ३९ ॥ व्याख्या—' पुप्फिए इति ' पुष्पिते पुष्पयुक्ते फलिते तथा प्रसिद्धौ ' पिउघरंमित्ति ' पितृगृहे वासुदेवभवने इत्यर्थः, एतादृशे पितृगृहे सत्यपि येन महापुरुषेण ' तण्हा ' शब्देन तृषा ' छुहा ' शब्देन क्षुधा ' समणुबद्धा ' निरंतरा ढंढणकुमारेण महापुरुषेण तथाऽलाभपरिषहसहनप्रकारेण ' विसढा ' शब्देन तितिक्षिता ' जहा ' यथा प्रकारेण विसोढा अनुभूता तृषा क्षुधा, तस्य महापुरुषस्य सफला केवलज्ञाननिमित्तं जातेत्यर्थः ॥ अधुना कथायां विस्तरार्थनिदर्शनं लिख्यते, ढंढणकुमारदृष्टांतस्त्वयं—

ढंढणकुमारजीवः पूर्वभवे राज्ञः पंचशतपरिमितानां हलवाहकानामधिकारी बभूव. यदा मध्याह्नवेलायां सर्वनिमित्तं भक्तपानमायाति, तदा स्वकीये क्षेत्रे तेषां पार्श्वादेकैकां हलचंत्रां दापयति. पंचशतानां कर्षकाणां सहस्रपरिमितानां वृषभाणामंतरायं च करोति. तस्मि- ॥ १४६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न जवे तदंतरायकर्म निबद्धं. ततो बहुकालं बहून् जवान् परिभ्रम्य स द्वारिकायां नगर्यां श्रीकृष्णवासुदेवगृहे ढंढणा राज्ञी, तस्याः कुक्षौ पुत्रत्वेनोत्पन्नः, ढंढणकुमार इति नाम्ना च प्रसिद्धो जातः, यौवनं प्राप्तः, पित्रा पाणिग्रहणं कारितः स्त्रीसंगसुखनिमग्नो बहून् वासरान् गमयामास. एकस्मिन्नवसरे जगवानरिष्टनेमिरष्टादशसहस्रसाधुपरिवृतो द्वारिकायां महोद्याने समवसृतः, वंदनार्थं सढंढणकुमारो वासुदेवो निर्गतः, वंदित्वा यथास्थानमुपविष्टौ वासुदेवो ढंढणकुमारश्च. प्रभुणापि कुमतांधकारनिवारिणी यतिजनोद्धारिणी सुधास्यंदानुकारिणी मोहमल्लसंहारिणी सकलजनाह्लादिनी मालवकैशिकरागानुवादिनी सहलक्लेशनाशिनी देशना प्रारेजे. वैराग्यरसप्लावितसर्वमलेन ढंढणेन श्रीनेमिनाथस्वामिसमीपे चारित्रं जगृहे. चारित्रं गृहीत्वा द्वारिकायां स जिक्षार्थं पर्यटति. परंतु श्रीकृष्णपुत्रत्वेन प्रसिद्धस्यापि श्रीनेमिशिष्यत्वेन बहुनिर्झातस्यापि तस्य शुद्ध जिक्षा न मिलति. जगवतोक्तमन्येनानीत आहारो गृह्यतां? तदा करौ मुकुलीकृत्य ढंढणकुमारेणोक्तं हे त्रिलोकीविज्ञो! यदा मदीयोंतरायः क्षयं यास्यति, तदैव स्वकीयलब्ध्या मिलितमाहारमहं गृहीष्यामि, नाऽन्यलब्ध्यानीताहारग्रह-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णं मे युक्तं, स्वामिनः साक्षिकमेतदन्निग्रहतपः स जग्राह. पश्चात्प्रतिदिनमव्याकुलमनाः स न्निक्षार्थं परिभ्रमति, परं न मिलति. इत्थं तृष्णां क्षुधां चानुन्नवतस्तस्य कियानपि कालो गतः.

एकदा श्रीनेमिवंदनार्थं वासुदेवः समायातः, प्रभुं वंदित्वा तेन पृष्टं, न्नो न्नगवन्! अष्टादशसहस्रसाधूनां मध्ये को मुनिर्दुष्करकारकः? तदा न्नगवतोक्तं सर्वेऽपि, परं विशेषतो ढंढणमुनिः, वासुदेवेनोक्तं न्नगवन्! केन गुणेन? न्नगवता सर्वोऽपि तदन्निग्रहः कथितः, तत् श्रुत्वाऽतीवहृष्टेन कृष्णेनोक्तं क्व वर्त्तते स धन्यो मुनिः? मम महती तद्वंदनेच्छा वर्त्तते. न्नगवतोक्तं स न्निक्षार्थं नगर्यां गतोऽस्ति, न्नवतां च सन्मुखमेव मिलिष्यति. स्वामिनं वंदित्वा द्वारिकां प्रत्यागच्छता हस्तिराजाधिरूढेन कृष्णेन दृष्टो हट्टमार्गे स ढंढणमुनिः, बहुन्नावपूर्वकं हस्तिस्कंधादुत्तीर्य त्रिःप्रदक्षिणीकृत्य कृष्णेनान्निवंदितो ढंढणमुनिः, धन्यस्त्वं मुने, कृतपुण्यस्त्वं, न हि न्नूरिन्नाग्यमंतरा न्नवद्दर्शनं सुलन्नं. तस्मिन्नवसरे षोडशसहस्रपरिमिताः सर्वेऽपि राजानो मुनिचरणयोर्निपेतुः, तदवसरे गवाक्षस्थितेनैकेन वणिजा चिंतितमहो महानुन्नावोऽयं मुनिर्दृश्यते, यन्महाऋद्धिमंतोऽपि कृष्णादय एतदीयचरणांन्नोजे न्नृंगीन्नवंति. अतोऽसौ ॥ १४८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मया शुद्धमोदकभिक्षादानेन प्रतिलंभनीयः, ममाप्येतत्प्रतिलंभनेन महत्पुण्यं भविष्यति. ततो बहुभावपूर्वकं तेन स्वगृहे प्रवरमोदकैः स प्रतिलंभितः, भगवत्समीपमागतः, पृष्टं च भगवन् मेंतरायकर्म क्षीणं? भगवतोक्तं हे मुनेऽद्यापि न क्षीणं. ढंढणेनोक्तं स्वामिंस्तर्हि कुतो ममाद्य भिक्षालाभो जातः? स्वामिनोक्तं कृष्णलब्ध्याऽयमाहारो लब्धः, न तु भवदंतरायक्षयजनितलब्ध्या. ।

इति भगवद्वचनं श्रुत्वा तमाहारं प्रतिष्ठापयितुं स गतः, शुद्धभूमौ तत्र विशुद्धविशुद्धतराध्यवसायवशतः प्रबलशुक्लध्यानानलदग्धघातिकर्मेंधनस्य कर्मसमूहमिव मोकळं चूरयतस्तस्य मुनेः केवलज्ञानमुत्पन्नं. देवैर्दुंदुभयस्ताडिताः, जयजयारवो जातः, हृष्टाः कृष्णादयः सर्वेऽपि भव्यजनाः, बहुकालं केवलित्वेन विहृत्य मुक्तिमलंचकार ढंढणमुनिः, एवमन्येनापि महात्मना भाव्यमिति ढंढणमुनिनिदर्शनं ॥

॥ मूलम् ॥—आहारेसु सुद्धेसु अ । रम्मावसहेसु काणणेसु च ॥ साहूण नाहिगारो । अहिगारो धम्मकज्जेसु ॥ ४० ॥ व्याख्या—' आहारेसु इति ' आहारेषु अशनपानखाद्यस्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्यलक्षणेषु, कीदृशेषु आहारेषु ? शुद्धेषु विशिष्टरसयुक्तेषु, च पुना रम्या मनोहरा ये आवसथा उपाश्रयास्तेष्वपि साधूनां नाधिकारः, काननेषु विचित्रोद्यानेषु, च शब्दः समुच्चयार्थः, एतेषु स्थानेषु साधूनां नाधिकारः, एतेषु स्थानकेष्वासक्तो न भवतीत्यर्थः, निर्ममत्वादित्यर्थः, तर्हि साधूनां क्वाधिकार इत्याह—साधूनां धर्मकार्येष्वधिकारः, नत्विंद्रियसुखकारिषु बाह्येषु, एतादृशाः साधवो भवंतीत्यर्थः ॥ ४० ॥

॥ मूलम् ॥—साहू कंतारमहाभएसु । अवि जणवएवि मुइअंमि ॥ अवि ते सरीरपीडं । सहंति न लयंति अ विरुद्धं ॥ ४१ ॥ व्याख्या—' साहू इति ' साहुशब्देन साधवो महात्मानः, कीदृशाः ? कांतारमहाभययोरपि, कांतारेऽटव्यां, महाभये राजविड्वरादौ वर्त्तमाना अपि, जनपदे इव मुदिते भृद्धिस्तिमिते निर्भय वर्त्तमानाः, अपिशब्दः संभावनायां, ते भगवंतः साधवः शरीरपीडां कायबाधां सहंते क्षमंते, परं न लांति न गृह्णंति विरुद्धमनेषणीयं भक्तपानादि न गृह्णंति च शब्दाकृहीतमपि न भुंजते. एतेन किमुक्तं ? तेषामाहारादिषु प्रतिबंधो नास्ति, किंतु धर्मैकार्येषु प्रतिबंधो वर्त्तते इत्यर्थः ॥ ४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जंतेहिं पीलियावि हु । खंदगसीसा न चेव पकुविआ ॥ विइअपरमत्थ-सारा । खमंति जे पंडिआ हुंति ॥ ४२ ॥ व्याख्या—' जंतेहिं इति ' यंत्रैः पीडिता अपि पीडां प्रापिता अपि पालकनाम्ना दुष्टेन, हुः पादपूरणे, स्कंदकान्निधाचार्यस्य शिष्याः पंचशतीपरिमिता इत्यर्थः, परं ते कीदृशाः ? नचेवशब्देन नैव परिकुपिताः क्रोधं न गता इत्यर्थः, विदितो ज्ञातः परमार्थसारो यैस्ते विदितपरमार्थसारा ज्ञाततत्वगर्भा इत्यर्थः, क्षमंति सहंते, प्राणात्ययेऽपि मार्गान्न चलंतीत्यर्थः, विदितपरमार्था ये पंडिता भवंति ते मार्गान्न चलंतीति समासार्थः, विस्तरार्थस्तु कथानकगम्यः ॥ ४२ ॥ अधुना स्कंदकाचार्यसाधूनां निदर्शनं लिख्यते—

श्रावस्त्यां नगर्यां जितशत्रुराजा राज्यं करोति, तद्गृहे धारिणीनाम्नी पट्टराज्ञी बभूव. तत्कुक्षिसंभूतः स्कंदककुमारः, तस्य पुरंदरयशानाम्नी भगिनी वर्त्तते, सा पुरंदरयशा कुंभकारकटकनगरस्वामिना दंडकनाम्ना राज्ञा परिणीता. तस्य दंडकनाम्नो राज्ञः पालकनामा पुरोहितोऽस्ति, अन्यदा दंडकराज्ञा कस्मैचित्कार्याय निजश्वसुरजितशत्रुनृपपार्श्वे पालकः प्रे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षितः, तदा तस्यां जितशत्रुनृपसन्नायां वार्त्तावशेन पालकेन धर्मचर्चा प्रारब्धा. तस्यां धर्मचर्चायां स स्वकीयं नास्तिकमतं स्थापयति. तदा समीपस्थेन जिनतत्वविदा स्कंदककुमारेण जिनोक्तयुक्तिभिः पालको निःपृष्टव्याकरणीकृतः, मानभ्रष्टो जातः, अंतः क्रोधेन ज्वलितो बन्नूव. स स्वकीयं कार्यं कृत्वा पश्चात्कुंन्नकारनगरे समायातः, अथैकदा श्रीमुनिसुव्रतस्वामिनो विहरंतः श्रावस्त्यां समायाताः, स्कंदककुमारो वंदनार्थमागतः, गुरुन्निर्देशना दत्ता, तां श्रुत्वा स्कंदककुमारः पंचशतराजपुत्रैः पुरुषैः सार्द्धं दीक्षां जग्राह; नग्नविहारी च जातः, गृहीतसकलसिद्धांतसारो न्नगवता पंचशतसाधूनां स एवाचार्यः कृतः.

अन्यदा मुनिसुव्रतस्वामिनः पार्श्वे समागत्य स्कंदककुमारः प्राह न्नगवन् यदि न्नवतामाज्ञा न्नवति तदा निजन्नगिनीपुरंदरयशाप्रतिबोधनार्थं, निजन्नगिनीपतिदंमकनृपादिप्रतिबोधनार्थं च कुंन्नकारकटकनगरं गन्नामि. तदा न्नगवतोक्तं हे स्कंदकाचार्य! न्नवतां तत्र प्राणांतिक न्नपसर्गो न्नावी, तदा स्कंदकाचार्येणोक्तमहमाराधको न्नविष्यामि वा न वेति? न्नगवतोक्तं न्नवंतं मुक्त्वा सर्वेऽप्याराधका न्नविष्यंति. तत् श्रुत्वा स्कंदकाचार्येणोक्तं स्वामिन् यदि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मत्साहाय्येनैते आराधका भवंति तदा मया सर्वमपि लब्धं. इत्यभिधाय स्वामिनं वंदित्वा स पंचशतसाधुभिः सार्द्धं कुंभकारकटकपुरमागतः, तां वार्त्तां श्रुत्वा तदागमनात्पूर्वं साधुयोग्यासु वनभूमिषु पालकेन पूर्वद्वेषिणा नानाविधानि शस्त्राणि स्थापितानि. समागताः स्कंदकाचार्याः, दंडकनृपोऽपि नागरलोकैः सह वंदनार्थमागतः, आचार्यैः क्लेशनाशिनी देशना दत्ता, दर्शिता चाऽनित्यता भवस्वरूपस्य, आह्लादिताः प्राणिनः, ततः पालको रहसि राज्ञः समीपमागत्योवाच, हे स्वामिन्नयं स्कंदकनामा पाखंडी वर्त्तते, साधुर्नास्ति, स्वाचारभ्रष्टोऽयं सहस्रयोधिनः पंचशतपुरुषान् सहायीकृत्य तव राज्यं गृहीतुमागतोऽस्ति. तदा दंडकनृपेणोक्तं त्वं कथं जानीषे? पालकेनोक्तं दर्शयिष्यामि भवतामेषां कापट्यं, ततस्तेन केनचित्कार्यमिषेण साधवोऽन्यवने प्रेषिताः, पश्चात्पालकेन स्वयमेव भूमिन्यस्तानि शस्त्राणि राज्ञो दर्शितानि. शस्त्रदर्शनाच्चलितचित्तेन राज्ञा पालकस्याज्ञा दत्ता, त्वमेतेषां यथोचितं कुरु? इति कथयित्वा राजा गृहं गतः, पश्चात्पूर्वमत्सरी पालकनामा पुरोहितः पुरुषपीडनयंत्रं विधाय तान् साधून् प्रत्येकं प्रत्येकं मध्ये क्षेपयामास. स्कंदकाचार्यस्तु प्रत्येकमालोचनां द- ॥१५३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दाति, तेषां समाधानमुत्पादयति च. तेऽपि भगवंतो मुक्तकायपरिग्रहाः कर्मक्षयनिबद्धदृष्टयो ' नाऽभुक्तं क्षीयते कर्म ' इति निश्चयवंतो गतरागद्वेषाः परमकरुणारसभावितांतःकरणाः शुभध्यानवशतः क्षपकश्रेणिमारूढा निर्दग्धकर्मेंधनास्तेन पापेन पीडिता अंतकृत्केवलित्वेन मोक्षं गताः, एवमनुक्रमेणैकोना साधुपंचशती मुक्तिं जगाम. पश्चादेको लघुशिष्योऽवतिष्ठितः, तमपि पापात्मा पालकः पीडितुमारब्धवान्. तदा स्कंदकाचार्येणोक्तं भो पालक! मां प्रथमं पीडय? पश्चादेनं पीडयेत्युक्तोऽपि दुष्टात्मा पालकस्तं शीघ्रतरं पीडितवान्. अहो! दुरात्मनां दुर्ललितं! ततः स्कंदकाचार्यस्यापि तीव्रः क्रोधानलः प्रकटीबभूव. दग्धं क्षणाद्गुणेंधनं. अहो मत्प्रत्यक्षमनेन दुष्टात्मना किं विहितं? दुष्टोऽयं पालकः, अधमोऽयं दंडकनृपः, निर्दयाश्चैते पौरजनाः, इति क्रोधाध्मातमनसा स्कंदकाचार्येण पालकमुद्दिश्य अरे दुरात्मन् अहं त्वद्वधाय भूयामिति निदानं चक्रे. ततो विशेषेण बद्धरोषेण पालकेन स्कंदकाचार्योऽपि पीडितः, विराधितसंयमः समुत्पन्नोऽसावग्निकुमारनिकाये देवत्वेन.

एतस्मिन्नवसरे स्कंदकाचार्यरजोहरणं रुधिरलिप्तो हस्तोऽयमिति भ्रांत्या गृध्रपक्षिन्निर्गृ- ॥ १५४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दीतो विवदतां तेषां पक्षिणां मुखात्पतितं तज्जोहरणं तन्नगिन्याः पुरंदरयशायाः प्रांगणे; तयापि रजोहरणमुपलक्षितं. लोकमुखात्सर्वोऽपि वृत्तांतो ज्ञातः, तं श्रुत्वा पुरंदरयशा राजानमुद्दिश्याह आः पाप दुरात्मन् दुर्नीतिकारक किमेतत्कुकर्म कृतं? त्वया साधुहत्यात्मकं पापं कृतं, यद्दहत्यासप्तमं कुलं, महतीयं साधुहत्या, इति वारंवारं तं निर्भर्त्सितवती संसारपराङ्मुखी सा संजातवैराग्या जाता, शासनदेवतया च परिवारसहिता श्रीमुनिसुव्रतसमीपे समानीता, दीक्षां गृहीत्वाऽऽत्मार्थं साधयामास. तस्मिन्नवसरेऽग्निकुमारनिकाये समुत्पन्नेन स्कंदकाचार्यजीवेनाऽवधिज्ञानेन विलोकितं, संजातक्रोधेन च तेन नस्मीकृतः पालकसहितो दंडकनृपदेशः, ततो जातं दंडकारण्यं लोकप्रसिद्धं. तदेवमेते स्कंदकशिष्याः प्राणांतकारिण्यपि पालके न क्रुद्धाः, ततस्तस्मिन्नेव भवे सर्वेऽपि मुक्तिं गताः, अतः सिद्धांतेऽपि ' भवसमसारं खु सामण्ण ' मित्युक्तं. यदुक्तं—क्षमाखड्गं करे यस्य । दुर्जनः किं करिष्यति ॥ अतृणे पतितो वह्निः । स्वयमेवोपशाम्यति ॥ १ ॥ तत ईदृशमेव क्षमागुणधारणं साधूनां मुक्तिनिबंधनमित्युपनयः ॥ इति स्कंदकाचार्यशिष्यकथा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जिणवयणसुइसकन्ना । अवगयसंसारघोरपेयाला ॥ बालाणं खमंति ते । जइत्ति किं अत्थ अच्छेरं ॥ ४३ ॥ व्याख्या—' जिण इति ' जिनवचनस्याऽर्हद्भाषितस्य या श्रुतिः श्रवणं, तया सकर्णाः कर्णसहिता इत्यर्थः, लोकरूढ्यापि ये सकर्णा भवंति ते सकर्णा नोच्यंते, किंतु जिनवचनश्रवणेनैव सकर्णाः, अत एवाऽवगतो ज्ञातो घोरसंसारस्य रौद्रभवस्य ' पेयालोत्ति ' देशीयभाषया विचारो यैस्ते, एवंभूताः साधवोऽसारोऽयं संसारप्रचार इति पर्यालोचनवंत इत्यर्थः, एतादृशाः ' जइति ' यतयः साधवो बालानामज्ञानवतां मिथ्यादृशां संबंधि दुष्टचेष्टितं क्षमंते सहंते. यदीत्यभ्युपगमे, यद्येतादृशां दुष्टानामपराधं क्षमंते स्कंदकशिष्यवत् ' अच्छेति ' अत्र किं अच्छेरं आश्चर्यं ! अपितु नाश्चर्यमित्यर्थः, साधूनां दुष्टकृतापराधसहनं युक्तमित्यर्थः ॥ ४३ ॥

॥ मूलम् ॥—न कुलं इत्थ पहाणं । हरिएसबलस्स किं कुलं आसि ॥ आकंपिअतवेणं । सुरावि जं पज्जुवासंति ॥ ४४ ॥ व्याख्या—' न कुलं इति ' इत्थेत्यत्र धर्मविचारे कुलमुग्रभोगादिकं न प्रधानं न श्रेष्ठं न मुख्यं. उग्रभोगादिकुलं विना धर्मो न भवतीति न निश्च-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

य इत्यर्थः, कथं ? तत्र दृष्टांतमाह—हरिकेशिबलस्य महापुरुषस्य किं कुलं प्रधानमुग्रादिकमासीत् बभूव ? जुगुप्सितत्वान्न किंचिदित्यर्थः, तस्य किं संपन्नमित्याह—आकंपिता आवर्जिता वशीकृतहृदयाः, केन ? तपसा, एतादृशाः सुरा अपि यं हरिकेशिबलनामानं साधुं पर्युपासंते सेवंते, तर्हि मनुजानां का कथा ? अतो धर्मविचारे न कुलस्य प्राधान्यं. ॥ ४४ ॥ अत्र हरिकेशिबलदृष्टांतो लिख्यते. अधुना हरिकेशिबलपूर्वभवस्वरूपं किंचिल्लिख्यते—

मथुरायां नगर्यां शंखराजा बभूव. सोऽतीवन्यायनिपुणः, एकदा तेन राज्ञा गुरुसमीपे चारित्रं गृहीतं. विहारं कुर्वन् शंखराजर्षिर्हस्तिनागपुरं गतः, तेन शंखराजर्षिणा मार्गमजानता सोमदेवपुरोधसे पृष्टो नगरमार्गः, यतिवेषद्वेषिणा तेन सोमदेवपुरोहितेन व्यंतराधिष्ठितोऽग्निसदृशस्तप्तो मार्गस्तस्मै दर्शितः. योऽजानन् तस्मिन् मार्गे व्रजति स भस्मसाद्भवति, विप्रेण चिंतितमयं यतिरस्मिन् ज्वलन्मार्गे यदा गमिष्यति तदा स ज्वलिष्यति, ततोऽहं च कौतुकं विलोकयिष्यामीति दुष्टमतिनाऽादिष्टे मार्गे साधुर्गंतुं लग्नः, तस्मिन्नवसरे साधोर्धर्ममाहात्म्येन स व्यंतरो नष्ट्वा गतः, मार्गश्च शीतलो जातः, शंखराजर्षिस्त्वैर्यासमित्या तस्मि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न् मार्गे शनैर्गच्छति. तदा गवाक्षस्थितेन सोमदेवपुरोहितेन विचारितमहो महानयं धर्मप्रभावः, यदयं व्यंतराधिष्टितोऽग्निसदृशस्तप्तोऽपि मार्गोऽस्य प्रभावेण शीतलो जातः, अतो धन्योऽयं साधुवेषो धन्यश्चायं मार्गः, स गवाक्षादुत्तीर्य साधुचरणयोः पतितः, हे स्वामिन्मयाऽज्ञानवशेन दुःकृतं कृतं; क्षमस्व मदीयापराधं?

साधुनापि तं योग्यं ज्ञात्वा धर्मदेशना दत्ता, तच्छ्रवणेन स प्रतिबोधं प्राप्तः, मनसि चिंतयति, अहो परमोपकारित्वमेतेषां! यदपकारिण्यप्युपकारबुद्धिः, पुरोहितेनोक्तं हे भगवन्! भवाब्धौ निमज्जंतं मां चारित्रधर्मप्रवहणप्रापणेन तारय? गुरुणा चारित्रं दत्तं, निरतिचारं चारित्रं स पालयति, परंतु ब्राह्मणजातिवशेन नीचैर्गोत्रनिबंधनं जातिमदं करोति. बहुकालं चारित्रं प्रपाल्यांते मदमनालोच्य स देवत्वं प्राप्तः, तत्र बहुकालं यावद्भोगान् भुंक्त्वा बहुनीचैर्गोत्रनामा सोमदेवपुरोहितजीवो गंगातटे बलकोटनाम्नश्चांडालस्य गृहे गौरीभार्या, तत्कुक्षौ समुत्पन्नः, मात्रा स्वप्नमध्ये नीलवर्णः सहकारो दृष्टः, अनुक्रमेण पुत्रो जातः, मातृपितृभ्यां हरिकेशिबल इति नाम दत्तं. अनुक्रमेण वर्द्धनकवारं वसंतोत्सवे सवयोभिः शिशुभिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ततो बहुभिर्मिलित्वा हरिकेशिबलः स्वयूथान्निष्कासितः, एतस्मिन्नवसरे एकः सविषः सर्पो निर्गतः, ततो बहुभिर्जनैर्मिलित्वा स सर्पो हतः, तस्मिन्नेव वासरेऽन्योऽपि सर्पो निर्ग- तः, स तु निर्विषः, ततो लोकैर्विचारितं निर्विषोऽसौ सर्पो न मारणीय इति जीवन्मुक्तः, ए- तत्स्वरूपं दृष्ट्वा लघुकर्मणा हरिकेशिबलबालकेन विचारितं अहोऽस्मिन्नगाधे भवकूपे स्वक- र्मणैवायं जीवो दुःखी भवति, परस्तु निमित्तमात्रं, यदुक्तं—रे जीव सुहदुहेसु । निमित्त- मित्तं परं विजाणाहि ॥ सकयं फलं भुंजंतो। कीस मुहा कुप्पसि परस्स ॥ १ ॥ पुनः स्वगु- णैरेवायं सुखी भवति. सुखदुःखयोरुपादानं निजात्मैव. अतो निर्विषत्वमेव वरं. विषयविष- सहितास्तु मरणं प्राप्नुवंति, अतो विषयविषरहिता ये त एव धन्याः, इत्थं मुकुलितनयनो- ऽनादिभवप्रपंचं चिंतयन् भवतापहरणं जातिस्मरणं प्राप. सम्यक् पूर्वभवस्वरूपं दृष्टं, अहो मया पूर्वं सोमदेवभवे चारित्रं पालितं, परं तुच्छजातिमदं कुर्वता कलुषीकृतं. अहो विशुद्धे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽयं चारित्रधर्मो निर्विषत्वेनाराद्धो नियतं स्वर्गसुखाय संपद्यते, यदुक्तं सिद्धांतेऽपि—तणसंथा-
रनिविट्ठोवि । मुणिवरो भट्ठरागमयमोहो ॥ जं पावइ मुत्तिसुहं । कत्तो तं चक्कवट्टीवि ॥१॥
॥ १६० ॥ इति संवेगरंगशालीढमनसा हरिकेशिबलेन गुरोःपार्श्वे जिनवाणीं सम्यग् निशम्य चारित्रं गृही-
तं, दुष्करं षष्टाष्टमादितपः करोति, निर्विषत्वेन च भूमौ विचरति. एकदा कृतमासोपवासतप-
सा वाणारस्यां नगर्यां तिंदुकनाम्नि वने तिंदुकयक्षायतने स कायोत्सर्गमुद्रया स्थितः, तत्तपो-
गुणरंजितमनास्तिंदुकयक्षोऽपि साधुसेवापरायणो जातः, अहो महत्तपोमाहात्म्यं! यदुक्तं—
यद्दूरं यद्दुराराध्यं । यत्सुरैरपि दुर्लभं ॥ तत्सर्वं तपसा साध्यं । तपोऽहि दुरतिक्रमं ॥ १ ॥
एतस्मिन्नवसरे वाणारसीनगरीपतिसुभद्रानाम्नी राजकन्या बहुचेटीपरिवृता बलिपूजासाम-
ग्रीं लात्वा यक्षराजमर्चयितुमागता, आगत्य यक्षायतनं प्रदक्षिणां कुर्वत्या राजकन्यया म-
लमलिनगात्रो मुनिर्दृष्टः, अहो जुगुप्सितदेहोऽयं कः प्रेतोपमः? इति थूत्कृतं तया, एवं सा ॥ १६० ॥
मुनेर्महतीमाशातनां चकार.

तत्स्वरूपं दृष्ट्वा संजातकोपेन तिंदुकयक्षेण चिंतितं अहो दुःकर्मकारिणीयं राजसुता, य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्सुरासुरपूजितपदयुगस्यापि मुनेरवज्ञां करोति. अतो दर्शयाम्यस्या भगवत्परिभवफलमिति संचिंत्य तेन तच्छरीरमधिष्ठितं. ततो नानाविधं प्रलपंती हारादीनि त्रोटयंती वस्त्रादिशुद्धिमजानती परिजनेन मातृपितृसमीपमानीता. ततोऽपत्यस्नेहमोहितेन राज्ञा चिकित्सा कारिता, अनेके मांत्रिका वैद्याश्चादूताः, परं विशेषो न जातः, विषण्णा वैद्याः, ततो यक्षेण प्रत्यक्षीभूयोक्तं भो राजन् स्वरूपगर्वितयाऽनया तव पुत्र्या मत्स्वामिनो मुनेरुपहासः कृतः, ततो यद्यस्यैव मुनेरियं जाया भवति तदा मुंचामि, नान्यथेति. ततो राज्ञा विचारितं, इत्थमपीमां प्राणतोऽतीववल्लभां कन्यां जीवंतीं तु द्रक्ष्यामि. अतोऽर्पणीयेयं मुनिराजस्येति विचार्य प्रहिता सा मुनिसमीपे परिजनसहिता सुभद्रा, सापि कन्या पितुराज्ञया यक्षायतने गता, मुनिं नत्वा प्राह हे महर्षे गृहाण करेण करं? स्वयंवराहं भवतः समीपमागता, ततो मुनिनोक्तं हे भद्रे निवृत्तविषयासंगा मुनयो भवंति, अतो नास्ति मे प्रयोजनमनया कथ्येति. ॥१६१॥

ततः केलिप्रियतया तिंडुकयक्षेण मुनिशरीरं प्रविश्य सा परिणीता, कृतविडंबना मुक्ता च, स्वप्नमिव तद् दृष्ट्वा विज्ञाया गता पितुः सकाशं, पितुरग्रे तया सर्वमपि स्वप्नसदृशं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रजनीस्वरूपं कथितं. तस्मिन्नवसरे रुद्रदेवपुरोहितेनोक्तं हे स्वामिन्नियं ऋषिपत्नी जाता, अतोऽस्माकं शास्त्रे प्रोक्तं, ' ऋषिपत्नी त्यक्ता ब्राह्मणेभ्यो दीयते ' इति वेदार्थः, अतो ब्राह्मणानामेवेयं कन्या समर्पणीया, एतत् श्रुत्वा राज्ञा तस्मै रुद्रदेवपुरोहिताय सुभद्रा पत्नीत्वेन समर्पिता. एकवारं तेन रुद्रदेवपुरोहितेन यज्ञं यजता सुभद्रा यज्ञपत्नी कृता. यज्ञमंडपे बहवो द्विजा मिलिताः, यज्ञकर्मणि कुशलाः श्रोत्रिया यज्ञं कर्तुं लग्नाः, तद्योग्यं बह्वशनादि प्रह्वीकृतं वर्त्तते. तस्मिन्नवसरे मासक्षपणपारणके हरिकेशबलमुनिर्यज्ञपाटके प्रविष्टः, तदा सन्मुखमागच्छंतं मुनिं दृष्ट्वा द्विजैरुक्तमहो कोऽयं प्रेतोपमो मलमलिनगात्रो निंदितवेषो यज्ञपाटकं मलिनीकर्तुमागतोऽस्ति? तदवसरे मुनिना समागत्य भिक्षार्थं ब्राह्मणा याचिताः, तद्वचनमाकर्ण्याऽनार्यैस्तैरुक्तं, रे दैत्यरूप यज्ञपाटके निष्पन्नमन्नं द्विजेभ्यो दातुं योग्यं, तुभ्यं शूद्राधमाय कथं दीयते? इत्युपहासः कृतः, यदन्नं ब्राह्मणेभ्यो दीयते तत्पुण्यं सहस्रगुणं भवति, तुभ्यं दत्तं तु भस्मनि हुतमिव जायते; अतो व्रजस्व? किमर्थं स्थितोऽसि? इति वाक्यं श्रुत्वा यक्षेण तद्भरीरे प्रविश्योक्तं, अहो श्रूयतां? अहं श्रमणोऽस्मि, यावज्जीवं ब्रह्मचर्य- ॥ १६२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निरतः, अहिंसादिकव्रतधारी अत एवाहमेव सुपात्रं, न ब्राह्मणः, कथं वा भवंतः पशुवधादिपापासक्ता योषिदवाच्यप्राणिमर्दकाः सद्ज्ञानेन दूरीकृता ब्राह्मणाः? अतोऽहमेव सुपात्रं, भाग्येन भवतां यज्ञपाटके समागतोऽस्मि.

अतो मे शुद्धमन्नं समर्पयत? इत्यादिवाक्यैस्तिरस्कृतास्ते तं मुनिं प्रहर्तुं लग्नाः, यष्टिमुष्ट्यादिभिस्ताडनां चक्रुः, ततो रुष्टेन यक्षेणाहत्य ते निर्गच्छद्रुधिरोद्गाराः शिथिलबंधनसंधयो भूतले पातिताः, ततो महान् कोलाहलो जातः, सर्वेऽपि मिलिताः, तदाकर्ण्य सुभद्रा राजकन्या बहिर्निर्गता, दृष्टो मुनिरुपलक्षितश्च, ततो भयविह्वलांगी सा रुद्देवादीन् कथयति भो दुर्मतयो यास्यथामुं पीडयंतो यममंदिरं, अयं तिंदुकयक्षपूजितो महाप्रभावो मुनिर्वर्त्तते, महातपस्वी, मया पूर्वं चालितोऽपि यो मनागपि ध्यानान्न चलितः, धन्योऽयमिति वदंती सुभद्रा मुनिचरणयोर्निपत्याह, हे कृपासिंधो हे जगतीजनबंधो क्षमस्व मूर्खैर्विहितमपराधं मदनुरोधेनेति. मुनिनोक्तं न मुनीनां कोपावकाशाः स्युरिति. यतोऽयं महानर्थकारी क्रोधः, यदुक्तं—जं अज्जिअं चरित्तं । देसुणाए अ पुव्वकोडिए ॥ तंपि कसायमित्तो । हारेइ नरो मुहुत्ते-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णं ॥ १ ॥ अतः साधूनां न कोपः कर्त्तुं युज्यते. परंतु कोपकारिणं यक्षं प्रसन्नीकुरुतेति तैस्तद्वचनादिन्नियक्षः संतोषितः, सर्वेऽपि सज्जीभूता द्विजा यज्ञकर्माणि त्यक्त्वा मुनिचरणयोर्निपतिताः, प्रतिलाभितो मुनिः शुद्धान्नेन, तत्र पंच दिव्यानि प्रादुर्भूतानि, किमेतदिति संजातकुतूहला बहवो लोका मिलिताः, राजापि व्यतिकरं विज्ञाय समागतः, सुपात्रदानप्रशंसां च चकार. यदुक्तं—व्याजे स्याद् द्विगुणं वित्तं । व्यवसाये स्याच्चतुर्गुणं ॥ क्षेत्रे शतगुणं प्रोक्तं । पात्रेऽनंतगुणं तथा ॥ १ ॥ मिथ्यादृष्टिसहस्रेषु । वरमेको ह्यणुव्रती ॥ अणुव्रतिसहस्रेषु । वरमेको महाव्रती ॥ २ ॥ महाव्रतिसहस्रेषु । वरमेको हि तात्विकः ॥ तात्विकस्य समं पात्रं । न भूतं न भविष्यति ॥ ३ ॥ अतो धन्यमिदं जैनसाधुदानमिति बहवो जना मुनिदेशनया प्रतिबुद्धाः, द्विजाः सर्वेऽपि देशविरतिधराः संजाताः, हरिकेशिमुनिरपि शुद्धव्रतमाराध्य केवलमुत्पाद्य मोक्षं प्राप्तः, तस्माज्जकुलं प्रधानमपितु गुणा एव, गुणानां विरहे कुलस्याऽकिंचित्करत्वादिति. पुनश्चायमात्मा नटवदपरापररूपैः परावर्त्तते, ततः कः कुलाभिमानावकाशः? इति गाथात्रयेण स्पष्टीकरोति, ॥ इति हरिकेशिबलमातंगकथा ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—देवो नेरइउत्तिय । कीडपयंगुत्तिमाणुसो वेसो ॥ रूवस्सी अ विरूवो । सुहउन्नागो दुक्कउन्नागी अ ॥ ४५ ॥ व्याख्या—' देवो इति ' अयं जीवो देवो जातः, पुनर्नारकोऽपि जातः, इतिशब्द उपदर्शनार्थः, च शब्दः समुच्चयार्थः, कीटः कृम्यादिः, पतंगः शलभः, तिर्यगुपलक्षणं चैतत्, मानुषः पुमानेष जीवः, परावर्त्तते इति सर्वत्र क्रिया. ' रूवस्सीत्ति ' कमनीयशरीरः, विरूपो विशोभनो विगताकार इति यावत्. सुखं सातं भजते इति सुखभागी, एवं दुःखभाग्यपि जात इति गाथार्थः ॥ ४५ ॥

॥ मूलम् ॥—राउत्ति य दमगुत्ति य । एस सपागुत्ति एस वेयविऊ ॥ सामी दासो पुज्जो । खलुत्ति अधणो धणवइत्ति ॥ ४६ ॥ व्याख्या—' राउत्ति ' तथा राजा पृथ्वीपतिः, तथा द्रमको निःस्वः, एष जीवः श्वपाकश्चांडालोऽपि संजातः, तथा एष एव वेदवित् सामादिवेदानां वेत्ता प्रधानब्राह्मणोऽपि जातः, तथा स्वामी नायकः, तथा दासोऽपि एष जीवः संजातः, पूज्योऽभ्यर्चनीय उपाध्यायादिः, खलो दुर्जनोऽप्येष जीवः, अधनो निर्धनोऽप्येष जीवः परावर्त्तते, धनपतिरीश्वरोऽप्येष जीवः ॥ ४६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—नवि इत्थ कोइ नियमो । सकम्मविणिविट्ठसरिसकयचिट्ठो ॥ अनुन्नरूववेसो । नडुव्व परिअत्तए जीवो ॥ ४७ ॥ व्याख्या—' नवि इति ' नापि संज्ञाव्यते ' इत्थेति ' अत्र कश्चिन्नियमोऽवश्यंज्ञावो, यथा परे मन्यंते पुरुषः पुरुषत्वं प्राप्नोति, पशवः पशुत्वं प्राप्नुवंति, इति केचिन्मन्यंते, तथाऽत्र निश्चयो नास्तीत्यर्थः, कीदृशो जीवः ? स्वकर्मविनिविष्टसदृशकृतचेष्टः, यादृशः स्वकर्मोदयस्तादृशएव चेष्टाव्यवहार इत्यर्थः, कर्मवैचित्र्येण नववैचित्र्योपपत्तेरिति पदार्थः, तद्दृष्टांतमाह—अन्योऽन्यरूपो नानाकारो वेषो यस्यासावन्योऽन्यरूपवेषः, विविधवस्त्रादिविन्निर्तिमानित्यर्थः, एतादृशो नट इव जीवः परावर्त्तते परिभ्रमति, तदिदं संसारस्वरूपमालोच्य विवेकिनो मोक्षान्निलाषिण एव नवंति, न धनादिलिप्सव इति, अग्रेतनगाथायां दृष्टांतेनाह ॥ ४७ ॥

॥ मूलम् ॥—कोमीसएहिं धणसंचयस्स । गुणसुन्नरियाए कन्नाए ॥ न विलुद्धो वइररिसी । अलोन्नया एस साहूणं ॥ ४८ ॥ व्याख्या—' कोमीसएहिं इति ' धनसंचयस्य इव्यसमूहस्य कोटीनां शतैरपि सहितायां, पुनः कथंन्नूतायां ? गुणैः रूपलावण्यादिन्निर्नृतायां,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवंभूतायामपि कन्यायामपरिणीतायामपि न विलुब्धो न लोभं गतः, कोऽसौ? वयररिषिः श्रीवज्रस्वामिमुनिः, गुरुः शिष्यंप्रति कथयति अलोभतैषाऽनंतरोक्ता साधूनां कर्त्तव्या, सर्वयतिभिर्निर्लोभैर्भाव्यमिति संक्षेपार्थः ॥ ४८ ॥ अधुना निर्लोभतायां वज्रमुनिनिदर्शनं—

तुंबवनग्रामे धनगिरिनामा व्यवहारी वसतिस्म, सोऽतीवभद्रकमतिः, तद्गृहे सुनंदा नाम्नी पत्नी, तया सार्द्धं भोगानुपभुंजन् बहूनि वासराणि स सुखेनातिवाहयामास. एकदा संजातवैराग्येण धनगिरिणा गुर्विणी निजभार्यां त्यक्त्वा सिंहगिरिगुरुसमीपे चारित्रं गृहीतं. भव्यतपःपरायणो जातः, गुरुसेवारसिकः, सारणावारणाचोदनाप्रतिचोदनादिग्रहणकुशलो बभूव. पश्चात्सुनंदायाः कुक्षौ पुत्रो जातः, स पुत्रो जातमात्र एव, अस्य पित्रा दीक्षा गृहीता, धन्यो मुनिर्जात इति स्वजनमुखात् श्रुत्वा मनसि चिंतितवानहो किमिदं लोका वदंति? कोऽसौ दीक्षाधर्मः? मया कदाप्यनुभूतो वर्त्तते, इतिध्यानपरायणस्य तस्य जातिस्मरणमुत्पन्नं. ज्ञातं पूर्वानुभूतं चारितं धर्मस्वरूपं च, भवाद्विरक्तश्चिंतयति, क्वायं जन्मजराद्युःखपरंपरापरीतो भवविलासः! क्व च शाश्वतसुखप्रकाशश्चारित्रधर्मवासः! अहो अनंतशोऽप्यनुभूतेष्व- ॥१६७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पि विषयेषु न तृप्तोऽयं जीवः, यदुक्तं—

धनेषु जीवितव्येषु । भोगेष्वाहारकर्मसु ॥ अतृप्ताः प्राणिनः सर्वे । याता यास्यंति यांति च ॥१॥ पुनश्चोक्तं—भोगा न भुक्ता वयमेव भुक्ता—स्तपो न तप्तं वयमेव तप्ताः ॥ कालो न यातो वयमेव याता—स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ २ ॥ अतः सुलभानि सांसारिक-सुखानि, परं दुर्लभमिदं बोधिरत्नं. तथा चोक्तं—सुलहो विभाणवासो । एगछत्तावि मेइणी सुलहा ॥ दुलहा पुण जीवाणं । जिणंदवरसासणे बोही ॥ १ ॥ एवं विचार्य मातुरुद्वेगनिमित्तं नित्यं बाढस्वरेण स रुदनं करोति. मात्राप्यनेके प्रतीकाराः कृताः, परंतु न मनागपि रुदनादपसरतीति स्नेहपूर्णमपि मातुश्चित्तं पुत्रोपरि विरक्तं जातं, यथा यथा मातुश्चित्तं विरक्तं जानाति तथा तथा स द्विगुणं रोदिति. एवं षण्मासी व्यतिक्रांता. एतस्मिन्नवसरे श्रीसिंहगिरिसूरयस्तत्र समवसृताः, वंदनार्थमागता नागरिकलोकाः, देशनांते प्रत्यागतायां पर्षदि धनगिरिणा समीपमभ्येत्य भिक्षार्थमनुज्ञा गृहीता. तदा गुरुभिरुक्तं हे महात्मन्नद्य गोचर्यां यत्सचित्तमचित्तं किमपि मिलति तत्सर्वं गृहीतव्यं. एतद्गुरुवाक्यं प्रतिश्रुत्य धनगिरिर्भिक्षाच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्थार्थं नगरमागतः, गोचर्यां परिभ्रमता निजस्त्रीसुनंदागृहं प्राप्तं, धर्मलाभो दत्तः, तदा सुनंदयोक्तं हे स्वामिन् गृहाणामुं पुत्रं? ममानेन महान् संतापश्चोत्पादित इति श्रुत्वा धनगिरिणापि गृहीतगुरुवचनेन सुनंदार्पिता पुत्रभिक्षा गृहीता. ऊपोलिकायां पुत्रं लात्वा प्रत्यागतो गुरुसमीपं. वज्रमिव भारं ज्ञात्वा वज्र इति तस्य नाम गुरुणा दत्तं, साध्वीनामुपाश्रये च मुक्तः, बह्वयः श्राद्ध्यस्तत्सपर्यां कुर्वंति. श्रीसंघस्यातीवप्रियो जातः, तत्र पालनके स्थितवता तेन विविधसिद्धांतान्यासं कुर्वंतीनां साध्वीनां मुखेभ्य आगमं शृण्वता एकादशांगान्यधीतानि. अनुक्रमेण स त्रिवार्षिको जातः, मातापि प्रतिदिनं तत्रागच्छति, तं पुत्रं च दिव्यरूपं दृष्ट्वा मोहविह्वलमना गृहीतुमागता; कथितं च मदीयं पुत्रं गृहीष्यामि. धनगिरिणोक्तं नाहमर्पयिष्यामि; यतस्त्वयायं स्वहस्तेन समर्पितो मे बालः, इत्थं परस्परं वादो लग्नः, विवदंती सुनंदा गुरुभिः सार्द्धं राजद्वारं गता, राज्ञोक्तमुभयोः समानोऽयं पुत्रः, यदाकारितो यत्पार्श्वे व्रजति तस्यायं पुत्र इति न्यायः, तत् श्रुत्वा सुनंदाऽनेकानि सुखभक्षिकाभरणादीनि विचित्राणि बालचित्तरंजकानि वस्तून्यग्रे मुक्त्वा पुत्रमाह्वयतिस्म. हे वत्सागच्छागच्छ? अमुं गृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हाण अमुं गृहाणेति जल्पंतीं मातरं सन्मुखमपि स न विलोकयतिस्म. सा विषण्णा जाता. ततो धनगिरिणोक्तं हे वत्सास्मत्पार्श्वे त्वयं धर्मध्वजो वर्त्तते, यदि रोचते तर्हि गृहाणामुमिति श्रुत्वा झटिति गुरुसमीपमागत्य धर्मध्वजं च मस्तके चटाप्योत्फुल्लनयनोऽसौ ननर्त्त. राज्ञोक्तं गुरोरेवायं पुत्रः, सर्वेऽपि लोकाश्चमत्कृताः, पश्यताहो त्रिवार्षिकस्यापि बालस्य ज्ञानं! सर्वोऽपि संघलोकः श्रीगुरुभिः सह स्वस्थानमागतः, अनुक्रमेण सोऽष्टवार्षिको जातः, गुरुभिश्चारित्रं दत्तं, पुत्रमोहेन मोहितया सुनंदयापि चारित्रं गृहीतं. चारित्रगृहणानंतरं योग्योऽयमिति ज्ञात्वा गुरुभिः स स्वपदे स्थापितः, दशपूर्वविदुग्रतपाश्च केनचित्पूर्वभवमित्रेण देवेनागत्य तस्मै वैक्रियलब्धिराकाशगामिनी विद्या च दत्ता. विद्याद्यतिशययुताः श्रीवज्रस्वामिनः पाटलीपुत्रे समवसृताः, तद्वंदनार्थं मिलितो नागरलोकः, वज्रस्वामिनाऽपि विद्याबलतो विहितविशेषरूपेण धर्मदेशना प्रारब्धा. ततस्तदाक्षिप्तचित्ता लोकाः परस्परमूचुरहो भगवतोऽयं रूपानुगुणो वाग्विलासः, उपसंहृता देशना, गतं तद्दिनं.

इतश्च तत्रैव नगरे धनावहनामा श्रेष्ठी परिवसति, तत्पुत्री रुक्मिणीनाम्नी. साऽतीवरू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पवती, तयैकदा कस्याश्चिदार्याया मुखात् श्रीवज्रस्वामिनो गुणाः कर्णगोचरीकृताः, आर्यिकयापि रुक्मिण्यग्रे पुनःपुनः श्रीवज्रस्वामिनो गुणा वर्णिताः, तद्रूपलावण्यविद्यातिशयमोहितया रुक्मिण्या प्रतिज्ञा कृता, यद्वज्रस्वामिनं विहाय नान्यं परिणेष्यामि. पितुरग्रे प्रोक्तमहं वज्रस्वामिनंविना नान्यं वरिष्यामि. ततोऽपत्यस्नेहवशात् श्रीवज्रस्वामिनः समागमनं श्रुत्वा द्वितीयदिनेऽनेकरत्नकोटिसहितां कृतालंकारामुपहसितत्रिदशवधूलावण्यां कन्यां गृहीत्वा स भगवत्समीपं गतः, सार्थवाहो विरचितकरकुड्मलो भूत्वा प्राह, हे भगवन् प्राणतोऽप्यधिकाया मम कन्याया रत्नराशिसहितायाः पाणिग्रहणेन कुरुतानुग्रहमिति. भगवानाह हे भद्र! मुग्धेयं कन्या किमपि न जानाति. वयं तु मुक्तिकन्यापरिरंभाध्यवसायिनो नाऽशुचिपूर्णासु स्त्रीषु रतिं लभामहे. यत इदं मलमूत्रखानितुल्यं स्त्रीणां शरीरं, तत्स्पर्शोऽनर्थमूल एव. यदुक्तं—वरं ज्वलदयःस्तंभ–परिरंभो विधीयते ॥ न पुनर्नरकद्वार–सभाजघनसेवनं ॥ १ ॥ अतोऽयं मोहनिवासः केवलं प्राणिनां पाश एव स्त्रीदेहः, यदुक्तं—आवर्त्तः संशयानामविनयभवनं पत्तनं साहसानां । दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां ॥ स्वर्गद्वारस्य विघ्नं नरकपुर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुखं सर्वमायाकरंडं । स्त्रीयंत्रं केन सृष्टं विषममृतमयं प्राणिनामेकपाशः ॥ १ ॥ अतः स्त्री-
णां संगतिरेव ब्रह्मचारिणां कर्त्तुं न युक्ता; न तदंगवीक्षणानि च. तथोक्तं—स्नेहं मनोज्ञवकु-
तं जनयंति नार्यो । नाभीभुजस्तनविभूषणदर्शितानि ॥ वस्त्राणि संयमनकेशविमोक्षणानि ।
भ्रूक्षेपकंपितकटाक्षनिरीक्षणानि ॥ १ ॥ अतोऽलममीभिर्वर्णितैर्विषादप्यधिकैर्विषयैरिति. अ-
तो मानससरोमिलितेन, नयपक्षविशुद्धेन, सुमतिहंसीसहितेन, निर्मलध्यानमुक्तालीनेन,
जडचैतन्यविभावविदा, भावविभावविवेचनकारिणा, राजहंसतुल्येनात्मना, मज्जामेदपूर्णाऽ-
शुचिरूपस्त्रीदेहकूपवासिना भवितुं न युक्तं. ततोऽलमनया निर्विवेकजनोचितकथया, यद्येत-
स्यास्तव कन्याया ममोपरि रागोऽस्ति, तदा निजार्थसाधनेन मच्चित्तमोदं करोतु ? इति श्री-
मद्वज्रस्वामिवचनं श्रुत्वा प्रकटितज्ञानप्रदीपा, विज्ञातस्वभावविभावरूपा, हर्षातिरेकेण अव-
दश्रुधारा रुक्मिणी करौ मुकुलीकृत्य प्राह, हे स्वामिन् भगवदुक्तवचनकरणेनापि कृतार्थाहं,
ततो धनसार्थेनानुज्ञा दत्ता, श्रीवज्रस्वामिना प्रव्राजिता चारित्रं सम्यगाराध्य स्वर्गभाग्बभूव.
श्रीवज्रस्वाम्यपि दशपूर्वधरोऽनेकभव्यानुपदेशदानेनोद्धृत्य अष्टौ वर्षाणि गृहस्थपर्याये स्थि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वा, चतुश्चत्वारिंशद्वर्षाणि गुरुसेवारसिको भूत्वा, षट्त्रिंशद्वर्षाणि युगप्रधानत्वेन विहृत्याऽष्टाशीतिवर्षाणि सर्वायुः प्रपाल्य. श्रीवीराच्चतुरशीत्यधिकपंचशतवर्षातिक्रमे देवत्वं प्राप्तः, ततोऽयमेव धर्मो यत्रैवंविधप्रज्ञावाणामपीदृशी निर्लोभता. अतोऽन्यैरपि श्रीवज्रस्वामिवन्निर्लोभैर्भाव्यमित्युपनयः ॥ इति श्रीवज्रस्वामिनिदर्शनं ॥

॥ मूलम् ॥—अंतेनरपुरबलवाहणेहिं । वरसिरिघरेहिं मुणिवसहा ॥ कामेहिं बहुविहेहिं य । बंदिज्जंताविनेच्छंति ॥ ४९ ॥ व्याख्या—' अंतेनर इति ' अंतःपुराणि विशिष्टयोषित्समूहास्तैः करणभूतैः, पुराणि नगराणि, बलानि चतुरंगाणि, वाहनानि प्रवरहस्त्यादीनि, तैः करणभूतैः, वरश्रीगृहैः प्रधानकोशैर्भांडागारैः करणभूतैर्मुनिवृषभा मुनिवराः, काम्यंते प्रार्थ्यंत इति कामाः शब्दादयस्तैः करणभूतैर्बहुविधैर्नानारूपैः, चित्ताक्षेपहेतुरंतःपुरादिभिरित्येवं सर्वेषां विशेषः, वंद्यमाना अपि निमंत्र्यमाणा अपि पूर्वोक्तैरित्यर्थः, नेच्छंति नाभिलषंति तानीति गम्यते, इतिसंबंधो गाथार्थः ॥ ४८ ॥ परिग्रहस्याऽनर्थकारणत्वमाह—

॥ मूलम् ॥—नेउ नेउ वसण—आयासकिलेसभयविवाउ अ ॥ मरणं धम्मभ्रंसो । अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रइ अन्नाउ सव्वाइं ॥ ५० ॥ व्याख्या—' छेउ इति ' छेदः कर्णादीनां कर्त्तनं, भेदः क्रकचादिना पाटनं, स्वजनादिभिः सह विश्लेषो वा, व्यसनमापत्, आयासो द्रव्योपार्जनार्थं स्वयंकृतशरीरक्लेशः, क्लेशो विबाधा पीडेति यावत्. भयं त्रासः परिग्रहाज्जायते, विवादः कलहः, चशब्दः समुच्चयार्थे, मरणं प्राणत्यागः, धर्मभ्रंशः श्रुतचारित्रलक्षणधर्माच्च्यवनं, सदाचारविलोपो वा, अरतिश्चित्तोद्वेगः, एतानि सर्वाण्यपि अर्थान्नवंति, अतोऽनर्थमूलोऽर्थ इत्यर्थः, अर्ज्यते विवेकविकलैः प्रार्ज्यते इत्यर्थो हिरण्यादिरिति व्युत्पत्तिः ॥ ५० ॥

॥ मूलम् ॥—दोससयमूलजालं । पुव्वरिसिविवज्जियं जई वंतं ॥ अन्नं वहसि अणन्नं । कीस अणन्नं तवं चरसि ॥ ५१ ॥ व्याख्या—' दोससय इति ' दोषा रागादयस्तेषां शतानि, तेषां मूलकारणं च जालं, मत्स्यबंधजालवत्कर्मबंधहेतुत्वादित्यर्थः, पूर्वर्षिभिर्नित्यत्यक्तस्वाम्यादिभिर्विशेषेण वर्जितं त्यक्तं. इदानींतनाः कर्मकालादिदोषादर्थवाहनप्रवणा नूयांसो विवेकिना नाऽवलंबितव्याः, यदि हे साधो वांतं दीक्षाग्रहणेन त्यक्तं, एतादृशमर्थं हिरण्यादिकं वहसि धारयसि, किंभूतमर्थं? अनर्थं नरकपातायनर्थकारणत्वात्, तर्हि किस इति किमनर्थं निः-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रयोजनं तपोऽनशनादिरूपं चरसि? अतः परिग्रहत्याग एव साधुनां श्रेयानित्यर्थः ॥ इति पंचाशत्तमगाथार्थः ॥

॥ मूलम् ॥—वहबंधणमारण-सेहणाउ कासु परिग्गहे नत्थि ॥ तं जइ परिग्गहु च्चिय । जइधम्मो तो नणु पवंचो ॥ ५१ ॥ व्याख्या—'वहबंधणेत्ति' वधस्ताडनं, बंधनं रज्ज्वादिभिः, मारणं प्राणच्यवनं, सेहणा नानाप्रकाराः कदर्थनाः, एतेषां द्वंद्वः, हे प्राणिन् त्वं कथय? ताः काः? याः परिग्रहे द्विपदादिसंग्रहे न संति न विद्यंते. अपि तु सर्वा अपि संतीत्यर्थः, तत्तस्मात्कारणात् यद्येवं ज्ञात्वापि परिग्रहः क्रियते, 'च्चिय इति' निश्चयेन नो इति तस्मात्परिग्रहरक्षणाद्यतिधर्मो न, तु निश्चितं प्रपंच एव विडंबनैव, अतो न परिग्रहरक्षणं युक्तमिति भावः ॥ ५१ ॥

॥ मूलम् ॥—विज्जाहरीहिं सहरिसं । नरिंददुहियाहिं अहमहंतीहिं ॥ जं पत्थिज्जइ तइया । वसुदेवो तं तवस्स फलं ॥ ५२ ॥ व्याख्या—'विज्जा इति' विद्याधरीभिर्विद्याधरकुलोत्पन्नाभिः कन्याभिः सहरिसं सहर्षं यथास्यात्तथा नरिंददुहितृभिर्नृपतिसुताभिश्चेत्यर्थः, की- ॥ १७५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृशीन्निः ? अथ महतीन्निः स्वगृहनिर्गमादनंतरं प्रधानान्निः, अथवा प्राकृतन्नायया ऽहमहमिकया परस्परस्पर्द्धया, एतादृशीन्निर्यत्प्राप्यते ऽन्निलष्यते, ' तइया इति ' तस्मिन् काले वसुदेवनामा कुमारः, तत्सर्वं तपसः फलं, प्राग्भवविहितवैयावृत्त्यादेः फलं, तस्मात्परिग्रहं त्यक्त्वा तपश्चरणमेव वरमित्यर्थः, इति पूर्वगाथया संबंधः ॥ ५२ ॥

॥ मूलम् ॥—किं आसि नंदिसेणस्स । कुलं जं हरिकुलस्स विउलस्स ॥ आसी पियामहो सु—चरिएण वसुदेवनामुत्ति ॥ ५३ ॥ व्याख्या—' किं आसि इति ' किमासीन्नंदिषेणस्य कुलं ? नन्निन्नत्वाद्भिन्नजातित्वान्न किंचिदित्यर्थः, पूर्वं तु दरिद्रस्तुन्नकुलो ब्राह्मण आसीदित्यर्थः, तथापि यद्यस्मादसौ नंदिषेणजीवो विपुलस्य विस्तीर्णस्य हरिकुलस्य यादववंशस्य आसीज्जातः पितामहः पूज्यः सुचरितेन सदनुष्ठानेन हेतुन्नूतेनेत्यर्थः, वसुदेवनामा राजकुमारः, तस्मात्किं कुलेन ? सुचरितमेवाचरणीयमित्यर्थः ॥ अधुनानंदिषेणकथानकं लिख्यते—मगधदेशे नंदिनामनि ग्रामे चक्रधरनामा चक्रधारी दरिद्री विप्रो वसतिस्म. तस्य सोमिला स्त्री, तत्कुक्षिसंन्नूतो नंदिषेणनामा पुत्रः, तस्मिन् जातमात्र एव पितरौ मृत्युमापन्नौ. तदा त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्मातुलेन स स्वगृहे समानीतो वर्द्धितश्च. परंतु यौवनेऽपि कुरूपो बृहन्मस्तको लंबोदरो वक्रनासिको वामनशरीरो विकृतनयनस्त्रुटितकर्णः पीतकेशः पादखंजः पृष्टव्रणो दौर्भाग्यैकनिधिः कामिनीनामप्रीतिपात्रं च. एतादृशोऽसौ मातुलगृहकार्याणि करोति. तदा लोकैरुक्तं भो निर्भाग्यशिरोमणे किं परगृहकार्यं दासवत्करोषि? गच्छ विदेशं? धनार्जनेन स्त्रीपाणिग्रहणं कुरु? स्थानांतरितानि भाग्यानीति लोकैरप्युच्यते. एतादृग्लोकवचनं श्रुत्वा गंतुकामस्य तस्य मातुलेनोक्तं, किमर्थं विदेशं व्रजसि? मद्गृहे सप्त पुत्र्यो वर्त्तंते, तासां मध्यादेकां तव विवाहयिष्यामीति तिष्ठ मद्गृहे? स स्थितस्तथैव गृहकार्यं करोति, एकदा मातुलेन सप्तापि कन्या नंदिषेणस्य दर्शिताः, ताभिरुक्तं भो भो तात वयं प्राणघातं करिष्यामः, परं तं नंदिषेणं न वरिष्याम इति तासां प्रतिज्ञां श्रुत्वा स मनसि चिंतयति, अहो ममैवायं कर्मणां दोषः, स्वकृतं नाऽभुक्तं क्षीयते कर्म. यदुक्तं—

॥ १७७ ॥

कर्मणो हि प्रधानत्वं । किं कुर्वंति शुभा ग्रहाः ॥ वसिष्ठदत्तलग्नोऽपि । रामः प्रव्रजितो वने ॥ १ ॥ स दुःखगर्भवैराग्येण गृहान्निर्गतः, परिभ्रमन् रत्नपुरं गतः, तत्रोपवने क्वचित्प्रदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शे क्रीडंतं विवसनं मदनरसोन्मत्तं परस्परार्पितगाढालिंगनं स्त्रीपुरुषयुग्मं दृष्ट्वा मनसि खेदं वहन् आत्मघाताय वनं गतः, तत्र सुस्थितनामा साधुर्मिलितः, साधुनोक्तं भो मुग्ध किमनेनाऽज्ञानमृत्युना? अनंतशोऽनुभूतेनापि कामेन न कापि सिद्धिः, किंचिद्धर्मकार्यं कुरु? येनार्थसिद्धिः स्यात्, किमेभिर्भोगिभोगोपमैर्विपाककटुकैः सुखैः? अनित्यमिदं रोगायतनं शरीरं, यतो रोगसंख्या—पणकोडी अडसट्ठि । लक्खा नव नवइ सहस पंचसया॥ चुलसि अहिआ निरए । अपइट्ठाणंमि वाहिउ ॥ १ ॥ अतोऽनित्यदेहात्सारं धर्ममेवांगीकुरु? दुर्लभोऽयं मनुष्यभवो धर्मविना व्यर्थ एव. यदुक्तं—संसारे मानुष्यं । सारं मानुष्यके च कौलिन्यं ॥ कौलिन्ये धर्मित्वं । धर्मित्वे चापि सदयत्वं ॥ १ ॥ इति गुरोरमृतोपमां देशनां श्रुत्वा निवृत्तविषयतापोऽसौ गुरुसमीपे दीक्षां जग्राह. नग्रविहारित्वेन गुरुसेवां कुर्वन् स विचरति; षष्टषष्टभक्तांते पारणं करोति. अतीववैराग्यरसपूरितमनाः पंचशतसाधूनां वैयावृत्त्यं मया विधेयमिति स नियमं जग्राह. अहो! साधुवैयावृत्त्यस्य महत्पुण्यं. यदुक्तं—वेयावच्चं निययं । करेह नत्तमगुणे धरंताणं ॥ सव्वं किर पडिवाई । वेयावच्चं अपडिवाई ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधूनामन्नपानाद्यानीय समर्पयित्वा पश्चात्पारणकं करोति. संघमध्ये तस्य महती प्रशंसा जाता. एकस्मिन्नवसरे सौधर्मपतिना नंदिषेणनियमप्रशंसा कृता. तामश्रद्दधानौ द्वौ देवौ नंदिषेणस्य नियमपरीक्षार्थं रत्नपुरमागतौ. एको देवो नगरबाह्योपवने ग्लानमुनिरूपं कृत्वा स्थितः, द्वितीयो देवो यतिरूपं कृत्वा नगरमध्ये यत्र नंदिषेणमुनिः षष्टपारणकं कर्तुं स्थितोऽस्ति तत्रागतः, यावत्स प्रथमकवलकं मुखे क्षिपति तावत्साधुवेषो देवोऽपि तत्रागत्योवाच, अरे भो नंदिषेण मदीयो गुरुर्नगरबाह्योपवनेऽतिसाररोगपीडितस्तिष्ठति, त्वं तु वैयावृत्यकारी वर्त्तसे, तन्निश्चिंतः कथं भोजनं कर्तुं स्थितोऽसि? तद्वचनं श्रुत्वा नंदिषेणस्तथैव कवलं मुक्त्वा, आहारोपरि वस्त्रमाच्छाद्य, तेन साकं मिलित्वा गंतुं लग्नः, साधुरूपदेवेनोक्तं, भो देहशुद्ध्यर्थं प्रथमं नगराज्जलमानय? नंदिषेणो जलार्थं गतो, यत्र यत्र याति तत्र तत्राशुद्धं मिलति, परं स खेदं न प्राप्नोति. एवं वारद्वयं नगरमध्ये परिभ्रमतापि देवोपरोधेन तेन जलं न लब्धं. तृतीयवारं निर्गतेन लाभांतरायकर्मक्षयोपशमप्राबल्येन तपोलब्ध्या देवोपरोधे निवृत्ते तेन शुद्धं जलं प्राप्तं. तद्गृहीत्वा तेन साकं स वनमध्ये ग्लानपार्श्वे समाया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तः, ग्लानेन बहूनि कर्कशवचनान्युक्तानि; परंतु नंदिषेणः स्वकीयमेव दोषं विलोकयति; मनागपि न क्रोधकलुषितमना जातः, कथयति च हे ग्लानमुने मदीयापराधं क्षमस्वेत्युक्त्वा तच्छरीरं स जलेन प्रक्षालयति, कथयति च स्वामिन्नुपाश्रये समागम्यतां? यथौषधं विधाय तव समाधिः क्रियते.

तदा देवस्वरूपसाधुनोक्तं, हे नंदिषेण मम गमनशक्तिर्न विद्यते, कथमागच्छामि? तदा नंदिषेणो ग्लानमुनिं स्कंधे समारोप्य चलितः, मार्गे तेन तदंगोपरि दुर्गंधाशुच्यादीनि कृतानि. ज्ञो नंदिषेण धिक् त्वां! वेगविधावितं करोषीत्यादिभिः कटुवाक्यैस्तं तर्जयति, नंदिषेणोऽपि तीव्रतरशुभपरिणामश्चिंतयति, कथमयं महात्मा स्वस्थीभविष्यति? ज्ञो ग्लानमुने मिथ्यादुष्कृतमस्तु? अधुना त्वां शोभनं नयामीत्ति वदन् गच्छतिस्म. ततो देवेन विचारितमहो धन्योऽयं मुनिर्मया महांतं खेदं प्रापितोऽपि न मनाक् चलितः, सत्यमेंऽवच इति संचिंत्य देवमायां संहृत्य दिव्यरूपं च विधायैवं स वदतिस्म. हे स्वामिन् यादृशस्त्वमिंद्रेण वर्णितस्तादृश एव मया दृष्टः, धन्यस्त्वं, पवित्रात्मा त्वमेव, निर्जितक्रोधस्त्वमेव, क्षमस्व

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ममापराधमिति मुहुर्मुहुर्मुनिचरणयोर्निपत्य देवः स्वस्थानं गतः, नंदिषेणोऽपि गोशीर्षचंदनलिप्तगात्रः स्वस्थानमागतः, बहुकालं यावद्वैयावृत्त्यान्निग्रहं पालयन् दुष्करं तपश्चकार. द्वादशसहस्रवर्षाणि यावच्चारित्रधर्मं प्रतिपाल्य प्रांतसमये त्वनशनं चकार. तत्र दर्नसंस्तारकस्थितेन प्रत्याख्यातचतुर्विधाहारेण तादृक्कर्मोदयात्संस्मृतनिजदौर्भाग्येण नंदिषेणमुनिना निदानं कृतं, यथाहमागामिनि भवे स्त्रीवल्लभो भूयासमिति निदानं कृत्वा मृत्वा च स सहस्रारदेवलोके देवत्वेनोत्पन्नः ।

ततश्च्युत्वा सोरीपुरनगरे अंधकविष्णुराज्ञः सुभद्राराज्ञीकुक्षौ समुद्रविजयादीनां नवानां वृष्णनां भ्रातृणां वसुदेवनामा लघुभ्रातृत्वेनोत्पन्नः, सोऽतीवरूपसौंदर्यवान्, बन्धनिदानोऽत्यंतसुभगो लोकप्रियश्च बभूव. निश्चिंतो नगरमध्ये स्वेच्छया भ्रमति. तद्रूपं दृष्ट्वा मोहिताः पौरवनिता गृहकार्यं त्यक्त्वा तदनु भ्रमंति, सलज्जा अपि कुलांगनाः स्वधर्मं त्यजंतिस्म. इत्थं स्त्रीणां व्याकुलत्वं विज्ञायाकुलैः पौरलोकैः समुद्रविजयांतिकमागत्य विज्ञप्तं च, स्वामिन्नयं वसुदेवो गृहे एव रक्षणीयः, यदेतद्रूपमोहितानिः पौरवनितानिः कुलाचारादि त्यक्तं, एतन्निमि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्तेयं कुलवधूनामाचारहानिः, अनाचारमनिवारयतां नवतामप्ययं दोषः, इति श्रुत्वा समुद्रविजयेनापि वसुदेवः शिक्षाप्रदानेन सौधमध्ये स्थापितः, कलाभ्यासं स करोतिस्म. एकदोष्णत्तौ शिवादेव्या गोशीर्षचंदनं घृष्ट्वा, स्वर्णकच्चोलकं च नृत्वा दासीहस्ते स्वकांताय प्रेषितं. मार्गे वसुदेवेन बलात्तद्गृहीत्वा स्वांगलेपः कृतः, पश्चात्तयोक्तं यद्येतादृशोऽसि तर्ह्येवात्र गुप्तिस्थाने स्थापितोऽसि, पश्चात्तद्भयतिकरं ज्ञात्वा स पाश्चात्यरात्रौ नगरप्रतोल्यां समागत्य कमप्येकं मृतकमानीय प्रतोल्यां ज्वालयित्वा तेन लिखितं यद्वसुदेवः काष्टभक्षणेनात्र मृतोऽस्ति, सर्वैरपि लोकैः सुखेन स्थेयं, इत्थं लिखित्वा स नगराद्बहिर्निर्गतः ।

प्रभाते समुद्रविजयोऽपि तां प्रवृत्तिं श्रुत्वा महांतं शोकमापन्नश्चिंतयति, अहो मानवता किमाचरितमिदं दुःकुलोचितं! किं क्रियते? यद्भाव्यं तद्भान्यथा भवति, वसुदेवोऽपि पृथिव्यां परिभ्रमन् नवनवरूपवेषाचरणेन भाग्यवशतः सहस्रशो विद्याधरसुताः सहस्रशो राजकन्याश्च परिणीतवान्. विंशत्यधिकवर्षशतं यावद्देशाटनं कुर्वता द्विसप्ततिसहस्रसंख्याकानां स्त्रीणां तेन पाणिग्रहणं कृतं. पश्चाद्रोहिण्याः स्वयंवरे समागत्य, कुब्जरूपेण च तां विवाह्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यादवैर्युद्धं कृत्वा चमत्कारं दर्शयित्वा स्वरूपप्रकटनेन समुद्रविजयादीनामानंदमुत्पादयामास. चमत्कृता लोकाः, अहो महानयं पुण्यप्राग्भारः, पश्चात्स्वजनवर्गेण सार्द्धं स नगरमागत्य देवकनृपपुत्रीदेवकीपाणिग्रहणं चकार. तत्कुक्षिजः श्रीकृष्णवासुदेवः, तदंगजाश्च सांबप्रद्युम्नादयः संजाताः, इत्थं स हरिवंशपितामहो जातः, सर्वमप्येतत्पूर्वभवाचीर्णतपःफलं ज्ञेयं. एवमन्येनापि तपसि यत्नो विधेय इत्युपदेशः ॥ इति सप्तदशः संबंधः ॥ १७ ॥

॥ मूलम् ॥—सपरक्कमरायलवाइएण । सीसे पलीविए नीयए ॥ गयसुकुमालेण खमा । तहा कया जह सिवं पत्तो ॥ ५४ ॥ व्याख्या—' सपरक्कम इति ' सपराक्रमेण पराक्रमसहितेन ' रायलवाइएणत्ति ' राजबंधुरपि बहुलालितः, एतादृशेन सता ' सीसे इति ' मस्तके ' पलीविए इति ' प्रदीपिते ज्वालिते निजके स्वकीये गजसुकुमालनाम्ना मुनीश्वरेण क्षमा क्रोधाऽभावः ' तहा इति ' तेन प्रकारेण तादृशी कृता, ' जहत्ति ' यथा यत्क्षमाकरणेन शिवं मोक्षं प्राप्तः ॥ अत्र कथानकसंप्रदायः—

द्वारिकायां श्रीकृष्णाभिधो नृपस्तस्य माता देवकीनाम्नी, तत्र श्रीनेमिजिनेश्वराः सम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वसृताः, देवैरागत्य समवसरणं निर्मितं, भगवता देशना दत्ता, पर्षत्सु स्वस्थानं गतासु षड् भ्रातरो भद्दिलपुरवास्तव्याः साधवो भगवंतमापृच्छ्य षष्टपारणके द्विसाधुसंघाटकत्रयेण नगर्यां भिक्षार्थमागताः, प्रथमः संघाटकः परिभ्रमन् देवकीमंदिरं प्राप्तः, तं दृष्ट्वा हृष्टचित्ता देवकी मोदकैः प्रतिलाभयतिस्म. तस्मिन् गते द्वितीयं युग्ममागतं, तत्सदृशरूपधारकमत्युच्चासकारकं दृष्ट्वा तथैव प्रतिलाभयतिस्म. तृतीयं युग्ममागतं, तदा देवकी चिंतयति, नैवं तृतीयवारमाहारार्थमागमनं शुद्धसाधूनां घटते. किं कारणमिति विमृश्य सा कथयतिस्म. भो महानुभाव! महतीयं द्वारिकापुरी, श्राद्धा अपि बहवः संति, तत्किं पुनः पुनरागमनप्रयोजनं? किमाहारो न मिलितः? किं वा साधवो बहवः? किं वा भ्रांत्या समागतमिति पृष्टे साधुः प्राह, भो सुश्राविके वयं षड् बंधवः षष्टपारणके पृथक् पृथक् भवगृहे समागताः, सदृशरूपत्वात्संशयः समुत्पन्नः, देवक्या चिंतितं षडप्येते सदृशाकाराः कृष्णतुल्या वीक्ष्यंते, ममाप्येतेषां दर्शनेन पुत्रदर्शनानंदः समुत्पद्यते, पूर्वमप्यतिमुक्तसाधुना ममोक्तमस्ति यत्तवाष्टौ पुत्रा भविष्यंति. तत एते किं मदीयपुत्रा न भवंतीति तस्याः संदेहः समुत्पन्नः, द्वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तीयदिने सा श्रीनेमिजिनं पृष्टुं गता, स्वामिन् गतदिने साधुदर्शनेन ममाऽतीवानंदः समजायत, किमत्र स्नेहकारणं? भगवतोक्तं षण्मप्येते तवांगजाः कंसभयतो देवेन भद्दिलपुरे नागपत्नीसुलसागृहे मुक्ताः, तत्रैव च वृद्धिं गताः, यौवने कारितद्वात्रिंशद्द्वात्रिंशत्कन्यापाणिग्रहणा अस्मद्देशनाश्रवणतो लब्धवैराग्यास्त्यक्तसंसारसंगा गृहीतचारित्राः षष्टषष्टं तपः कुर्वाणा गतदिने अस्मदादेशतो नगर्यामाहारार्थं निर्गताः, पृथक्पृथक् भवद्गृहमागताः, पुत्रसंबंधेन तद्दर्शनतस्ते स्नेहः समुत्पन्नः, इति भगवद्वचनमाकर्ण्य सा पश्चात्तापं कर्तुं लग्ना. मनसि चिंतयति धन्या सा या विकसितहसितमुखसुकोमलकरचरणं स्वकीयमंगजं लालयति, स्वांके च स्थापयति. अहं त्वधन्या दौर्भाग्यवती ययैकोऽपि पुत्रो न लालित इति चिंतातुरा भूमिन्यस्तदृष्टिः सा देवकी कृष्णेन दृष्टा, चिंताकारणं च पृष्टं, कथितं च तया चिंताकारणं, पश्चान्मातृमनोरथपूरणार्थं सोऽष्टमं तपो विधाय देवमाराधितवान्. तेनाप्यागत्य वरो दत्तः पुत्रो भविष्यतीति, परं स बहुकालं गृहे न स्थास्यतीत्युक्त्वा देवो गतः, क्रमेण सिंहस्वप्नसूचितस्तस्याः पुत्रो जातः, गजसुकुमाल इति च नाम दत्तं.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्रमेण सोऽष्टवार्षिकः संजातः, समहोत्सवं महताग्रहेण तस्य सोमिलपुत्री परिणायिता. पश्चान्नेमिजिनेशदेशनां श्रुत्वा संसाराऽसारतां च ज्ञात्वा गृहीतचारित्रो गजसुकुमालः प्रभुमापृच्छय स्मशाने कायोत्सर्गमुद्रया स्थितः, तदवसरे भ्रमता सोमिलेन स दृष्टो, मदीया निरपराधा तनया दुष्टेनानेन विगोपितेति समुत्पन्नद्वेषेण तच्छिरसि मृत्तिकापालिं निबद्ध्य तत्र जाज्वल्यमाना अंगारकाः क्षिप्ताः, मस्तके ज्वलत्यपि गजसुकुमालः क्षमामाधाय शुक्लध्यानतोंतकृत्केवलित्वेन मोक्षं प्राप्तः, द्वितीयदिवसे श्रीकृष्णः प्रभुवंदनार्थमागतः, पृष्टं कुत्रास्ति गजसुकुमालो? भगवतोक्तं तेन स्वकीयं कार्यं साधितं, सर्वोऽपि वृत्तांतः कथितः, कृष्णेनोक्तं स्वामिन् केनैतदुःकृतं कृतं? भगवतोक्तं त्वां दृष्ट्वा यदीयं हृदयं स्फुटिष्यति स ज्ञेयः, पश्चात्कृष्णस्य शोकातुरस्य नगरंप्रत्यागच्छतः सोमिलो मिलितः, भयान्नश्यन् हृदयस्फोटेन मृत्वा सप्तमीं गतः, ऋषिहत्याकारकत्वात्. एवं धैर्यवता गजसुकुमालेन यथा क्षमा कृता, तथान्येनापि सकलसिद्धिदायिनी क्षमा विधेयेत्युपदेशलेशः ॥ इत्यष्टादशसंबंधः ॥

॥ मूलम् ॥—रायकुलेसुवि जाया । जीया जरमरणगब्भवसहीणं ॥ साहु सहंति सव्वं।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नीआणविपेसपेसाणं ॥ ५६ ॥ व्याख्या—' रायकुलेसु इति ' राजकुलेषूत्तमकुलेषु जाता अपि, एतादृशा अपीत्यर्थः, नीतास्त्रस्ताः, जरा वयोहानिर्मरणं प्राणवियोगो, गर्भवसतिर्गर्भावास-दुःखं, एतेभ्यः, प्राकृतत्वाद्विभक्तिव्यत्ययः, एतादृशाः ' साहू ' इति साधवः सर्वं सहंते, नी-चानामपि ' पेसपेसाणंति ' सेवकस्य सेवकास्तेषां कृतमुपसर्गं सहंते इत्यर्थः ॥ ५६ ॥

॥ मूलम् ॥—पणमंति य पुव्वयरं । कुलया न नमंति अकुलया पुरिसा ॥ पणउ पु-व्विं इह जइ-जणस्स जह चक्कवट्टिमुणी ॥ ५७ ॥ व्याख्या—' पणमंति य इति ' प्रणमं-ति वंदंते ' पुव्वयरं इति ' प्रथमतरं, प्रथमं के नमंतीत्याह—कुलजाः कुलीनाः पुरुषाः, पर-मकुलीना नीचकुलोत्पन्नाः पुरुषा न नमंति न वंदंते; प्रणतः कुलीनत्वात् ' पुव्विं इति ' प्र-थमं इहास्मिन् जगति यतिजनस्य सामान्यसाधोः, ' जहइति ' यथा चक्रवर्त्ती साधुस्त्यक्त-षट्खंडसाम्राज्यः ॥ ५७ ॥

॥ मूलम् ॥—जह चक्कवट्टिसाहू । सामाइयसाहुणा निरुवयारं ॥ नमिउ न चेव कु-विउ । पणउ बहुअत्तणगुणेण ॥ ५८ ॥ व्याख्या—' जह इति ' यथा चक्रवर्त्तिसाधुः सर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लतया प्रथमं वंदनमकुर्वन् ' सामाइयसाहुणत्ति ' सामान्यसाधुना लघुदीक्षितेन निरुवयारं निरुपचारं निष्ठुरतया तुंकारं कृत्वा भणितः शिक्षितः, त्वं साधूनभिवंदयेति श्रुत्वा न चैव कुपितो न क्रोधं गतः, प्रणतो नतः, गुणानां ज्ञानदर्शनचारित्राणां बहुत्वेन ॥ ५७ ॥

॥ मूलम् ॥—ते धन्ना ते साहू । तेसिं नमो जे अकज्जपमिविरया ॥ धीरा वयमसिहारं । चरंति जह थूलिभद्दमुणी ॥ ५९ ॥ व्याख्या—' ते धन्ना इति ' ते पुरुषा धन्याः कृतपुण्याः, ते साधवः सत्पुरुषाः, तेभ्यः पुरुषेभ्यो नमस्कारोऽस्तु, ' जे इति ' ये पुरुषा अकार्यात्प्रतिविरता निवृत्ताः, धीराः साहसवंतो व्रतं चतुर्थव्रतं, ' असिहारं इति ' असिधारोपरिचलनसदृशं चरंति समाचरंति, यथेति दृष्टांते, श्रीस्थूलिभद्रेण मुनिना यथा चरितं तथा धीरा आचरंति ॥ ५९ ॥ अत्र व्रतोपरि श्रीस्थूलिभद्रनिदर्शनं—

पाडलीपुरे श्रीनंदनामा नृपः, तस्य शकडालनामा नागरजातीयो विप्रो मंत्री, तस्य लाछिलदेवीनाम्नी प्रिया, तयोर्ज्येष्ठः पुत्रः स्थूलिभद्रनामा, द्वितीयश्च श्रीयकनामा, यक्षाद्याः सप्त कन्यकाश्च. स्थूलिभद्रो यौवने विनोदं कुर्वन्नेकदा मित्रपरिवृतो वनमवलोकयितुं गतः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रत्यागच्छन् स वेश्यया दृष्टः, तद्रूपमोहितया तया कृणं वार्त्तया विलंबितः, चातुर्यगुणेन च तच्चित्तं वशीकृतं; स्थूलिभद्रोऽपि तत्कृणरूपरंजितः कोशाया गृहे स्थितस्तया सार्द्धं विषयसुखमनुभवन् नवनवं विनोदं करोतिस्म. पिताप्यनर्गलाज्ञाप्रेषणेन तस्य यथेप्सितं पूरयति. एवं द्वादशवर्षाणि यावत्तत्र स्थितेन तेन सार्द्धद्वादशकोटिपरिमितः स्वर्णव्ययः कृतः, तदवसरे वररुचिब्राह्मणप्रयोगेण पितुर्मरणं जातं. तदा श्रीयकः प्रधानपदार्पणार्थमाकारितो नंदेन, तेनोक्तं स्वामिन् मदीयो वृद्धभ्राता कोशाया गृहे वर्त्तते, स एव प्रधानयोग्यो वर्त्तते, नंदेन तदाकारणार्थं सेवकाः प्रेषिताः, सोऽप्यागतो दीयमानमपि मंत्रिपदं नांगीकरोति. स्थूलिभद्रेणोक्तं स्वामिन्नालोचं कृत्वा समागच्छामि, एवमुक्त्वैकांते वाटिकायां गत्वा स विचारयतिस्म, अस्मिन् संसारे कोऽपि कस्यापि नास्ति, सर्वोऽपि स्वार्थनिष्ठः, यदुक्तं—

वृक्षं क्षीणफलं त्यजंति विहगाः शुष्कं सरः सारसाः । पुष्पं पर्युषितं त्यजंति मधुपा दग्धं वनांतं मृगाः ॥ निर्द्रव्यं पुरुषं त्यजंति गणिका भ्रष्टं नृपं सेवकाः । सर्वः स्वार्थवशाज्जनोऽभिरमते नो कस्य को वल्लभः ॥ १ ॥ यदि मदीयः पिताऽनेकराज्यकृत्यानि कृत्वा कुमृ- ॥ १८९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्युना मृतस्तर्हि ममाप्यनया राजमुद्रया किं सुखं भविष्यति? धिगनर्थकारणं राज्यमुद्राधारणं! धिग्वैषयिकं सुखं! यत्परवशेन मया पितृमरणमपि न ज्ञातमित्यालोचयन् वैराग्यरसपूरितः पंचमुष्टिलोचकरणेन शासनदेवतयार्पितसाधुवेषो भुपसन्नायां समागत्य धर्मलाभं दत्तवान्. सर्वेऽपि विस्मिताः, नंदेन पृष्टं किमिदमाचरितं? स्थूलिभद्रेणोक्तं सम्यगालोचितं मयेति कथयित्वा तेन श्रीसंभूतिविजयाचार्याणां समीपे चारित्रं गृहीतं. तत् श्रुत्वा कोशातीवदुःखिताऽश्रुजलाविललोचना विरहातुरा बहुविधं विलपतिस्म. भो चतुरचाणाक्य को राज्यमुद्रां त्यक्त्वा भिक्षुमुद्रामंगीकरोति? हे प्राणनाथ त्वांविना को ममाधारः? किंकरोमि? कथं जीवामीत्यादिविरहवाक्यान्युच्चरंती तिष्ठति. अथ बहुषु दिनेषु गतेषु चतुर्मासकोपरि गुरोरंतिके एकेन साधुना सिंहगुहायामहं चतुर्मासं करोमीत्याज्ञा मार्गिता, द्वितीयेन सर्पबिले, तृतीयेन कूपांतरालस्थितकाष्टे, तदा चतुर्थेन स्थूलिभद्रेण कोशागृहे चतुर्मासकाज्ञा मार्गिता, योग्यतां ज्ञात्वा च दत्ताज्ञा. स्थूलिभद्रो गुरुं नत्वा कोशागृहं गतः, तमागच्छंतं दृष्ट्वाऽतीवहृष्टा सा सन्मुखमागत्य तच्चरणयोर्निपतिता; तदाज्ञया च स चित्रशालायां चातुर्मास-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कं स्थितः, प्रतिदिनं षड्रसाहारग्रहणं, कालोऽपि वर्षाकालः, वसतिस्तु चित्रशालिका, रागस्तु कोशायाः, परिचयस्तु द्वादशवार्षिकः, पुनर्नयनवदनविलासहावभावगीतगानतानमानतंत्रीमृदंगमधुरशब्दनाट्यविनोदादिविषयप्रकारैः श्रीस्थूलिभद्रपुरतः स्वकीयभावं निवेदयंती कोशा कथयति, हे स्वामिन् स्वाधीनमिदं कामिनीकुचस्पर्शालिंगनादि त्यक्त्वा किं कर्कशं तपः करोषि? यदुक्तं—

'संदष्टोऽधरपल्लवे सचकितं हस्ताग्रमाधुन्वती । मा मा मुंच शठेति कोपवचनैरानर्तितभ्रूलता ॥ सीत्कारांचितलोचना सरभसं यैश्चुंबिता मानिनी । प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥ १ ॥ अतः कोऽयं योगकालः? भुंक्ष्व यथेष्टं मया सार्द्धं विषयसुखास्वादं? दुर्लभोऽयं पुनर्भवो, दुर्लभं चेदं यौवनं, स्वामिन्नुपभुज्यतामिदं मदीयांगसंगमजं सुखं, पश्चाद्वृद्धावस्थायां समुचितमिदं तपःकरणं, तत् श्रुत्वा स्थूलिभद्रः प्राह, भो भद्रे अपवित्रं मलमूत्रभाजनं कामिनीशरीरं कः परिरब्धुमिच्छति? यदुक्तं—स्तनौ मांसग्रंथी कनकलशावित्युपमितौ । मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं ॥ स्रवन्मूत्रक्लिन्नं करिवराशिरःस्प-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्हिजघनं । मुहुर्निंद्यं रूपं कविजनविशेषैर्गुरु कृतं ॥ १ ॥ पुनरपि—वरं ज्वलदयःस्तंभ–परिरंभो विधीयते ॥ न पुनर्नरकद्वार–रामाजघनसेवनं ॥ १ ॥ एकेन स्त्रीसंभोगेन बहुजीवोपघातः, यदुक्तं—मेहुणसन्नारूढो । नवलक्खं हणेइ सुहुमजीवाणं ॥ तिन्नयरेहिं भणियं । 'सद्दहियव्वं पयत्तेणं ॥ १ ॥ अहो अनंतवारमुपभुक्ता अपि विषया न तृप्तिं जनयंति, यदुक्तं—अवश्यं यातारश्चिरतरमुषित्वापि विषया । वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥ व्रजंतः स्वातंत्र्यादतुलपरितापाय मनसः । स्वयं त्यक्ता ह्येते शिवसुखमनं तं विदधति ॥ १ ॥ अतो भोगिभोगोपमान् विषयांस्त्यक्त्वा शीलालंकारेणालंकुरु सुभगमिदं वपुः, पुनर्दुःप्रापोऽयं नरभवो धर्मविना हारितः, सर्वेषां कार्याणामुत्तमं धर्मकार्यं. यदुक्तं—न धम्मकज्जा परमत्थि कज्जं । न पाणिहिंसा परमं अकज्जं ॥ न पेमरागा परमत्थि बंधो । न बोहिलाभा परमत्थि लाभो ॥ १ ॥ इत्याद्युपदेशदानेन वालितमानसा सैवं वदतिस्म. हे कंदर्पविदारक शासनोद्योतकारक मिथ्यात्वनिवारक धन्योऽसि त्वं, लब्धं त्वयैव सुजन्मजीवितफलं, अहमधन्या यया बहुशश्चालितोऽपि त्वं न चलितः, कृपां विधाय मां समुद्धर सम्यक्त्वदानेनेति स्थू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लिभद्रांतिके सम्यक्त्वोच्चारपूर्वकं सा द्वादशव्रतधारिका श्राविका जाता. राजप्रेषितं नरं मुक्त्वा वचसापि नान्यमावर्जयामीति भोगप्रत्याख्यानं तया कृतं. जीवाजीवादितत्वाभिज्ञायिका जाता. एवं तां प्रतिबोध्य चतुर्मासपारणके स श्रीसंभूतिविजयाचार्यपार्श्वे समागतः, तेऽपि पूर्वं त्रयः समागताः, गुरुणा प्रत्येकं दुष्करकारक इत्येकवारं कथनेन ते सन्मानिताः, स्थूलिभद्रस्तु वारत्रयं दुष्करदुष्करदुष्करकारककथनेन ब्रह्मादेरेण सन्मानितः।

तदा सिंहगुहावासिनो मनसि मत्सरः समुदभूत्, पश्यत गुरुविवेकं! यदस्माकं क्षुत्तृड्बाधितानामप्येकवारं दुष्करकारक इति कथितं, षड्रसभोजिनो मोहनालयवासिनस्तु वारत्रयं दुष्करदुष्करदुष्करकारक इति कथितमिति मनसि स मत्सरं दधार. एतस्मिन्नवसरे एकदा नंदनृपाज्ञया कोऽपि रथकारः कोशाया मंदिरमागतो, गवाक्षस्थितेन तेन बाणसंधानविद्ययाम्रफललुंबिका समानीता स्वकीयकला दर्शिता च; तदा कोशयापि स्वांगणे सर्षपपुंजं कृत्वा तदुपरि सूचिकां मुक्त्वा तदुपरि च पुष्पं निधाय नृत्यं विहितं. रथकारश्चमत्कृतिमवाप्य वदतिस्म कठिनमेतत्. तदा कोशयोक्तं—न दुष्करं अंबयलुंबितोग्रणं। न दुष्करं सि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रसवनच्चिआए ॥ तं दुक्करं तं च महाणुन्नावं । जं सोमुणी पमयवणंमि वुत्थो ॥ १ ॥ गि-
रौ गुहायां विजने वनांतरे । वासं श्रयंतो वशिनः सहस्रशः ॥ हर्म्येऽतिरम्ये युवतीजनांति-
के । वशी स एकः शकमालनंदनः ॥ २ ॥ योऽग्नौ प्रविष्टोऽपि हि नैव दग्ध–श्छिन्नो न ख-
ड्गाग्रकृतप्रचारः ॥ कृष्णाहिरंध्रेऽप्युषितो न दष्टो। नार्कोंगनागारनिवास्यहो यः ॥ ३ ॥ वेश्या
रागवती सदा तदनुगा षड्रीरसैर्भोजनं । शुभ्रं धाम मनोहरं वपुरहो नव्यो वयःसंगमः ॥
कालोऽयं जलदाविलस्तदपि यः कामं जिगायादरा–त्तं वंदे युवतीप्रबोधकुशलं श्रीस्थूलभद्रं
मुनिं ॥ ४ ॥ रे काम वामनयना तव मुख्यमस्त्रं । वीरा वसंतपिकपंचमचंडमुख्याः ॥ त्व-
त्सेवका हरिविरंचिमहेश्वराद्या। हा हा हताश मुनिनापि कथं हतस्त्वं ॥ ५ ॥ श्रीनंदिषेणर-
थनेमिमुनीश्वराई–बुद्ध्या त्वया मदन रे मुनिरेष दृष्टः ॥ ज्ञातं न नेमिमुनिजंबुसुदर्शनानां।
तुर्यो भविष्यति निहत्य रणांगणे मां ॥६॥ श्रीनेमितोऽपि शकमालसुतं विचार्य । मन्यामहे
वयममुं भटमेकमेव ॥ देवोऽद्रिदुर्गमधिरुह्य जिगाय मोहं । यन्मोहनालयमयं तु वशी प्र-
विश्य ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवं तया सर्वमपि स्थूलिभद्रस्वरूपमुक्तं. यः पूर्वपरिचिताया अपि ममावासे समागत्य मनागपि न चलितः, अतोऽयं दुष्करकारः, यदुक्तं—पुप्फफूलाणं वरसं । सुराई महिलयाणं च ॥ जाणंतो जे विरइया । ते दुक्करकारए वंदे ॥ १ ॥ इत्यादिस्थूलिभद्रस्तुतिवचनैः प्रतिबोधं प्राप्तो रथकारः स्थूलिभद्रांतिके चारित्रं जग्राह. स्थूलिभद्रोऽप्यनुक्रमेणार्थतोऽधीतदशपूर्वः, सूत्रतोऽधीताग्रेतनचतुःपूर्वश्चतुर्दशपूर्वविदामपश्चिमो बहून् भव्यान् प्रतिबोधयन् यशोधवलीकृताखिलजगत्सर्वजनप्रसिद्धत्रिंशद्वर्षाणि गृहे, चतुर्विंशतिवर्षाणि व्रते, पंचचत्वारिंशद्युगप्रधानत्वे, सर्वायुर्नवनवतिवर्षाणि परिपाल्य श्रीवीरात्पंचदशाधिकशतद्वय (२१५) वर्षे स्वर्गभाक्, एवं यथा स्थूलिभद्रेण दुर्धरव्रतधारणेन चतुरशीतिसंख्याश्चतुर्विंशतिका यावत्स्वं नाम रक्षितं. एवमन्योऽपि गुर्वाज्ञास्थो व्रतं पालयन् कीर्त्तिभाग् भवतीति संबंधः ॥ इत्येकोनविंशतितमः संबंधः ॥

॥ मूलम् ॥—विसयासिपंजरमिव । लोए असिपंजरंमि तिक्कंमि ॥ सीहाव पंजरगया । वसंति तवपंजरे साहू ॥ ६० ॥ व्याख्या—' विसया इति ' विषयाः शब्दादयस्तद्रूपेऽसिपं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जरे, तत्तुल्यो यः स्त्रीलोकस्तस्माद्गीता इत्यर्थः, ' लोए ' लोकमध्ये ' तिक्खंमि इति ' तीक्ष्णेऽसिपंजरे खड्गपंजरे, तस्माद्भीता इत्यर्थः, सिंहा इव पंजरगताः काष्टपंजरगताः, यथा सुभटखड्गपंजरभीताः सिंहाः काष्टपंजरे वसंति, तथा साधवोऽपि विषयरूपपंजरे स्त्रीलोकाद्भीतास्तपःपंजरे वसंतीत्यर्थः, गुर्वाज्ञां गृहीत्वा स्थूलिभद्रदृष्टांतेन ॥ ६० ॥

॥ मूलम् ॥—जो कुणइ अप्पमाणं । गुरुवयणं न य लहेइ उवएसं ॥ सो पच्छा तह सोअइ । उवकोसघरे जह तवस्सी ॥ ६१ ॥ व्याख्या—' जो कुणइ इति ' यः करोत्यात्ममानमात्मनोऽहंकारं, गुरुवचनं च न ' लहेइत्ति ' न प्रतिपद्यते, उपदेशमाज्ञां न प्रतिपद्यते, स पुमान् पश्चात्तह इति तथा ' सोअइत्ति ' शोचं करोति, यथोपकोशागृहे कोशाभिधगिनीगृहे गुर्वाज्ञां विना समागतस्तपस्वी सिंहगुहावासी शोचं प्राप्तस्तथेत्यर्थः ॥ ६१ ॥ अत्र तत्संबंधो निरूप्यते—

एकदारं पाडलीपुरे श्रीसंभूतिविजयाचार्यशिष्यस्थूलिभद्रोपरिधृतामर्षः सिंहगुहावासी नामा साधुर्द्वितीयचतुर्मासके, कोशाभिधगिन्युपकोशानाम्नी, तद्गृहे स्थातुं गुरुपार्श्वे आज्ञां मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्गितवान्. गुरुन्निरयोग्यतां ज्ञात्वाऽज्ञा न दत्ता. गुरुन्निरुक्तं हे महानुभाव तत्र भवतां चारित्रं न स्थास्यति, एवं गुरुवारितोऽपि स तत्र गतः, चतुर्मासकस्थित्यर्थं च याचना कृता, मम तादृक् स्थानं समर्पय? तयापि तदर्पितं, पश्चाद् ज्ञातं यदयं श्रीस्थूलिन्नद्रोपरि मत्सरं धृत्वा समागतोऽस्ति. अतोऽस्य दर्शयामि सम्यक् स्थूलिन्नद्रगुणेर्ष्याकारणं फलमिति विचिंत्य सा रात्रौ सकलशृंगारोपजीवितपंचबाणा विकसितपद्मलोचना रणन्मणिनूपुरा कटितटार्पितकूजन्मेखला चर्वितताम्बूला मधुरध्वनिविनिर्जितकोकिलस्वरा हावादि दर्शयंती मुनेः पुरतः समागता, कटाक्षान् विक्षेपयंतीं अंगमोटनं कुर्वंतीं तां मृगलोचनां दृष्ट्वा मुनेः सुस्थिरमपि मनो विवशं बभूव. अहो! दुर्जयः कामविकारः! यदुक्तं—विकलयति कलाकुशलं। हसति शुचिं पंडितं विडंबयति॥ अधरयति धीरपुरुषं। क्षणेन मकरध्वजो देवः॥१॥ तथाच—मातंगकुंभदलने भुवि संति शूराः। केचित्प्रचंडमृगराजवधेऽपि दक्षाः॥ किं तु ब्रवीमि बलिनां पुरतः प्रसह्य॥ कंदर्पदर्पदलने विरला मनुष्याः॥ २॥

तदा तेन पंचबाणपरवशेन कामभोगप्रार्थना कृता, नृपकोशयोक्तं, निर्धने नास्माकमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दरो धनमानय? पश्चाद्यद्रोचते तत्कुरु इति श्रुत्वा धनार्जनोपायं विचारयता तेन चिंतितमु-
त्तरस्यां दिशि नेपालदेशाधिपोऽपूर्वसाधवे लक्षमूल्यं रत्नकंबलमर्पयति तत्र गत्वा तदानीया-
ऽनया सार्द्धं विषयसेवया मनोऽभीष्टं पूरयामीति विचार्य स महति वर्षाकाले वर्षति घनमं-
डले नेपालंप्रति चलितः, बहून् जीवानुपमर्दयन् कष्टं सहमानः कियद्भिर्दिनैर्नेपालमागत्य ते-
नाशीर्वादपूर्वकं राज्ञोऽग्रे कंबलं मार्गितं. तेनापि तद्दत्तं. तद्गृहीत्वा चलितो मार्गे चौरैस्तदु-
ल्लूसितं द्वितीयवारं तत्र गतस्तद्भिक्षायेन नृपेण पुनः कंबलं दत्तं, तद्दंशे क्षिप्त्वा गुप्तं
गृहीत्वा गच्छन् पथ्यां शुकेन चौराणां निवेदनात्तैरागत्य स वेष्टितः, कथितं च दर्शय लक्ष-
मौल्यं कंबलं? तेनोक्तं मत्पार्श्वे किमपि नास्ति, चौरैरुक्तमस्मदीयोऽयं शुको मृषा न वक्ति,
सत्यं वद? वयं न गृहीष्यामः, तेनापि सत्यमुक्तं, भिक्षुकत्वान्मुक्तः, क्रमेण स पाल्हीपुर-
मागतः, कंबलं तेनोपकोशायै समर्पितं. तयापि स्वपादांभोजरजःप्रमार्जनं विधाय तद्दूरतोऽ-
शुचिप्रदेशे क्षिप्तं, साधुनोक्तं किमिदं कृतं? निर्भाग्यवति दुर्लभं चैतद्दत्तं, तत् श्रुत्वा तयोक्तं
त्वत्तोऽपि कोऽपरो निर्भाग्यशेखरः? मया तु लक्षमूल्यं कंबलमशुचौ क्षिप्तं, त्वया तु अमू-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ल्यं ज्ञानदर्शनचारित्ररूपं रत्नत्रयमनंतभवदुर्लभं नटविटनिष्ठीवनशरावोपमाऽशुचिमलमूत्रसंभृते मदीये देहे क्षिप्तमतो धिगविमृश्यकारिणं! दुर्लभोऽयं नरभवस्तत्रापि कुलमुत्तमं दुर्लभं, तत्रापि धर्मश्रुतिस्तत्रापि श्रद्धातत्वं, तत्र साधुधर्माचरणमतीवदुर्लभं मुक्तिदायकं त्यक्त्वा मदीयांगमोहितो वर्षाकाले नेपालगमनादिना बहुजीवोपघातेन त्यक्तचारित्रो बहुकालं नरकादिवेदनां कथं सहिष्यसे? इत्यादिवाक्यश्रवणेन पुनरप्यायातसंवेगो मुनिः कथयतिस्म. त्वमेव धन्या यया भवकूपे निमज्जन्नहं रक्षितः, अधुनाऽकार्यान्निवृत्तोऽहं. तयोक्तं घटते चैतद्भवादृशां, पश्चात्स गुरुपार्श्वे समागतः, चरणयोर्निपत्य श्रीस्थूलिभद्रं क्षमयामास. धन्या यूयं भवतां कृतं भवद्भिरेव क्रियते, न त्वस्मादृशैर्हीनसत्वैः, गुरून् स विज्ञपयतिस्म, स्वामिन् सत्यमेव दुष्करकारक इति वारत्रयं कथितमित्यालोच्य पुनश्चारित्रग्रहणेन स सद्गतिं गतः, अतो गुर्वाज्ञापुरस्सरमाचरणं प्रधानमित्युपदेशः ॥ २० ॥

॥ मूलम् ॥—जिट्ठव्वयपव्वयभर–समुव्वहणववसियस्स अच्चंतं ॥ जुवइजणसंवइयरे । जइत्तणं भन्नयइ भट्ठं ॥ २१ ॥ व्याख्या—' जिट्ठ इति ' ज्येष्ठव्रतानि महाव्रतानि पर्वतभा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रसदृशानि, तेषां समुद्गहनं धरणं, तत्र व्यवसितस्योद्यतस्य अत्यंतमतिशयेनैतादृशस्य साधोर्युवतिजनसंव्यतिकरे स्त्रीजनसंसर्गे कृते, यतित्वं, णमिति वाक्यालंकारे, उन्नयतो ऽन्यतो भावतश्च भ्रष्टं, स्त्रीसंगेन यतित्वं नश्यतीत्यर्थः ॥ ६१ ॥

॥ मूलम् ॥—जइ ठाणी जइ मोणी । जइमुंडी वक्कली तवस्सी वा ॥ पत्थिंतो अ अबंभं । बंभावि न रोचए मझं ॥ ६२ ॥ व्याख्या—यदि स्थानी कायोत्सर्गविधायकः, यदि मौनधारकः, यदि मुंडीत्तिमस्तके मुंडनं कारयति, वल्कली वल्कलधारी, वाऽथवा तपस्वी तपःकारकः, प्रार्थयन् अब्रह्मचर्यं मैथुनं वांछन्, एतादृशो ब्रह्मापि ' मझंति ' मम न रोचते, मैथुनान्निलाषी न कोऽपि कष्टकारी वरमित्यर्थः ॥ ६२ ॥

॥ मूलम् ॥—तो पढियंतो गुणियंतो । मुणियंतो अ चेइउ अप्पा ॥ आवकिअपस्सिआमं—तिउवि जइ न कुणइ अकज्जं ॥ ६३ ॥ व्याख्या—' तो पढियंति ' तर्हि पठितं प्रमाणं, तर्हि गुणितं प्रमाणं, तर्हि मुणितं शास्त्रार्थज्ञानं प्रमाणं, तर्ह्ययमात्मा चेतितः, आत्मस्वरूपचिंतनमपि तदैव प्रमाणमित्यर्थः, अकुलीनसंसर्गरूपायामापदि आपसितोऽपि कुमित्रैः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रेरितोऽपि, च स्त्रीभिरामंत्रितोऽपि, एतादृशोऽपि यदि न करोति अकार्यं मैथुनसेवनादि, तदा तस्य पठितगुणितादि प्रमाणमित्यर्थः ॥ ६३ ॥

॥ मूलम् ॥—पागम्मियसव्वसल्लो । गुरुपायमूलंमि लहइ साहुपयं ॥ अविसुद्धस्स न वड्ढइ । गुणसेढी तत्तिया णाइ ॥ ६४ ॥ व्याख्या—' पागम्मिय इति ' प्रकटीकृतसर्वशल्य आलोचितसर्वपापः, कुत्र ? गुरुपायमूलंमि गुरुपादमूले, एतावता गुरुसमीपे, स पुमानालोचितपापः साधुपदं लभते प्राप्नोति, अनालोचितपापकर्मणः पुरुषस्य न वर्द्धते न वृद्धिं प्राप्नोति गुणश्रेणिर्ज्ञानदर्शनचारित्रादिगुणसमूहस्तावत्येव तिष्ठति, वृद्धिं न प्राप्नोतीत्यर्थः ॥ ६४ ॥

॥ मूलं ॥—जइ दुक्करदुक्करकारगत्ति । नणिउ जहट्ठिउ साहू ॥ तो किस अजसंभूइ—विजयसीसेहिं नवि खमियं ॥ ६५ ॥ व्याख्या—' जइ इति ' यदि समागच्छत दुष्करदुष्करदुष्करकारक इति बहुमानपूर्वकं श्रीसंभूतिविजयगुरुणा भणितः कथितो यथास्थितः साधुः श्रीस्थूलिभद्रनामा, तो तर्हि कीस इति कथमार्यसंभूतिविजयाचार्यशिष्येण सिंहगुहावासिना तत्कथं गुरुवचनं न क्षांतं ? एतन्निर्विवेकित्वं, अतो यथास्थितगुणान् दृष्ट्वा तत्रानुरागो विधेय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यर्थः ॥ ६५ ॥

॥ मूलम् ॥—जइ ताव सव्वउ सुंद–रुत्ति कम्माण उवसमेण जई ॥ धम्मं वियाणमाणो । इयरो किं मच्छरं वहइ ॥ ६६ ॥ व्याख्या—' जइ इति ' यदि तावत्कोऽपि लोकमध्ये सर्वतः सुंदरः सर्वप्रकारेण भव्योऽयमिति प्रसिद्धिमाग्भवति, कर्मणां तदावरणानां विरुद्धकर्मणां उपशमेन क्षयोपशमेन, यतिः साधुर्धर्मं विजानन्नपि धर्मज्ञातापि इतरो द्वितीयः पुमान् तदुपरि किमर्थं मत्सरं वहति? निर्गुणस्य गुणवदुपरि मत्सरधारणं व्यर्थमेवेत्यर्थः ॥

॥ मूलम् ॥—अइसुट्ठिउत्ति गुणसमु–इउत्ति जो न सहइ जइपसंसं ॥ सो परिहाइ परभवे । जहा महापीढपीढरिसी ॥ ६७ ॥ व्याख्या—' अइ इति ' अयमतिसुस्थितश्चारित्रविषये सुदृढः, इत्येवंरूपां, पुनर्गुणैर्वैयावृत्त्यादिलक्षणैः समुदितो युतोऽयं वर्त्तते, इत्येवंरूपां वा, यः पुमान् एवंविधां यतिप्रशंसां न सहते स पुमान् परभवे ' परिहाइत्ति ' परिहीणो भवति, पुरुषवेदं त्यक्त्वा स्त्रीवेदं प्राप्नोतीत्यर्थः, यथा पीठमहापीठनामानौ मुनिवरौ ब्राह्मीसुंदरीजीवौ स्त्रीत्वं प्राप्तौ तथेत्यर्थः, प्रबंधः कथानकादवसेयः, अत्र कथा—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विदेहनाम्नि क्षेत्रे वज्रनाभश्चक्री राज्यं त्यक्त्वा गृहीतचारित्रश्चतुर्दशपूर्वधरः संजातः, चत्वारोऽन्ये तल्लघुभ्रातरो बाहुसुबाहुपीठमहापीठनामानोऽप्येकादशांगधरा जाताः, तेषां मध्ये बाहुनामा पंचशतसाधूनामाहारमानीयार्पयति, द्वितीयः सुबाहुनामा तावतां वैयावृत्त्यं करोति, द्वौ चान्यौ पीठमहापीठनामानौ स्वाध्यायं कुरुतः, एकदा गुरुणा बाहुसुबाहुमुनी प्रशंसितौ. तत् श्रुत्वा पीठमहापीठयोरमर्षः समुत्पन्नः, विलोकयत गुरोरविवेकित्वं? यदद्यापि स रागस्वभावं न त्यजति, स्वकीयवैयावृत्त्यकारिणं भक्तपानीयादिभक्तिकारकं प्रशंसति, आवां द्वावपि प्रतिदिनं स्वाध्यायं तपश्च कुर्वः, परमावां न प्रशंसति; इति मत्सरतस्तौ चारित्रं पालयतः, पश्चादंते पंचापि साधवः कालं कृत्वा सर्वार्थसिद्धौ देवत्वेनोत्पन्नाः, ततश्च्युत्वा वज्रनाभजीवः श्रीऋषभदेवः, बाहुसुबाहुजीवौ भरतबाहुबलिनामानौ तदंगजौ, पीठमहापीठजीवौ त्वीर्ष्याकरणेन बद्धस्त्रीवेदौ ब्राह्मीसुंदरीत्वेनोत्पन्नौ. एवमन्येऽपि ये गुणप्रशंसायामीर्ष्यां कुर्वंति, तेऽपि पीठमहापीठवत्प्रहीना भवंतीत्यतो विवेकिभिर्मत्सरो न विधेय इत्युपदेशः ॥ इत्येकविंशतितमः प्रबंधः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—परपरिवायं गिण्हइ । अट्ठमयविरल्लणे सया रमइ ॥ रुज्झइ य परसिरीए । सकसाउ दुक्खिउ निच्चं ॥ ६९ ॥ व्याख्या—' परइति ' परपरिवादं गृह्णाति जानाते, अष्टमदानां विस्तारणे सदा निरंतरं रमते, तत्रासक्त एव तिष्ठतीत्यर्थः, परश्रिया परलक्ष्म्या ' रुज्झइत्ति ' ज्वलति, एतादृशः सकषायः पुमान् नित्यं दुःखितो ज्ञेयः ॥ ६९ ॥

॥ मूलम् ॥—विग्गहविवायरुइणो । कुलगणसंघेण बाहिरकयस्स ॥ नहि किर देवलोए । वि देहसमईसु अवगासो ॥ ७० ॥ व्याख्या—' विग्गहेति ' विग्रहे युद्धादिकरणे, विवादे राटीकरणे रुचिर्यस्यैतादृशस्य कुलं नागेंद्रादि, गणः कुलसमुदायः, संघश्चतुर्विधः, एतैर्बाह्यकृतस्य अयोग्यत्वाद्बहिर्निष्कासितस्येत्यर्थः, नास्ति ' किर इति ' निश्चयेन देवलोकेऽपि, यतः स किल्बिषदेवेष्ववतरति, अतः ' देवसमिइसु इति, देवसभायामवकाशः प्रवेशो नास्ति स हीनत्वाद्देवसभायां न प्रवेशं लभते ॥ ७० ॥

॥ मूलम् ॥—जइ ता जणसंववहारो–वज्जियमकज्जमायरइ अन्नो । जो तं पुणो विकंथइ । परस्स वसणेण सो दुहिउ ॥ ७१ ॥ व्याख्या—' जइ इति ' यदि तावज्जनसंव्यव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हारो लोकव्यवहारो लोकाचारस्तस्मिन् वर्जितं निषिद्धं चौर्यादिकं पापकर्म, यत्समाचरति यः पुमान्, ' तं इति ' तदीयं पापकर्म ' विकंथइत्ति ' विस्तारयति लोकसमक्षं कथयति, स पुमान् परस्य व्यसनेन दुःखेन दुःखितो भवति, निरर्थकं परनिंदाकरणेन पापभाग्भवतीत्यर्थः.

॥ मूलम् ॥—सुट्ठुवि जज्जममाणं । पंचेव कारिंति रित्तयं समणं ॥ थुईपरनिंदाजिब्भा । जवन्ना य कसाया य ॥ ७२ ॥ व्याख्या—' सुट्ठुवि इति ' सम्यक् प्रकारेणापि ' जज्जममाणंति ' तपःसंयमक्रियासु जद्यमवंतं श्रमणं साधुं ' पंचेवत्ति ' पंच वस्तूनि निश्चयेन ' रित्तयं इति ' गुणरहितं कुर्वंति, पंचभिर्दोषैः साधुर्गुणरिक्तो भवतीत्यर्थः, आत्मस्तुतिः स्वप्रशंसा, परेषां च निंदाऽपवादः, जिह्वाशब्देन तत्पारवश्यं, जघन्यशब्देन पुरुषस्त्रीचिह्नं, तद्विषयाभिलाषित्वं, कषायाः क्रोधादयः, एतान् पंच दोषान् समाचरन् गुणरिक्तो भवतीत्यर्थः ॥७२॥

॥ मूलम् ॥—परपरिवायमईअ । डसई वयणेहिं जेहिं परं ॥ ते ते पावई दोसो । परपरीवाई इय अपिच्छो ॥ ७३ ॥ व्याख्या—' पर इति ' परपरिवादमतिकः परापवादभाषणनिपुणबुद्धिः पुमान् यैर्यैर्वचनैः परं दूषयति, अन्यं दोषवंतं करोति, स परनिंदाकारकः पुमां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तांस्तान् दोषान् स्वयं प्राप्नोति, इति हेतोः परपरिवादिपुमान् ' अपिन्नो इति ' अप्रेक्ष्योऽदर्शनीयः ॥ ७३ ॥

॥ मूलम् ॥—अक्ष भिद्दप्पेही । अवन्नवाई सयंमई चवला ॥ वंका कोहणसीला । सीसा नवेअगा गुरुणो ॥ ७४ ॥ व्याख्या—' अक्ष इति ' स्तब्धा अनम्राः, भिद्रान्वेषिणः, अवर्णवादिनोऽवर्णभाषणतत्पराः, ' सयंमइत्ति ' स्वयंमताः स्वेच्छाचारिणः, चपलस्वभावाः, वक्राः ' कोहणसीला इति ' क्रोधस्वभावाः, एतादृशाः शिष्याः ' नवेअगा इति ' नवेगकारका गुरूणां भवंति ॥ ७४ ॥

॥ मूलम् ॥—जस्स गुरुंमि न भत्ती । न य बहुमाणो न गउरवं न भयं ॥ नवि लज्जा नवि नेहो । गुरुकुलवासेण किं तस्स ॥ ७५ ॥ व्याख्या—' जस्सेति ' यस्य शिष्यस्य गुरौ भक्तिर्विनयो न, गुरुं दृष्ट्वा योऽभ्युत्थानासनप्रदानादिविनयं न करोतीत्यर्थः, यस्य शिष्यस्य च गुरौ बहुमानोऽभ्यंतरा भक्तिर्नास्ति, यस्य गुरौ गौरवं न, यस्य गुरोर्भयं न, यस्य मनसि गुरोर्लज्जा नैव, यस्य गुरोरुपरि न स्नेहस्तस्य दुर्विनीतस्य शिष्यस्य गुरुकुलवासेन किं स्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्? गुरुसमीपे वसतस्तस्य न किंचिदपि फलमित्यर्थः ॥ ७५ ॥

॥ मूलम् ॥—रुसइ चोइज्जंतो । वहइ अहिअएण अणुसयं भणिउ ॥ न य कहिहिं करणिज्जे । गुरुस्स आलो न सो सीसो ॥ ७६ ॥ व्याख्या—' रुसइ इति ' ' चोइज्जंतो इति ' गुरुणा प्रेर्यमाणो ' रुसइत्ति ' रोषं करोति, वहति धारयति हृदयेन अनुशयं क्रोधं भणितो जल्पितः सन्, ' नयइति ' न च कस्मिन्नपि ' करणिज्जे इति ' कार्ये समायाति, एतादृशो दुर्विनीतो गुरोः ' आलोत्ति ' आलरूपो ज्ञेयः, स शिष्यो न शिष्यो, ग्रहणान्नावादित्यर्थः ॥ ७६ ॥

॥ मूलम् ॥—उव्विल्लणसूअणपरि–भवेहिं अइभणियदुट्ठभणिएहिं ॥ सत्ताहिआ सुविहिआ । न चेव निंदंति मुहरागं ॥ ७७ ॥ व्याख्या—' उव्विल्लण इति ' उद्वेगप्रापणं, सूचनं दोषाणां वचनेन प्रकटीकरणं, परिभवस्तर्जनं, एतेषां द्वंद्वः, तैः, ' अइभणियत्ति ' अतिशिक्षावचनानि दुष्टभणितानि कर्कशभाषणानि, तैः कृत्वा सत्वाधिकाः क्रोधादिजयसमर्थाः सुविहिताः सुशिष्याः, ' न चेवत्ति ' नैव मुखरागं निंदंति, कालमुखा न भवंतीत्यर्थः, ।७७।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—माणंसिणोवि अवमाण–वंचणा ते परस्स न करंति ॥ सुहदुक्खगिरणट्ठं । साहू न अहिव्वगंभीरा ॥ ७८ ॥ व्याख्या—' माणंसिणो इति ' इंद्रादिभिर्मानिताः संतोऽपि, परस्याऽपराधकारिणोऽपि अमाने वंचनां ते प्रसिद्धाः साधवो न कुर्वंति. सुखं पुण्यकर्म, दुःखं पापकर्म, तयोर्गिरणट्ठं इति छेदनार्थं साधवो यतय उदधिरिव गंभीरा भवंति ॥

॥ मूलम् ॥—मउआ निहुअसहावा । हासदवविवज्जिया विगहमुक्का ॥ असमंजसमइबहुअं । न भणंति अपुट्ठिआ साहू ॥ ७९ ॥ व्याख्या—' मउआ इति ' सुकुमाला अहंकाररहिताः, निभृतस्वभावाः शांतस्वभावाः, हासः सामान्येन हसनं, दवं परेषामीर्ष्याकरणं, ताभ्यां वर्जिताः ' विगहमुक्का इति ' विकथा देशराजभक्तस्त्रीकथास्ताभ्यो मुक्ताः, एतादृशा असमंजसमसंबद्धमतिबहुकमतिप्रचुरं साधवोऽपृष्टाः संतो न भणंति न जल्पंति, पृष्टा अपि कीदृशं जल्पंतीत्याह ॥ ७९ ॥—

॥ मूलम् ॥—महुरं निउणं थोवं । कज्जावडिअं अगवियमतुच्छं ॥ पुव्विं मए संकलिअं । भणंति जं धम्मसंजुत्तं ॥ ८० ॥ व्याख्या—' महुरं इति ' मधुरं मिष्टं परेषां हर्षोत्पादकं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निपुणं चातुर्यसहितं, ' थोवंति ' स्वल्पं, कार्ये आपतितं कार्ये सति जल्पति, गर्वरहितमतुच्छं तुंकारादिरहितं, पूर्वं भाषणात्प्रथमं, मत्या बुद्ध्या संकलितं विचारितं, एतादृशं महापुरुषा वचनं भणंति कथयंति; यत् धर्मसंयुक्तं तत्कथयंति; नान्यदित्यर्थः ॥ ८० ॥

॥ मूलम् ॥—सट्ठिंवाससहस्सा । तिसत्तखुत्तोदएण धोएण ॥ अणुचिन्नं तामलिणा । अन्नाणतवुत्ति अप्पफलो ॥ ८१ ॥ व्याख्या—' सट्ठिं इति ' षष्टिवर्षसहस्राणि यावत् प्रतिदिनं षष्ठषष्ठपारणके त्रिसप्तकृत्व एकविंशतिवारान् ' उदएण धोएणत्ति ' उदकेन प्रक्षालितेनाऽऽहारेण तामलिनाम्ना तापसेन अनुचीर्णमाचरितं तपःकष्टं विहितमित्यर्थः, अज्ञानतप इति हेतोस्तस्याऽल्पं फलं संजातं, यद्येतादृशं तपो दयायुक्तमकरिष्यत्तदा मुक्तिरूपं फलमभविष्यदित्यर्थः, अतो जिनाज्ञया तपः प्रमाणं ॥ ८१ ॥ अत्र तामलिसंबंधो यथा—

तामलिप्त्यां महापुर्यां तामलिनामा श्रेष्ठी परिवसतिस्म, तेनैकदा स्वपुत्रे गृहभारमारोप्य वैराग्यपरायणेन तापसी दीक्षा गृहीता, नद्युपकंठे तिष्ठति, प्रतिदिनं षष्ठषष्ठानंतरं पारणं करोति. पारणकदिने यदाहारमानयति, तमेकविंशतिवारान्नदीजलेन प्रक्षाल्य नीरसीकु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्य न्नक्षयति. पुनः षष्टं करोति. एवं षष्टिवर्षसहस्राणि यावत्स दुष्करमज्ञानतपः कृतवान्, प्रांते च तेनाऽनशनं कृतं. तस्मिन्नवसरे बलिचंचाराजधानीवास्तव्या असुराः समागत्य तं ऋद्धिं दर्शयित्वा विज्ञपयंतिस्म, स्वामिन्निदानं कृत्वा यूयमस्माकं स्वामिनो न्नवत? वयं निःस्वामिकाः स्मः, इति वारत्रयं कथितेऽपि तेषां वचनं तेन नांगीकृतं, निदानं च न कृतं. अल्पकषायित्वेन कष्टप्रन्नावतः कालं कृत्वा स ईशानदेवलोके इंद्रत्वेनोत्पन्नः, सम्यक्त्वं च लब्धं, अतो ज्ञानतप एव मोक्षकारणं, स्तोकमपि तपो दयादानयुक्तं विधेयं, न तु तामलिवदज्ञानहिंसासहितमित्युपदेशः, द्वाविंशतितमोऽयं संबंधः ॥

॥ मूलम् ॥—छज्जीवकायवहगा । हिंसगसत्थाइं न्नवइसंति पुणो ॥ सुबहुंपि तवकिलेसो। बालतवस्सीण अप्पफलो ॥ ८२ ॥ व्याख्या—' छज्जीवेति ' षण्णां जीवकायानां वधका हिंसाकारकाः, पुनर्ये हिंसकशास्त्राण्युपदिशंति, लोकानामग्रे हिंसाप्ररूपकाणि शास्त्राणि प्रकाशयंति; एतादृशानां बालतपस्विनां सुबहुरपि अतिप्रचुरोऽपि तपःक्लेशोऽल्पफलो न्नवति. अतो हिंसात्यागेनैव तपसो महत्फलमित्यर्थः ॥ ८२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—परियन्नंति य सव्वं । जहट्ठियं अवितहं असंदिग्धं ॥ तो जिणवयणविहिन्नू । सहंति बहुअस्स बहुआइं ॥ ७३ ॥ व्याख्या—' परियन्नंति इति ' जानंति, ये साधवो भवंति ते सर्वं जीवाऽजीवादिपदार्थसमुहं यथास्थितं सत्यमवितथं यथा भवति तथा. असंदिग्धं संदेहरहितं, तो इति तस्माज्जिनवचनविधिज्ञाः सिद्धांतमार्गज्ञातारः साधवः सहंते तितिक्षंते ' बहुअस्सत्ति ' बहुसामान्यलोकस्य ' बहुआ इत्ति ' बहूनि दुर्वचनादीनि, तेषां तपो महते फलाय भवतीत्यर्थः ॥ ७३ ॥

॥ मूलम् ॥—जो जस्स वट्टइ हियए । सो तं गावेइ सुंदरसहावं ॥ वग्घी गावं जणणी । भद्दं सोमं च मन्नेइ ॥ ७४ ॥ व्याख्या—' जो जस्सेति ' यो यस्य हृदये चित्ते वर्त्तते, स पुमांस्तं हृदयस्थितं सुंदरस्वभावं ' गावेइत्ति ' मन्यते. अत्र दृष्टांतमाह—व्याघ्रजननी माता स्वकीयं शावं सुतं व्याघ्रं अभद्रमपि भद्रं मन्यते; असौम्यमपि सौम्यं मन्यते; तद्वदज्ञान्यपि स्वकीयमज्ञानतपः सम्यगेव जानातीत्यर्थः ॥ ७४ ॥

॥ मूलम् ॥—मणिकणगरयणधण—पूरिअंमि भवणंमि सालिभद्दोवि ॥ अन्नोवि किर म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्ठवि । सामिनत्ति जाउ विगयकामो ॥ ७५ ॥ व्याख्या—' मणिइति ' मणयश्चंद्रकांताद्याः, कनकं सुवर्णं, रत्नानि वैडूर्यादीनि, धनानि रजतादीनि, तैः पूरिते नृते, एतादृशे भुवने स्थितोऽपि शालिभद्रनामा व्यवहारी ' किर इति ' निश्चयेन ' मष्ठवि इति ' ममापि अन्यः स्वामी वर्त्तते, तर्हि धिगिदं वैभवं ! इति विचारयन् विगतकामो गतविषयाभिलाषो जातः ॥ ॥ ७५ ॥ अत्र प्रसिद्धत्वात्संक्षेपतः शालिभद्रसंबंधः—

पूर्वभवे शालिग्रामवास्तव्या काचिद् धन्या नाम्नी वशा स्वोदरपूरणार्थं संगमनामानं सुतं सहादाय राजगृहमागता परगृहकार्यं करोति. संगमोऽपि धेनूनां वत्सांश्चारयति. एकदा पर्वविशेषे प्रतिगृहं पायसभोजनं दृष्ट्वा समुत्पन्नतन्मनोरथः संगमोऽपि मातुरग्रे पायसभोजनं ययाचे. तयापि प्रातिवेश्मिकाप्रदत्तदुग्धादिकारणतो निष्पन्नं पायसं पुत्राय स्थाल्यां समर्पितं यावदत्युष्णत्वात्स तं फूत्करोति, तावदेकस्मान्मासक्षपणपारणके तद्गृहे कोऽप्यतिथिरायातः, संजातहर्षेण तेन बहुभावपूर्वकं पायसं साधवे समर्पितं. चिंतितवांश्च धन्योऽहं यन्मया पात्रं प्राप्तमिति प्रशंसितवान्. यतोऽनुमोदनासहितं दानं महते फलाय. यदुक्तं—आनंदाश्रूणि ॥२१२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोमांचो । बहुमानं प्रियं वचः ॥ किंचानुमोदना पात्रं । दानभूषणपंचकं ॥ १ ॥ साधुदानेन तेन महत्पुण्यमर्जितं. यदुक्तं—व्याजे स्याद् द्विगुणं वित्तं । व्यवसाये चतुर्गुणं ॥ क्षेत्रे शतगुणं प्रोक्तं । पात्रेऽनंतगुणं भवेत् ॥ १ ॥ दुष्करमेतत्कृत्यं, भक्तं च—दाणं दरिद्दस्स पहुस्स खंती । इच्छानिरोहो य सुहोइयस्स ॥ तारुण्णए इंदिअनिग्गहो य । चत्तारि एयाइं सुदुक्कराइं ॥ १ ॥ गते साधौ समागता जननी, रिक्तं स्थालं दृष्ट्वाऽवशिष्टं पायसं परिवेष्य सैवं चिंतयतिस्म. एतावद्बुभुक्षावान् मत्सुतः प्रतिदिनं बुभुक्षितस्तिष्ठति, धिग्मे जीवितं! इति स्नेहदृष्टिदोषेण स शुभध्यानतो रात्रौ मृत्वा तस्मिन्नेव पुरे गोभद्रश्रेष्ठिगृहे भद्राकुक्षौ निष्पन्नशालिक्षेत्रस्वप्नसूचितः शालिकुमारत्वेनोत्पन्नः, पित्रा यौवने द्वात्रिंशत्कन्यानां पाणिग्रहणं कारितं, गृहीतचारित्रः पिताऽनशनेन सौधर्मे समुत्पन्नः, अवधिना स्वपुत्रं दृष्ट्वा स्नेहातुरेणागत्य तेन दर्शनं दत्तं. भद्रायै कथितवान्, शालिभद्रस्य भोगसामग्रीं सर्वामप्यहं पूरयिष्यामीत्युक्त्वा गतो मनोऽभीष्टं पूरयति. यद्भोगैः सुरपरिवृढो भूषणाद्यं ददौ य—ज्ञातं जायापदपरिचितं कंबलश्रेष्टरत्नं ॥ पण्यं यच्चाऽजनि नरपतिर्यच्च सर्वार्थसिद्धि—स्तद्दानस्याद्भुतफल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिदं शालिभद्रस्य सर्वं ॥ १ ॥ पादांभोजरजःप्रमार्जनमपि क्ष्मापालली लावती-दुःप्रापाद्भु-तरत्नकंबलदलैर्यद्भद्रानामभूत् ॥ निर्माढ्यं नवहेममंजनमपि क्लेशाय यस्यावनी-पालालिं-गनमप्यसौ विजयते दानात्सुभद्रांगजः ॥ २ ॥

एतां शालिभद्रऋद्धिं दृष्ट्वा श्रेणिको व्यचिंतयत्—यथा महातरुर्वह्नि-र्बृहद्भानुर्यथोच्य-ते ॥ सारतेजोवियोगेन । नरदेवास्तथा वयं ॥ १ ॥ शालिभद्रोऽपि स्वगृहागतश्रेणिकं स्वा-मिनं विज्ञाय, धिगिमां पराधिनां साम्राज्यलक्ष्मीमिति वैराग्यपरायणः प्रतिदिनमेकैकां का-मिनीं त्यजन्, श्रुततदवदातेन धन्यनाम्ना स्वभगिनीपतिना समागत्य प्रेरितः प्रवर्द्धितोत्साहः श्रीमहावीरांतिके दुस्तपं तपस्तप्त्वा द्वादशवर्षाणि यावत्पर्यायं प्रपाल्यैकमाससंलेखनया स-र्वार्थसिद्धौ त्रयस्त्रिंशत्सागरोपमायुरहमिंद्रसुरत्वेनोत्पन्नः, धन्योऽयं मुनिर्येन सर्वाण्यप्यनुत्तर-तया साधितानि. यतः—अनुत्तरं दानमनुत्तरं तपो । ह्यनुत्तरं माननमनुत्तरं यशः ॥ श्रीशा-लिभद्रस्य गुणा अनुत्तरा । अनुत्तरं धैर्यमनुत्तरं पदं ॥ १ ॥ एवं ज्ञानसहितं तपःकरणं महते फलाय संपद्यते इत्युपदेशः ॥ त्रयोविंशतितमः प्रबंधः ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—न करंति जे तवसंजमं च । ते तुल्लपाणिपायाणं ॥ पुरिसा समपुरिसाणं । अवस्स पेसत्तणमुविंति ॥ ८६ ॥ व्याख्या—' न करंति इति ' ये पुरुषास्तपो द्वादशविधं, अथ च संयमं सप्तदशभेदं न कुर्वंति, ते पुरुषास्तुल्यपाणिपादानां समहस्तचरणानां, एतादृशानां समपुरुषाणां सदृशपुरुषाकारधारिणां अवश्यं प्रेष्यत्वं दासत्वं प्राप्नुवंति. शालिभद्रश्चिंतयति श्रेणिकस्य मम च न कोऽपि हस्तचरणयोर्विशेषः, परमयं स्वामी, अहं च सेवकः, अतो न कृतं मयाऽन्यजन्मनि सुकृतमिति संचिंत्य तेन चारित्रं गृहीतं ॥ ८६ ॥

॥ मूलम् ॥—सुंदरसुकुमालसुहो–इएण विविहेहिं तवविसेसेहिं ॥ तह सोसविन्न अप्पा । जह नवि नाउ सन्नवणेवि ॥ ८७ ॥ व्याख्या—' सुंदरेति ' सुंदरो रूपवान्, सुकुमालो मृदुशरीरः, सुखोचितोऽन्यस्तसुखः, एतादृशेनापि शालिभद्रेण, विविधैः षष्ठाष्टमाद्यनेकप्रकारैस्तपोविशेषैः, ' तह इति ' तथात्मा ' सोसविन्नत्ति ' शोषितो दुर्बलीकृतः, यथा स्वप्नवेऽपि स्वमंदिरेऽपि नैव ज्ञातः, स स्वसेवकैर्नोपलक्षितः, अतिसुकुमालेनाप्येतादृग् दुष्करमाचरितं ॥ ८७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—दुक्करमुक्कोसकरं । अवंतिसुकुमालमहरिसीचरिअं ॥ अप्पावि नाम तह । तज्जइति अन्नेरयं एयं ॥ ८८ ॥ व्याख्या—' दुक्करं इति ' दुष्करं दुःखेन कर्तुं शक्यं, ' मुक्कोसकरंति ' शृण्वतामपि रोमोत्कंपकारकं, एतादृशमवंतिसुकुमालनाम्नो मुनेश्चरितं ज्ञेयं, येन महात्मना, नामेति प्रसिद्धौ, स्वकीयात्मापि तथा तेन प्रकारेण तर्जितो निर्भर्त्सितः, ' एयंति ' एतत् ' अन्नेरयंति ' आश्चर्यं, आश्चर्यकारकं चैतच्चरित्रमित्यर्थः ॥८८॥ अत्र तत्संबंधः—

अवंतिविषये उज्जयिन्यां भद्रा नाम्नी सार्थवाही, तत्कुक्षिसंभूतो नलिनीगुल्मविमानादागतोऽवंतिसुकुमालनामा सुतो द्वात्रिंशद्भ्यो भूभृद्भिर्वैषयिकं सुखमनुभवन्नेकदा स्वगृहसमीपस्थितार्यसुस्थितसूरीणां मुखाच्चतुर्थप्रथमपौरुष्यां नलिनीगुल्मविमानाध्ययनं श्रुत्वा जातिस्मरणतः पूर्वभवस्वरूपं ज्ञात्वा, तत्रैव गंतुं समुत्सुको गुरुसमीपमागत्य विनयपूर्वकं पृष्टवान्, कथं भवद्भिर्नलिनीगुल्मविमानस्वरूपं दृष्टं? गुरुभिरुक्तं सिद्धांतचक्षुषा, अवंतिसुकुमालेन पृष्टं कथमेतदवाप्यते? गुरुभिरुक्तं चारित्रादेव, यतश्चारित्रं बहुसुखदायि, यदुक्तं—नो दुष्कर्मप्रयासो न कुयुवतिसुतस्वामिदुर्वाक्यदुःखं । राजादौ न प्रणामोऽशनवसनधनस्थानचिंता न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चैव ॥ ज्ञानान्निर्लोकपूजा प्रशमपरिणतिः प्रेत्य नाकाद्यवाप्ति—श्चारित्रे शिवदायके सुमतय-
स्तत्र यत्नं कुरुध्वं ॥ १ ॥ अतश्चारित्रं गृहीत्वाऽनशनविधानेनैतत्प्राप्यते. इति गुरुमुखात् श्रु-
त्वाऽवंतिसुकुमालेनोक्तं, प्रतिपन्नं चारित्रमनशनं च भावतो मया; गुरुणा ज्ञानेन ज्ञातमेत-
स्यार्थ इत्थमेव सेत्स्यतीति रात्रौ तस्मै वेषः समर्पितः, तं परिधाय नगराद्बहिः स्मशानम-
ध्ये कंथेरिकावने स कायोत्सर्गमुद्या स्थितो मार्गे कंटककर्करादिप्रहारतः सुकुमारतरचरण-
तलादितो रुधिरं प्रस्रवते, प्राग्भवाऽपमानितस्त्रीजीवः शृगाली बहुभिरपत्यैः परिवृता तत्राग-
त्य तच्छरीरं भक्षितुं लग्ना, परं मनागपि स न क्षुब्धः, निश्चलचित्ततया महतीं वेदनामध्या-
स्य नलिनीगुल्मे स देवत्वेनोत्पन्नः, प्रभाते तत्सर्वं भद्रया ज्ञातं, एकां गर्भवतीं वधूं गृहे मु-
क्त्वा भद्रया वधूभिः सह चारित्रं गृहीतं. पश्चाद्गृहस्थितायां वध्वाः पुत्रो जातस्तेन स्मशा-
नमध्ये प्रासादः कारितः, प्रतिमा च स्थापिता, स्मशानस्य च महाकाल इति नाम दत्तं. य-
था धर्मार्थमवंतिसुकुमालेन स्वकीयं शरीरं त्यक्तं, परं न गृहीतव्रतभंगो विहितः, एवमन्ये-
नापि धर्मविषये यतनीयमित्युपदेशः ॥ इति चतुर्विंशतितमः संबंधः ॥ २४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—उच्छुद्धसरीरघरा । अन्नो जीवो सरीरमन्नंति ॥ धम्मस्स कारणे सुविहिआ सरीरंपि उझंति ॥ २५ ॥ व्याख्या—' उच्छुद्धेति ' उत्सृष्टं त्यक्तं शरीररूपं गृहं यैस्ते, त्यक्तदेहमोहा इत्यर्थः, कथं त्यक्तशरीरगृहाः? अयं जीवोऽन्यो भिन्नः, इदं शरीरमपि चान्यद्भिन्नमिति. अनया बुद्ध्या, एकभविक एवायं देहजीवसंबंध इत्यर्थः, अतः कारणात्सुविहिता धर्मस्य कारणे धर्मनिमित्तमित्यर्थः; शरीरमपि त्यजंति, धर्मस्त्यक्तः पुनरवाप्तुं दुर्लभः, प्राणास्तु जन्मनि जन्मनीति प्राणभंगेऽपि धर्मो न त्याज्य इति भावः ॥ ८८ ॥

॥ मूलम् ॥—एगदिवसंपि जीवो । पव्वज्जमुवागउ अनन्नमणो ॥ जइवि न पावइ मुक्खं । अवस्स वेमाणिओ होइ ॥ ९० ॥ व्याख्या—' एगदिवसमिति ' अथ चारित्रधर्मफलमाह—एकदिवसमपि एकदिनं यावदपि प्रव्रज्यामुपागतः प्रतिपन्नः, अनन्यमना निश्चलचित्त एतादृशो यद्यपि संहननकालाद्यभावे मोक्षं निर्वाणं न प्राप्नोति, तर्ह्यवश्यं निश्चयेन स वैमानिको भवत्येव. ॥ ९० ॥

॥ मूलम् ॥—सीसावेढेण सिरंसि । वेढिए निग्गयाणि अच्छीणि ॥ मेअज्जस्स भगव- ॥२१८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ङ । न य सो मणसावि परिकुविङ ॥ ७१ ॥ व्याख्या—' सीसा इति ' ' सीसावेढेणत्ति ' आर्द्रचर्मवर्द्धावेष्टनेन शिरसि मस्तके वेष्टिते सति, तदार्द्रचर्मणि शुष्के सति अक्षिणी लोचने ' निग्गयाणीति ' निर्गत्य पतिते, प्राकृतत्वाद् द्वित्वार्थे बहुवचनं. कस्य ? मेतार्यस्य मेतार्यनाम्नो मुनेः संबंधिनी, कीदृशस्य भगवतः पूज्यस्य; न च स मेतार्यनामा मुनिर्मनागपि लवलेशमात्रमपि स्वर्णकारोपरि कुपितः, न क्रोधं प्राप्तः, एवमन्येनापि क्षमा विधेयेत्युपदेशः ॥ ७१ ॥ अत्र कथानकं—

साकेतपुरे चंद्रावतंसको राजाऽतीवधार्मिकः, तत्कृहे सुदर्शनाकुक्षिसमुद्भूतौ सागरचंद्रनामानौ पुत्रौ. तयोर्मध्ये मुख्यस्य युवराजपदं दत्तं, द्वितीयस्य चोज्जयिनीराज्यं दत्तं; अन्या प्रियदर्शना राज्ञी, तत्सुतौ गुणचंद्रबालचंद्रान्वितौ, एवं सुतादिभिः परिवृतो राजा राज्यं करोति. अथैकदा गृहीतपौषधव्रतो राजा रात्रौ कस्मिन्नप्येकांतवासे यावदयं समीपस्थो दीपो ज्वलति तावन्मया प्रतिमया स्थेयमित्यभिग्रहवान् स्थितः, तदवसरेऽनभिज्ञाततदाशया काचिद्दासी तत्र तैलमापूरयामास. बहुकालमवस्थानेन शिरोवेदनया मृतोऽसौ गतो देवलोकं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद् दृष्ट्वा सागरचंद्रेण चिंतितं कृत्रिमोऽयं देहसंबंधो यत्प्रातर्विलोक्यते तन्न मध्याह्ने, यन्मध्याह्ने तन्न निशायां, विनश्यति प्रतिक्षणं, क्षीयते चायुर्वायुविधूतपत्रसदृशं. यदुक्तं—आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं । व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥ दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते । पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ १ ॥ इत्यादि संविग्नचित्तो राज्यपराङ्मुखोऽपि, विमात्रा मम सुतोऽधुना राज्यभारोद्वहनाऽसमर्थस्ततो गृह्णात्वेमां राज्यधुरमिति बलात्कारेण सागरचंद्रो राज्ये स्थापितो विरक्तमनसा राज्यं पालयति; क्रमेण रुद्ध्या यशोभिश्चोर्जितं तं दृष्ट्वा विमात्रा दुर्मनायतेस्म. सा प्रतिदिनमीर्ष्यां करोति, छलमन्वेषयति च.

एकदा क्रीडार्थं वनं गताय राज्ञे तन्मात्रा मोदको दास्या हस्ते प्रेषितो, गच्छंतीं तां दासीमाहूय विमात्रा पृष्टं किमेतदिति? तयोक्तं नृपार्थं मोदकं गृहीत्वा गच्छामि, तयोक्तं विलोकयामि कीदृशोऽयं? तयापि दत्तः, तं विषमिश्रकरेण सम्यक् स्पृष्ट्वा पश्चादर्पितः, तं गृहीत्वा सापि नृपांतिकमागता, पुरतो मुमोच, गृहीतो नृपेणापि हन्मोदकोऽसौ मोदकः, तदव- ॥२२०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सरे पुरतः करयोजनपूर्वकं स्थितौ विमातृको दृष्ट्वा, स्नेहवशेन लघुवयसाविमौ मुक्त्वा नो-
चितं मम मोदकन्नोजनमिति विमृश्य मोदको विन्नज्योन्नयोर्दत्तः, स्वयं च न न्नक्षितः, ता-
वता तौ विषप्रयोगेण भूमौ पतितौ, दृष्ट्वा सोऽतीवविषण्णो, मणिमंत्रादिप्रयोगेण च तौ नि-
र्विषौ कृतौ. दासीमुखात् हस्तस्पर्शेन विषप्रयोगं विज्ञाय समागत्य स विमातुरेवमुपालंन्न-
तेस्म. धिक् त्वां! पूर्वं दीयमानमपि राज्यं त्वया नांगीकृतं, सांप्रतमेतदकार्यं कृतं! धिग् ना-
रीणां विलसितं! यदुक्तं—नितंबिन्यः पतिं पुत्रं । पितरं भ्रातरं सुतं ॥ आरोपयंत्यकार्येऽपि
। दुर्वृत्ताः प्राणसंशये ॥ १ ॥ अथ सूतमनेन दुर्गतिनिबंधनेन राज्येनेति विचिंत्य
तदीयसूनवे गुणचंद्राय राज्यं दत्वा दीक्षां गृहीत्वा स नग्रविहारं कुर्वन् श्रुतपारगो जा-
तः, एकदोज्जयिनीपुरादागतेन केनापि साधुना सागरचंद्राय कथितं नो स्वामिन् नज्जयिन्यां
त्वदीयभ्रातृव्यः पुरोहितपुत्रश्च द्वावपि मिलित्वा साधूनां महतीमवहीलनां कुरुतः, किं बहु
कथ्यते? तत् श्रुत्वा गुर्वाज्ञां गृहीत्वा तत्प्रतिबोधार्थं स नज्जयिन्यामागतः, यत्र राजसुतपु-
रोहितपुत्रौ तिष्ठतस्तत्रागत्योच्चैःस्वरेण तेन धर्मलान्नो दत्तः, तत् श्रुत्वा हृष्टौ तौ ' आगच्छवो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽद्य धर्मलाभः समागतोऽस्ति, तं नर्त्तयावः ' इत्युक्त्वा तं हस्ते गृहीत्वा सौधोपरि चटितौ. कपाटं पिधाय च तं कथयितुं लग्नौ, त्वं नर्त्तय ? नो चेत्कुट्टयिष्यावः, तदा सागरचंद्रेणोक्तं युवां वाद्यं वादयतं यथाहं नृत्यं करोमि, ताभ्यामुक्तमावां वाद्यवादनं न जानीवः, साधुनोक्तं तदाहमपि नर्त्तनं न जानामि, ताभ्यामुक्तं तर्हि आवाभ्यां साई मल्लयुद्धं कुरु ? साधुनोक्तं तथास्तु.

सागरचंद्रेणापि मल्लयुद्धे क्रियमाणे तादृक्पूर्वाभ्यस्तकलया तद्वरीरास्थिसंधयः पृथक्कृताः, ततः कपाटमुद्घाटयित्वा स्वोपकरणं गृहीत्वा स नगराद्बहिरागत्य वने कायोत्सर्गमुद्रया स्थितः, पश्चात्तयोर्महती वेदना जाता, पूत्कारं कर्तुं लग्नौ, तत्रागतेन राज्ञा पृष्टं किमिदं जातमिति. लोकैरुक्तमत्रैको मुनिरागतस्तेन किंचित्कृतं विलोक्यते. पश्चाद्राजापि तमन्वेषयन् वनं गतः, तत्र स्वकीयं वृद्धभ्रातरं विनयपूर्वकमभिवंद्य स विज्ञपयतिस्म. स्वामिन्न घटते भवादृशां महात्मनां परपीडाकरणं. तत् श्रुत्वा सागरचंद्रेणोक्तं त्वं चंद्रावतंसकनृपांगजः पंचमलोकपालोऽसि, कथमेतादृशमन्यायं प्रवर्त्तयसि ? यत्साधूनां दुःखदायकं स्वपुत्रं पुरोहितपु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं च न निवारयसि. गुणचंद्रेणोक्तं मदीयोऽयमपराधः क्षम्यतां? यादृशं कृतं तादृगवाप्तं, यूयं पितृस्थानीयाः, कृपां विधायैतौ सज्जीकुरुत? नास्ति कोऽप्यन्यो युष्मान् विना य एतदस्थीनि स्थानमानयतीति. एवमुक्त्वा तेन तौ साधुसमीपमानीतौ. साधुनोक्तं यदि जीवितेच्छां कुरुथस्तदा संयमं समाचरतमिति, ताभ्यां तत्प्रतिपन्नं, सज्जीकृतौ, चारित्रं गृहीत्वोन्नावपि निर्गतौ. तयोर्मध्ये पुरोहितपुत्रो द्विजजातिमदकरणेन नीचैर्गोत्रं निबद्धवान्. चारित्रपालनेन द्वावपि देवौ जातौ. परस्परमनुरक्तौ; ताभ्यां परस्परं संकेतः कृतो, योऽग्रतश्च्युत्वा मनुष्यो भवति, स द्वितीयेन स्वर्गस्थितेन प्रतिबोधनीय इति. पश्चात्कालांतरे प्रथमं पुरोहितजीवश्च्युत्वा, राजगृहे पुरे मेहरनाम्नश्चांडालस्य गृहे मेतीनाम्नी भार्या, तत्कुक्षौ जातिमदकरणतोऽवतीर्णः, सा चांडालभार्या तस्मिन्नेव नगरे कस्यचित् श्रेष्ठिनो गृहे प्रतिदिनमायाति, श्रेष्ठिभार्यया सार्द्धं तस्या अतीवमैत्री जाता, श्रेष्ठिन्या मृतवत्सादोषेण सुता न जीवंति. सा प्रवृत्तिस्तया तदग्रे कथिता, चांडालपत्न्या कथितमहमस्मदीयं सुतं तव समर्पयिष्यामि, कालेन तस्याः सुतः प्रसूतः, श्रेष्ठिभार्यायै तया प्रच्छन्नं समर्पितश्च. ॥ २२३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुत्रजन्मोत्सवः कृतो, मेतार्य इति च तस्य नाम दत्तं, षोडशवार्षिको जातः. तदवसरे मित्रदेवेनागत्य संकेततो बोधितः, परं स प्रतिबोधं न प्राप्नोति, पश्चात्पित्राऽष्टाभिर्व्यवहारिसुताभिस्तस्य विवाहो मेलितः, तत्पाणिग्रहणावसरे मित्रदेवेनागत्य चांडालपत्नीशरीरमधिष्ठितं, लोकानां पुरतः सा जल्पतिस्म. अयं मदीयोंगजः कथं स्वकीयाः पुत्र्यो दीयंते? एतस्य विवाहमहं करिष्यामीत्युक्त्वा तया बलात्कारेण स स्वगृहमानीतः, पश्चाद्देवेनागत्य तस्मै प्रोक्तं कथं मदीयं कथितं न कृतं? कीदृशो धिक्कृतोऽसि? कुरु मदीयं कथनं? गृहाण चारित्रं? मेतार्येणोक्तं कथमहं दीक्षां गृह्णामि? अहं चांडालकरणेन लोकमध्ये हीनत्वं प्रापितः? ततो यदि पुनर्मयि नृपान् महत्वमारोपयति, पुनः श्रेष्टी च मां पुत्रत्वेन स्थापयति, श्रेणिको नृपः स्वकीयां पुत्रीं मह्यं ददाति, तदाहं चारित्रमंगीकरोमि, देवेन तत्सर्वमपि प्रतिपन्नं. पश्चान्नृपेऽशुचिकरणस्थाने रत्नानि कुर्वन्नेकोऽजस्तेन देवेन बद्धः, चांडालोऽपि देवप्रेरितो दिनत्रयं रत्ननृतं स्थालं श्रेणिकाग्रे ढोकयामास. अभयकुमारेणोक्तं कुतस्तवैतावंति रत्नानि? तदा तेनाऽजस्वरूपं प्रोक्तं. पुनरप्यभयेनोक्तं किमर्थं त्वं ढोकयसि? तेनोक्तं रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जसुतां मदीयसुताय समर्पय ? तदा राज्ञोक्तं कथमेतज्ज्ञवति ? अन्नयेनोक्तमेकवारं त्वं तं ज्ञागमत्रानय ? पश्चाद्यथोचितं करिष्यामः, तेनाप्यानीय नृपगृहे ज्ञागो बद्धः, तदा स दुर्गंधविष्टां कर्तुं लग्नः, अन्नयेनोक्तमयं कोऽपि देवप्रज्ञावो विलोक्यते, नोचेत्कथमयं नृपपुत्रीं मार्गयति ? तत्परीक्षा विधेया, अतो यत्कार्यं मनुष्येण कर्तुमशक्यं, तत्कार्यं चेदसौ करोति, तदा सत्योऽयं देवप्रज्ञाव इति विचार्याऽन्नयेन तस्मै प्रोक्तं, यो हि राजगृहपुरतो नवीनं स्वर्णदुर्गं कारयति, वैज्ञारगिरौ सेतुबंधं करोति, गंगायमुनासरस्वतीक्षीरसमुद्रचतुष्टयमत्रानयति, तदीयजलेन स्वसुतं च स्नपयति, तस्य श्रेणिकः स्वपुत्रीं ददाति, एतत्सर्वमन्नयकुमारोक्तं देवप्रज्ञावेण सद्यः संजातं. पश्चात्तज्जलेन चांमालसुतं स्नपयित्वा, पवित्रं विधाय राजसुता परिणायिता. पश्चात्तैर्व्यवहारिज्निरप्यष्टौ कन्यास्तस्मै दत्ताः, इत्थं नवस्त्रीणां पाणिग्रहणं कृतं. तदा देवेनोक्तं दीक्षां गृहाण ? मेतार्येणोक्तं नवपरिणीतोऽस्मि, ततो द्वादशवर्षाणि यावदेताज्निः सार्द्धं विषयसुखं भुक्त्वा पश्चाच्चारित्रं गृहिष्यामि. देवेनापि तत्प्रतिपन्नं. द्वादशवर्षांते पुनरप्यागतो देवः, तदा करौ मुकुलीकृत्य स्त्रीज्निर्द्वादश वर्षाणि याचितानि. तज्जिनयरंजितेन ते- ॥ २२५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नापि दत्तानि. इत्थं चतुर्विंशतिवर्षाणि सांसारिकसुखं भुंक्त्वा श्रीवीरांतिके व्रतमादायाऽधीतनवपूर्वोऽसौ जिनकल्पाचरणेन विजहार.

विहरन्नेकदा मासक्षपणपारणके राजगृहे भिक्षार्थं भ्रमन् स स्वर्णकारगृहे धर्मलाभं दत्तवान्. तावत्स स्वर्णकारोऽपि श्रेणिकाज्ञया जिनभक्त्यर्थं घटिताष्टोत्तरशतस्वर्णयवान् मुक्त्वा गृहांतर्गतः, तदवसरे कश्चित्क्रौंचनामा पक्षिविशेषस्तत्रागतः, तेन सर्वेऽपि ते यवा गलिताः, मेतार्यमुनिना तद् दृष्टं; क्रौंचोऽपि गत्वोच्चैः स्थितः, स्वर्णकारः समागतो यवानदृष्ट्वा साधुं पृच्छतिस्म. साधुना चिंतितं यदि पक्षिनाम गृहिष्यामि तदैनमयं मारयिष्यतीति करुणावशेन स मौनमाधाय स्थितः, युक्तमेतत्साधूनां, यदुक्तं—बहु शृणोति कर्णाभ्यां—मक्षिभ्यां बहु पश्यति ॥ न च दृष्टं श्रुतं सर्वं । साधुराख्यातुमर्हति ॥ १ ॥ पुनः पुनः पृष्ठोऽपि मौनावलंबनेन चौरोऽयमिति ज्ञात्वा तेन क्रोधवशेनार्द्रचर्मणा साधुशिरो वेष्टयित्वा स आतपे स्थापितः, पश्चात्तापात्कठिनीभूतार्द्रचर्माकर्षणतः साधुलोचनयुग्मं निर्गत्य पतितं, महतीं वेदनामनुभवतापि न तेन रोषः समानीतः, क्षमागुणेन सकलकर्मक्षयं कृत्वा सोंतकृत्केवलि- ॥२२६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वेन सिद्धिं गतः, तदवसरे काष्टभारनिपतनोद्भितशब्दतो भयातुरेण पक्षिणा सर्वेऽपि यवा भक्षीर्णाः, तान् दृष्ट्वा भीतः स्वर्णकारो व्यचिंतयत् हा हा अधममाचरितं मया, श्रेणिकजामाता मेतार्यनामा मुनिर्निंदितो मया, यद्ययं राजा ज्ञास्यति तदा मां सकुटुंबं हनिष्यतीति भयतो भगवतः समीपे कुटुंबसहितेन तेन चारित्रं गृहीतं. चारित्रं प्रपाल्य स्वपापान्यालोच्य स सद्गतिं जगाम. एवमन्येनापि संयमवता क्षमा विधेयेत्युपदेशः ॥ इति पंचविंशतितमः संबंधः ॥ ९५ ॥

॥ मूलम् ॥—जो चंदणेण बाहुं । आलिंपइ वासिणावि तच्छेइ ॥ संथुणइ जो व निंदइ । महरिसिणो तत्थ समभावा ॥ ९२ ॥ व्याख्या—' जो चंदणेणेति ' यः कश्चिद्भक्त्या चंदनेन गोशीर्षादिना बाहुं स्वभुजमालिंपयति विलेपयति, अथवा द्वेषवशेन ' वासिणावित्ति ' वास्या वृक्षभिदाशस्त्रेण ' तच्छेइति ' तक्षणोति, अथवा यः कोऽपि संस्तौति, स्तुतिं करोति, यः कोऽपि निंदां करोति, महर्षयो महापुरुषास्तत्र समभावा भवंति, शत्रुमित्रयोरुपरि समचित्ता भवंतीत्यर्थः ॥ ९२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—सीहगिरिसुसीसाणं । भद्दं गुरुवयणसद्दहंताणं ॥ वइरो किर दाही । वायणत्ति न विकोविअं वयणं ॥ ९३ ॥ व्याख्या—' सीहगिरि इति ' सिंहगिरिनामाचार्यस्तेषां सुशिष्या विनीतशिष्यास्तेषां भद्दं कल्याणं भवतु? कीदृशानां? ' गुरुवयणसद्दहंताणं इति ' गुरुवचनं श्रद्दधतां, किं तद्वचनमित्याह—' वइरो इति ' वज्रनामा शिष्यः ' किर इति ' निश्चयेन भवतां वाचनां सिद्धांतपाठनरूपां दास्यति, इति गुरुवचनं ' न विकोविअंति ' नाऽसत्यं कृतं. किमयमस्माकं वाचनां दास्यतीति न विमृष्टमित्यर्थः ॥ ९३ ॥ अत्र कथानकं कथ्यते—

पूर्वोक्ता वज्रस्वामिनो बाल्ये पदानुसारिणीलब्धिबलेन समधीतसाध्वीमुखश्रुतैकादशांगा अष्टवर्षप्रमाणा गुरुभिर्दीक्षिता गुरुभिः सार्द्धं विहरंतिस्म. एकदा वज्रस्वामिनमुपाश्रये मुक्त्वा सर्वसाधवो गोचर्यां निर्गताः, पश्चात्स वज्रनामा मुनिः सर्वेषामुपधीन् प्रत्येकं पंक्तौ संस्थाप्य तेषु यतिस्थापनां कृत्वा, स्वयं च मध्ये स्थित्वा महता शब्देन तेषामाचारांगादि पाठयति. एतदवसरे स्थंभिलात्सूरयः समागताः, मुष्टितकपाटमुपाश्रयं दृष्ट्वा गुरुभिः प्रच्छन्न-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मवलोकितं, तदा वज्रमुनिः सर्वयतीनामुपधीनेकीकृत्य गात्रबुद्ध्या पाठयति. गुरुन्निश्चिंतितं यद्यहं सहसा द्वारमुद्घाटयिष्यामि तदायं शंकां प्राप्स्यति, इति ज्ञात्वा महता शब्देन ते वारत्रयं नैषेधिकीशब्दमुच्चरंतिस्म. ततो गुरूणामागमनं विज्ञाय लघुकलयोपधीन् पृथक् पृथक् मुक्त्वा तेन कपाटमुद्घाटितं. गुरुन्निश्चिंतितं, इयदस्मिन् पुरुषरत्ने ज्ञानमस्ति, ततो मैतस्य ज्ञानमज्ञातं गच्छतु; एवं विचिंत्य द्वितीयदिवसे स सिंहगिरिनामाचार्यः किमपि कार्यमुद्दिश्य द्वितीयग्रामे विहर्तुमुद्यतः, तदा साधुवर्गः कथयतिस्म, स्वामिन् कोऽस्माकं वाचनां दास्यति? गुरुन्निरुक्तं वज्रनामा लघुशिष्यः, तैरपि 'तहत्ति' इति कथितं, न तु किमयं वाचनां दास्यतीति विप्रतिपन्नं. गुरवोऽन्यस्मिन् ग्रामे गताः, शिष्यैरपि वज्रपार्श्वे सिद्धांतवाचना गृहीता. सम्यगध्ययनं जातं, गुरवः समागताः, शिष्याणां पृष्टं किंचिदधीतं वा न वेति? तैरुक्तं स्वामिन् विशेषेणाध्ययनं प्रवृत्तं; स्तोकदिवसैश्च बह्वधीतं. अस्माकमयमेव वाचनाचार्यो भवतु? इति विज्ञप्तैर्गुरुन्निस्तस्मै वज्रमुनये आचार्यपदं दत्तं, वाचनाचार्यत्वेन स स्थापितः, एवं यथा सिंहगिरिशिष्यैर्गुरुवचनं प्रमाणं कृतं, तथाऽन्यैरपि गुरुवचनविषये संदेहो न वि- ॥ २२९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धेय इत्युपदेशः ॥ २६ ॥

॥ मूलम् ॥—मिण गोणसंगुलीहिं । गणेहि वा दंतचक्कलाइं से ॥ इच्छंति जाणिऊणं । कज्जं तु तएव जाणंति ॥ ९४ ॥ व्याख्या—' मिण इति ' हे शिष्य! अंगुलैः कृत्वा गोणसं सर्पविशेषं ' मिणत्ति ' मापय? वाऽथवा ' से इति ' तस्य ' दंतचक्कलाइंइति ' दंतस्थानानि गणय? सुशिष्यास्तद्गुरुवचनमिच्छंति, ' तहत्ति ' इति जाणित्वांगीकुर्वंति, ' त एवत्ति ' ते गुरव एव जानंति, शिष्यैर्विलंबो न विधेय इत्यर्थः ॥ ९४ ॥

॥ मूलम् ॥—कारणविऊ कयाइ । सेअं कायं वयंति आयरिया ॥ तं तह सद्दहिअव्वं । भवियव्वं कारणेण तहिं ॥ ९५ ॥ व्याख्या—कारणविदः कारणज्ञातार एतादृशा गुरवः कदाचित्कस्मिंश्चित्काले काकं श्वेतवर्णं वदंति कथयंति, शिष्या विलोकयत? कीदृशोऽयं श्वेतः काक इति वदंति. तद्वचनं तथा तथैव ' सद्दहियव्वं इति ' माननीयं. ' तहिं इति ' तत्र केनापि कारणेन भवितव्यं, कारणं विना नैवाचार्या वदंतीत्यर्थः ॥ ९५ ॥

॥ मूलम् ॥—जो गिण्हइ गुरुवयणं । भन्नंतं भावउ विसुद्धमणो ॥ डसइमिव पिज्जंतं । ॥२३०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तं तस्स सुहावहं होइ ॥ ९६ ॥ व्याख्या—यो गृह्णाति प्रतिपद्यते गुरुवचनं, कीदृशं? भणत्कथ्यमानं भावतो विशुद्धमना निर्मलमनाः, औषधमिव पीयमानं तद्गुरुवचनं तस्य सुखावहं भवति, यथाऽऽपाते कटुकमप्यौषधं पीतं सत्परिणामे बहुसुखदं तथा गुरुवचनमपीत्यर्थः ॥ ९६ ॥

॥ मूलम् ॥—अणुवत्तगा विणीआ । बहुखम्मा निच्चभत्तिमंता य ॥ गुरुकुलवासी अमुई । धन्ना सीसा इह सुसीला ॥ ९७ ॥ व्याख्या—' अणुवत्तगा इति ' गुरूननुवर्त्तंते इत्येवंशीलाः, विनीता बाह्याभ्यंतरविनयवंतः, बहु क्षमंते सहंते एतादृशाः, नित्यं भक्तिमंतः, गुरुकुलवासे वसंतीत्येवंशीलाः, न तु स्वेच्छाचारिण इत्यर्थः, ज्ञानादिकार्ये सिद्धेऽपि गुरुं न मुंचंति, एतादृशाः शिष्या इहास्मिञ् जगति धन्याः, कीदृशाः, सुशीलाः सम्यगाचारवंतः ।९७।

॥ मूलम् ॥—जीवंतस्स इह जसो । कित्ती अ मयस्स परभवे धम्मो ॥ सुगुणस्स निग्गुणस्स य । अयसो अकित्ती अहम्मो अ ॥ ९८ ॥ व्याख्या—' जीवंतस्स इति ' इहास्मिञ् जगति जीवतस्तस्य यशो भवति, कीर्त्तिश्च भवति मृतस्य च परभवे धर्मो भवति, ॥ २३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवादिसद्गतिं स प्राप्नोतीत्यर्थः, सुगुणस्य विनीतशिष्यस्यैतद्भवति, 'निग्गुणस्स यत्ति' दुर्विनीतशिष्यस्य तु अत्र भवेऽयशोऽकीर्त्तिश्च भवति, परभवेऽधर्मश्च नरकादिगतिरूपो भवति ॥९८॥

॥ मूलम् ॥—वूढावासेवि ठियं । अहव गिलाणं गुरुं परिभवंति ॥ दत्तुव्व धम्मवीमंसएण दुस्सिक्खियं तंपि ॥ ९९ ॥ व्याख्या—'वूढावासेत्ति' वृद्धावस्थायामपि गमनाऽशक्तत्वेन विधिपूर्वकमेकक्षेत्रे स्थितं, अथवा ग्लानं मांद्ययुक्तमेतादृशं गुरुमाचार्यं यत्परिभवंत्यवगणयंति, क इव? दत्त इव, यथा दत्तेनाऽवज्ञा कृता तथेत्यर्थः, 'धम्मं विमंसएणंति' धर्मविमर्शनेन धर्मविचारणयेति यावत्, तदपि दुःशिक्षितं ज्ञेयं, दुष्टशिष्याचरणमेतदित्यर्थः ॥ ९९ ॥ अत्र दत्तावदातः—

कुब्जपुरे नगरे संघमध्ये स्थविराचार्याः, तैरेकदा भाविनमत्यंतदुष्कालं ज्ञात्वा सर्वेऽपि गणसाधवोऽन्यदेशे प्रेषिताः, स्वयं च वृद्धत्वेन गंतुमशक्तत्वात्तत्रैव पुरे वसत्यां नवभागान् कल्पयित्वा स्थानवासित्वेन स्थिताः, एकदा गुरुसेवार्थं दत्तनामा शिष्यस्तत्रागतो, यस्मिन् वसतिभागे गुरुं मुक्त्वा स पूर्वं गतस्तस्मिन्नेव भागे विहारक्रमेण वर्त्तमानं गुरुं दृष्ट्वा संशय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मापन्नो व्यचिंतयत्, गुरवः पार्श्वस्था उन्मार्गगामिनो जाताः, स्थानपरावर्त्तोऽपि न कृतो दृश्यते, इति ज्ञात्वा स भिन्नोपाश्रये स्थितः, भिक्षार्थं गुरुभिः सार्द्धं निर्गतो नीचोच्चकुलेषु परिभ्रमन् स उद्वेगं गतः, गुरवोऽपि तदिंगितं ज्ञात्वा कस्मिंश्चिन्महेभ्यगृहे गताः, तद्गृहे व्यंतरीप्रयोगेण रुदंतमेकं शिष्यं दृष्ट्वा मा रुदिहीत्युक्त्वा तैश्चिप्पटिका वादिता, व्यंतरी नष्टा, स्वास्थ्यं च जातं. हृष्टाभ्यां तन्मातृपितृभ्यां गुरुभ्यो मोदकाः समर्पिताः, तमाहारं दत्ताय दत्वा स उपाश्रये प्रेषितः ।

दत्तेनाचिंति सत्यप्येतादृशे स्थापनाकुले बहुवारं भ्रामितोऽहं, पश्चाद् गुरवोऽपि सामान्यकुले गत्वा नीरसाहारं गृहीत्वा समागताः, आहारश्च कृतः, पश्चात्प्रतिक्रमणवेलायां दैवसिकातिचारालोचनावसरे गुरुभिरुक्तं, भो महानुभाव! अद्य धात्रीपिंडस्त्वया भक्षितोऽस्ति, ततः सम्यगालोचयेति श्रुत्वा दत्तश्चिंतयतिस्म, गुरवो मदीयं सूक्ष्मदोषं पश्यंति, स्वकीयं महांतमपि च दोषं न विलोकयंति, एवं स गुरोरुपरि मत्सरं दधार. पश्चात्प्रतिक्रमणं कृत्वा स स्वस्थानं यावद्गच्छति तावद्गुरुगुणावर्जिता शासनसुरी दर्शयाम्येतस्य गुरुपराभवफल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिति विचिंत्य महांधकारकरणेन तं व्यामोहयतिस्म. दत्तः किमपि न पश्यति. आकुलीभूतः पूत्कारं कर्तुं लग्नः, गुरुणोक्तं त्वमत्रागच्छ? तेनोक्तं कथमागच्छामि? द्वारमहं न पश्यामि, गुरुणा निष्ठिवनं स्पृष्ट्वा स्वांगुलिरुत्क्षिप्ता, दीपकवज्ज्वलंती तेन दृष्टा, दत्तेन चिंतितं गुरवो बहुसावद्यं दीपकमपि धारयंति, इहं तस्याऽवगुणमेव प्रतिभासतेस्म. शासनदेवतयोक्तं रे दुरात्मन् पाप्मन् गौतमसदृशं गुरुं यत्पराभवसि, तत्किं दुर्गतिं गंतुमिच्छसीत्यादिबहुकर्कशवाक्यैस्तस्य शिक्षा दत्ता, ततोऽसौ पश्चात्तापं कुर्वन् गुरुचरणयोर्निपत्य पुनः पुनः स्वापराधं क्षमयामास. प्रांते सम्यगालोचितपापकर्मा सद्गतिं गतः, इहं दत्तदृष्टांतेन गुरोरवज्ञा न विधेयेत्युपदेशः ॥ इति सप्तविंशतितमोऽयं दत्तसंबंधः ॥२७॥ अथ गुरोरुपरि भक्तिरागोपनयमाह—

॥ मूलम् ॥—आयरियभत्तिरागो । कस्स सुनखत्तमहरिसीसरिसो ॥ अवि जीविअं वबसियं । न चेव गुरुपरिभवो सहिउ ॥ १०० ॥ व्याख्या—' आयरिअ इति ' आचार्योपरि भक्तिरागोऽभ्यंतरः स्नेहः कस्य भवति? सुनक्षत्रनामा यो महर्षिस्तस्य सदृशः समः, यादृशः सुनक्षत्रस्य गुरोरुपरि भक्तिराग आसीत्तादृशो न कस्यापीत्यर्थः, कीदृशो भक्तिरागस्तेन र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षितः? जीवितमपि स्वप्राणधारणमपि 'वर्वसियंति' त्यक्तं परं गुरुपरिभवो गुरुतिरस्कारो 'न सहिज्जत्ति' न तितिक्षितः न क्षमित इत्यर्थः ॥१००॥ अत्र सुनक्षत्रसंबंधो लिख्यते—

एकवारं श्रीवीरप्रभुः श्रावस्त्यां समवसृतः, तत्र गोशालकोऽपि समागतः, नगरमध्ये प्रवृत्तिर्विस्तृता यदद्य नगरे द्वौ सर्वज्ञौ समवसृतौ, एकः श्रीवीरविभुर्द्वितीयो गोशालकश्च. गोचर्यां गतेन श्रीगौतमेन तत् श्रुत्वा समागत्य भगवतः पृष्टं, कोऽयं गोशालकः? यो लोकानां मध्ये सर्वज्ञबिरुदं धारयति. भगवतोक्तं गौतम! शृणु? सरवणनाम्नि ग्रामे मंखलिनाम्नो मंखस्य भद्रा स्त्री, तत्कुक्षिसमुद्भूतो गोबहुलब्राह्मणस्य गोशालायां जातत्वाद्गोशालकनामाऽसौ यौवनं प्राप्तः, तदवसरेऽहं छद्मस्थावस्थायां राजगृहे चतुर्मासके स्थितः, सोऽपि भ्रमंस्तत्रागतः, मया चत्वारि मासक्षपणपारणकानि परमान्नेन कृतानि, तन्महिमानं दृष्ट्वा स चिंतितवांश्च, यद्येतदीयः शिष्यो भवामि तदा प्रतिदिनं मिष्टान्नभोजनं करोमि. इति विचार्याहं तव शिष्योऽस्मीति कथयित्वा स मम पृष्ठौ लग्नः, षड् वर्षाणि मया सार्द्धं भ्रांतः, एकवारं कमपि योगिनं दृष्ट्वा यूकाशय्यातरोऽयमिति स तं हसितवान्. क्रुद्धेन तेन तेजोलेश्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुक्ता, मया शीतलेश्यामोचनेन स रक्षितः, तदा तेन तेजोलेश्यासमुत्पादनोपायः पृष्टः, मयापि नाविन्नावं ज्ञात्वा कथितः, पश्चान्मत्तः पृथग्भूतः षण्मासान् कष्टं विधाय स तेजोलेश्यां साधितवान्. अष्टांगनिमित्तविच्च जातः, इत्थं स लोकानां पुरः सर्वज्ञत्वं स्थापयति, परं तन्मिथ्याभाषा, अयं जिनो वा सर्वज्ञोऽपि नेति भगवद्वाक्यं श्रुत्वा त्रिके चतुष्के राजमार्गे सर्वेऽपि लोकाः कथयंति, यदयं गोशालकः सर्वज्ञो नास्तीति. कस्यचिन्मुखादेतत्सर्वं गोशालकेन श्रुतं, तस्य क्रोधः समुत्पन्नः, एतदवसरे आनंदनामानं साधुं गोचर्यां गच्छंतं दृष्ट्वा तं समाकार्य स कथयतिस्म, भो आनंद दृष्टांतमेकं शृणु? यथा केचिद्वणिजः क्रयाणकैः शकटानि भृत्वा चलिताः, अटव्यां गतास्तृषातुरा जलमन्वेषयंति, तैश्चत्वारि वाल्मिकशिखराणि दृष्टानि. एकं शिखरं भग्नं तन्मध्याद्गोदकसदृशमुदकं निर्गतं, पायं पायं सर्वेऽपि संतुष्टाः, द्वितीयशिखरभेदने क्रियमाणे केनचिद्वृद्धेन वारिता अपि ते न विरमंतिस्म. तद्भेदनतः स्वर्णं निर्गतं. एवं तृतीयभेदनेन रत्नानि निर्गतानि. चतुर्थभेदनावसरे वृद्धेन बहुतरं वारिता अपि अतिलोभतस्तद्भिदंतिस्म. ततोऽतिभयंकरो दृष्टिविषः सर्पो निःसृतः, तेन सूर्यसन्मुखं विलो- ॥२३६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्य सर्वेऽपि भस्मसात्कृताः, एकः स वृक्वणिग्मुक्तः, तथा हे आनंद तव धर्माचार्योऽपि स्वकीयर्द्ध्याऽतृप्तो ममेर्ष्यां करोति, परमहं तं ज्वालयित्वा भस्मसात्करिष्यामि, त्वां तु वृक्वणिजमिव हितोपदेशदायकं न ज्वालयिष्यामि, इति श्रुत्वा समुत्पन्नभय आनंदोऽपि भगवदग्रे सर्वामपि प्रवृत्तिं कथयतिस्म; भगवदाज्ञया गौतमादीनां च ज्ञापितं, सर्वेऽपि दूरे स्थिताः, गोशालकस्तत्रागतः कथयतिस्म, भो काश्यप! त्वं मां स्वशिष्यं कथयसि तदसत्यं, स तु तव शिष्यो मृतः, अहं तु तदीयं बलवद्वरीरमधिष्ठाय स्थितोऽस्मि.

एतत् श्रुत्वा भगवतोऽवज्ञां कुर्वंतं तं ज्ञात्वा गुरुभक्तिरागतः सुनक्षत्रसाधुर्गोशालकायैवं वदति, भो स्वधर्माचार्यं किंनिंदसि? स एव त्वं गोशालकोऽसि, इति श्रुत्वा क्रोधवशतस्तेन तेजोलेश्यया ज्वालितः स समाधिना मृत्वाऽष्टमस्वर्गे देवत्वेनोत्पन्नः, एतदवसरे द्वितीयः सर्वानुभूतिनामा साधुरपि सर्वजीवान् क्षामयित्वाऽनशनमाराधनां कृत्वा समागत्य गोशालकसन्मुखं वदतिस्म, दुष्टेन सोऽपि ज्वालितो मृत्वा द्वादशे स्वर्गे समुत्पन्नः, पश्चाद्भगवतोक्तं, हे गोशालक! किमात्मानमपलपसि? यथा चौरो नश्यन् तृणेन स्वात्मानमाच्छादयति, परं स

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न उन्नं तिष्ठति, तथा त्वमपि मत्तो बहुश्रुतो जातो, मामेवाऽपलपसीत्यादिवचनैः स कुद्धो भगवदु-परि तेजोलेश्यां मुक्तवान्, सा भगवंतं त्रिःप्रदक्षिणीकृत्य पश्चाद्गत्वा गोशालकशरीरं प्रविष्टा, पश्चाद्गोशालकः प्राह भो काश्यप त्वमितः सप्तमे दिवसे मरणमवाप्स्यसि, भगवतोक्तमहं तु-षोडशवर्षाणि यावत्केवलित्वेन विचरिष्यामि, परं त्वं तु सप्तमे दिवसे महतीं वेदनामनुभूय मरिष्यसि. पश्चाद्गोशालकः स्वस्थानमागतः, सप्तमे दिवसे शांतपरिणामेन तेन सम्यक्त्वं स्पृ-ष्टं, मनसि स चिंतयतिस्म, हा मया विरुद्धं कृतं, भगवदाज्ञालोपः कृतः, साधुघातो विहि-तो मया, भवांतरे मम का गतिर्भविष्यतीति विचार्य शिष्यानाहूय कथयतिस्म, मरणानंतरं मम कलेवरं पादयोर्बध्वा श्रावस्त्यामिस्ततो भ्रामणीयं, यतोऽजिनेनापि मया जिन इति बिरुदं धारितमित्यात्मानिंदां कुर्वन् स मृत्वा द्वादशस्वर्गे समुत्पन्नः, पश्चाद्भिष्यैर्गुरुवचनं प्र-माणीकरणीयमित्युपाश्रयमध्ये एव श्रावस्तीनगरीमालिख्य कपाटं दत्वा पादयो रज्जूं ब-ध्वा स भ्रामितः, एवं सुनक्षत्रवदन्येनापि साधुना गुरुभक्तिरागो विधेय इत्युपदेशः ॥ इत्य-ष्टाविंशतितमः संबंधः ॥ २८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—पुन्नेहिं चोइआ पुरा–कमेहिं सिरिन्नायणं नविअसत्ता ॥ गुरुमागमेसिन्नद्दा । देवयमिव पज्जुवासंति ॥ १ ॥ व्याख्या—' पुन्नेहिं इति ' पुण्यैः कृत्वा चोदिताः प्रेरिताः, पुराकृतैः पूर्वन्नवकृतैः, श्रियो न्नाजनं लक्ष्मीस्थानं, एतादृशा न्नविकसत्त्वा न्नव्यजीवा गुरुं स्वकीयं धर्माचार्यं ' आगमेसिन्नद्दा इति ' अग्रे न्नावि न्नद्दं कल्याणं येषां ते, एतादृशा दैवतमिव पर्युपासते, यथा देवता सेव्यते, तथा गुरुमपि ते सेवंते इत्यर्थः ॥ १ ॥

॥ मूलम् ॥—बहुसुक्खसयसहस्साणं । दायगा मोयगा दुहसयाणं ॥ आयरिआ फुरमेयं । केसिपएसी य ते हेऊ ॥ २ ॥ व्याख्या—' बहु इति ' बहुनां सुखशतसहस्राणां सुखलक्षाणां दायका दातारः, पुनर्दुःखशतानां मोचकाः, दुःखेभ्यो मोचयंतीत्यर्थः, आचार्या धर्माचार्या एतादृशा न्नवंति, एतत्स्फुटं प्रकटं वर्त्तते, अत्र संदेहो नास्ति, यथा प्रदेशिनाम्नो राज्ञः केशिनामाचार्यः ' ते हेऊइति ' तद्धेतुः सुखहेतुर्जातस्तद्वदित्यर्थः ॥ २ ॥ अत्र केशिप्रदेश्योरुपनयो निरूप्यते, तद्यथा—

जंबूद्वीपे न्नारते वर्षे कैकेयार्द्धविषये श्वेतांबीपुरी, तत्राऽधर्मवतामवतंसको नित्यरुधिर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लिप्तहस्तस्त्यक्तपरलोकः पुण्यपापनिरपेक्षः प्रदेशिनामा नृपः, तस्य चित्रसारथिनामा मंत्री, सोऽन्यदा प्रदेशिनृपेण श्रावस्त्यां जितशत्रुपार्श्वे प्रेषितः, तत्र केशिकुमारनाम्नो मुनेर्देशनां श्रुत्वा स परमश्रावको जातः, केशिकुमारं विज्ञपयतिस्म स्वामिन्नेकवारं श्वेतांब्यां कृपा विधेया, महान् लाभो भविष्यति, तदा केशिगणधरेणोक्तं भवतां स्वामी दुष्टोऽस्ति, तत्कथमागम्यते ? चित्रेणोक्तं राजा दुष्टश्चेत्किं ? अन्ये बहवो भव्यसत्त्वास्तत्र निवसंति, केशिकुमारेणोक्तं प्रस्तावे ज्ञास्यते. पश्चाच्चित्रः श्वेतांब्यां समागतः, केशिकुमारोऽपि बहुमुनिपरिवृतो मृगवनाभिधे वने श्वेतांब्यां समवसृतः, चित्रसारथिरपि तदागमनं श्रुत्वा मनसि चिंतयति, मयि राज्यचिंताकारके सति दुर्बुद्धिमान् पापकारको मन्नृपो मा नरके व्रजतु ? अतोऽमुं मुनिसमीपं नयामीति विचिंत्याऽश्वक्रीडाभिषेण राजानं बहिरानयत्, अतिश्रमातुरो नृपः श्रीकेशिकुमारविभूषितं वनमाजगाम. तत्र बहुलोकमध्ये देशनां ददंतं गणधरमालोक्य स चित्रं पृच्छतिस्म. किमेते मुंडा जडा अज्ञानिनो लोकानामग्रे कथयंति ? चित्रेणोक्तं नाहं जानामि. भवतां यदीच्छा तर्हि तत्र गत्वा श्रूयते.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवमुक्ते चित्रेण सार्द्धं स तत्रागतः, गत्वा वंदनादिविनयं विनैव स गुरूणां पृष्ठतिस्म, ननु दाज्ञा चेत्तिष्ठामि, गुरुणोक्तं नवतां नूमिरियं वर्त्तते, यथेष्टमाचरत? इति श्रुत्वा स पुरतः स्थितः, तं दृष्ट्वाऽाचार्या विशेषेण जीवादिस्वरूपं वर्णयंति, तत् श्रुत्वा प्रदेशिनृपोऽवक् इदं सर्वमसंबद्धं, यत्प्रत्यक्षेण दृश्यते तत्सत्यं, यथा पृथिव्यप्तेजोवायवः प्रत्यक्षेण दृश्यंते, तथा नायं जीवो दृश्यते, खपुष्पवदविद्यमाना जीवसत्ता कथं कथ्यते? तदा केशिकुमारेणोक्तं, नो नृप यद्वस्तु तव दृष्टौ नायाति, तत्सर्वेषामपि दृष्टौ नायाति, यदि त्वं कथयिष्यसि यदहं न पश्यामि तत्सर्वमसत्यं तन्मिथ्या, यतः सर्वैर्दृष्टमेकेन चाऽदृष्टं नाऽसत्यतां याति; अथ यदि कथयिष्यसि सर्वेऽपि न पश्यंति, तर्हि किं त्वं सर्वज्ञोऽसि? सर्वज्ञास्तु जीवं प्रत्यक्षेण पश्यंति, त्वं स्वशरीरस्याग्रनागं पश्यसि, पुनः पृष्टिनागं न पश्यसि, अतः कथमरूपिजीवस्वरूपं त्वं पश्यसि? अतो जीवसत्तामनुमन्यस्व? परलोकसाधनं प्रमाणय? तदा प्रदेशीनृपेणोक्तं स्वामिन् मदीयः पापीयान् पितामहो नवन्मते नरकं गतो नविष्यति, अहं तु तस्यातीववल्लन्न आसीत्, तेनाप्यागत्य मम नोक्तं, तत्कथं श्रद्दधामि जीवसत्तां? केशिकुमा-

॥ २४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रश्रमणेनोक्तं तदुत्तरं शृणु ?

यथा कोऽपि पुरुषस्त्वदीयसूरिकंतया राज्ञ्या सार्द्धं विषयसेवामाचरति, तदाचरंतं तं त्वं यदि पश्येस्तदा किं तस्य कुर्याः ? नृपेणोक्तं तमेकघातेन द्विधाखंडं कृत्वा मारयामि, क्षणमपि गृहे कुटुंबमिलनार्थं नाऽङ्गां समर्पयामि; गुरुणोक्तमेवं ते नारकाः कर्मसंबद्धा नात्राऽायातुं शक्नुवंति; पुनरपि नृपेणोक्तं मदीयाऽतीवधर्मवती माता भवन्मते स्वर्गमाप्ता भविष्यति, तयाऽपि नागत्योक्तं, ततोऽहं कथं जीवसत्तां प्रमाणयामि ? तदा केशिगणधरेणोक्तं, भवान् भव्यवस्त्रचंदनादिलिप्तगात्रः स्त्रिया सार्द्धं सौधे रममाणो भवेत्तदवसरे कोऽपि चांडालस्त्वामशुचिकरणभूमौ समाकारयति तदा भवांस्तत्र गच्छेद्वा न वा ? नृपेणोक्तं न गच्छामि; गुरुणोक्तं तथा देवा अपि स्वभोगान् मुक्त्वा दुर्गंधं मृत्युलोकं नायांति. यदुक्तं—चत्तारिपंचजोयण—सयाइं गंधो अ मणुअलोगस्स ॥ उड्ढं वच्चइ जेणं । न हु देवा तेण आवंति ॥ १ ॥ ॥२४२॥

पुनरपि नृपेणोक्तं स्वामिन्नेकवारं जीवन्गृहीतश्चौरो मया लोहकोष्टके क्षिप्तो, द्वारं च पिहितं, कालेन द्वारोद्घाटनं कृत्वा विलोकितं, चौरो मृतो दृष्टः, तत्र कलेवरे च कीटकराशयः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

समुत्पन्ना दृष्टाः, परं छिद्राणि न पतितानि. तज्जीवनिर्गमनेऽन्येषां चागमनेऽवश्यं छिद्राणि न-
वंत्येव; तानि तु न दृष्टानि, ततो नास्ति जीवः, केशिकुमारेणोक्तं शृणु ?

कश्चित्पुरुषो गर्त्तागारे स्थापितः, सर्वद्वाराणि पिधाय मध्यस्थितः शंखमथ भेरीं वाद-
यति, तदीयशब्दो बहिः श्रूयते वा न वा ? नृपेणोक्तं श्रूयते. गुरुणोक्तं बहिःशब्दनिस्सरणेऽप-
वरकनिर्त्तौ किं छिद्राणि पतंति ? नृपेणोक्तं न पतंति; गुरुणोक्तं यदि रूपिशब्देनापि छिद्रं न
पतति, तर्हि अरूपिजीवेन कथं छिद्रं पतति ? पुनरपि प्रदेशिनृपेणोक्तं स्वामिन्नेकश्चौरश्चूर्णी-
कृत्य प्रदेशे प्रदेशे विलोकितोपि तस्य जीवो न दृष्टः, केशिगणधरेणोक्तं त्वं तु काष्टवाहक इव मू-
र्खो दृश्यसे, यथा केचित्काष्टवाहकाः काष्टग्रहणार्थं वने गताः, एकस्य कथितमयमग्निर्वर्त्त-
ते, वेलायां रसवती विधेया, चेदग्निर्याति तदाऽरणिकाष्टमध्यादग्निर्निष्कासनीय इति कथयि-
त्वा ते गताः, अग्नौ गते तेनापि मूर्खेण अरणीकाष्टमानीय चूर्णं चूर्णं कृतं, परं तत्राग्निर्न
दृष्टः, तावता ते समागताः, तन्मुर्खतां च ज्ञात्वा द्वितीयमरणीकाष्टमानीय सरकेणोन्मथ्या-
ग्निः पृकटीकृतो रसवती निष्पादिता, भोजनं च कृतं. यथा काष्टमध्ये स्थितोऽग्निरुपायेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साध्यस्तथा कायस्थितो जीवः साध्य इति श्रुत्वा प्रदेशिनृपो वदतिस्म. स्वामिन्नेकश्चौरो मया तोलयित्वा श्वासरोधनेन मारितः, पुनस्तुलनायां स तावन्मान एव जातः, तदा मया ज्ञातं जीवो नास्ति, भवति चेत्तस्मिन् गते किंचिन्न्यूनो भवेदयं चौरः, केशिगणधरेणोक्तं भो महीपते! यथा पूर्वं तोलितोऽपि चर्ममयो दृतिः पश्चाद्वायुना पूरितोऽपि तावत्प्रमाण एव भवति, न भारवृद्धिर्जायते, तथाऽयमपि. त्वं सम्यग् विचारय? यदि रूपिद्रव्येण वायुना भारो न वृद्धस्तर्हि अरूपिद्रव्ये चात्मनि गते का न्यूनता? सूक्ष्मरूपिद्रव्याणां यदि विचित्रा गतिस्तर्हि अरूपिणः किं कथनीयं? एतन्मध्ये किं भ्रांतोऽसि? आत्माऽनुमानप्रमाणगम्यः, केवलिनां तु प्रत्यक्षप्रमाणगम्योऽस्ति, पुनश्चाहं सुखी, अहं दुःखीत्याकारं ज्ञानमात्मनो लक्षणं तस्माज्जीवोऽस्ति. यथा तिलेषु तैलं, दुग्धे घृतं, काष्टेऽग्निस्तथा कायेऽपि जीवः।

इत्यादि बहुप्रश्नानामुत्तरं शास्त्रयुक्त्या दत्तं, विगतसंदेहो नृपश्चिंतयति, सत्यमेतत्, धन्यमिदं ज्ञानं, गुरूनत्वा स विज्ञपयतिस्म भगवन् त्वदुपदेशमंत्रेण मम हृदयस्थितो मिथ्यात्वपिशाचो नष्टः, परं कुलक्रमागतं नास्तिकमतं कथं मुंचामि? तदा केशिकुमारेणोक्तं

॥२४४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नो प्रदेशिनृप कथं लोहवणिगिव मूर्खो नवसि? यथा केचिद्वणिजो वाणिज्यार्थं देशांतरं गताः, मार्गे गच्छन्निस्तैर्लोहाकरो दृष्टः, लोहेन च शकटानि भृतानि, पुनरग्रे ताम्राकरो दृष्टो, लोहं त्यक्त्वा ताम्रं नृतं, एकेन वणिजा लोहं न त्यक्तं, पुनरग्रे गच्छन्नी रूप्याकरो दृष्टः, ताम्रं त्यक्त्वा रूप्यं नृतं, बहूक्तेऽपि लोहवणिजा तु लोहं न त्यक्तं, अग्रे स्वर्णाकरो दृष्टो, रूप्यं त्यक्त्वा स्वर्णं नृतं, अग्रे रत्नाकरो दृष्टः, स्वर्णं त्यक्त्वा रत्नानि नृतानि. लोहवणिजं ते कथयंतिस्म, नो मूर्ख! किं लब्धं हारयसि रत्नजातं? लोहं त्यक्त्वा गृहाण रत्नानि? अन्यथा पश्चात्तापं करिष्यसि, एवं बहूक्तोऽपि स न मन्यते, प्रत्युतैवं कथयतिस्म, नवतां मध्ये स्थैर्यं नास्ति, यदेकं मुक्त्वा द्वितीयं गृह्णीथ, द्वितीयं मुक्त्वा तृतीयं गृह्णीथ, परमहमिच्छं न करोमि; मया तु यदादृतं तदादृतमेव. पश्चात्सर्वेऽपि ते स्वगृहमागताः, रत्नधनप्रज्ञावेण च सुखिनो जाताः, तान् दृष्ट्वा लोहवाणिजो मनसि पश्चात्तापं कर्तुं लग्नो, हा मया किं कृतं? यदेतेषां कथनं नांगीकृतं? एवं स बहुकालं शुशोचेति. इच्छं त्वमपि नो प्रदेशिनृप स लोहवणिगिव पश्चात्तापं करिष्यसि, पुनर्यो विवेकी नवति स कुलक्रमागतं रोगदारिद्र्यादिकं त्यक्तुं किं न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वांछति ? यदि कुलमार्गो धर्मः स्यात्तदाऽधर्मनाम्नापि नष्टं, किंच—दारिद्र्यदास्यदुर्भग–तादुःखितादि पित्राचरितं ॥ नैव त्याज्यं तनयैः । स्वकुलाचारैककथितनयैः ॥ १ ॥ तस्मान्न कुलाचारो धर्मः, किंतु जंतुरक्षादिरेवेत्यादिवचनैः प्रतिबुद्धः प्रदेशिनृपः सविनयमेवं वदतिस्म. भगवन् सत्यमेतत् भवद्वाक्यं, अयमर्थः, अन्यः सर्वोऽप्यनर्थ एवेत्युक्त्वा सम्यक्त्वमूलानि द्वादशव्रतानि स जग्राह; पुनः शिक्षावसरे केशिगणधरेणोक्तं—' माणं तुमं पएसी पुव्विं रमणिज्जे भवित्ता, पच्छा अरमणिज्जे भविज्जासि ' इति राजप्रश्नीयसूत्रं, एतस्यायं भावार्थः—पूर्वमन्येषां दाता भूत्वा संप्रति जिनधर्मप्रतिपत्त्या तेषामदात्रा न भाव्यं. अस्माकमंतरायस्य जिनधर्मापन्नाजनस्य च प्रसक्तेः; ततश्चिरप्रसक्त(वृत्त)दानस्य लोकविरुद्धत्वाऽपन्नाजनादिदोषः, पात्रबुद्ध्या तु तेषां न देयमेव. यथार्हमौचित्यादिदानं तु न क्वापि निषिद्ध्यते. मिथ्यात्वं तु वर्जनीयं, दयादानं तु सर्वोपरि त्वया धारणीयमिति गुरुशिक्षां गृहीत्वा स गृहमागत्य धनं चतुर्षु भागेषु न्यस्तवान्. एको भागोंतःपुरस्य, द्वितीयः सैन्यस्य, तृतीयो भांडागारस्य, चतुर्थो दानशालायां दानस्य; एवं श्राद्धव्रतं पालयतस्तस्य कियत्यपि काले गते परपुरुषलुब्धा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वकीया पट्टराज्ञी सूर्यकांतानाम्नी भोजनमध्ये तस्मै विषं ददातिस्म.

प्रदेशिनृपेण तद् ज्ञातं, अव्याकुलितः क्रोधमुक्तः पौषधशालायामागत्य स दर्भसंस्तारकं विधायैशान्यां दिशि सन्मुखं स्थित्वा, नमस्कारं श्रीभगवते केशिगणधराय धर्माचार्याय च कृत्वा, स्वकीयव्रतातिचारं सम्यगालोच्य प्रतिक्रम्य कालं कृत्वा, प्रथमस्वर्गे सूर्याभनाम्नि विमाने चतुःपल्योपमायुःसूर्याभनामा देवो जातः, ततश्च्युत्वा महाविदेहेऽवतीर्य स मोक्षं यास्यति. अतो नरकदत्तहस्तेनापि पापवता प्रदेशिना यदमरविमानं प्राप्तं, तत्केशिगणधरमाहात्म्यं, अतो दुःखनिवारका धर्माचार्या यत्नेन सेवनीया इत्युपदेशः ॥ इत्येकोनत्रिंशत्तमः संबंधः ॥ २९ ॥

॥ मूलम् ॥—नरयगइगमणपडिहत्थए । कए तह पएसिणा रन्ना ॥ अमरविमाणं पत्तं । तं आयरियप्पभावेणं ॥ ३ ॥ व्याख्या—' नरय इति ' नरकगतिगमनं, तत्र ' पडिहत्थए इति ' प्रस्थानके कृते सत्यपि ' तह इति ' तथा ' पएसिणा रन्ना ' इति प्रदेशिनाम्ना राज्ञा यदमरविमानं देवविमानं प्राप्तं, तदाचार्यप्रभावेण केशिगणधरमाहात्म्येन, अतो गुरुसेवनं म-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हाफलदायि भवतीत्यर्थः ॥ ३ ॥

॥ मूलम् ॥—धम्ममइएहिं अइसुंदरेहिं । कारणगुणोवणिएहिं ॥ पल्हायंतोए मणं । सीसं चोएइ आयरिउ ॥ ४ ॥ व्याख्या—' धम्म इति ' धर्ममयैर्धर्मप्रचुरैर्धर्मसहितैरिति यावत्, अति सुंदरैर्दोषरहितैः, कारणानि ज्ञानदर्शनचारित्राणि, तेषां गुणास्तैरुपनीतानि सहितानि एतादृशैर्वचनैर्मनश्चित्तं पल्हादयन्, आचार्यः शिष्यं ' चोएत्ति ' प्रेरयति शिक्षां ददातीत्यर्थः ॥ ४ ॥

॥ मूलम् ॥—जीयं काऊण पणं । तुरमिणिदत्तस्स कालिअअज्जेण ॥ अचियसरीरं चत्तं । न य भणियमहम्मसंजुत्तं ॥ ५ ॥ व्याख्या—' जीयं इति ' स्वकीयं जीवितं पणं कृत्वा ' तुरमिणित्ति ' तुरमिणीनाम्नि नगरे ' दत्तस्सत्ति ' दत्तनाम्नो राज्ञः ' कालिअअज्जेणत्ति ' कालिकाचार्येण, च पुनः शरीरमपि त्यक्तं, मनसा स्वदेहोऽपि त्यक्तः, परमधर्मसंयुक्तमसत्यं वचनं न भणितं न भाषितं ॥ ५ ॥ अत्र कालिकाचार्यसंबंधो यथा—

तुरमिणीनामनि नगरे जितशत्रुनामा नृपः, तत्रैकः कालिकनामा विप्रः, तस्य भद्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाम्नी भगिनी, तस्या दत्तनामा पुत्रः, एकदा कालिकब्राह्मणेन स्वयंबुद्धेन चारित्रं गृहीतं, क्रमेण चाचार्यपदं प्राप्तं, तद्भागिनेयो दत्तनामा निरंकुशो द्यूतादिव्यसनाक्रान्तो नृपसेवां करोति, कर्मयोगेन राज्ञा तस्य मंत्रिपदं दत्तं. लब्धाधिकारेण तेन राजानं बहिर्निष्कास्य स्वयं राज्यं गृहीतं. राजापि तद्भयान्नष्टः, प्रच्छन्नं च स्थितवान्. अथ स दत्तनृपो महाक्रूरकर्मा मिथ्यात्वमोहितोऽनेकान् यागान् कारयति, पशूंश्च घातयति. तदवसरे तत्र कालिकाचार्याः समवसृताः, तदा भगिनीमातुरुपरोधेन स दत्तमंत्रीश्वरोऽपि वंदनार्थमागतः, गुरुभिर्देशना दत्ता, यतः—धर्माद्धनं धनत एव समस्तकामाः । कामेभ्य एव सकलेंद्रियजं सुखं च ॥ कार्यार्थिना हि खलु कारणमेषणीयं । धर्मो विधेय इति तत्वविदो वदंति ॥ १ ॥ इति श्रुत्वा दत्तेन यागफलं पृष्टं, गुरुणोक्तं यत्र हिंसा तत्र धर्माऽभावः, यदुक्तं—दमो देवगुरूपास्ति—र्दानमध्ययनं तपः ॥ सर्वमप्येतदफलं । हिंसां चेन्न परित्यजेत् ॥ १ ॥ पुनरपि द्वितीयवारं यागफलं पृष्टं, गुरुणोक्तं हिंसादुर्गतिकारणं वर्त्तते, यदुक्तं—पंगुकुष्टिकुणित्वादि । दृष्ट्वा हिंसाफलं सुधीः ॥ निरागस्त्रसजंतूनां । हिंसां संकल्पतस्त्यजेत् ॥ १ ॥ पुनर्दत्तेनोक्तं, कथमित्थमुत्तरं ? यादृशं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भवति तादृशं सत्यमेव वदत? तदा कालिकाचार्येण चिंतितं यद्यप्ययं राजा यागरक्तोऽस्ति, तथापि यन्नाव्यं तन्नवतु? परं मिथ्या न जल्पामि, प्राणांतेऽपि मिथ्याभाषणं न श्रेयः, यदुक्तं— निंदंतु नीतिनिपुणा यदि वा स्तुवंतु। लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं ॥ अद्यैव वा मरणमस्तु युगांतरे वा। न्याय्यात्पथः प्रविचलंति पदं न धीराः ॥ १ ॥ इति विचार्य कथितं भो दत्त निश्चयेन नरकगतिरेव यागफलं, यदुक्तं—यूपं छित्वा पशून् हत्वा। कृत्वा रुधिरकर्दमं ॥ यद्येवं गम्यते स्वर्गे। नरके केन गम्यते ॥ १ ॥ दत्तेनोक्तं कथमेतद् ज्ञायते? गुरुणोक्तं इतः सप्तमे दिवसे घोटकखुरोल्लिता विष्टा तव मुखे पतिष्यति, पश्चात्त्वं लोहकुंभिकायां पतिष्यसि. एतदनुमानेन तवावश्यं नरकगतिर्भाविनीति ज्ञेयं. दत्तेनोक्तं भवतां का गतिर्भविष्यति? गुरुभिरुक्तं वयं धर्मप्रभावेण स्वर्गे गमिष्यामः।

इति श्रुत्वा समुत्पन्नक्रोधेन दत्तेन चिंतितं, यदि सप्तदिवसमध्ये एतद्वाक्यं न मिलिष्यति, तदैनमवश्यं मारयिष्यामीति स्वसेवकांस्तत्समीपे मुक्त्वा नगरमागत्य नगरवीथिका अशुचिनिष्कासनपूर्वकं शोधयामास. सर्वत्रापि पुष्पाणि विकीर्णानि, स्वयं चांतःपुरे स्थितः, ॥२५०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षड् दिनानि गतानि, अष्टमदिनभ्रांत्या सप्तमे दिने क्रोधमाधायाऽश्वमारुह्य गुरून् हंतुं याव-
च्चलति, तदवसरे कश्चिद्दृष्टो मालाकारो वृष्टनीतिबाधया पीडितो रथ्यायां विष्टां कृत्वा पुष्पै-
राच्छाद्य गतोऽस्ति, तदुपरि दत्तनृपाश्वचरणो निपतितः, समुच्छलन्नवस्करांशो नृपमुखे पतितः
समुत्पन्नो विश्वासः, पश्चाच्छलितो दत्तनृपः, एकांतं ज्ञात्वा राजपुरुषैर्गृहीतो, जितशत्रुनृपश्च
राज्ये स्थापितः, पश्चात्सामंतपुरुषैश्चिंतितं जीवन्नयं दुःखदायी भविष्यतीति ज्ञात्वा स लो-
हकोष्टिकायां क्षिप्तो, बहूनि दिनानि महत्कष्टमनुभवन् विलपन् पूत्कारं कुर्वन् मृत्वा सप्त-
मनरकावनिं प्राप. श्रीकालिकाचार्यास्तु चारित्राराधनेन स्वर्गं गताः, एवं साधुना प्राणांतेऽ-
पि मिथ्याभाषणं न विधेयमित्युपदेशः ॥ इति त्रिंशत्तमः संबंधः ॥ ३० ॥

॥ मूलम् ॥—फुडपागडमकहंतो । जहट्ठियं बोहिलाभमुवहणइ ॥ जह भगवउ वि-
सालो । जरमरणमहोअही आसि ॥ ६ ॥ व्याख्या—' फुड इति ' स्फुटं प्रकटं सत्यार्थम-
कथयन्नभाषमाणः सन् यथास्थितं सत्यं बोधिलाभमागामिनि भवे धर्मप्राप्तिमुपहंति नाश-
यति, यथा भगवतः श्रीमहावीरस्य मरीचिभवे विशालो विस्तीर्णो जरामरणरूपो यो महो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दधिर्महासमुद्रो विस्तीर्ण आसीद्भवनूव; कोटाकोटीप्रमाणः संसारो वर्द्धित इत्यर्थः ॥ ६ ॥ अत्र श्रीमहावीरपूर्वभवस्वरूपं निरूप्यते—

प्रथमभवे पश्चिममहाविदेहे नयसारनामा कश्चिद्ग्रामाधिपतिः, सोऽन्यदा काष्टानयनार्थं वनं गतो मध्याह्ने भोजनायोपविष्टः, तदवसरे कश्चित्सार्थभ्रष्टो मुनिस्तत्रागतः, तं दृष्ट्वाऽतीवसंतुष्टो नयसारो भावतस्तस्मै शुद्धाहारं दत्तवान्. आहारकरणानंतरं साधोर्मार्गदर्शनार्थं साकं चलितो, योग्यं ज्ञात्वा साधुना देशनया तस्य सम्यक्त्वं प्रापितं, ततोऽसौ साधुं नत्वा गृहं गतः, कालांतरे स सौधर्मे समुत्पन्नः ॥ इति द्वितीयो भवः ॥ ततश्च्युत्वा तृतीये भवे मरीचिनामा चक्रवर्त्तिसुतः समुत्पन्नः, श्रीप्रथमप्रभुदेशनां श्रुत्वा भोगांस्त्यक्त्वा स्थविरांतिके चारित्रं जग्राह. अधीतैकादशांगीको चारित्रं प्रपालयन्नेकवारमुष्णकाले तापादिपीडितश्चिंतयितुं लग्नः, चारित्रं मया तु दुष्पालनीयं, अतीवदुष्करोऽयं चारित्रधर्मो, न मया पालयितुं शक्यो, न चापि गृहे गमनं युक्तं, इति विचार्य तेनैको नवीनस्त्रिदंडिकवेषो गृहीतः, यः कोऽपि धर्मं पृच्छति तस्याग्रे स साधुधर्मं प्रकाशयति, यः कोऽपि देशनाशक्त्या प्रतिबोधं प्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मोति तं भगवत्पार्श्वे प्रेषयति. इक्ष्वमनेके राजपुत्रास्तेन प्रतिबोधिताः, भगवता साई स विचरति; विहारं कुर्वन्नेकवारमयोध्यायां भगवान् समवसृतः, भरतः प्रभुवंदनार्थमागतो, देशनांते च पृछतिस्म. भगवन्नस्यां महत्यां पर्षदि कोऽपि भावी तीर्थंकरो वर्त्तते ? भगवतोक्तं तवायं पुत्रो मरीचिनामा परिव्राजकवेषधारी अस्यां चतुर्विंशतिकायां चतुर्विंशतितमो वर्द्धमाननामा तीर्थंकरो भावी; महाविदेहे मूकायां स प्रियमित्रनामा सार्वभौमो भविष्यति, भरते च प्रथमोऽयं त्रिपृष्टनामा वासुदेवः, इति पदत्रयं भुक्त्वा स चरमजिनो भविष्यतीति श्रुत्वा भरतस्त्रिःप्रदक्षिणीकृत्य मरीचिं नत्वा कथयतिस्म.

भो मरीचे संसारे यावान् लाभस्तावांस्त्वयैव लब्धो, यतस्त्वं तीर्थंकरो भावी १ चक्रवर्त्ती २ वासुदेवश्च ३ अहं त्वदीयं परिव्राजवेषं नानुमोदयामि, परं त्वमंतिमजिनो भविष्यसि, तेन त्वां वंदामीत्युक्त्वा भरते गते मरीचिस्त्रिपदीमास्फाल्य नृत्यन् वदतिस्म, यतोऽहं पदत्रयमवाप्स्यामि, ततो मम कुलमुत्तममिति पुनः पुनः कुलमदकरणेन तेन नीचैर्गोत्रं बद्धं. पश्चात्प्रथमप्रभौ मोक्षं गते साधुभिः साई विहरतस्तस्य तनौ मांद्यं समुत्पन्नं, असंयत- ॥ २५३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वान्न कोऽपि तस्य सेवां करोति. तदा स चिंतयतिस्म यदा सज्ञो भवामि तदैकं क्षुल्लकं करोमि, क्रमेण तस्य स्वास्थ्यं जातं. एकदा कपिलनामा राजपुत्रो मरीचेर्देशनां श्रुत्वा प्रतिबुद्धः, तदा मरीचिनोक्तं भो कपिल त्वं साधुसमीपे चारित्रं गृहाण? तेनोक्तमहं भवतां शिष्यो भविष्यामि. मरीचिना सर्वमपि स्वस्वरूपं दर्शितं, यन्मयि चारित्रं नास्ति. तथापि कपिलो नानुमन्यते; कथयतिस्म किं भवदर्शनमध्ये सर्वथा धर्मो नास्त्येव? मरीचिना ज्ञातं मम योग्योऽयं मिलितः, इति ज्ञात्वा मरीचिरुवाच 'कपिला इहंपि इदंयंपि' भो कपिल तत्र महान् धर्मोऽस्ति, मम पार्श्वे तु स्तोकोऽस्ति; एतदुत्सूत्रवचनेन तेनैककोटाकोटीप्रमाणा संसारवृद्धिः कृता, तदनालोच्य चतुरशीतिलक्षपूर्वायुः परिपाल्य स चतुर्थे भवे पंचमस्वर्गे दशसागरोपमायुः सुरो जातः ॥ ४ ॥

ततश्च्युत्वा पंचमे भवे कोल्लागसन्निवेशेऽशीतिलक्षपूर्वायुर्ब्राह्मणो जातः, तत्र त्रिदंडिको भूत्वा बहुकालं भवे भ्रांतः, पश्चात् षष्टे भवे स्थूणानगर्यां द्वासप्ततिलक्षपूर्वायुः पुष्पनामा ब्राह्मणस्त्रिदंडिको भूत्वा सप्तमे भवे प्रथमस्वर्गे मध्यमस्थितिर्देवो जातः ॥ ७ ॥ तत- ॥२५४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च्युत्वाऽष्टमे भवे चैत्यसन्निवेशग्रामे षष्टिलक्षपूर्वायुरग्नियोतनामा द्विजः, प्रांते त्रिदंडित्वेन मृतो नवमे भवे द्वितीयस्वर्गे मध्यमस्थितिर्देवो जातः ॥ ९ ॥ ततश्च्युत्वा दशमे भवे मंदिरसन्निवेशे षष्टिलक्षपूर्वायुरग्निभूतिनामा द्विजः, प्रांते त्रिदंडिको भूत्वा मृतः, एकादशे भवे तृतीयस्वर्गे मध्यमस्थितिकत्वेनोत्पन्नः ॥ ११ ॥ ततश्च्युत्वा द्वादशे भवे श्वेतांब्यां चतुरशीतिलक्षपूर्वायुर्भारद्विजनामा विप्रः, प्रांते त्रिदंडिकत्वेन मृत्वा त्रयोदशे भवे चतुर्थदेवलोके मध्यमस्थितिकोऽमरः समुत्पन्नः ॥ १३ ॥ पश्चाद्बहुकालं भवे भ्रांत्वा चतुर्दशे भवे राजगृहपुरे चतुस्त्रिंशल्लक्षपूर्वायुः स्थावरनामा विप्रः, प्रांते त्रिदंडिको भूत्वा मृतः पंचदशे भवे पंचमस्वर्गे मध्यमस्थितिकत्वेनोत्पन्नः ॥ १५ ॥

ततश्च्युत्वा षोडशे भवे कोटिवर्षायुर्विश्वभूतिनामा युवराजपुत्रो जातः, तत्र वैराग्यपरायणेन संभूतिसाधुपार्श्वे चारित्रं गृहीत्वा दुस्तपं तपस्तप्तं. एकदा मासक्षपणपारणके मथुरायां स गोचर्यां गतो दुर्बलत्वेन गोराघातेन भूमौ पतितः, तं दृष्ट्वा वैशाखनंदिनामा पितृव्यपुत्रो हसतिस्म. स दिवसः क्व गतो? यस्मिन् दिने त्वं मुष्टया कोष्टकफलभंजनमकरोत्,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वं हास्यं कृतं, समुत्पन्नक्रोधः समुत्थाय तां सौरभीं शृंगयोर्गृहीत्वाऽऽकाशे भ्रामयित्वा निदानं कृतवान्. यद्येतस्य तपसः फलं भवेत्तदाहं बहुबलवान् भूयासमिति सहस्रवर्षाणि तपस्तप्त्वा प्रांतेऽनालोचितपापकर्मा मृत्वा सप्तदशे भवे सप्तमस्वर्गे उत्कृष्टस्थितिर्देवो जातः ॥ ॥ १७ ॥ ततश्च्युत्वाऽष्टादशे भवे पोतनपुरे प्रजापतिनाम्नो नृपस्य गृहे स्वयंपरिणीतस्वपुत्रीमृगावतीराज्ञीकुक्षौ सप्तस्वप्नसूचितस्त्रिपृष्टनामा वासुदेवो जातः, भरतार्द्धं साधयित्वा बहुपापं कृत्वा चतुरशीतिलक्षसर्वायुः परिपाल्यैकोनविंशे भवे सप्तमनरकावनिं गतः ॥ १९ ॥ ततश्च विंशतितमे भवे स सिंहत्वेनोत्पन्नः ॥ २० ॥ एकविंशतितमे भवे महाविदेहे मूकायां राजधान्यां धनंजयराज्ञो गृहे धारिणीकुक्षौ चतुर्दशस्वप्नसूचितः प्रियमित्रनामा चक्रवर्त्ती जातः, पोट्टिलाचार्यपार्श्वे दीक्षां गृहीत्वा कोटिवर्षं यावच्चारित्रं परिपाल्य, सर्वं चतुरशीतिलक्षपूर्वायुर्भुक्त्वा चतुर्विंशतितमे भवे सप्तमे स्वर्गे देवो जातः.

ततश्च्युत्वा पंचविंशतितमे भवे भद्रिकायां पुर्यां जितशत्रुनृपगृहे भद्राकुक्षौ पंचविंशतिलक्षपूर्वायुर्नंदनामा पुत्रो जातः, पोट्टिलाचार्यपार्श्वे दीक्षां गृहीत्वा यावज्जीवं मासक्षपणै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विंशतिस्थानकतपः समाराध्य तीर्थंकरनामकर्मोपार्जितवान्. लक्षवर्षाणि यावच्चारित्रं पाल-यित्वा प्रांते चैकमासिक्या संलेखनया षड्विंशतितमे भवे दशमस्वर्गे पुष्पोत्तरावतंसविमाने विंशतिसागरोपमायुः सुरो जातः. ततश्च्युत्वा सप्तविंशतितमे भवे स चतुर्विंशतितमो जि-नः संजातः. इत्थं मरीचिभवे भूत्सूत्राऽसत्यभाषणतस्तेन कोटाकोटीप्रमाणः संसारो वर्द्धितः, एवमन्येऽपि जीवा भूत्सूत्रभाषणतः संसारं वर्द्धयंतीत्युपदेशः । इत्येकत्रिंशत्तमः संबंधः ॥३१॥

॥ मूलम् ॥—कारुन्नरुण्णसिंगार–भावभयजीविअंतकरणेहिं ॥ साहू अवि अ मरंति । न य निअनियमं विराहंति ॥ ७ ॥ व्याख्या—' कारुन्न इति ' कारुण्यं करुणाभावः, रुन्न-शब्देन रोदनं, शृंगारभावो हावादिविलासः, भयो राजादीनां, जीवितांतकरणैरनुकूलप्रतिकू-लोपसर्गकरणैः साधवोऽपि च म्रियंते, कदाचिज्जीवितं त्यजंति, परं निजनियमं स्वकीयव्रतं न च नैव विराधयंति; पूर्वोक्तैः कारुण्यादिभिर्व्रतं न विराधयंतीत्यर्थः ॥ ७ ॥

॥ मूलम् ॥—अप्पा हियमायरंतो । अणुमोअंतो अ सुग्गइं लहइ ॥ रहकारदाणं अ-णुमो–यंतो मिगो जह बलदेवो ॥ ८ ॥ व्याख्या—' अप्पा इति ' आत्मनो हितं तपःसंय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मादि समाचरन् सद्गतिं लभते, च पुनर्दानादिधर्ममनुमोदयन्नपि 'सुग्गइं लहइत्ति' सद्गतिं लभते; रथकारो मुनिदानदाता, अनुमोदकः साधुदानानुमोदनाकारको मृगो हरिणश्च पुनर्यथा बलदेवस्तपोकारको बलदेवनामा मुनिः, एते त्रयोऽपि पंचमे स्वर्गे गताः, धर्मः कृतः कारितोऽनुमोदितोऽपि च फलदायको भवतीत्यर्थः ॥ ८ ॥ अत्र कथा—यदा कृतद्वारिकादाहनिदानेन द्वैपायनेनाऽग्निकुमारेण भूत्वा द्वारिकादाहः कृतस्तदा नगराद् द्वावेव कृष्णबलभद्रौ निर्गतौ, अन्ये सर्वेऽपि ज्वलिताः, द्वौ बांधवौ वनांतर्गतौ, कृष्णस्य पिपासा लग्ना, बलभद्रो जलानयनार्थं गतः, तत्र वैरिभिः सार्द्धं युद्धं क्रियमाणे रात्रिः पतिता, श्रीकृष्णो वृक्षाधश्चरणोपरि चरणं स्थापयित्वा यत्र सुप्तोऽस्ति, तदवसरे तत्र श्रीनेमिमुखविज्ञातस्वहस्तकृष्णमरणहेतुकगृहीतवनवासो जराराज्ञीतनुजो जराकुमारस्तत्रागतः, तेन भ्रमता रात्रौ श्रीकृष्णचरणपद्मं दृष्टं, ज्ञातं ज्वलदिदं मृगचक्षुर्विलोक्यते, कर्णांतं यावदाकृष्टेन बाणेन चरणो विद्धः, पार्श्वे समागत्य निजबांधवं ज्ञात्वा पश्चात्तापं कुर्वन् जराकुमारो विलपतिस्म. कृष्णेनोक्तं भो पापिन् इतः शीघ्रतरं गच्छ ! अधुना बलभद्रः समागमिष्यति, त्वां च मारयिष्य- ॥२५८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति; एवमुक्ते गतो जराकुमारः, पश्चादायुःप्रांते कृष्णस्य क्रोधः समुत्पन्नः, मनसि च चिंतितवान्. अहो! विलोकयत? अहं षष्ट्यधिकशततत्रयसंग्रामकारको महाबलवानेतादृशमपि मां जरासूनुर्बाणेन हत्वा कुशलेन गतः, एवं दुर्ध्यानवशतो मृत्वा स तृतीयं नरकं गतः।

तदवसरे जलं गृहीत्वा रामोऽपि तत्रागतः, पीतांबरं प्राह भ्रो बंधो मया त्वदर्थं शीतलं जलमानीतं, स्नात्वा तज्जलं पिबेत्युक्तोऽपि स न जल्पति. रामेण चिंतितं जलानयनार्थं गतस्य मे बहुवेला लग्ना, अतोऽयं मम बांधवः क्रुद्धो विलोक्यते, अतः सम्यगेनं क्षामयामीति संचिंत्य स तच्चरणयोर्निपत्य विज्ञपयतिस्म. भ्रो बंधो कोऽयं क्रोधावसरः? अस्यां महाटव्यामावामेकाकिनौ तिष्ठावः, त्वं समुत्तिष्ठेति पुनः पुनरुक्तेऽपि यदा स न जल्पति, तदा मोहवशतो मृतमप्यमृतं तं ज्ञात्वा स्वस्कंधे समारोप्य चलितः, यतः संसारे वस्तुत्रयमधिकं वर्त्तते. यदुक्तं—तीर्थंकराणां शाम्यत्वं। सपत्नीवैरमेव च॥ वासुदेवबलस्नेहः। सर्वेभ्योऽप्यधिकं मतं॥ १॥ एवं मृतं स्वबांधवं स्कंधे धारयन् तत्सेवां कुर्वन्नेकदा सिद्धार्थनाम्ना देवेनागत्य यंत्रमध्ये वालुकापीडननिदर्शनेनबोधितोऽपि स न बुद्धः, प्रत्युत खड्गमुत्पाट्य म- ॥२५९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दीयं बांधवं कथं मृतं कथयसीति तं मारणार्थं धावितः, देवोऽदृश्यीभूतः, पुनरपि द्वितीयवारं पर्वतशीलायां कमलं वपंतं तं दृष्ट्वा रामेणोक्तं, भो मूर्ख! कथं शीलायां कमलोद्गमः संभवति? देवेनोक्तं यदि त्वदीयो मृतबंधुरुज्जाय त्वां भ्रातरिति कथयिष्यति तदाऽत्रापि कमलोद्गमो भविष्यति. इत्युक्तेऽपि मोहवशतो भ्रातरं मृतं न जानाति, एवं षण्मासान् यावद्भ्रांतः, पश्चाद्वरीरं विनष्टं ज्ञात्वा मुक्तं, सिद्धार्थदेवेन तद्वरीरं समुज्जीवितं. पश्चाद्बहु विलपन् बलदेवः श्रीनेमिनाथप्रेषितचारणर्षीश्वरेणागत्य बोधितो, वैराग्यपरायणेन तेन चारणमुनिसमीपे चारित्रं गृहीतं. अत्युग्रं तपः समाचरन्नेकवारं मासक्षपणपारणके स आहारार्थं समागच्छन्नेकया कूपकंठस्थितया वामभ्रुवा दृष्टः, तद्रूपमोहितया तया घटभ्रांत्या पुत्रकंठे पाशो निहितः, तद् दृष्ट्वा बलसाधुनोक्तं भो मुग्धे किमाचरसि? मोहपरवशा पुत्रं मारयसि, साधुना चिंतितं धिग्मदीयं रूपं! अतः परं मम नगरागमनं न श्रेयः, वनवास एव वरं ।

॥२६०॥

इत्यभिग्रहं गृहीत्वा स तुंगिकागिरौ स्थितः, यदा पारणके कोऽपि सार्थः काष्ठार्थी वा तत्रागच्छति, स च शुद्धान्नमर्पयति चेत्तदा स आहारं करोति; नो चेत्तपोवृद्धिः, इत्थं तपस्यत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तस्याऽनेका लब्धयः समुत्पन्नाः, देशनया चाऽनेकान् व्याघ्रसिंहादीन् स बोधयतिस्म. सिद्धार्थदेवोऽपि तत्सेवायां तिष्ठति; तत्रैको मृगोऽतीवभद्रको तद्देशनया प्रतिबुद्धः साधुसेवामहर्निशं करोति; वने च भ्रमति. यत्र कुत्रापि चाहारयोगं जानाति, तच्छुद्धिं संज्ञया साधवे निवेदयति. साधुरपि तं पुरतः कृत्वा तत्र गच्छति. एवमेकदा कोऽपि रथकारो वनमागतो महतीमर्द्धछिन्नां वृक्षशाखां मुक्त्वा रसवतीं निष्पादितवान्. मृगोऽप्यग्रतः स्थितः सन् शुभभावनां भावयन्नस्ति. तदवसरेऽर्द्धछिन्ना तरुशाखा त्रुटित्वा त्रयाणामुपरि समकालं पतिता. कालं कृत्वा ते पंचमे स्वर्गे देवत्वेनोत्पन्नाः, तपःकारकस्तु बलसाधुः, साहाय्यदाता रथकारः, अनुमोदनाकारको मृगः, एतैस्त्रिभिरपि समानफलमवाप्तं. अतोऽयं धर्मः कृतोऽपि कारितोऽप्यनुमोदितोऽपि च समानफलदायको भवतीति धर्म एवोद्यमो विधेय इत्युपदेशः ॥ इति द्वात्रिंशत्तमः संबंधः ॥ ३२ ॥

॥ मूलम् ॥—जं तं कयं पुरा पू–रणेण अइदुक्करं चिरं कालं ॥ जइ तं दयावरे इह ।
करिंतु तो सफलियं इंतं ॥ ए ॥ व्याख्या—' जं तं कयं इति ' पुरा पूर्वं यत्तपः पूरणेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूरणनाम्ना तापसेन कृतं, अतिदुष्करमतिकर्कशं चिरं कालं बहुकालं यावत्, यदि तत्तपा दयापरो दयायुक्तः सन् इहास्मिन् संसारेऽकरिष्यत् 'तो इति' तर्हि सफलमभविष्यत्; इदं तु तपो बहुतरमपि अज्ञानदोषेण तुच्छफलप्राप्त्या निष्फलमेव जातमित्यर्थः ॥९॥ अत्रकथा—

विंध्याचलपार्श्वे पेढालनाम्नि ग्रामे पूरणनामा श्रेष्ठी परिवसति, स एकदा वैराग्यमापन्नः स्वपुत्रं स्वपदे संस्थाप्य तामलिवत्तापसीं दीक्षां जग्राह. षष्ठषष्ठपारणकं करोति. पारणके चतुःकोणं पात्रमादाय परिमितगृहेषु भिक्षार्थं भ्रमति. यदि प्रथमखंडेऽन्नादि पतति तदा स पक्षिभ्यो ददाति; द्वितीयखंडे पतितं मत्स्यादिभ्यः समर्पयति, तृतीयखंडे पतितं स्थलचरेभ्यः, चतुर्थखंडे पतितं च स्वात्मना भुंक्ते. इत्थमत्युग्रं द्वादशवर्षाणि यावदज्ञानतपो विधायैकमासिक्या संलेखनया कालं कृत्वा स चमरचंचायां राजधान्यां चमरेंद्रो जातः, यद्येतत्तपःकष्टं स दयासहितमकरिष्यत्तदा बहुफलमभविष्यदित्यतो ज्ञानयुक्तमेव तपो विधेयमित्युपदेशः इति त्रयस्त्रिंशत्तमः संबंधः ॥ ३३ ॥

॥ मूलम् ॥—कारणनीआवासे । सुहुअरं नक्कमेण जइअव्वं ॥ जह ते संगमथेरा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सपाडिहेरा तया आसि ॥ १० ॥ व्याख्या—' कारण इति ' कारणेन रोगवार्द्धक्यादिना एकस्थानस्थायिनमपि सुष्ठुतरमतिशयेन गाढमुद्यमेन सर्वायासेन ' जइअवंति ' चारित्रविषये यतनीयं; यथा ते चारित्रविषये यतनावंत एकस्थानवासिनः संगमस्थविरनामान आचार्याः, ' तया इति ' तदा ' सपाडिहेरा इति ' देवसान्निध्यान्माहात्म्यवंत आसन् ॥ १० ॥

॥ मूलम् ॥—एगंतनीआवासी । घरसरणाइसु जइ ममत्तंपि ॥ कह न पमिहंति कलि–कलुसरोसदोसाण आवाए ॥ ११ ॥ व्याख्या—' एगंत इति ' रोगादिकारणं विनैकांतेन नित्याऽवासी नित्यमेकांतस्थानवासी ' घरसरणाइसुत्ति ' गृहसज्जीकरणादिषु यदि ममत्वमपि वहति धारयति, तर्हि स कथं न पतिष्यति? कुत्र? कलिः कलहः, कलुषो मलिनाचरणं, रोषः क्रोधः, एतेषां दोषाः, तेषामापदि स पुमान् कथं न पतिष्यतीति संबंधः ॥११॥

॥ मूलम् ॥—अविकत्तिऊण जीवे । कत्तो घरसरणगुत्तिसंठप्पं ॥ अविकत्तियाय तं तह । पमिआ असंजयाण पहे ॥ १२ ॥ व्याख्या—' अविकत्तिऊण इति ' अहत्वा जीवान् प्राणिनः ' कत्तो इति ' कुतः ' घरसरणत्ति ' गृहसंमार्जनं ' गुत्तिसंठप्पंति ' गृहस्य परितो र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षाकरणं, ' अविकत्तिया इति ' जीवघातकाः ' तं तहत्ति ' तथाप्रकाराः, एतादृशा वेषधारका असंयतानां पथि मार्गे निश्चयेन पतिता ज्ञेयाः ॥ १२ ॥

॥ मूलम् ॥—थोवोवि गिहिपसंगो । जइणो सुद्धस्स पंकमावहइ ॥ जह सोवरदत्तरिसी । हसिउ पज्जोअनरवइणा ॥ १३ ॥ व्याख्या—' थोवोवीति ' स्तोकोऽपि गृहिप्रसंगः शुद्धस्य यतेर्निर्मलचारित्रवतः पापरूपं पंकं कर्दममावहति, यथा स वरदत्तनामा ऋषिर्मुनिः प्रद्योतनरपतिना चंडप्रद्योतनरपतिना चंडप्रद्योतनाम्ना नृपेण हसितः, भो नैमित्तिक त्वां वंदामीति हास्यं कृतं ॥ १३ ॥ अत्र कथा—

चंपायां मित्रप्रभो नामा राजा, तद्गृहे धर्मघोषनामा मंत्री, तत्रैको धनमित्रनामा श्रेष्टी, अतीवराजनान्यः, तद्गृहे धनश्रीनाम्नी भार्या, तयोः सुजातकुमारनामाऽत्यंतरूपलावण्यादिगुणोपेतो यशस्वी स्त्रीवल्लभः पुत्रोऽस्ति. सोऽन्यदा धर्मघोषमंत्रीश्वरस्यांतःपुरपार्श्वे गच्छन् प्रियंगुमंजरीनाम्न्या मंत्रिस्त्रिया दृष्टः, तद्रूपलावण्यादिमोहिताः सर्वा अपि मंत्रिस्त्रियः परस्परमित्थं कथयंतिस्म. भो सख्योऽस्माकमयं पुरुषो वल्लभो लगति, परं सा धन्या यस्या अयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नोक्ता न्नविष्यति.

इत्तं विचिंत्यैकदा प्रियंगुमंजरी प्रत्तन्नं सुजातकुमारवेषं परिधाय सपत्नीन्निः सार्द्धं पुरुषवत्क्रीडां करोति, परस्परं रमते, तत्सर्वं मंत्रिणा दृष्टं, मनसि द्वेषो जातः, चिंतयतिस्म, अहो सर्वा अपि मदीयाः स्त्रियः सुजातकुमारेण सार्द्धं विलसंति; सुजातोपरि द्वेषमाधाय स्थितः, सर्वा अपि स्त्रियस्त्यक्ताः, एकदा कूटपत्रं लिखित्वा तेन राज्ञो हस्ते समर्पितं, एतादृशः कूटलेखकोऽयं सुजातकुमारो मारणीय इति. तत् श्रुत्वा राज्ञा चिंतितं यदि सहसा मारयिष्यामि तदा मदीयाऽपकीर्त्तिर्न्नविष्यतीति ज्ञात्वा कूटपत्रं लिखित्वा चंड्ध्वजनृपपार्श्वे तेन सुजातकुमारः प्रेषितः, मध्ये लिखितमस्ति यदयं सुजातकुमारो मारणीय इति. तदा चंड्ध्वजेन चिंतितं कथमेषः पुरुषरत्नं निहन्यते? पश्चाच्चरप्रेषणेन तेन सर्वापि प्रवृत्तिर्ज्ञाता. पुत्रोऽसौ प्रत्तन्नवृत्त्या रक्षितः, स्वकीया चंड्यशानाम्नी न्नगिनी सुजातकुमाराय समर्पिता, स्वमंदिरे च स्थापितः, पश्चाच्चंड्यशासंयोगेन सुजातकुमारस्य तनौ रोगः समुत्पन्नः, तया चिंतितं धिगस्तु मां, यन्मत्संयोगेनायं पुरुषो रोगी जातः, तदा सुजातकुमारेणोक्तं न्नो सुलो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चने नायं कोऽपि तवापराधः, ममैवायमप्यशुभकर्मणां दोषः, इत्यादिवचनैः प्रतिबुद्धा वैराग्यमापन्नाऽनशनविधानेन सा समाधिना मृत्वा देवत्वेनोत्पन्ना, पूर्वभवं चावधिना ज्ञात्वा तत्रागता सुजातकुमारायैवं वदतिस्म, स्वामिंस्त्वत्प्रसादेन चंद्रयशाजीवोऽहं देवो जातोऽस्मि; ततो यदाज्ञा तत्करोमि.

सुजातकुमारेणोक्तं मां मातृपितृसमीपे मोचय? कलंकं चोत्तारय? यथाहं दीक्षां गृह्णामि. देवेनापि तथैव कृतं, स चंपानगर्या उद्याने मुक्तः, ततो नगरप्रमाणां शिलां विकुर्व्य चंद्रप्रभो राजा भाषितः, भो नराधम कथं सुजातकुमारोपरि विरुद्धं कृतं? राजापि भीतः सन् तच्चरणयोर्निपत्य सर्वमपि यथास्थितं प्रोवाच; सुजातकुमारचरणौ च शरणीकृत्य पुनः पुनः स क्षामितवान्. देवेनापि शिला संहृता, पश्चात्तेन हस्तिनः स्कंधे समारोप्य समहोत्सवं सुजातकुमारो नगरमानीतः, पश्चात्पित्रा सार्द्धं दीक्षां गृहीत्वा केवलं प्राप्य स मोक्षं गतः, धर्मघोषमंत्रीश्वरोऽपि राज्ञा देशाद्बहिर्निष्कासितः, पुत्रैः स्त्रीभिश्च धिक्कृतो भ्रमन् स राजगृहमागतः, स्थविरांतिके वैराग्यपरायणेन तेन चारित्रं गृहीतं; गीतार्थो जातः, विहारं कुर्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न् वरदत्तनाम्नि नगरे वरदत्तमंत्रिणो गृहे भिक्षार्थमागतः, तदा वरदत्तमंत्री पायसभोजनं लात्वा सन्मुखमागतः, कथितं च स्वामिन् गृहाणेदं शुद्धमन्नं ? तन्मध्यादेको बिंदुरधः पतितः, तं दृष्ट्वा धर्मघोषनामा मुनिः पश्चाद्वलित्वा गतः ।

वरदत्तमंत्रिणा चिंतितमाहारार्थमागतोऽप्ययं शुद्धाहारं कथं न गृहीतवान् ? इति यावत्स चिंतयति तावदधःपतितपायसबिंदोरुपरि मक्षिका समागता, तां दृष्ट्वा गृहगोधिका समागता, तदुपरि कृकलाकः समागतः, तद्वधाय मार्जारी धावतिस्म, तद्वधाय गृहकुर्कुरः समागतः, गृहकुर्कुरवधार्थं रथ्याः कुर्कुरो धावितः, रथ्याकुर्कुरो ग्रहसेवकैर्निहतः, तदा रथ्यालोकैर्गृहकुर्कुरो हतः, परस्परं गृहसेवकानां रथ्यालोकानां च चकारमकारादिवचनानि जल्पतां कलहः समजायत, क्रोधवृद्धौ शराशरिखड्गाखड्गियुद्धे जायमाने वरदत्तमंत्रिणा चिंतितं, अहो धन्योऽयं साधुर्येनैतावंतं भाविनमुपद्रवं ज्ञात्वा दीयमानमपि शुद्धान्नं न गृहीतं; धन्योऽयं जैनधर्मः, स चायं जंगमतीर्थरूपः साधुर्मम कथं मिलिष्यतीति चिंतयतस्तस्य जातिस्मरणमुत्पन्नं, सर्वमपि प्राचीनदीक्षासूत्रं स्मृतिमापन्नं, गृहीतचारित्रो देवतादत्तवेषो वर- ॥२६७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्तनामाऽयं स्वयंबुद्धो मुनिर्विहरन् सुसुमारपुरे नागप्रासादे कायोत्सर्गमुद्रया स्थितः, एतस्मिन्नवसरे धुंधुमारनृपपुत्री अंगारवतीनाम्नी अत्यंतरूपवती वर्त्तते. एकदा तया कयाचिद्योगिन्या साऽहं राजपुत्र्या विवादः कृतः, योगिनी च निरुत्तरीकृता; योगिन्याः क्रोधः समुत्पन्नः, अंगारवत्या रूपं चित्रपट्टे समालिख्योज्जयिन्यां चंडप्रद्योतस्य दर्शयामास. तद्रूपमोहितेन योगिनीमुखादंगारवतीं रूपवतीं ज्ञात्वा धुंधुमारनृपोपरि दूतप्रेषणेनांगारवती याचिता. धुंधुमारेणोक्तं स्वपुत्री तु मनःप्रसत्त्या समर्प्यते, न तु बलात्कारेण गृहीतुं शक्यते. इति दूतमुखात् श्रुत्वा समुत्पन्नक्रोधश्चंडप्रद्योतनामा नृपो महता दलेनागत्य सुसुमारपुरं वेष्टयामास. अल्पसैन्यो धुंधुमारनृपो नगरमध्ये एव स्थितो, न तु बहिर्निर्गतः, एवं बहुदिनेषु गतेषु धुंधुमारेण कश्चिन्नैमित्तिकः पृष्टो मम जयः पराजयो वा भावी? नैमित्तिकेनोक्तं निमित्तमवलोक्य कथयिष्यामि.

॥२६८॥

पश्चान्नैमित्तिकश्चतुःपथमागत्य बहून्नरकान् भाषयामास, ते भीता नागप्रासादमध्यस्थितवरदत्तमुनिसमीपे गताः, भयाकुलांस्त्रस्तांस्तान् दृष्ट्वा वरदत्तेनोक्तं यूयं मा बिभीत मा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बिभीत? भवतां भयं नास्तीति ऋषिवाक्यं श्रुत्वा नैमित्तिकेनागत्य राज्ञे कथितं, राजन् भवतां सर्वथा भयं नास्ति, जयो भविष्यति, तत् श्रुत्वा हृष्टो नृपो नगराद्बहिर्निर्गत्य युद्धे चंडप्रद्योतं निर्जित्य जीवंतं गृहीत्वा नगरमागतः, धुंधुमारेणोक्तं तव कीदृशं दंडं ददामि? चंडप्रद्योतेनोक्तं अहं तव गृहे प्राघूर्णकः समागतोऽस्मि, ततः प्राघूर्णकोचितं दंडं देहीति कोमलं विनयवाक्यं श्रुत्वा धुंधुमारेण चिंतितं, यतः—गुरुरग्निर्द्विजातीनां । वर्णानां ब्राह्मणो गुरुः ॥ पतिरेव गुरुः स्त्रीणां । सर्वस्याऽभ्यागतो गुरुः ॥ १ ॥ इत्युक्तत्वात्सर्वथायं पूज्य एव. अथ च प्रार्थनाभंगोऽपि महतां न श्रेयसे. यदुक्तं—याचमानजनमानसवृत्तेः । पूरणाय बत जन्म न यस्य ॥ तेन भूमिरतिभारवतीयं । न द्रुमैर्न गिरिभिर्न समुद्रैः ॥ १ ॥ एवं विचार्य तेन स्वपुत्री परिणायिता; कथितं च मदीयेयं पुत्री विशेषेण माननीया; तेनापि सा पट्टराज्ञी कृता; एकवारमेकांते चंडप्रद्योतेन राज्ञ्यै पृष्टं स्वल्पसैन्योऽपि त्वदीयः पिता मां कथमजयदिति. अंगारवत्या कथितं स्वामिन् नागप्रासादस्थितैकमुनिप्रोक्तनिमित्तबलेन मम पितुर्जयो जातः, तत् श्रुत्वा तत्र चंडप्रद्योतेनागत्य, भो नैमित्तिकमुने त्वामहं वंदामीति हास्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतं. वरदत्तमुनिना चिंतितं क्व मया निमित्तं प्रकाशितं? एवं विचारयता तेन ज्ञातं, सत्यं त्रस्तानामत्रागतानां बालानां मा विघ्नीत? भवतां भयं नास्तीति कथनतो मम निमित्तदोषो लग्नः, पश्चात्तदालोच्य चारित्राराधनेन स सद्गतिं प्राप. एवं शुद्धचारित्रिणा स्तोकोऽपि गृहिप्रसंगो न विधेय इत्युपदेशः ॥ इति चतुस्त्रिंशत्तमो वरदत्तसंबंधः ॥ ३४ ॥

॥ मूलम् ॥—सप्पावो वीसंभो । नेहो रइवइयरो जुवइजणे ॥ सयणघरसंपसारो । तवसीलवयाइं फेमिज्जा ॥ १४ ॥ व्याख्या—' सप्पावो इति ' सद्भावः स्त्रीणामग्रे हृदयवार्त्तायाः प्रकाशनं, विश्रंभः स्त्रीणां विश्वासः, स्त्रीभिः सार्द्धं स्नेहकरणं, रतिव्यतिकरः कामकथाकथनं स्त्रीजनैः सार्द्धं, स्वजनाः संबंधिनो, गृहं स्वकीयं मंदिरं, तेषां संप्रसारः पुनःपुनरालोचनं. एते सर्वेऽपि पदार्थास्तपः षष्टाष्टमादि, शीलं सदाचारः, व्रतानि मूलगुणाः, एतानि स्फेटयंति नाशयंति ॥ १४ ॥

॥ मूलम् ॥—जोइसनिमित्तअक्खर—कोउयआएसभूइकम्मेहिं ॥ करणाणुमोयणेहिं य । साहुस्स तवक्खउ होइ ॥ १५ ॥ व्याख्या—' जोइसेति ' ज्योतिःशास्त्रकथनं, निमित्तं हो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रादिनिमित्तकथनं, कौतुकं समश्यादिकथनं, आदेश इदमित्थमेव भविष्यतीति कथनं, भूति-कर्मशब्देन मंत्रितरक्षादिदानं, एतैः पदार्थैः कृत्वा, अथवा एतेषां पदानामिति विभक्तिव्यत्ययो वा, स्वयं करणेन परतः कारणेन च, पुनरेतदाचरतामनुमोदनेन साधुर्मुनिस्तस्य तपःक्षयो भवति, एतान् साधवो नाचरंतीत्यर्थः ॥ १५ ॥

॥ मूलम् ॥—जह जह कीरइ संगो । तह तह पसरो खणे खणे होइ ॥ थोवोवि हो इ बहुओ । न य लहइ धिइं निरुंभंतो ॥ १६ ॥ व्याख्या—' जह जह इति ' यथा यथा गृहस्थादीनां संगः संबंधः क्रियते, तथा तथा क्षणे क्षणे ' पसरो इति ' वर्द्धमानो भवति, स्तोकोऽपि संबंधः प्रचुरो भवति. न च लभते प्राप्नोति धृतिं संतोषं, ' निरुंभंतोत्ति ' गुरुवचनैर्निरुध्यमानोऽपि. ॥ १६ ॥

॥ मूलम् ॥—जो चयइ उत्तरगुणे । मूलगुणेवि अचिरेण सो चयइ ॥ जह जह कुणइ पमायं । पिल्लिज्जइ तह कसाएहिं ॥ १७ ॥ व्याख्या—' जो चयइ इति ' य उत्तरगुणानाहारशुद्धिप्रमुखांस्त्यजति स पुमानचिरेण स्तोककालेन मूलगुणानपि प्राणातिपातविरम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णादीनपि त्यजति. उत्तरगुणनाशे सति मूलगुणनाशोऽपि भवत्येवेत्यर्थः, यथायथायं जीवः प्रमादशैथिल्यं करोति, तथातथायं जीवः कषायैः क्रोधादिकैः ' पिल्लिज्जइति ' प्रेर्यते ॥१७॥

॥ मूलम् ॥—जो निच्चएण गिण्हइ । देहच्चाएवि न य धिइं मुयइ ॥ सो साहेइ सकज्जं । जह चंदवर्मसिव राया ॥ १८ ॥ व्याख्या—' जो निच्चएण इति ' यो निश्चयेन स्थैर्येण गृह्णाति स्वकीयव्रतानि पालयति, देहत्यागेऽपि प्राणांतकष्टे जायमानेऽपि धृतिं संतोषं न मुंचति न त्यजति, गृहीतमभिग्रहं यो न त्यजति, स पुमान् स्वकार्यं मुक्तिसाधनरूपं साधयति, यथेति दृष्टांतोपन्यासे, चंद्रावतंसको राजा, यथा चंद्रावतंसकेन गृहीतोऽभिग्रहो न मुक्तस्तथाऽन्येनापि प्रवर्त्तनीयं. ॥१८॥ अत्र कथा—साकेतपुरे चंद्रावतंसको नाम राजा, सुदर्शना राज्ञी, स राजाऽतीवश्रावकोऽस्ति. सम्यक्त्वमूलानि श्राद्धव्रतानि सम्यक् पालयन् राज्यं करोति. एकवारं सन्ध्याविसर्जनं विधायांतःपुरमध्ये गत्वा सामायिकं च गृहीत्वा स कायोत्सर्गमुद्रया मनस्येवमवधार्य स्थितोऽस्ति, यावदयं दीपो ज्वलिष्यति तावन्मया प्रतिमयाऽत्र स्थेयं. इति प्रथमप्रहरो गतः, दीपं विध्यायं दृष्ट्वा नृपाभिग्रहमजानत्या दास्या तत्र तैल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मापूरितं, द्वितीयप्रहरो गतः, एवं प्रहरचतुष्टयं यावत्तैलपूरणेनाऽखंडदीपे ज्वलितेऽखंडिताग्निग्रहो नृपः प्रातः प्रदीपे निर्वाते कायोत्सर्गं पारयित्वा स्थितः, तावदत्यंतं सुकुमालतया चतुःप्रहरमेकत्रावस्थानतो महतीं वेदनामनुभूय विशुद्ध्यानतः कालं कृत्वा देवत्वेनोत्पन्नः, एवमन्येनापि दृढता विधेयेत्युपदेशः ॥ एवं पंचत्रिंशत्तमः संबंधः ॥ ३५ ॥

॥ मूलम् ॥—धम्ममिणं जाणंता । गिहिणोवि दढव्वया किमुय साहू ॥ कमलामेलाहरणे । सागरचंदेण इत्थुवमा ॥ २० ॥ व्याख्या—' धम्ममिणं इति ' इमं जिनभाषितं धर्मं जानंतः सम्यगवबुध्यंतः, एतादृशाः ' गिहिणोवि इति ' श्रावका अपि श्राद्धा अपि दृढा व्रतधारणे दृढा वर्त्तंते, तर्हि साधवः किमु ? कथं साधवो दृढव्रता न भवंतीत्यर्थः; कमलामेलोदाहरणे, कमलामेलानाम्नी कन्या, तस्याः संबंधे यः सागरचंद्रनामा कुमारः, सोऽत्रोपमा, अत्र दृष्टांतो ज्ञेयः ॥ २० ॥ अत्र सागरचंद्रोदाहरणं निदर्श्यते—

द्वारिकायां कृष्णनृपो राज्यं करोति, तद्भ्रांधवो बलभद्रनामा, तत्सुतो निषधनामा कुमारः, तदंगजातः सागरचंद्रनामा कुमारो वसति, तत्रैका धनसेनपुत्री कमलामेलानाम्नी व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्त्तते, सा उग्रसेननृपपुत्रस्य नन्नःसेननाम्नः समर्पितास्ति. एकस्मिन्नवसरे एकवारं नन्नःसेन-
गृहे नारदमुनिरागतः, नन्नःसेनेन क्रीडाव्यग्रचित्तेनाऽादरो न दत्तः, तदा समुत्पन्नक्रोधो नार-
दः समुत्पत्य सागरचंद्रगृहमागतः, तेन विनयपूर्वकं तस्मै बहु मानं दत्तं, सिंहासने च स्था-
पितः, तदीयचरणक्षालनं कृत्वा करौ मुकुलीकृत्य सहर्षमेवं स वदतिस्म. स्वामिन् कथयत?
किमाश्चर्यकारि दृष्टमनुभूतं ज्ञातं वा कौतुकं? तद्विनयरंजितमना नारदः प्रोवाच, भो कुमा-
र पृथिव्यां बहु कौतुकं विलोक्यते, परं कमलामेलारूपं महदाश्चर्यकारि दृष्टं, एतादृशं कस्या-
पि रूपं नास्ति; येन सा न दृष्टा तस्य जन्म निरर्थकं गतं, परं तन्मातृपितृभ्यां काचमण्यो-
रिवाऽयुक्तः संबंधो विहितोऽस्ति; यन्नन्नःसेनाय सा समर्पितास्ति. इत्युक्त्वा सागरचंद्रमन-
सि रागं समुत्पाद्य नारदः कमलामेलामंदिरमागतः, तयापि तस्य बह्वी प्रतिपत्तिः कृता; पृष्टं
च काचिदाश्चर्यवार्त्ता दृष्टा? नारदेनोक्तं यादृशं सागरचंद्रस्य रूपमाश्चर्यकारि वर्त्तते तादृशं
संसारे न कस्यापि पुरुषस्य वर्त्तते; तद्रूपोपमा भूमौ नास्ति. तद्रूपनन्नःसेनरूपयोर्महदंतरं.

एवमुक्त्वा नारदे गते कमलामेला सागरचंद्रोपरि रागवती जाता, नन्नःसेनविरक्तचित्ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चिंतयतिस्म, कैतादृशं मम भाग्यं? यत्तेन सह मे संबंधो भवति; तेन विना निष्फलमेव मम यौवनं वपुश्चेति चेतसि सागरचंद्रं ध्यायंती तिष्ठति. अथ नारदमुखाद्विज्ञाततदनुरागः सागरचंद्रोऽपि तामेव ध्यायन् क्षणमात्रमपि न रतिं प्राप. यथा धत्तूरकभक्षणेन जनः सर्वत्र स्वर्णं पश्यति, तथा सोऽपि मोहपारवश्येन सर्वत्र कमलामेलामेव पश्यति, तन्मयो जातः, यदुक्तं—प्रासादे सा दिशिदिशि च सा पृष्ठतः सा पुरः सा । पर्यंके सा पथि पथि च सा तद्वियोगातुरस्य ॥ हंहो चेतःप्रकृतिरपरा नारीमेकापि सा सा । सा सा सा सा जगति सकले कोऽयमद्वैतवादः ॥ १ ॥ जगत्तमोभूतं मन्यतेस्म. यतः—सति प्रदीपे सत्यग्नौ। सत्सु नानामणिषु च ॥ विनैकां मृगशावाक्षिं । तमोभूतमिदं जगत् ॥ २ ॥ भ्रांत्या सर्वत्र स कमलामेलामेव पश्यति. भ्रांतिदृष्टां तां समागत्य प्राणप्रिये? त्वदालिंगनं देहीति वदन् विविधां चेष्टां कुर्वन् स सांबकुमारेण विलोकितः, पृष्ठतः समागत्य हास्यतस्तेन तदक्षिनिमीलनं कृतं. सागरचंद्रः प्राह मया ज्ञायते त्वं कमलामेलासि, किमक्षिनिमीलनं करोषि? यदि समागत्य मदुत्संगे तिष्ठेस्तदा वरं, एतत् श्रुत्वा विहस्य सांबकुमारः प्राह, वत्स नाहं कमला-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेलाऽस्मि, अहं त्वदीयः पितृव्यः कमलामेलकोऽस्मि; चक्षुरुद्घाट्य सम्यग् विलोकय? अहो कामांधता! यदुक्तं—दिवा पश्यति नो घूकः। काको नक्तं न पश्यति॥ अपूर्वः कोऽपि कामांधो। दिवा नक्तं न पश्यति॥ १॥ एतदुक्ते सागरचंद्रेण पितृव्यो दृष्टः, तच्चरणयोर्निपतितः, स्वाऽविनयं क्षामयित्वा लज्जां त्यक्त्वा सागरचंद्रः प्राह. नो तात! कमलामेलकोऽस्मीति यदुक्तं तत्सत्यं कुरु? सत्पुरुषाश्चोक्तं पालयंति. यदुक्तं—

—जंन्नायंतेणवि सज्जणेण। जं न्नासियं मुहे वयणं॥ तन्नयणसाहणन्नं। सप्पुरिसा हुंति नज्जमिया॥ १॥ पुनः संतःपरोपकारकरणकुशला न्नवंति. यदुक्तं—मनसि वचसि काये पुण्यपीयूषपूर्णा—स्त्रिभुवनमुपकारश्रेणिन्निः प्रीणयंतः॥ परगुणपरमाणून् पर्वतीकृत्य नित्यं। निजहृदि विकसंतः संति संतः कियंतः॥ १॥ अतः कारणात्कमलामेलां मेलय? इति श्रुत्वा सांबकुमारेणापि तत्प्रतिपन्नं. पश्चात्स्वकीयविद्याबलेन तेन सुरंगां दापयित्वा कमलामेलाऽपहृता, द्वारिकोद्याने च समानीता. नारदः समाकारितः, तत्साक्षिकं च शुन्नलग्ने सागरचंद्रस्य सा परिणायिता.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रश्चात्पितृव्यां कन्याहरणं ज्ञात्वा सर्वत्राऽवलोकितं, वनमध्ये दृष्टा, कृष्णाग्रे बुंत्कारवो दत्तः, स्वामिंस्त्वयि समर्थे नाथेऽनाथस्येव ममांगजा केनापि विद्याधरेण संहृत्य वने मुक्तास्ति. तत् श्रुत्वा ससैन्यो देवकीसूनुस्तत्रागतः, तमागतं दृष्ट्वा सनारदः सांबः सन्मुखमागत्य पितुश्चरणयोः पपात, सर्वमपि स्वरूपं कथितं, स्वकीयपुत्रकृत्यं विज्ञाय कृष्णोऽपि तूष्णीं स्थितः, पश्चात्सागरचंद्रेणागत्य नग्नःसेनस्य चरणयोर्निपत्य क्षामितं. परं नग्नःसेनेन न क्षामितं. पश्चात्कमलामेलया साई सागरचंद्रो विषयानुपभुंजन् कियंतं कालमतिवाहयामास. एकदा श्रीनगवतो नेमिविनोर्देशनां श्रुत्वा स द्वादशव्रतान्यंगीचकार. प्रतिदिनं स्वव्रतानि पालयन्नेकवारं श्राद्धप्रतिमां समुद्वहन् स स्मशाने कायोत्सर्गमुद्रया स्थितः, तदवसरे नग्नःसेनोऽपि नित्यं छलमन्वेषयन् स्मशाने कायोत्सर्गस्थं सागरचंद्रं दृष्ट्वा चिंतयतिस्म, अहो समीचीनोऽयमवसरोऽद्य निहन्मि मम कमलामेलाप्रोक्तारमिति संचिंत्य स आर्द्रमृत्तिकायाः पालिं तस्य शिरसि बध्ध्वोपरि जाज्वल्यमानान् खदिरांगारान् मृत्वाऽन्यत्र गतः, पश्चात्तद्वेदनां सहमानः सागरचंद्रो निश्चलमनाः शुभध्यानतो मृत्वा स्वर्गं जगाम. एवं श्राद्धेनापि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यद्येतादृशा उपसर्गाः सोढाः, तर्हि साधुना तु विशेषेण सोढव्या इत्युपदेशः ॥ इति षट्त्रिंशत्तमः संबंधः ॥ ३६ ॥

॥ मूलम् ॥—देवेहिं कामदेवो । गिहीवि नय चालिउ तवगुणेहिं ॥ मत्तगइंदभुअंगम—रक्कसघोरट्टहासेहिं ॥ २१ ॥ व्याख्या—' देवेहिं इति ' देवैरमरैः कामदेवनामा ' गिहीवि ' गृहस्थोऽपि ' तवगुणेहिंति ' तपोगुणेभ्यो नैव चालितः, कैः कृत्वा ? मत्ता ये गजेंद्रा हस्तिनो, भुजंगमाः सर्पाः, राक्षसा दुष्टदेवास्तेषां घोरा ये अट्टहासा महाहसनानि तैः कृत्वा न चालितः ॥ २१ ॥ अत्र कामदेवदृष्टांतः—

चंपायां च महापुर्यां जितशत्रुर्नृपः, तत्रैकः कामदेवनामा गाथापतिः परिवसति, सोऽष्टादशस्वर्णकोटीस्वामी षष्टिसहस्रगवामधिपतिर्बहुधनधान्यादिऋद्धिमान्, तद्गृहे भद्रानाम्नी भार्या. सोऽन्यदा श्रीमहावीरस्य देशनां शुश्राव. भगवतापि प्रथमतः सम्यक्त्वस्वरूपं निरूपितं, तत्र सम्यक्त्वं दर्शनमोहनीयकर्मोपशमादिसमुद्भोऽईदुक्तजीवादितत्वसम्यक्श्रद्धानरूपः शुभ आत्मपरिणामः, तत्त्वत्रयाध्यवसायो वा सम्यक्त्वं, उक्तं च—अरिहं देवो गुरुणो सुसा- ॥२७८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दूणो । जणमयं महपमाणं ॥ इच्चाइसुहो भावो । सम्मत्तं बिंति जगगुरुणो ॥ १ ॥ सम्यक्त्वं चाईऽर्मस्य मूलभूतं. यतः—सर्वेषु त्रयोदशकोटिशतचतुरशीतिकोटिद्वादशलक्षसप्तविंशतिसहस्रद्व्युत्तरद्विशतसंख्येष्वपि भंगकेषु सम्यक्त्वं प्रथमो भंगः, सम्यक्त्वं विना नैकस्यापि भंगस्य संभवः, अत एवोक्तं—मूलं दारं पईट्ठाणं । आहारो भायणं निही ॥ दुवक्कस्सावि धम्मस्स । सम्मत्तं परिकित्तियं ॥ १ ॥ सम्यक्त्वफलं चैतत्—अंतोमुहुत्तमित्तंपि । फासियं जेहिं हुज्ज सम्मत्तं ॥ तेसिं अवड्ढपुग्गल–परिअट्टो चेव संसारो ॥ १ ॥ जं सक्कइ तं कीरइ । जं न सक्कइ तयंमि सद्दहणा ॥ सद्दहमाणो जीवो । वच्चइ अयरामरं ठाणं ॥ २ ॥

सम्यक्त्वमूलान्येव द्वादशव्रतानि; सम्यगाराधितानि च तानि अत्र परत्र बहुफलदायकानि भवंतीति भगवतो देशनां श्रुत्वा स परमसंवेगः सम्यक्त्वोच्चारपूर्वकं द्वादशव्रतधारको बभूव. कामदेवो जीवाऽजीवादितत्वज्ञो नित्यं सम्यक् श्राद्धधर्मं पालयन्नेकदा सौधर्मपतिना प्रशंसितो, दृढधर्मायं कामदेवो देवेनापि न चालयितुं शक्यः, अहो तदीयं धैर्यमिति कामदेवस्य बहुप्रशंसां श्रुत्वा कश्चिन्मिथ्यादृग्देवो देवैरवाणीमन्यथाकर्तुं तत्रागतः, तदवसरे कामदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वः पौषधं गृहीत्वा पौषधशालायां कायोत्सर्गमुद्रया स्थितोऽस्ति. सोऽपि देवस्तत्रागत्य मध्यरात्रावेकं भयंकरं राक्षसरूपं कृत्वा, हस्तमध्ये यमजिह्वासदृशं खड्गं गृहीत्वा पादप्रहारेण भूमिकामाकंपयन्, मुखं विकास्याऽट्टट्टहासं कुर्वन् कामदेवांतिकं समागत्यैवं वदतिस्म. मुंचेदं प्रत्याख्यानं? त्यजेमां कायोत्सर्गमुद्रां? नोचेत्त्वामनेन खड्गेन खंडशः करिष्यामि; तदा च त्वमार्त्तध्यानतोऽकाले मृत्युमवाप्स्यसि.

इत्थं वारंवारमुक्तेऽपि कामदेवो न ध्यानाच्चलितः, तदा समुत्पन्नक्रोधेन देवेन खड्गेन कृत्वा कामदेवश्छिन्नकायः कृतो, महती वेदना जाता, परं स ध्यानान्न क्षुब्धः, पश्चाद्देवेन पर्वतसदृशं हस्तिरूपं विकुर्वितं, शुंडामुल्लालयन् भयंकरहस्तिरूपो देवः कामदेवंप्रति प्राह, भो कामदेव मुंचेमानि व्रतानि? त्यजेमां कायोत्सर्गमुद्रां? नो चेत् शुंडया समुत्पाट्य भूमौ निपात्य दंतप्रहारेण मर्दयिष्यामीत्युक्तोऽपि स न चलितः स्वध्यानात्. तदा तेन शुंडया समुल्लालयित्वा धरित्र्यां पातितो दंतप्रहारैर्विद्धो मनागपि न क्षुब्धो मनसि चिंतितवान्. यतः—सर्वेऽन्योऽपि प्रियाः प्राणा—स्तेऽपि यांत्वधुनापिहि॥ न पुनः स्वीकृतं धर्मं। खंडयाम्यल्पमप्य- ॥२८०॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हं ॥ १ ॥ पुनर्देवेन तृतीयवारं महाभयंकरं मुशलप्रमाणकायं कज्जलवर्णफणाटोपमंडितं च-लज्जिह्वायुगलं दर्शनमात्रेण परप्राणनाशनं प्रचंडविषं सर्परूपं विकुर्व्य कामदेवंप्रति कथितं. मुंच गृहीतव्रतं? नो चेन्मया दष्टो विषेणाऽकाल एव मरिष्यसि. इति भाषितोऽपि स न भ-याकुलो जातः, चेतसि चिंतयतिस्म, स्वल्पोऽप्यतिचारो मम मा भवतु? सोऽपि महते दो-षाय. यदुक्तं—अत्यल्पादप्यतीचारा–द्धर्मस्याऽसारतैव हि ॥ अंहिकंटकमात्रेण । पुमान् पं-गूयते न किं ॥ १ ॥ इति निश्चलात्मानं तं ज्ञात्वा सर्परूपेण स दष्टवान्. दुःखोद्भववशेन का-मदेवशरीरं कालज्वरेणेव पीडितमभूत्; महती वेदना जाता, परं ध्यानान्न चलितोऽसौ विचारयतिस्म.

यतः—स्खलनायां तु धर्मस्या–ऽनंतैरपि भवैर्भवैः ॥ दुःखांतो भविता नैव। गुणस्तत्र च कश्चन ॥ १ ॥ दुःखं तु दुःकृताज्जातं । तस्यैव क्षयतः क्षयेत् ॥ सुकृतात्तत्क्षयश्च स्या–त्तस्मिन् सुदृढो न कः ॥ २ ॥ इति ध्यानपरायणं तं ज्ञात्वा स्वरूपं प्रकटीकृत्य देवः काम-देवं सम्यक् क्षामयामास, कथितवांश्च धन्योऽसि त्वं, कृतपुण्योऽसि त्वं, लब्धजीवितफलोऽ- ॥ २८१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सि त्वं, सौधर्मे सुरपतिना त्वत्प्रशंसा कृता, तामश्रद्दधानोऽहं त्वत्परीक्षार्थमागतो, यादृशः सुरपतिना प्रशंसितस्तादृश एव त्वं मया दृष्टः, इति स्तुत्वा स स्वस्थानं गतः, प्रातः कायोत्सर्गं पारयित्वा स समवसरणे भगवंतं वंदितुमागतः, भगवतोक्तं भो कामदेव! अद्य तव मध्यरात्रौ देवेनागत्योपद्रवत्रयं यत्कृतं तत्सत्यं? कामदेवेनोक्तं सत्यं, हंता स्वामीति. पश्चाद्भगवता सर्वसाधून् साध्वीश्चाहूयैवमुक्तं भो देवानुप्रियाः यद्ययं श्राद्धधर्मस्थितोऽपि देवकृतोपसर्गानेवं सहते, तदा श्रुतज्ञातॄणां साधूनां तु सम्यक् परीषहादि सहनीयमेवेति. श्रीभगवद्वाक्यं विनयपूर्वकं सर्वैरपि श्रुतमंगीकृतं च. इत्थं भगवता कामदेवस्य स्वमुखेन प्रशंसा कृता, धन्यात्माऽयं कामदेवः, उक्तं च—धण्णा ते जीअलोए। गुरवो निवसंति जस्स हिययंमि ॥ धन्नाणवि सो धन्नो। गुरूण हियए वसइ जोउ ॥ १ ॥ इति लोकैः स्तूयमानोऽसौ भगवंतमभिवंद्य स्वगृहमागतः, पश्चात्तेन सम्यक् श्राद्धानां दर्शनादिका एकादश प्रतिमा आराधिताः, विंशतिवर्षाणि यावत् श्राद्धपर्यायं प्रपाल्य प्रांते चैकमासिक्या संलेखनया सम्यगालोच्य प्रतिक्रम्य कालमासे कालं कृत्वा सौधर्मनाम्नि सुरलोकेऽरुणाभनाम्नि विमाने चतुः- ॥२७२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पल्योपमायुर्देवत्वेन स उत्पन्नः, ततश्च्युत्वा स महाविदेहे सेत्स्यतीति कामदेवदृष्टांतः, एवं यथा श्राद्धेनापि कामदेवेन घोरोपसर्गाः सोढास्तथा साधुनापि मोक्षार्थिनोपसर्गाः सोढव्या इत्युपदेशः ॥ इति सप्तत्रिंशत्तमः संबंधः ॥

॥ मूलम् ॥—भोगे अभुंजमाणावि । केइ मोहा पडंति अहरगइं ॥ कुविउ आहारट्ठी । जत्ताइजणस्स दमगुव्व ॥ २२ ॥ व्याख्या—' भोगे इति ' भोगानऽभुंजाना अपि, मनसि केवलं भोगेच्छां कुर्वाणा अपीत्यर्थः, केचित्प्राणिनो मोहादज्ञानात्पतंति ' अहरगइंति ' अधोगतौ; तत्र दृष्टांतमाह—कुपितः सन् ' आहारट्ठी इति ' आहारार्थी भिक्षुकः ' जत्ताइ जणस्सत्ति ' जेमनवारायां वने गतो यो जनो लोकस्तस्योपरि शिलापातकऽमक इव भिक्षुरिव, यथा तेन मनसा दुर्ध्यानचिंतनेनैव दुर्गतिरूपं फलं प्राप्तं तथाऽन्योऽपि प्राप्नोतीत्यर्थः ॥ ॥ २२ ॥ अथात्र संबंधः—

राजगृहे नगरे कस्मिंश्चिदुत्सवे सर्वोऽपि लोको वैभारगिरावुद्यानिकायां गतः, तदवसरे चैको भिक्षुर्भोजनवांछया नगरं भ्रांत्वाऽलब्धभोजनो वनमागतः, सर्वत्रापि भ्रांतः, परं के-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाप्यंतरायकर्मोदयतो भिक्षा नार्पिता, रुष्टः सर्वोपरि चिंतयतिस्म, अहो दुष्टाः सर्वेऽप्येते पौरलोका यदेवं ते खादंति पिबंति स्वेच्छया भोजनं च कुर्वंति, परं मम स्वल्पमपि नार्पयंति, अतोऽहं वैभारगिरेरुपरि चटित्वा महतीशिलापातनेनैतान् दुष्टान् चूर्णयामीति संचिंत्य स दुर्ध्यानतो वैभारगिरेरुपरि चटितः, महती शिला च पातिता. तां दृष्ट्वा नष्ट्वा सर्वेऽपि दूरं गताः, अभाग्यवशतश्चलंत्याः पर्वतशिलाया अधो भिक्षुरायातः, तद्भारेणाक्रांतश्चूर्णीभूतकायो रौद्रध्यानतो मृत्वा सप्तमीं नरकावनिं गतः, अहो बलीयान्मनोव्यापारः. उक्तं च—मनोयोगो बलीयांश्च । बाधितो भगवन्मते ॥ यः सप्तमीं क्षणार्धेन । नयेद्वा मोक्षमेव च ॥ १ ॥ पुनश्च—मन एव मनुष्याणां । कारणं बंधमोक्षयोः ॥ यथैवालिंग्यते भार्या । तथैवालिंग्यते स्वसा ॥ २ ॥ एवं दुर्ध्यानतो यथा भिक्षुकेण नरकदुःखं प्राप्तं, तथाऽन्योऽपि प्राप्नोतीति मनसा भोगप्रार्थनापि न विधेयेत्युपदेशः ॥ इत्यष्टत्रिंशत्तमः संबंधः ॥ ३८ ॥

॥ मूलम् ॥—नवसयसहस्स दुलहे। जाइजरामरणसागरुत्तारे ॥ जिणवयणंमि गुणायर । खणमवि मा काहिसि पमायं ॥ २३ ॥ व्याख्या—' नव इति ' नवानां शतसहस्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णि लक्षाणि, तेषु दुर्लभो दुःप्राप एतादृशे, जातिर्जन्म, जरा वयोहानिः, मरणं प्राणत्याग- स्तद्रूपो यः सागरः समुद्रस्तमुत्तारयतीति, एतादृशे, हे गुणानामाकर गुणनिधे एतादृशे जि- नवचने वीतरागसिद्धांते क्षणमपि क्षणमात्रमपि प्रमादं मा कार्षीः ? प्रमादं त्यक्त्वा जिनव- चनमाराधनीयमित्यर्थः ॥ २३ ॥

॥ मूलम् ॥—जं न लहइ सम्मत्तं । लद्धूणवि जं न एइ संवेगं ॥ विसयसुहेसु अ र- ज्जइ । सो दोसो रागदोसाणं ॥ २४ ॥ व्याख्या—' जं न लहइत्ति ' अयं जीवो यत्सम्य- क्त्वं न लभते न प्राप्नोति, अथ च सम्यक्त्वं लब्ध्वापि यत्संवेगं नैति न प्राप्नोति, च पुनः विषयसुखेषु शब्दादिषु यज्यति रक्तो भवति, सोऽयं सर्वोऽपि रागद्वेषाणामेव दोषः, अतो दोषहेतुत्वाद्रागद्वेषौ त्याज्यावित्यर्थः ॥ २४ ॥

॥ मूलम् ॥—तो बहुगुणनासाणं । सम्मत्तचरित्तगुणविणासाणं ॥ न हु वसमागंतव्व । रागद्दोसाण पावाणं ॥ २५ ॥ व्याख्या—' तो बहु इति ' तो इति तस्मात्कारणाद्बहुगु- णानां नाशो येभ्यस्ते, अथवा बहुगुणान् नाशयंतीति, तेषामेतादृशानां रागद्वेषाणामित्युत्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रेण संबंधः, पुनः कीदृशानां रागद्वेषाणां? सम्यक्त्वं शुद्धश्रद्धानरूपं, चारित्रं पंचाश्रवनिरोधलक्षणं, गुणास्तेषां विनाशो यैस्ते तेषां, रागद्वेषाः सम्यक्त्वादीन् गुणान् विनाशयंतीति भावः, ' न इति ' निषेधार्थे, ' हु इति निश्चये ' वश्यं पारवश्यं नाऽगंतव्यं नाऽगमनीयं ' वश न आववुं इति लोकभाषयार्थः ' केषां वश्यं नाऽगंतव्यं? पूर्वोक्तदोषदुष्टानां पापानां नीचानां रागद्वेषाणां वश्यं नागंतव्यमित्यर्थः ॥ २५ ॥

॥ मूलम् ॥—न वि तं कुणइ अमित्तो । सुट्ठुवि सुविराहिउ समत्थोवि ॥ जं दोवि अणिग्गहिया । करंति रागो अ दोसो अ ॥ २६ ॥ व्याख्या—' नवीति ' नैव ' तं इति ' तादृशं ' कुणइ इति ' करोत्यनर्थं, कः? अमित्रो वैरी शत्रुरपि तादृशमनर्थं न करोति, कीदृशः शत्रुः? ' सुट्ठुवि ' अतिशयेनापि सुविराधितोऽपि अतिशयेन सम्यग् विराधितोऽपि, एतादृशोऽपि शत्रुः, पुनः कीदृशः शत्रुः? समर्थोऽपि बलवानपि सन्, एतादृशोऽपि शत्रुस्तमनर्थं न करोति, यमनर्थं ' दोवि इति ' द्वावपि शत्रुभ्योऽप्यधिकौ कुरुतः, कीदृशौ द्वौ? अनिगृहीतावनिरुद्धावनिवारितौ. तौ द्वौ कौ? एको रागः, अन्यो द्वेषश्च. एतावता कोऽर्थः?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वैरी विराधितः सन्नेकस्मिन् भवे मरणं ददाति, रागद्वेषौ त्वनंतानि मरणानि दत्त इति भावः ॥ २६ ॥ पुनरपि रागद्वेषयोरेव फलमाह—

॥ मूलम् ॥—इह लोए आयासं । अयसं करिंति गुणविणासं च ॥ पसवंति अपरलोए । सारीरमणोगए दुक्के ॥ २७ ॥ व्याख्या—' इहलोए इति ' अस्मिन् लोके संसारे रागद्वेषौ आयासं शरीरमनसोः क्लेशं दत्तः च पुनरयशोऽपकीर्त्तिं विस्तारयतः, च पुनर्गुणा ज्ञानदर्शनचारित्राणि, तेषां विनाशं कुरुतः ' पसवंति इति ' उत्पादयतः परलोके परजन्मनि शारीराणि शरीरसंबंधीनि दुःखानि जनयतः, नरकतिर्यग्गतिदायकत्वात्, तयोरनर्थमूलत्वाच्चेत्यर्थः ॥ २७ ॥

॥ मूलम् ॥—धिद्धी अहो अकज्जं । जं जाणंतोवि रागदोसेहिं ॥ फलमउलं कडुअरसं । तं चेव निसेवए जीवो ॥ २८ ॥ व्याख्या—' धिद्धी इति ' धिगू धिग् जीवंप्रतीतिशेषः, अहो इति महदाश्चर्यकारि इदमकार्यं ! जानन्नपि अनर्थकारकावेतौ रागद्वेषाविति विदन्नपि, अथ च एतयोः फलं विपाकमतुलं विस्तीर्णं, कीदृशं फलं ? कटुकरसं कटुकास्वादं जानन्नपि,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

'तं इति' तदेव चैवेत्यव्ययद्वयं बाहुल्यार्थे, रागद्वेषफलममृतबुद्ध्या निषेवते सेवते जीवः संसारवासी, अतोऽमुं धिगित्यर्थः ॥ २८ ॥

॥ मूलम् ॥—को दुक्कं पाविज्जा । कस्सवि सुक्खेहिं विम्हन हुज्जा ॥ को मुक्कं न लहिज्जा । रागदोसौ न जइ हुज्जा ॥ २९ ॥ व्याख्या—'को दुक्कं इति' कः पुमान् दुःखं 'पाविज्जा' अप्राप्स्यत्! लोकन्नाषया 'पामत' इत्यर्थः, कस्यापि, अपि समुच्चये. कस्य संसारिणः सुखैः कृत्वा 'अहो अयं महान् सुखी' इति विस्मयमाश्चर्यमन्नविष्यत्, को जीवो मोक्षं नाऽन्नन्निष्यत्, अपि तु सर्वोऽपि मोक्षमगमिष्यत्. रागद्वेषौ यदि 'न हुज्जाइति' नाऽन्नविष्यतां, तदा सर्वेऽपि मोक्षमगमिष्यन्निति न्नावः ॥ २९ ॥

॥ मूलम् ॥—माणी गुरुपमिणीन्न। अणन्नन्नणिन्न अमग्गचारी अ ॥ मोहं किलेसजालं । सो खाइ जहेव गोसालो ॥ ३० ॥ व्याख्या—'माणी इति' यः शिष्यो मानी अहंकारी न्नवति, गुरुप्रत्यनीको गुर्वपवादवादी न्नवति, आत्मीयेनाऽशुद्धस्वन्नावेनाऽनर्थन्नृतोऽनर्थपूर्णः, अमार्गे न्नत्सूत्रप्ररूपणारूपे चरति गन्नतीत्येवं शीलो मोघं व्यर्थं निष्फलं क्लेशाः शि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोमुग्नतपःसंयमादयस्तेषां जालं समूहं ' सो इति ' स शिष्यो भुंक्ते, एतादृशो दुर्विनीतो निष्फलमेव तपःसंयमादिकष्टं सहते, यथैवेति दृष्टांतोपन्यासे, गोशालको भगवच्छिष्यान्नास-स्तद्वदित्यर्थः ॥ ३० ॥

॥ मूलम् ॥—कलहणकोहणसीलो । डंडणसीलो विवायसीलो अ ॥ जीवो निच्चुज्ज-लिउ। निरट्ठयं संजमं चरइ ॥ ३१ ॥ व्याख्या—' कलहण इति ' कलहनं राटीकरणं, क्रो-धनं परगुणाऽसहनं, तत्स्वभावस्तच्छील एतादृशो यो भवति, डंभनं यष्टिमुष्टिप्रभृतेर्युद्धकरणं, तस्य शीलः स्वभावो यस्यैतादृशः, च पुनः कीदृशः? विवादशीलः, वचनेन वादकरणं वि-वादः, तच्छीलः, एतादृशो जीवो नित्योज्ज्वलितो, नित्यं सदैवोज्ज्वलितः, क्रोधाग्निना, निरर्थकं व्यर्थं संयमं चारित्रं चरति वहति, चारित्रं विनाशयतीति भावः ॥ ३१ ॥

॥ मूलम् ॥—जह वणदवो वणं दव–दवस्स जलिउ खणेण निद्दहइ ॥ एवं कसायप-रिणउ । जीवो तवसंजमं दहइ ॥ ३२ ॥ व्याख्या—' जह इति ' यथेति दृष्टांते, यथा वन-भवो वनदावानलो वनं काननंप्रति ' दवदवस्सेति ' शीघ्रं शीघ्रं ' जलिउ इति ' ज्वलितः स-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न् ' खणेण इति ' क्षणेन स्तोकवेलया निर्दहति ज्वालयति वनमिति संबंधः, एवममुना प्रकारेण कषायपरिणतः कषायपरिणामे वर्त्तमान एतादृशो जीवः प्राणधारी तपः संयमं दहति ज्वालयति. समतैव चारित्रधर्ममूलमित्यर्थः ॥ ३२ ॥

॥ मूलम् ॥—परिणामवसेण पुणो । अहिअ ऊणयरत्तं हुज्ज खलं ॥ तहवि ववहारमित्तेण । भन्नइ इमं जहा थूलं ॥३३॥ व्याख्या—'परिणामेति' परिणामवशेनेति, कषायस्य परिणामास्तीव्रमंदरूपविशेषास्तेषां वशेन पुनस्तपःसंयमयोरधिकः प्रचुरो वाऽथवा ऊनतरो न्यूनः क्षयो भवति, कषायतीव्रपरिणामेन चारित्रस्यापि तीव्रतरक्षयो, मंदपरिणामेन तु मंदक्षय इत्यर्थः, ' तहवि ' तथापि ' ववहारमित्तेण ' व्यवहारमात्रेण भण्यते कथ्यते इमं यथा स्थूलो बादरः क्षयो भवति तथा कथ्यते इत्यर्थः ॥ ३३ ॥

॥ मूलम् ॥—फरुसवयणेण दिणतवं । अहिक्खिवंतो य हणइ मासतवं ॥ वरिसतवं खवमाणो । हणइ हणंतो अ सामन्नं ॥ ३४ ॥ व्याख्या—' फरुसेति ' परुषवचनेन कठिनवचनेन गालिप्रदानादिना दिनतपस्तद्दिनकृतं तपःसंयमादिपुण्यं हंति क्षयं प्रापयति. ' अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिक्किवंतो इति ' अत्यंतक्रोधेन जातिकुलमर्माणि भाषमाणो मासतपः क्षयं करोति. व्यवहारिकवचनमात्रमेतत्. शपमानस्तवेदमशुभं भूयादिति शापं ददानो वर्षतपो हंति क्षयं करोति. ' हणंतो इति ' यष्टिखड्गादिभिः परेषां घातं कुर्वाणः श्रामण्यमाजन्मानुष्ठितं चारित्रं हंतीत्यर्थः ॥ ३४ ॥

॥ मूलम् ॥—अह जीवियं निकिंतइ । हंतूण य संजमं मलं चिणइ ॥ जीवो पमायबहुलो । परिभ्रमइ जेण संसारे ॥ ३५ ॥ व्याख्या—' अह इति ' अथैतदनंतरं प्रमादैवगुण्यमाह—जीवितं संयमजीवितं निकृंतति छिनत्ति, हत्वा संयमं सप्तदशभेदं. यदुक्तं—पंचासवविरमणं । पंचिंदियनिग्गहो कसायजओ ॥ दंडत्तयस्स विरओ । सतरसहा संजमो होइ ॥ ॥ १ ॥ मलं पापकर्ममलक्षणं चिनोति, कः? जीवः संसारी, कीदृशो जीवः? प्राकृतत्वाद्बहुलः प्रमादो यस्येति प्रमादपरवश इत्यर्थः, येन कारणेन प्रमादपरवशो जीवः संसारे परिभ्रमति परिभ्रमणं करोति. अतः प्रमादपरिहरणं विधेयमित्युपदेशः ॥ ३५ ॥

॥ मूलम् ॥—अक्कोसणतज्जणताडणाओ अवमाणहीलणाओ अ ॥ मुणिणो मुणियपर-

॥ २९१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नवा । दृढप्पहारिव्व विसहंति ॥ ३६ ॥ व्याख्या—' अक्कोसेति ' आक्रोशनं शापदानं, तर्जनं भ्रूकुटिभ्रंगादिना निर्भर्त्सनं, ताडनं यष्ट्यादिना कुट्टनं, एतेषां द्वंद्वः, अपमानमनादरता, हीलना जात्याद्युद्भाटनेन निंदनं, एतयोर्द्वंद्वः, एतानि सर्वाण्यपि मुनयो मुनीश्वराः सहंते इत्युत्तरेण संबंधः, कीदृशा मुनयः? ' मुणियपरन्नवा ' ज्ञाताऽग्रेतनपरभवस्वरूपाः, कइव सहंते? दृढप्रहारीव, यथा दृढप्रहारिणा क्षांतं तथान्येनापि क्षंतव्यमित्यर्थः ॥ ३६ ॥ अथ दृढप्रहारिनिदर्शनं, तद्यथा—

माकंद्यां महापुर्यां समुद्दत्तनामा भूदेवः परिवसतिस्म. तद्गृहे समुद्दत्तान्निधा भार्या, एकदा तयैकः पुत्रः प्रसूतः, स प्रतिदिनं वर्द्धमानोऽन्यायशतानि कुरुते; यौवने लोकान्मारयति; मृषा वदति, स्तेयकर्म विदधाति, परांगनासंगमं करोति, भक्ष्याऽभक्ष्यविवेकं न जानाति, कस्यापि शिक्षां न मन्यते. मातृपित्रोरप्यवज्ञाकारी, एवं महाऽन्यायाचरणचतुरो नगरे परिभ्रमति. एकदा राज्ञा श्रुतं, अयोग्योऽयमिति ज्ञात्वा दुर्गपालमाहूय भणितं, विरसवाद्यवादनपूर्वकं नगराद्बहिर्निष्कासनीयोऽयं द्विजाधमः, लोकैरपि तदनुमोदितं, दुर्गपालेनापि त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्तथैव कृतं. सोऽप्यतीवहृष्टमना नगरान्निर्गत्य स्निग्धपल्लीमागतः, तत्रापि स्निग्धपतिना साकं मिलितः, तेनाऽप्यस्मत्कर्मकुशलोऽयमिति लक्षणेन विज्ञाय पुत्रवत्स्थापितः, सर्वापि गृहसंपत्तदायत्तीकृता, कुमारत्वेन विचरति, तत्रापि तिष्ठन् स बहून् जीवान्निर्दयतया दृढघातेन मारयति. ततो लोके दृढप्रहारीति तस्य नाम प्रसिद्धं जातं. एकदा स बहुलां धाटीं समादाय कुशस्थलपुरलुंटनार्थं समागतः, तस्मिन्नवसरे तत्रैव नगरे दरिद्री देवशर्माभिधो द्विजो वसति, तद्दिने तद्गृहे बहुभिर्मनोरथैः क्षीरेयीभोजनं राद्धं, द्विजस्तु नद्यां स्नानार्थं गतः, तदवसरे केनापि चौरेण तद्द्विजगृहे प्रविश्य क्षीरेयीभाजनं गृहीतं. तद् दृष्ट्वा तदर्भकै रुदनं कुर्वाणैर्नद्यां गत्वा पितुरग्रे निरूपितं, सोऽपि क्षुधातुरो द्रुतं समागत्य क्रोधातुरमना महतीमर्गलामादाय वधार्थं चौरसमीपमागतः, तावपि परस्परं लग्नौ.

तदा दृढप्रहारिणा समागत्य खड्गेन विप्रो व्यापादितः, तं भूमौ निपतितं दृष्ट्वा क्रोधावेशवशा स्वपुत्रमुज्झं विधाय तं हंतुं धावतिस्म गृहसौरभेयी; सापि रौद्रपरिणामेन दृढप्रहारिणा व्यापादिता. तदवसरे स्वपतिं व्यापन्नं दृष्ट्वाऽश्रूणि मुंचंती विलपंती गाढस्वरेणाक्रोशं कु- ॥२९३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्वती आपन्नसत्त्वा द्विजवधूरपि तेन पंचत्वं प्रापिता. उदरोपरि प्रहारदानेन तत्कुक्षिस्थो गर्भोऽपि भूमौ निर्गत्य पतितः, परिस्फुरंतं भूमौ विलुंठंतं तं दृष्ट्वा निर्दयस्यापि तस्य मनसि कारुण्यमुत्पन्नं. हे हे धिगस्तु मामधमाधमकर्मकारिणं! येन निष्कारणं मयाऽनाथेयमबला बालवती मरणधर्मं प्रापिता. चतस्रोऽपि हत्या मम लग्नाः, एकापि विहिता हत्या निश्चयतो नरकगतिं ददाति; किं पुनश्चतस्रः? अहो का गतिर्मे भाविनी! दुर्गतिकूपे निपततो मम किं शरणं भविष्यति? इति विमृश्य व्यग्रमनाः स नगरान्निर्गतो वने तपस्तपंतं साधुमेकं ददर्श. तच्चरणयोर्निपत्य तेन निजपातकस्वरूपं निवेदितं. भगवन् निवेदय? कथं हत्यापातकमोक्षो भवति? साधुना निवेदितं, शुद्धचरणधर्माराधनमंतरेण नैतन्मोक्षः, तद्वचसा वैराग्यमग्रमनसा तेन चारित्रं गृहीतं, अभिग्रहश्च गृहीतो यावच्चतस्रोऽपि हत्या मम स्मरणधर्ममायांति तावज्जलमन्नं च मया न गृहीतव्यं.

॥ २९४॥

इत्यभिग्रहं विधाय स तन्नगरप्रतोल्यां कायोत्सर्गं कृत्वा स्थितः, पश्चात्रगरलोकैरागच्छद्भिर्गच्छद्भिस्ता हत्याः स्मारं स्मारं दुष्कर्मकारकोऽयमिति तस्य तर्जनाताडनादिकं विदधे. के-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चिद्यष्टिप्रहारेण केचिन्नालिप्रदानेन, केचिदुपलेन, केचिदुर्वचसा तं तिरस्कुर्वंति, परं स मनागपि न क्रुध्यति, ध्यानाच्च न चलति. यावत्कंठप्रदेशं स इष्टिकापाषाणैरापूर्णो जातः, श्वासरोधं विज्ञाय ततः कायोत्सर्गं पारयित्वा स नगर्या द्वितीयप्रतोल्यां स्थितः, तत्रापि तेन तथैव परीषहाः सोढाः, पुनरपि तथैव तृतीयप्रतोल्यां, पुनस्तथैव चतुर्थ्यां प्रतोल्यां गालिमारिप्रहारादिकं सहमानस्य चतुर्विधाहारप्रत्याख्यानिनस्तस्य षण्मासी व्यतिक्रांता; परं तेन नियमो न भग्नः, विशुद्धध्यानेन क्रमाविशुद्धांतरस्य तस्य घातिकर्मक्षयतः केवलज्ञानमुत्पन्नं. बहून् जीवान् प्रतिबोध्य स दृढप्रहारी केवली मोक्षं प्राप्तः, एवमन्येऽपि ये आक्रोशाद्युपसर्गवर्गं क्षमंते, तेऽप्यनंतसौख्यभाजो भवंतीति दृढप्रहारिसंबंधः॥ इत्येकोनचत्वारिंशत्तमः संबंधः.

॥ मूलम् ॥—अहमाहनत्ति न य पडि–हणंति सत्तावि न य पमिसवंति ॥ मारिज्जंतावि जई । सहंते साहस्समल्लुव्व ॥ ३७ ॥ व्याख्या—'अहमिति' अहमनेन पुरुषेणाहतः पीडित इति मत्वापि साधवो नैव तं पुरुषं प्रतिघ्नंति, केनापि शप्ता अपि शापिता अपि च नैव प्रतिशपंति नैव शापं ददते इत्यर्थः, 'मारिज्जंतावि इति' केनापि मार्यमाणा अपि यतयो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मुनीश्वराः सहंते क्षमंते, क इव? सहस्रमल्ल इव; यथा सहस्रमल्लेन साधुना हननादिकं सोढं तथाऽन्येनापि सोढव्यमित्यर्थः ॥ ३७ ॥ अत्र सहस्रमल्लदृष्टांतो यथा—

शंखपुरे नगरे कनकध्वजो राजा राज्यं करोति, तस्य सन्नायामेको वीरसेननामा कश्चित्सुभटः सेवां करोति. राज्ञा तस्मै ग्रामापंचशती दीयमानापि तेन न गृहीता; कथयामास च हे राजन् मया मूल्यमंतरैव तव सेवा विधेया. त्वयि तुष्टे सति मयि द्रव्यं द्रविष्यति; एवं कथयित्वा स नित्यं राज्ञः सेवां करोति. एतस्मिन्नवसरे कालसेननामा कश्चिद्दुर्जयो रिपुः कस्यापि नो वशमायाति. ग्रामनगरोपद्रवं करोति; तदा सन्नायामुपविष्टेन राज्ञोक्तं एतादृशः कोऽपि वर्त्तते बलवान्? य एनं कालसेननामानं जीवग्राहं गृहीत्वा मत्समीपमानयति. तद्राज्ञो वचनं श्रुत्वा सर्वेपि तूष्णीं स्थिताः, तदा वीरसेनेनोक्तं किमर्थमन्येषां द्रास्यते? यदि ममाज्ञापयथ तदैकाक्येव तमानयामीति राज्ञोऽग्रे प्रतिश्रुत्य सन्नद्धो भूत्वा खड्गमादायैकाक्येव तदुपरि स चलितः, कालसेनोऽपि स्वबलमादाय सन्मुखमागतः, महति युद्धे जायमाने सर्वमपि तद्बलं नष्टं, एकाकिनं कालसेनं बध्वा स राज्ञः समीपमागतः, राजापि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तादृशं तद्भुजवीर्यं दृष्ट्वा चमत्कारमागतः, सन्यलोकैरपि प्रशंसितो, यो लक्षलोकैरप्यजेयं कालसेनं लीलयैव जिगाय. अतस्तुष्टचित्तेन राज्ञा लक्षप्रसादं कृत्वा तस्य सहस्रमल्ल इति नाम दत्तं, एकदेशस्याधिपत्यं च तस्मै दत्तं. कालसेनमपि स्ववशवर्त्तिनं विधाय राज्ञा पुनरपि तद्राज्यं तस्मै समर्पितं. पश्चात्सहस्रमल्लस्य स्वदेशराज्यं पालयतः कियत्सु दिनेषु गतेषु सुदर्शनाचार्योपदिष्टधर्मश्रवणतो वैराग्यमुत्पन्नं. राज्यं त्यक्त्वा तेन चारित्रं गृहीतं. सामायिकादीन्येकादशांगानि स पपाठ. अनुक्रमेण चारित्रं पालयता तेन जिनकल्पविहारः प्रतिपन्नः, एकदा विहरन् स कालसेननृपनगरसमीपे कायोत्सर्गेण तस्थौ. कालसेनेन दृष्ट्वोपलक्षितः, ततो रुष्टेन तेन दुष्टेन सहस्रमल्लसाधोर्यष्टिमुष्टिपाषाणादिभिर्महती कदर्थना कृता, परं स मनागपि न क्षुब्धः, क्षमामादृत्य शुद्धध्यानं ध्यायन् तत्कृतोपसर्गजनितवेदनतो मृत्युमासाद्य सर्वार्थसिद्धे विमाने समुत्पन्नः, एवमन्येनापि क्षमा विधेयेत्युपदेशः ॥ इति सहस्रमल्लसाधुसंबंधः ॥ इति चत्वारिंशत्तमी कथा ॥

॥ मूलम् ॥—दुज्जणमुहकोदंडा—वयणसरा पुव्वकम्मनिम्माया ॥ साहुण ते न लग्गा।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

खंतिफलयं वहंताणं ॥ ३८ ॥ व्याख्या—' दुज्जण इति ' दुर्जनानां मुखमेव कोदंडं धनुस्तस्मात्, यथाऽन्येऽपि शरा धनुषो निर्गच्छंति तथाऽत्र दुर्जनमुखमेव धनुः, वचनानि कटुकन्नाषणान्येव शराः, असातोत्पादकत्वात्, यथा शरा मर्माणि भिंदंति तथा दुर्वचनान्यपीति साधर्म्यं. कीदृशाः शराः? पूर्वकर्मोपार्जिताः एतादृशास्ते वचनशराः साधूनां न लग्नाः, कीदृशानां साधूनां? क्षांतिः क्षमा तद्रूपं फलकं वहतां धारयतां, यथा कवचधारणेन शरा न लगंति तथेत्यर्थः ॥ ३८ ॥

॥ मूलम् ॥—पत्थरेणाहन कीवो । पत्थरं मक्कुमिच्छइ ॥ मियारि य सरं पप्प । सरोपत्तिं वियारइ ॥ ३९ ॥ व्याख्या—' पत्थर इति ' प्रस्तरेण पाषाणेनाहतः संघट्टितः ' कीवो इति ' कुर्कुरः किं करोति? प्रस्तरं पाषाणं ' मक्कुमिति ' भक्षितुं वांछति, मृगाणामरिर्मृगारिः सिंहस्तु शरं बाणं प्राप्य किं करोति? शरोत्पत्तिं विचारयति. कुतः समागतोऽयं? केन वा मुक्तोऽयमित्यन्वेषते. तथा साधुरपि दुर्वचनतीरं प्राप्य, मम पूर्वकर्मोपार्जित एवायं वचनप्रहार इति विचारयति; न तु वचनन्नाषकोपरि द्वेषमित्यर्थः ॥ ३९ ॥

॥ २९८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—तह पुव्विं किं न कयं । न बाहए जेण मे समन्नोवि ॥ इण्हिं किं कस्स व कुप्पि—मुत्ति धीरा अणुप्पिन्ना ॥ ४० ॥ व्याख्या—' तह इति ' हे जीव त्वया पूर्वस्मिन् भवे तथा किं न कृतं? कथं न शुभमाचरितं? न बाधते न पीडयति ' जेण इति ' येन शुभाचरणेन मे मम समर्थोऽपि बलवानपि. यदि शुभं कृतमभविष्यत्तदा कस्त्वां बाधेत? ' इण्हिं ' इदानीं किमिति क्षेपे ' कस्सवत्ति ' कस्याप्युपरि इदानीं किं कुप्यामि? किं कोपं करोमि? पूर्वकर्मोदये परोपरि क्रोधकरणं व्यर्थमेव. धीरा धीरपुरुषा एवमनुप्रेक्षंते विचारयंति, विमृश्य क्रोधं न कुर्वंतीत्यर्थः ॥ ४० ॥

॥ मूलम् ॥—अणुराएण जइस्सवि । सियायपत्तं पिया धरावेइ ॥ तहवि य खंदकुमारो । न बंधुपासेहिं पडिबद्धो ॥ ४१ ॥ व्याख्या—' अणुराएण इति ' अनुरागेण स्नेहेन यतेरपि गृहीतसाधुवेषस्यापि पुत्रस्य मस्तकोपरि श्वेतातपत्रं श्वेतछत्रं पिता धारयति, सेवकैरिति शेषः, स्नेहबुद्ध्या पिता चारित्रगृहणानंतरमपि छत्रं धारयति, तथापि एतादृशे जनकस्नेहेऽपि स्कंदकुमारनामा मुनिः, बंधवः संबंधिनः पाशा इवेत्युपमितिसमासः, तैर्न प्र- ॥ २९९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिबद्धः स्नेहपाशैर्न बद्ध इत्यर्थः ॥ ४१ ॥ अत्रार्थे स्कंदकुमारनिदर्शनं विस्तरतो निरूप्यते—

अस्त्येका श्रावस्त्यभिधाना महापुरी, तत्राखिलारिमंडलधूमकेतुः कनककेतुर्नृपः, तत्कृहे स्ववंधून्योऽप्यतिसुंदरी मलयसुंदरी राज्ञी, तयोरंगजातः प्राणाधारः स्कंदकुमारः, तयोरेका विहितजनानंदा सुनंदानाम्नी पुत्री, साऽतीवरूपयौवनगर्विता कांतिपुरनगरस्वामिने पुरुषसिंहराज्ञे दत्ता. एतस्मिन्नवसरे श्रावस्त्यां विजयसेनसूरयः समवसृताः, स्कंदकुमारः सपरिवारो वंदनार्थमागतः, गुरुभिर्धर्मदेशना प्रारब्धा. अनित्योऽयं संसारः, अनित्यानि शरीराणि, जलतरंगोपमाः संपदः, पर्वतनदीपूरोपमं यौवनं, किमनेन कालकूटोपमेन विषयसुखास्वादेन. यदुक्तमागमे—संपदो जलतरंगविलोला । यौवनं त्रिचतुराणि दिनानि ॥ शारदाभ्रमिव चंचलमायुः । किं धनैः कुरुत धर्ममनिंद्यं ॥ १ ॥ सव्वं विलवियं गीयं । सव्वं नट्टं विडंबणा ॥ सव्वे आभरणा भारा । सव्वे कामा दुहावहा ॥ २ ॥ इत्यादि गुरुदेशनामाकर्ण्य प्रबुद्धः स्कंदकुमारो महताग्रहेण मातापितरावनुज्ञाप्य श्रीविजयसेनसूरिपार्श्वे चारित्रं जग्राह. तद्दिवसादारभ्य स्वकीयपुत्रोपरि राज्ञा स्नेहेन श्वेतछत्रं धारितं. सेवार्थं च सेवकाः पार्श्वे स्थापिताः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ते मार्गे कंटकादीन् दूरतो विक्षिपंति. परमभक्त्या सेवां कुर्वंति, क्रमेण स सकलसिद्धांताब्धिपारगः संजातः, गुरुमापृछ्य जिनकल्पमार्गं गृहीत्वा एकाकित्वेन विजहार. तमत्युग्रविहारिणं मत्वा सेवकाः सर्वेऽपि स्वस्थानं गताः.

एकदा विहारं कुर्वन् स कांतिपुरीमागतः, तत्र सौधगवाक्षोपरि स्वभर्त्रा सार्द्धं सारिक्रीडां कुर्वंत्या स्वभगिन्या सुनंदया स दृष्टः, साधुदर्शनेन तस्या हर्षः समुत्पन्नः, हर्षाश्रूणि नयनयोरुद्भूतानि. वर्षाहतकदंबपुष्पवद्रोमाण्युल्लसितानि. मनसि सा चिंतयति, मदीयो यः सहोदरः सोऽयं यतिर्वा न वेति बंधुस्नेहतो नयनयोरश्रूणि मुंचंती सुनंदा स्कंदसाधुनोपलक्षिता; परं मनागपि स्नेहो नानीतः, तत्स्वरूपं दृष्ट्वा भ्रातृभगिन्योः संबंधमजानता भूमिपालेन मनसि विचारितं यदस्या अनेन साधुना सह तीव्ररागो विलोक्यते. इति दुर्बुद्ध्या रात्रौ कायोत्सर्गमुद्रया वनमध्ये स्थितं स्कंदकर्षिं स घातयामास. प्रातः शोणितारुणा मुखपट्टिका केनापि पक्षिणा चंचुमध्ये गृहीत्वा राज्ञीगृहांगणे पातिता. तां दृष्ट्वा तस्या मनसि शंका समुत्पन्ना, दासीमाहूय पृष्टं, दास्या प्रोक्तं यत्साधुसन्मुखं भ्रात्रा गतदिने विलोकितं, सोऽयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधुः केनापि पापिना हतो विलोक्यते. तस्येयं च मुखपट्टी दृश्यते. तत् श्रुत्वा राज्ञी मूर्छामापन्ना. वज्राहतेव भूमौ निपतिता. शीतलोपचारैः पुनरुत्थिता, रुदंती कथयामास, को जानाति स मदीयो यदि भ्राता भविष्यति तदा किं करिष्यामि? यतो मदीयबंधुनापि दीक्षा गृहीता श्रूयते. अथ च तद्दर्शनेन ममापि बंधुदर्शनजनितानंदसदृश आनंदः समुत्पन्नः, एवं विचार्य स्वसेवकं पितृकुले प्रेषयित्वा तया प्रवृत्तिरानायिता. तत्सर्वं सत्यं ज्ञात्वा दुःखभरापूर्णहृदया मुक्तकंठं सा रुरोद, हे बंधो हे भ्रातः हे सहोदर हे वीर त्वं मम प्राणतोऽप्यधिकतरः, किमिदं त्वया कृतं? ममापि निजस्वरूपं न ज्ञापितं. त्वयेयं पृथ्वी तीर्थरूपा विहिता; परमहं महापापकर्मकारिणी यन्मद्विलोकननिमित्तोऽयं बंधुघातः, कथमहं भविष्यामि? क्व यामि? किं करोमि? इत्यनेकप्रकारं विलपंती सुनंदा मंत्रिभिरनेकाऽपूर्वनाट्यप्रेक्षणादिना बहुकालेन वीतशोका कृता. एवमन्येनापि स्कंदकमुनिवन्निर्मोहता विधेयेत्युपदेशः ॥ इति स्कंदकुमारकथा ॥ एवमेकचत्वारिंशत्तमः संबंधः ॥ ४१ ॥

॥ मूलम् ॥—गुरुगुरुतरो अ अइगुरु । पियमायअवच्चपियजणसिणेहो ॥ चिंतिज्जमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ण गुविलो । चत्तो अइधम्मतिसिएहिं ॥ ४२ ॥ व्याख्या—' गुरु इति ' गुरुर्बहुः, गुरुतरस्तेतोऽधिकतरो, बहुरतिशयेन बहुः, पिता च अपत्यानि च प्रियजनश्च, एतेषां द्वंद्वः, तेषां स्नेहोऽनुक्रमेणाधिकतरो ज्ञेयः, चिंत्यमानो विचार्यमाणो ' गुविलो इति ' महागहनस्नेहो वर्त्तते, अनंतभवहेतुत्वात्. एतादृशः स्नेहोऽतिधर्मतृषितैस्त्यक्तः, स्नेह एवायं धर्मरिपुः ॥ ४२ ॥

॥ मूलम् ॥—अमुणियपरमत्थाणं । बंधुजणसिणेहवेइअरो होइ ॥ अवगयसंसारसहाव–निच्छयाणं समं हिअयं ॥ ४३ ॥ व्याख्या—' अमुणिय इति ' अज्ञातपरमार्थानां, न ज्ञातः परमार्थस्तत्स्वरूपं यैस्ते, एतादृशानां पुरुषाणां मंदबुद्धिनामित्यर्थः, बंधुजनानां यः स्नेहस्तस्य व्यतिकरः संबंधः प्राकृतजनानामेव भवति, न तु पंडितबुद्धीनां भवति. अवगतो ज्ञातः संसारस्य यः स्वभावः स्वरूपं, तस्य निश्चयो यैस्ते, एतादृशानां त्यक्तसकलसंसारसंगानां ज्ञातभवविहितानंतसंबंधानामित्यर्थः, एतादृशानां पुरुषाणां हृदयं समं भवति, ते शत्रुमित्रोपरि सदृशा एव स्युः ॥ ४३ ॥

॥ मूलम् ॥—माया पिया य भाया । भज्जा पुत्ता सुहीय नियगा य ॥ इह चेव बहु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विहाइं । करंति भयवेमणस्साइं ॥ ४४ ॥ व्याख्या—' माया इति ' माता जननी, पिता जनकः, भ्राता सहोदरः, भार्या स्त्री, पुत्रा अंगजाः, सुहृदो मित्राणि, निजकाः संबंधिनः, एते सर्वेऽपि इहाऽस्मिन् भवे, एवेति निश्चयेन बहुविधानि अनेकप्रकाराणि कुर्वंति ? ' भयवेमणस्साइं ' भयानि मरणादिकानि, वैमनस्यं मानसं दुःखं; तान्येवानुक्रमेण कथयति ॥४४॥

॥ मूलम् ॥—माया नियगमइ–विगप्पियंमि अट्ठे अपूरमाणंमि ॥ पुत्तस्स कुणइ वसणं । चुलणी जह बंभदत्तस्स ॥ ४५ ॥ व्याख्या—' माया इति ' माता जननी निजकमत्या स्वकीयबुद्ध्या विकल्पिते विचारिते, एतादृशेऽर्थे कार्येऽपूर्यमाणे, मनश्चिंतिते कार्येऽनिष्पद्यमाने पुत्रस्य स्वकीयांगजातस्य करोति व्यसनमनर्थं. यथेति दृष्टांते, चुलनीनाम्नी माता यथा ब्रह्मदत्तनाम्नो भाविचक्रवर्त्तिनः स्वपुत्रस्याऽनर्थं चकार. तत्स्वरूपं कथानकादवसेयं. ॥ ४५ ॥ अथ चुलनीसंबंधो निरूप्यते.

कांपिलपुरनगरे ब्रह्मराजाभिधो नृपः, तद्गृहे चुलनीनाम्नी राज्ञी, तत्कुक्षौ चतुर्दशस्वप्नसूचितः पुत्रो जातः, तस्य ब्रह्मदत्त इति नाम दत्तं. अथ ब्रह्मराजश्चत्वारोऽन्ये राजानो मि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्राणि. प्रथमः कुरुदेशाधिपः कणेरदत्तनामा, द्वितीयः काशीदेशाधिपतिः कटकदत्तान्निधः, तृतीयः कोशलपतिर्दीर्घनामा, चतुर्थस्त्वंगपतिः पुष्पचूलः, पंचमश्च ब्रह्मराजा. एतेषां पंचानामपि परस्परमतीवमैत्र्यं वर्त्तते, ते क्षणमात्रमपि वियोगं न सहंते. प्रतिवर्षमेकैकस्य नगरे पंचापि मिलितास्तिष्ठंति. इत्थमेकवारं ते पंचापि नृपाः कांपिलपुरे स्थिताः संति. तस्मिन् वर्षे ब्रह्मराजा मस्तकरोगेण परलोकं प्राप्तः, तस्मिन्नवसरे ब्रह्मदत्तकुमारो द्वादशवार्षिकः, चतुर्भिर्मित्रैश्चिंतितमात्मीयः प्रीतिपात्रं परममित्रं ब्रह्मराजा परलोकं गतः, तस्य कुमारश्च लघुर्वर्त्तते, अतो वयं प्रतिवर्षमेतन्नगररक्षां कुर्म इति विमृश्यैकं दीर्घराजानं तत्र मुक्त्वा त्रयोऽपि स्वस्वनगरं गताः, अथ दीर्घराजा तत्र स्थितः सन् ब्रह्मराज्ञः कोष्टगारांतःपुरेषु गच्छन्नागच्छन्नेकदा चुलनीं नवयौवनां दृष्ट्वा कामरागविवशो बभूव.

चुलन्यपि दीर्घं दृष्ट्वा स्नेहवती जाता, अन्नयोरालापादिप्रसंगे जायमाने महान् कामरागो लग्नः, परस्परं संबंधो जातः, स्वकीयस्त्रीवत्स तां परिभुंक्ते, कस्यापि भयं न गणयति; लोकापवादोऽपि मुक्तः, जीर्णमंत्रिणा धनुर्नाम्नेयं प्रवृत्तिर्ज्ञाता, मनसि चिंतितं, हा हा दुष्टे- ॥ ३०५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाऽनेन दीर्घेणाऽविमृष्टं कृतं, तिसृभिरपि मित्रैः किं कृतं? यदेतस्य राज्याधिकारित्वं दत्तं; एतेनापि विरुद्धं कृतं, मित्रस्त्रिया सह व्यभिचारं सेवमानोऽप्ययं न लज्जते; इति विचार्य गृहमागत्य तेन वरधनुनाम्नः स्वपुत्रस्याग्रे सर्वमपि स्वरूपं निरूपितं, तेन गत्वा ब्रह्मदत्ताग्रे तद्गृहङ्गितं निवेदितं. तत् श्रुत्वा ब्रह्मदत्तः क्रोधारुणलोचनो जातः, पश्चाद्दीर्घराजः सन्नायामागत्य कोकिलस्त्रीकाकयोः संगमं कारयित्वा स कथयतिस्म, रे काक दुष्टबुद्धे कोकिलस्त्रिया साऽहं संगमं करोषि? एतदयुक्तं तवाचरणमहं नो सहिष्ये, इति कथयित्वा काकं स करे धृत्वा मारयति; पुनर्लोकसमक्षं कथयति य एतादृशमन्यायं मदीयनगरमध्ये करोति करिष्यति वा तमप्यहं नो सहिष्ये. एतत् श्रुत्वा दीर्घराज्ञा चुलन्या अग्रे निरूपितं. तदा चुलन्योक्तमियं बालक्रीडा, एतस्मात्किं भयं? अतः स्वस्थी भव?

एवं कियत्स्वपि दिनेषु गतेषु पुनरपि ब्रह्मदत्तेन दीर्घसमीपे हंसीबकयोः संगमं कारयित्वा पुनरपि पूर्ववत्कृतं. भयातुरेण दीर्घेण चूलन्यग्रे निरूपितं तव पुत्रेणेयं प्रवृत्तिर्ज्ञाता, अत आवयोर्निःशंकं कथं संयोगसंगमो जायते? अतस्त्वमेनं मारय? येन निर्भयमावयोर्विघ्न- ॥ ३०६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यरसास्वादानुन्नवः स्यात्. चुलन्या विचारितं, कथमहमेतादृशमकार्यं करोमि ? स्वहस्तेन स्वपुत्ररत्नमारणमयुक्तं. यत उक्तं—विषवृक्षोऽपि संवृद्धः । स्वयं छेत्तुमसांप्रतं ॥ पुनरपि दीर्घेणोक्तं, एतत्कुरु ? नो चेदलमनेन तव संगमेनेति श्रुत्वा तया चिंतितं, किमनेन पुत्रेण विषयसुखांतरायकारकेणेत्यवश्यं स मारणीयः, धिगस्तु विषयविलसितं, यत उक्तं—दिवा पश्यति नो घूकः । काको नक्तं न पश्यति ॥ अपूर्वः कोऽपि कामांधो । दिवा नक्तं न पश्यति ॥ १ ॥ पश्चाच्चुलन्या विचारितं पुत्रोऽप्ययं मारणीयो यशोऽपि रक्षणीयं चाऽतो महता महोत्सवेनैनं परिणाय्य लाक्षागृहं च कारयित्वा मध्ये सुप्तमेवैनं ज्वालयामि, यतो लोकेऽपयशो मे न नवतीत्यालोच्य तया लाक्षागृहं कारितं, सुधया च धवलितं, पश्चात्तेन सह पुष्पचूलराज्ञः पुत्री समहोत्सं परिणायिता; तत्सर्वमपि धनुमंत्रिणा ज्ञातं, मनसि चिंतितं च यदनया पापिन्या पुत्रमारणोपायः कृतोऽस्ति, परमहं रक्षोपायं करोमीति संचिंत्य तेन दीर्घराज्ञोऽग्रे गत्वा पृष्टं, हे राजन्नहं वृद्धो जातस्ततो नवतामाज्ञा नवति चेत्तदा तीर्थयात्रां करोमि, मत्पुत्रो वरधनुस्तव सेवां करिष्यतीति श्रुत्वा दीर्घराज्ञा चिंतितं दूरस्थितो ह्ययं किं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मपि विपरीतं करिष्यतीति समीप एव रक्षणीय इति मनस्यालोच्य दीर्घराज्ञोक्तं किं तीर्थ-गमनेन? अत्रैव गंगायास्तीर्थप्रायायास्तटे दानशालास्थिता दानपुण्यं कुरुध्वं? किमन्यत्र ग-मनेनेति धनुमंत्रिणापि प्रतिपन्नं. पश्चाद्गंगायास्तटे दानशालायां स्थितेन तेन लाक्षागृहात्क्रो-शद्वयं यावत्सुरंगा दापिता. वरधनुपार्श्वात्पुष्पचूलराज्ञोऽपि ज्ञापितं; यदद्य वासभुवने पुत्र्याः स्थाने सकलशृंगारालंकृता रूपवती दासी प्रेषणीया, तेनापि दासी प्रेषिता. वरधनुना प्राण-वल्लभेन मित्रेण सार्द्धं ब्रह्मदत्त आवासभुवनं प्राप्तः. दास्यपि तत्रागता, ब्रह्मदत्तश्चिंतयति म-दीया प्राणवल्लभेयं, स दासीस्वरूपं तु न जानाति; तदवसरे वरधनुना शृंगारोपरि कथाक-थनं प्रारब्धं, तच्छ्रवणरसनिमग्नमनसो ब्रह्मदत्तस्यापि नयनयोर्निद्रा नायातिस्म.

तदा मध्यरात्रिसमये सर्वेषु सुप्तेषु चुलन्या समागत्य तल्लाक्षागृहं ज्वालितं; ज्वलद्गृ-हं विलोक्य ब्रह्मदत्तेनोक्तं भो मित्र किमधुना करणीयं? तदा वरधनुर्वक्तिस्म, मित्र किमर्थं चिंतां करोषि? अस्मिन् स्थानके पादप्रहारं देहि? ततो ब्रह्मदत्तेन पादप्रहारतः सुरंगामुख-मुद्घाटितं. द्वावपि स्त्रियं मुक्त्वा पलायितौ. सुरंगाप्रांते वरधनुमंत्रिणा पवनवेगावश्वौ साज्जी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतावास्तां. द्वावपि तावारुह्य पलायितौ, पंचाशद्योजनानि गतौ; तदवसरे द्वावश्वौ श्रमातुरौ मृतौ, पादचारिणौ द्वावपि कोष्टनगरं गतौ. तत्र द्विजगृहे भोजनं कृतं, द्विजपुत्री च ब्रह्मदत्तेनोद्वाहिता. बहुषु ग्रामेषु बहुषु नगरेषु परिभ्रमन् स कुत्रापि प्रच्छन्नवृत्त्या कुत्रापि च प्रकटवृत्त्या नवनवस्त्रीपाणिग्रहणं कुर्वन् एकं वर्षाणां शतं यावत्पृथ्वीं भ्रांतः, अनुक्रमेण कांपिल्लपुरमागत्य दीर्घं दीर्घनिद्रया संयोज्य तेन निजं राज्यं गृहीतं, पश्चात् षट्खंडानि साधयित्वा स द्वादशमश्चक्री जातः, एकदा राज्यं पालयतस्तस्य पुष्पगुच्छदर्शनेन जातिस्मरणमुत्पन्नं. पूर्वभवभ्राता चित्रजीवस्तस्य प्रतिबोधनार्थमागतः, परं स न प्रतिबुद्धः, षोडशवर्षावशेषे स्वायुषि व्यतिक्रांते गोपालकनिष्कासिताक्षिगोलको ज्ञातविप्रचरित्रो द्विजानां चक्षूंषि निष्कासयन् रुद्ध्यानतो बहून्यशुभकर्माणि समर्ज्य सप्तशतवर्षाण्यायुः प्रपूर्य सप्तम्यां नरकावनौ अप्रतिष्ठानकप्रस्तटे उत्कृष्टस्थितिकत्वेनोत्पन्नः, अयं सर्वोऽपि संबंधः ' नवएससहस्सेहिंवि ' इति गाथोक्तविवरणतोऽवसेयः, एवं मातृस्नेहः कृत्रिमो ज्ञेय इत्युपदेशः ॥ इति द्विचत्वारिंशत्तमः संबंधः ॥ ४२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—सव्वंगोवंगविगत्तणाइं । जगरुणाविहेरुणाइं य ॥ कासीयरज्जतिसिइ । पुत्ताण पिआ कणयकेऊ ॥ ४६ ॥ व्याख्या—' सव्वंगो इति ' सर्वेषामंगोपांगानां ' विगत्तणाइं इति ' छेदनानि चकार, छिन्नांगोपांगानां राज्याधिकारित्वं न भवतीति बुद्ध्या ' जगरुणा इति ' कदर्थना ' विहेरुणाइं इति ' विविधा यातनाः पीडाः ' कासीय इति ' अकार्षीत्. किमर्थमंगच्छेदादिकं चकार? राज्यतृषितो राज्यतृष्णापरवशः, केषामंगच्छेदादिकं? पुत्राणां सुतानां, कः? पिता जनकः कनककेतुनामा राजा, राज्यसुखांधलेन कनककेतुना राज्ञा पुत्राणामंगानि छिन्नानीत्यर्थः, अतः कृत्रिमोऽयं पितृसंबंधः ॥ ४६ ॥ विस्तरतः संबंधः कथानकादवसेयः, तत्स्वरूपं चेदं—

तेतलिपुरे नगरे कनककेतुनामा नृपः, तद्गृहे पद्मावती पट्टराज्ञी, तस्य तेतलिपुत्रनामा मंत्री, तस्य पोट्टिलाम्नी प्रिया, साऽतीववल्लभा, अथ राज्यसुखं पालयतः कनककेतोर्गृहे पुत्रो जातः, तदा राजा चिंतयति, अयं पुत्रो वृद्धो जातः सन्मदीयं राज्यं गृहीष्यतीति भयेन स तस्य हस्तच्छेदं चकार; द्वितीयः पुत्रो जातस्तस्य पादच्छेदं चकार. अनया रीत्या कस्यचिदंगच्छे- ॥ ३१० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दं कस्यचिदंगुलिच्छेदं कस्यचिन्नक्रच्छेदं कस्यचित्कर्णच्छेदं कस्यचिदक्षिच्छेदं च चकार. एवं सर्वेऽपि पुत्रास्तेन विखंडितांगाः कृताः, एवं बहुकाले गते पुनरपि पद्मावती सुस्वप्नसूचितं गर्भं दधौ. तदवसरे मंत्रिस्त्रिया पोट्टिलानाम्न्यापि गर्भो धृतः, मंत्रिणमाकार्य राज्ञ्या कथितं मया सुस्वप्नसूचितो गर्भो धृतोऽस्ति, अतो जन्मसमये स त्वद्भिः प्रच्छन्नवृत्त्या पालनीयः, यथा स राज्याधिकारी भवति. भवतामपि स आधारो भविष्यतीति मंत्रिणा प्रतिपन्नं; समये पुत्रो जातः, प्रच्छन्नवृत्त्या मंत्रिणा स स्वकीयस्त्रियै पोट्टिलायै समर्पितः, तदवसरे पोट्टिलाप्रसूता पुत्री राज्ञ्यै समर्पिता. पश्चाद्दास्या ज्ञापितं राज्ञे पुत्रीजन्मस्वरूपं.

अथ मंत्रिगृहे वृद्धिं गच्छतो राजकुमारस्य कनकध्वज इति नाम दत्तं. क्रमेण स यौवनं प्राप्तः, एतस्मिन्नवसरे कनकेतुर्नृपः परलोकं गतः, सर्वेऽपि सामंताद्याश्चिंतातुरा जाताः, राज्यं कस्य समर्पयिष्यामः, तदवसरे मंत्रिणा सर्वमपि राज्ञीस्वरूपं निरूपितं. कनकध्वजं राजांगजं ज्ञात्वा सर्वेऽपि हृष्टाः, सर्वैरपि महताडंबरेण स राज्ये स्थापितः कनकध्वजकुमारः, कनकध्वजराज्ञापि मंत्रिणं बहूपकारिणं ज्ञात्वाऽतीवसन्मानं तस्मै दत्तं. महतानंदेन राज्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पालयतस्तस्य कियानपि कालो गतः, तदवसरे मंत्रिणो गृहे पोट्टिला स्त्री पूर्वं प्राणतोऽप्यधिकापि केनचित्कर्मदोषेणाऽनिष्टा जाता; पृथक् शय्या कृता. पोट्टिलामनसि दुःखमुत्पन्नं. यतः—आज्ञाभंगो नरेंद्राणां । गुरूणां मानमर्दनं ॥ पृथक् शय्या च नारीणा—मशस्त्रवधमुच्यते ॥ १ ॥ भर्तुरपमानपीडितया तया विशेषतो दानादिधर्मकृत्यं प्रारब्धं. तदवसरे पोट्टिलागृहे एका सुव्रताभिधाना साध्वी आहारार्थं समागता. सन्मुखं गत्वा शुद्धाहारेण प्रतिलाभयित्वा करौ मुकुलीकृत्य पोट्टिलया पृष्टं भो भगवति मातस्तादृशं किमपि कुरु? येन मे भर्त्ता वशीभवति; परोपकार एव परमं पुण्यं. यत उक्तं—दो पुरिसे धरइ धरा । अहवा दोहिं विधारिया धरणी ॥ नवयारे जस्स मइ । नवयारो जं न वीसरइ ॥ १ ॥

इति पोट्टिलाभाषितं श्रुत्वा सुव्रता वदति, किमुक्तं त्वया? एतादृशी प्रवृत्तिरुत्तमस्त्रिया कर्तुं न युक्ता, यतो मंत्रादिना पत्युः पारवश्यकरणं महते दोषाय. अथवाऽस्माकमपि गृहीतसर्वविरतीनां न घटते चैतत्कार्मणादिकरणं, त्वं यद्भोगार्थं वशीकरणं कारयसि ते भोगाः सांसारिकदुःखहेतवः किंपाकफलसदृशा विषयाः, आपातरम्याः परिणामेऽतिदारुणाः, चिर- ॥ ३१२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कालं सेविता अपि न तृप्तिहेतवः, अतोऽमुं विषयाभिलाषं विहाय कुरु जिनोदितं शुद्धधर्मं ? येन सर्वसिद्धिः स्यात्. तया प्रतिपन्नं, भर्तुराज्ञां गृहीत्वा चारित्रं गृहीतं, भर्त्रापि मुक्तक्रोधेनोक्तं धन्या त्वमेव यया धर्मो गृहीतः, अतो देवीभूतया मत्प्रतिबोधनार्थमागंतव्यं, तयापि प्रतिपन्नं, भूमौ विजहार, चिरकालं निरतीचारं चरणं प्रपाल्य सा देवत्वेनोत्पन्ना. अवधिज्ञानेनालोक्य पूर्वभवभर्तारं प्रतिबोधयितुमागतो देवः, बहुभिरप्युपदेशैः स न प्रतिबोधं प्राप्तस्तेतलिपुत्रः, ततो देवेन चिंतितं राज्यमोहेनायं न प्रतिबोधं प्राप्नोति; ततो देवेन राज्ञश्चित्तविपर्यासः कृतः, मंत्रिणि सभायामागते पराङ्मुखीभूय स्थितो राजा; मंत्रिणो दर्शनं न दत्तं. तेतलिपुत्रेण चिंतितं राजाऽतीव ममोपरि रुष्टः, दुष्टेन केनापि किमपि मदीयछिद्रं कथितं विलोक्यते. अतो न जाने किमयं करिष्यति ! केन वा मरणेन मां हनिष्यति ! तत आत्मघातं कृत्वा मरणमेव श्रेय इति विचिंत्य तेन कंठे पाशो दत्तः, देवमाहात्म्यात्स त्रुटित्वा गतः, पुनर्विषं भक्षितं, तदप्यमृतवज्जातं. पुनः खड्गेन शिरश्छेत्तुमारब्धं तदा देवेन खड्गधारा बद्धा, पुनरग्निमध्ये प्रविष्टो जलं जातं. एवं सर्वेऽपि मरणोपायास्तेन देवेन निष्फलीकृताः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पश्चात्प्रकटीभूय पोट्टिलादेवो बभाषे, एतत्सर्वं मया कृतं, किमर्थमात्मघातं करोषि? चारित्रं गृहाण? तत् श्रुत्वा तेतलिपुत्रप्रधानेन चारित्रं गृहीतं, राजा समागत्य चरणयोर्निपतितः, बहुकालं भूमौ विहृत्य चतुर्दश पूर्वाण्यधीत्य घातिकर्मक्षयतः केवलमासाद्य मोक्षं गतः, इत्थं पिता पुत्रस्यापि राज्यलोभेन विडंबनां करोतीति पितुरपि स्नेहः कृत्रिम एवेत्युपदेशः ॥ इति कनककेतुसंबंधस्त्रिचत्वारिंशत्तमः ॥ ४३ ॥

॥ मूलम् ॥—विसयसुहरागवसउ । घोरो भायावि भायरं हणइ ॥ आहाविउ वहट्ठं । जह बाहुबलिस्स भरहवई ॥ ४७ ॥ व्याख्या—' विसयेति ' विषयसुखस्य यो रागस्तस्य वशतो रागपारवश्यं प्राप्त इत्यर्थः, घोरो घोररूपो गृहीतशस्त्रत्वात्. भ्रातापि बंधुरपि भ्रातरं हंति, आधावितः सन्मुखं धावितः, किमर्थं? वधार्थं हननार्थं ' जह इति ' यथा बाहुबलेर्वधार्थं भरतचक्रवर्त्ती धावित इति संक्षेपतो दृष्टांतः, विस्तरस्तु पूर्वमुक्तत्वान्नात्रोक्तः ॥ ४७ ॥

॥ मूलम् ॥—भज्जावि इंदियविगार–दोसउ नडिया करेइ पइपावं ॥ जह सो पएसिराया । सूरिअकंताइ तह वहिउ ॥ ४८ ॥ व्याख्या—' भज्जावि इति ' भार्यापि स्त्रीरपींद्रि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यविकारदोषविडंबिता सती करोति पतिहिंसारूपं पापं. अत्र दृष्टांतमाह—यथेति दृष्टांते, स प्रसिद्धः प्रदेशिनामा राजा सूरिकांतान्निधानया स्वकीयस्त्रिया तथा विषदानादिप्रकारेण ' वह्नि इति ' हतः, तदाऽन्यस्याः प्राकृतस्त्रियाः किं पृष्टव्यमित्यर्थः, अत्रापि संबंधः पूर्वोक्त एवाऽवसेयः ॥ ४८ ॥

॥ मूलम् ॥—सासयसुक्खतरस्सी । नियअंगसमुब्भवेण पियपुत्तो ॥ जह सो सेणियराया । कोणियरन्ना खयं नीउ ॥ ४९ ॥ व्याख्या—' सासय इति ' शाश्वतसौख्यं निर्वाणसुखं, तस्मिन्विषये त्वरित उत्सुक एतादृशो धर्मवानपीत्यर्थः, निजं स्वकीयमंगं तस्मात् समुद्भवः समुत्पन्नः, एतादृशेन प्रियपुत्रेण वल्लभपुत्रेण, प्राकृतत्वात्तृतीयार्थे प्रथमा, ' जह इति ' यथा स प्रसिद्धः श्रेणिकनामा भगवद्वचनरक्तः क्षायिकसम्यक्त्वधारी, कोणिकराज्ञा स्वपुत्रेण क्षयं नीतो विनाशनं प्रापितः, अतः सूतं पुत्रस्नेहेनापीत्युपदेशः, विस्तरः कथानकादवसेयः, अत्र कोणिकदृष्टांतो निरूप्यते—

मालाटी. ॥ ३१५ ॥

। राजगृहं राजगृहं प्रधानं । पुरं प्रसिद्धन्यजनाभिपूर्णं ॥ श्रीश्रेणिकस्तत्र करोति राज्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। राजाधिराजो जिनभक्तिरक्तः ॥ १ ॥ सद्शीललावण्यभरा वरेण्य–रूपद्युतानल्परतिस्मयाशा ॥ श्रीचेल्लणाह्वा वरपट्टराज्ञी । बभूव तस्याऽमलगौरवर्णा ॥ २ ॥ श्रीश्रेणिके पूर्वनिबद्धवैरो । जीवः कृताऽनल्पतपाः किलैकः ॥ गर्भेऽवतारं खलु चिल्लणाया । दधौ यथा शुक्तिपुटे च मुक्ता ॥ ३ ॥ गर्भानुभावादथ चिल्लणाया । मासे तृतीयेऽशुभदोहदोऽभूत् ॥ प्राणेशहृन्मांसवसादनस्य । जाता ततः क्षीणतरा नितांतं ॥ ४ ॥ पृष्टा नृपेणाग्रहपूर्वकं सा–ऽचख्यौ स्वकीयं कुविकल्पजातं ॥ श्रुत्वा स्थिरत्वं भज पद्मनेत्रे । भूपोऽवदत्तामिति कामरागात् ॥ ५ ॥ गत्वाऽभयायाऽवददादरेण । प्रपंचतः पूरितवानिमं सः ॥ बध्ध्वान्यमांसं हृदयोपरिष्टा–त्कृपाणपुत्र्या परिकर्त्तनेन ॥ ६ ॥ क्रमेण पुत्रं सुषुवे कृशांगी । मुमोच जीवंतमशोककक्षे ॥ दासीमुखात्स्नेहवशेन लात्वा । समर्पयामास नृपः प्रियायै ॥ ७ ॥ अशोकचंद्रोऽयमिति प्रमोदा–त्सुतान्निधानं प्रथमं दधौ सः ॥ दष्टांगुलीकश्चरणायुधेन । तदर्भकस्तेन च कोणिकोऽभूत् ॥ ८ ॥ तदंगुलीवेदनया स्तनंधयो । रुरोद तीव्रं किल मुक्तकंठं ॥ मुखेंगुलिस्थापनतश्चकार । समाधिवंतं निजनंदनं नृपः ॥ ९ ॥ व्यतीतबाल्यः कृतराजपुत्री–पाणिग्रहो वैषयिकं सुखं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सः ॥ भुंक्ते द्वितीयावथ तस्य बंधू । हल्लो विहल्लश्च सुरोपमानौ ॥ १० ॥

दिव्यानि सत्कुंडलहारहस्ति–वस्तूनि भूपोऽर्पयतिस्म ताभ्यां ॥ समत्सरः कोणिकराड् गृहीत्वा । तं पंजरे काष्टमये न्यधत्त ॥ ११ ॥ करोति पीडां किल सोऽवनीपो । नाभीप्रहारैर्जनकस्य नित्यं ॥ तदा सुतं कोणिकराजपत्नी । पद्मावती वै सुषुवे मनोज्ञं ॥ १२ ॥ द्विवार्षिकं कोणिकभूमिपालः । संस्थापयित्वा तनयं निजांके ॥ भुंजन्वरान्नं शिशुमूत्रमिश्रं । मनाग् जुगुप्सां न चकार मोहात् ॥ १३ ॥ निवेदितं तन्निजमातुरंतिके । सुतप्रियत्वं मम कीदृशं वद ॥ श्रुत्वाऽन्यधात्क्रूरमते किमत्र । स्नेहः पितुस्ते सुतरामभूत्पुरा ॥ १४ ॥ इदंतमाकर्ण्य निजं जनन्या । मुखेन निंदन्निजकर्म निंद्यं ॥ कुठारमादाय ययौ च शीघ्रं । दुःपंजरं भंक्तुमनाः प्रगे सः ॥ १५ ॥ आयांतमेवं प्रविलोक्य भीतः । श्रीश्रेणिकस्तालपुटप्रयोगात् ॥ आयुः प्रपूर्यावनिमाप पूर्वी । सम्यक्त्वलाभात्प्रथमं निबद्धं ॥ १६ ॥ दृष्ट्वा गतासुं जनकं नरेशो । रुदन् पितुः प्रेतविधिं चकार ॥ सामंतमुख्यैर्बहुभिः प्रयोगैः । श्रीकोणिकोऽकारि च वीतशोकः ॥ १७ ॥ निजप्रियाप्रेरितमानसोऽथ । दिव्यत्रयं याचितवान्नरेशः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्तो विहत्तश्च गृहीतसारौ । मातामहस्यांतिकमीयतुस्तौ ॥ १८ ॥ बलोऽतः को-णिकराडू बहूनि । चकार युद्धानि धृताभिमानः ॥ क्रमेण षष्टीं पृथिवीं जगाम । पापोर्जि-तारंभरतः परायुः ॥ १९ ॥ एवं पुत्रस्नेहोऽपि कृत्रिम एवावसेयः ॥ इति चतुश्चत्वारिंशत्त-मः संबंधः ॥ ४४ ॥।

॥ मूलम् ॥—लुद्धा सकज्जतुरिया । सुहिणोवि विसंवयंति कयकज्जा ॥ जह चंदगुत्त-गुरुणा । पव्वयनंदा घाइन्न राया ॥ ५० ॥ व्याख्या—' लुद्धा इति ' लुब्धा लोलुपाः स्वकार्ये स्वकीये कृत्ये त्वरिताः सत्वराः ' सुहिणोवि इति ' स्वजनमित्राण्यपि विसंवदंति विपरीता वदंति, कृतकार्या विनिर्मितस्वकीयकृत्याः, यथेति दृष्टांतोपन्यासे, चंद्रगुप्तराज्ञो गुरुणा पूज्ये-न चाणाक्यनाम्ना मंत्रिणेत्यर्थः, पर्वतकनामा घातितो मारितो राजा. यथा चाणाक्येन स्व-मित्रं पर्वतनामा राज्यलुब्धेन मारित इति संक्षेपतो दृष्टांतः ॥ ५० ॥ अत्र कथानकं—

चणकनाम्नि ग्रामे चणीनामा ब्राह्मणो वसति, तद् गृहे चणेश्वरीत्यभिधाना भामिनी, द्वावपि जैनौ, जिनभक्तिरक्तौ, एकदा तयोरेकः सदंतः पुत्रो जातः, तस्य चाणाक्य इति ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

म दत्तं. एतस्मिन्नवसरे तद्गृहे साधवः समागतास्तदा तमर्भकं साधुचरणयोः पातयित्वा चणिभट्टेन पृष्टं भगवन् कथयत किं कारणमस्मद्गृहे सदंतोऽयं पुत्रो जातः? किं तस्य माहात्म्यं भविष्यति? साधुनोक्तं स राजा भविष्यति. तदा मातृपितृभ्यां विमृष्टमयं पुत्रश्चिरं राज्यं भुक्त्वा तन्निमग्नमना नरकं यास्यति, इति ज्ञात्वा तदंता घर्षिताः, पुनरपि पृष्टं, साधुनोक्तं दंतघर्षणादयं राज्ञो मंत्री भविष्यति. कंचिदग्रेसरं विधाय स्वयं राज्यं पालयिष्यति. पश्चाच्चाणाक्यः कालांतरे सर्वविद्याविशारदो जातः, यौवनं प्राप्तः, नृत्तमद्विजपुत्रीकरपीडनं विधाय स सांसारिकसुखान्युपभुंक्ते. एकदा चाणाक्यपत्नी भ्रातृविवाहोपरि पितृगृहे गता, तत्रापि सा सामान्यवेषधनरहितत्वादिना तादृशं सन्मानं न लेभे. अन्या अपि भगिन्यस्तत्रागतास्तासां बह्वाभरणशुभवेषधारित्वादिना भ्रात्रा बहुमानं दत्तं. अहो धनमूलमिदं जगत्. यदुक्तं—जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतां। शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना॥ शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं। येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे॥ १॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अन्यासां भगिनीनां भ्राता सर्वं कार्यादिकं पृच्छति, परं चाणाक्यपत्न्याः स्वभगिन्याः सन्मुखमपि नावलोकयति. ततः खेदमावहंती गृहकोणे तिष्ठंती सा चिंतयति धिग्मे निर्धनाया जीवितं! यतो बंधुनापि पंक्तिभेदो विहितः, ततो विवाहकृत्यानंतरं पश्चादुद्विग्नमनाः सा स्वगृहमागता. चाणाक्येन पृष्टं किमर्थं दुर्मना विलोक्यसे? तया सर्वमपि भ्रातृस्वरूपं निवेदितं. चाणाक्यो मनसि चिंतयति निर्धनाया मदंगनाया भ्रात्राप्यादरो न दत्तः, ततोऽहं धनमर्जयित्वा स्त्रिया मनोरथं पूरयिष्यामीति संचिंत्य स देशांतरे गतः, परिभ्रमन् स पाडलीपुरे नंदराजानं याचयितुमागतः, तत्र राजसभायां राज्ञो भद्रासने निविष्टः, दास्योक्तं भो द्विज एनं राजभद्रासनं मुक्त्वा द्वितीयमासनमलंकुरु? तदा चाणाक्येनोक्तमत्र मदीयं कमंडलु स्थास्यति, इति कथयित्वा तत्र कमंडलु स्थापितं. तृतीयमासनं दर्शितं, तेनोक्तमत्र मदीयो दंडः स्थास्यतीति कथयित्वा तत्र तेन दंडो निहितः, चतुर्थमासनं दर्शितं, तत्र माला मुक्ता, पंचममासनं दर्शितं, तत्र यज्ञोपवीतं मुक्तं, एवं तेन पंचाप्यासनान्यवरुद्धानि.

तदा क्रुद्ध्या दास्या प्रोक्तं कोऽपि महान् धृष्टो विलोक्यसे, यत्पूर्वं भद्रासनं न जहासि,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवीनं नवीनं च गृह्णासि. दास्या पादप्रहारेण हतः, तदा पादाहतसर्प इव स सक्रोधं समुत्थाय वदतिस्म नो दुष्टकर्मकारिके! त्वमद्य मामवगणयसि, परं यदि परंपरागतं नंदराज्यमुद्धाप्य नवीनमत्र स्थापयामि तदा ममाग्निधानं सत्यमित्युक्त्वा स नगराद्बहिर्निर्गत्य मनसि चिंतयति, पूर्वं साधुनाप्युक्तं वर्त्तते यदयं बालो बिंबांतरितो राजा भविष्यतीति. अतोऽहं राज्ययोग्यं कमपि पुरुषं विलोकयामीति चिंतयित्वा स बहूनि ग्रामनगराण्यवलोकयन् नंदराज्ञो मयूरपालकग्राममागतः, तत्र परिव्राजकवेषेण भिक्षार्थमटति. तत्र मयूरपालकस्त्रिया गर्भमाहात्म्येन तृतीयमासे चंद्रपानदोहदः समुत्पन्नः, तं केनापि पूरयितुमशक्यं ज्ञात्वा भर्तुरप्यग्रेऽकथयंती सा दुर्बलांगी जज्ञे. भर्त्रा साग्रहं पृष्टा यथार्थं बभाषे. मयूरपालकोऽपि चाणाक्यं विलोक्य दोहदपूरणोपायं पप्रच्छ, तदा तेनोक्तं यद्येनं गर्भस्थितं पुत्रं ममार्पयत तदैतद्दोहदपूरणोपायं करोमि, नो चेद्दोहदपूरणं विना स्त्रियो गर्भस्यापि च विनाशो भविष्यतीति श्रुत्वा तेन पुत्रार्पणं पंचसाक्षिकं प्रतिपन्नं.

पश्चाच्चाणाक्येनैकं तृणगृहं कारितं, उपरि चैकं छिद्रं रक्षितं; तदुपरि पिधानमादायैकः पु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रुषः स्थितः, मध्ये च गर्भवती स्थापिता. यदा पूर्णिमाचंद्रो निशीथे नभोमध्यमागतस्तदा दुग्धघृतं स्थालमादाय तदग्रे ढौकितं. स्थाल्यां चंद्रः प्रतिबिंबितस्तदा चाणाक्येनोक्तं भो भाग्यवति? त्वदीयभाग्येनात्र चंद्रः समागतः, ततः सहर्षमेनं पिबेत्युक्तया तया चंद्रपानं कर्तुमारब्धं. यथा यथा सा दुग्धपानं करोति तथा तथोपरिस्थितो मनुष्यः पिधानेनोपरिवर्त्तिनं छिद्रमाच्छादयति. संपूर्णस्थालस्थितदुग्धप्रतिबिंबितचंद्रपाने संपूर्णच्छिद्राच्छादने च तदीयमनोरथः संपूर्णो जातः, तया चिंतितं मया चंद्रपानं कृतं; एवं तदीयमनोरथमापूर्य राज्याधिपतिरयं भविष्यतीति निश्चित्य धातुविद्याशिक्षार्थं स गतः, देशाटनं कुर्वन् कियता कालेन स स्वर्णसिद्धिं प्राप्तः, अथ तदवसरे तत्कुक्षौ पुत्रो जातस्तस्य च चंद्रगुप्त इति नाम दत्तं. क्रमेण सोऽष्टवार्षिको जातस्तदा तद्ग्रामीणैः समानवयोभिर्बालैः सह स क्रीडां करोति. स्वयं राजा भवति, कस्यचिद्ग्रामं ददाति, कस्यचिद्देशं ददाति, कस्यचिद्दुर्गाधिपत्यं ददाति,

तदवसरे पर्यटन् चाणाक्योऽपि तत्रागत्य विलोकितेस्म याचितेस्म च. भो राजन् सर्वेषां मनोऽभीष्टं ददासि तर्हि ममापि किमप्यभीष्टं देहीति याचितश्चंद्रगुप्तो वदतिस्म, गृहाणै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ताः सर्वा अपि गावो मया तव समर्पिताः, इत्याकर्ण्य चाणाक्यो ब्रूतेस्म परकीया एता गावो मया कथं गृहीतुं शक्यंते इति. चंद्रगुप्तेनोक्तं यः समर्थस्तस्येयं पृथ्वीति. चाणाक्येन पृष्टमन्येषां बालानां यत्कस्यायं बालः? तैरुक्तं परिव्राजकाय समर्पितोऽयं चंद्रानंदोद्दोद्भवश्चंद्रगुप्तान्निधानो बालः, एतदाकर्ण्य चाणाक्येनोक्तं वत्स चेद्राज्यवांछा तदाऽागच्छ मया साकं, राज्यं तवार्पयामीति चंद्रगुप्तं गृहीत्वा स गतः, धातुविद्यया द्रव्यं विधाय, स्वल्पदलं मेलयित्वा, पाटलीपुत्रं च वेष्टयित्वा स स्थितः, नंदराज्ञा महता दलेन पराजितं तत्सैन्यं, तदा चंद्रगुप्तं गृहीत्वा चाणाक्यः पलायितः, नंदराज्ञा तं गृहीतुं पश्चात्सैन्यं प्रेषितं; तन्मध्यादेकोऽश्ववारः पश्चादासन्नमागतः, तदा चंद्रगुप्तं सरसि निधाय चाणाक्यः स्वयं ध्यानयुतो योगी भूत्वा स्थितः, तावताऽश्ववारेणागत्य पृष्टं भो योगीश्वर! त्वया नंदराज्ञो वैरी चंद्रगुप्तो गच्छन् क्वापि दृष्टः? तदा चाणाक्येनांगुलिसंज्ञया सरःस्थितोऽसौ दर्शितः, तं गृहीतुमश्वाद्युत्तीर्य वस्त्रशस्त्राणि च मुक्त्वा यावत्स नंदसेवको जले प्रविशति तावच्चाणाक्येनोड्डाय तद्धिरः खड्गेन छिन्नं. पश्चाच्चंद्रगुप्तमाकार्य तदश्वोपरि चाऽारोहयित्वा सोऽग्रे चलितः, मार्गे स चंद्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गुप्तं पृष्टवान् वत्स मया यदा त्वमंगुलिसंज्ञया दर्शितस्तदा त्वया किं विमृष्टं? तेनोक्तं नो तात मया विचारितं यत्समीचीनमेव कृतं भविष्यति श्रीतातपादैः, इति श्रुत्वा चाणाक्येन चिंतितं एष सुशिष्यवदाज्ञाकारी भविष्यति. एवं चिंतयन्नग्रे गच्छतोस्तयोः पृष्ठतो द्वितीयोऽश्ववारः समागतः.

पुनरपि तत्रैव तं सरसि संस्थाप्य स्वयं च वस्त्रक्षालनं कुर्वंतं रजकं भाषयित्वा रजकीभूय वस्त्रक्षालनं करोतिस्म. एतदवसरेऽश्ववारेणागत्य पृष्टं, पूर्ववदुक्तं च, तत्रैव तस्यापि शिरश्छिन्नं. अथ तौ द्वावपि द्वावश्वावारुह्याग्रतश्चलितौ, मध्याह्ने चंद्रगुप्तस्य बुभुक्षा लग्ना; तदा चंद्रगुप्तं ग्रामाद्बहिर्मुक्त्वा स ग्राममागतः, तदानीं दध्योदनं भुक्त्वाऽागच्छन् सन्मुखं द्विजो मिलितः, चाणाक्येन पृष्टं भो भद्र किं भवता भक्षितं? तेनोक्तं दध्योदनं; चाणाक्येन चिंतितं ग्रामे भिक्षार्थं भ्रमतो मे वेला भविष्यति, इतः पृष्ठतः समागत्य नंदभटा मैनं मारयंत्विति विचार्य ब्राह्मणोदरं विदार्य दधिकरंबेन पात्रं भृत्वा चंद्रगुप्तं भोजयित्वा संध्यायां तौ कुत्रापि ग्रामे गतौ, तत्र भिक्षुकवेषेण भिक्षार्थं कस्या अपि स्थविराया गृहे गतः, तया तदवसरे बा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लानामुष्णा रब्बा परिवेषिता, तेषामेकेन स्थालीमध्ये हस्तो निक्षिप्तो ज्वलितो रोदितुं लग्नो, वृद्धयोक्तं धिक् त्वां चाणाक्यवल्किं मूर्खो ज्ञवसि? तद्वचनं श्रुत्वा गृहागतेन तेनोक्तं कथय ज्ञो मातः कथं चाणाक्यो मूर्खो जातः? तयोक्तं यदग्रेतनानि पार्श्वात्यानि पार्श्वानि च ग्रामनगराणि, तेषां साधनं विना स पाटलीपुत्रं गतो ज्ञग्नः परिभ्रमति. तथैवायं मत्पुत्रोऽपि पार्श्वस्थितां शीतलां विहाय मध्यस्थितोष्णरब्बायां हस्तप्रक्षेपतो ज्वलितः सन् रोदिति. वृद्धोक्तां बुद्धिं चेतसि निधाय स हिमवत्कूटं गतः, तत्र च पर्वतान्निधेन राज्ञा सह मैत्रीं चकार. कियत्स्वपि दिनेषु गतेषु पर्वतराज्ञोऽर्द्धराज्यं प्रतिश्रुत्य बहुदलं च मेलयित्वाऽग्रतः पार्श्वतश्चाऽनेकान् देशान् साधयित्वा स पाटलीपुत्रमागतः, नंदराज्ञा सार्द्धं महद्युद्धं लग्नं. ज्ञग्नेन नंदराज्ञा धर्मद्वारं मार्गितं, पश्चादेकरथेन स्वकलत्रपुत्रीसहितः स्वल्पं सारधनं लात्वा निर्गतो नंदः, तदा नगरं प्रविशतश्चंद्रगुप्तस्य रूपं दृष्ट्वा व्यामोहमापन्ना रथस्थिता नंदपुत्री, नंदेन तद् ज्ञातं, चंद्रगुप्तोपरि पुत्र्याः स्नेहं दृष्ट्वा रथादुत्तार्य मुक्ता. सा गत्वा चंद्रगुप्तरथे चटिता. तस्मिन् समये रथस्य नवारका ज्ञग्नाः, चंद्रगुप्तेनोक्तं ज्ञो जनक! नगरप्रवेशसमयेऽपशकु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमेतत्; चाणाक्येनोक्तं हे वत्स शुभशकुनमेतत्. यश्चास्य नवारका भग्नास्ततो नवकुलवंशान् यावत्तव राज्यं स्थिरं भविष्यति. नगरमागत्य चंद्रगुप्तेन परिणीता नंदपुत्री, पश्चाद्राजमंदिरांतरेका विषकन्या नंदेन मुक्ताऽासीत्, तामनुमानतो दोषदुष्टां विज्ञाय चाणाक्येन पर्वतराजः परिणायिता, तदंगस्पर्शतः पर्वतराजः शरीरे विषव्याप्तिर्जाता. चंद्रगुप्तेनोक्तमेतत्साहाय्याद्राज्यं गृहीतमयं च नः सुहृन्म्रियते, चिकित्सां कुर्मः, चाणाक्येनोक्तमलं, विनौषधं व्याधिर्याति. इत्थं कार्यं कृत्वा चाणाक्येन म्रियमाणोऽपि सुहृदुपेक्षितः पर्वतनामा, ततः कृत्रिम एवायं मित्रस्नेहः ॥ इति चाणाक्यसंबंधः पंचचत्वारिंशत्तमः ॥ ४५ ॥

॥ मूलम् ॥—नियया वि नियय कज्जे । विसंवयंतंमि हुंति खरफरसा ॥ जह रामसुन्नूमकय । बंभखत्तस्स आसि खय ॥ ५१ ॥ व्याख्या—' नियया इति ' निजका अपि स्वकीया अपि संबंधिन इति यावत्. निजकार्ये स्वकीयकृत्ये ' विसंवयंतंमित्ति, विघटमाने सति, तेऽपि ' हुंति शब्देन ' भवंति. कीदृशाः खरा रौद्रकर्मकर्त्तारः ' फरुसा इति ' कर्कशवक्तारः, एतादृशा भवंति. यथेति दृष्टांतोपन्यासे रामेण परशुरामेण, सुभूमेनाऽष्टमचक्रवर्त्तिना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च कृतो निर्मितो ब्राह्मणस्य कृय आसीत्, परशुरामकृतः क्षत्रियकृय आसीत्, सुभूमचक्रवर्त्तिकृतश्च ब्राह्मणकृय इत्यर्थः ॥ ५१ ॥ संक्षेपतोऽत्र निदर्शनं तयोर्लिख्यते—

सुधर्मान्निधाने देवलोके द्वौ मित्रदेवौ, एको नाम्ना विश्वानरो द्वितीयो धन्वंतरिश्च. पूर्वो जैनो द्वितीयश्च तापसभक्तः, तयोः परस्परं धर्मवार्त्तां कुर्वतोः स्वस्वधर्मव्याख्याने क्रियमाणे धर्मपरीक्षार्थं तौ मृत्युलोकमागतौ. तदवसरे मिथिलायाः स्वामी पद्मरथो राजा राज्यं विहाय श्रीवासुपूज्यमुनिचरणांतिके चारित्रं गृहीतुं गच्छति. तं नविनभावचारित्रिणं विलोक्य जैनदेवो बभाषे, प्रथमत एतस्य परीक्षा क्रियते, पश्चात्त्वदीयतापसानां परीक्षां करिष्यावः, पश्चाद्भावचारित्रिणो निष्क्रांतमटतस्तस्याऽनेका रसवत्यस्ताभ्यां दर्शिताः, परं स भावसाधुः सत्त्वान्न चलितः, पश्चाद् द्वितीयवीथ्यामार्गे गच्छतस्तस्य साधोः पुरतो मार्गे निरंतरा मंडुक्यो विकुर्विताः, पश्चाद्बलन भूमौ च तीक्ष्णाः कंटका विकुर्विताः, तदा पद्मरथो भावमुनिर्मंडुकीमार्गं त्यक्त्वा कंटकभूमौ चलितः, कंटकाश्चरणे विध्यंति, ततो रुधिरधारा निपतति; महावेदनां स प्राप्नोति, परं न मनागपि खेदभागभूत्. ईर्यासमित्या चलन् लवलेशतोऽपि स

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न चुक्कौन्न. ततस्तृतीयवारं नैमित्तिकीन्नूय करौ मुकुलीकृत्य विनयपूर्वकं देवो वदतिस्म. न्नगवन् यूयं दीक्षां गृहीतुं गन्नथ, परमहं निमित्तबलेन जानामि यन्नवतामायुरद्यापि न्नूरि वर्त्तते, यौवनं वयश्च, ततोऽधुना राज्यस्थितो विविधान् न्नोगान् न्नुंक्ष्व? वृक्त्वे च चारित्रग्रहणं वरं. क्व पुनरिमे सरसा विषयस्वादाः? क्व पुनर्वालुकाकवलवद्विरसोऽयं योगमार्गः? न्नावसाधुनोक्तं न्नव्यं, यदि प्रचुरं ममायुस्तदा बहून् दिवसान् यावदहं चारित्रं पालयिष्यामि, महान् मे लान्नश्च.

अथ च यौवने एव धर्मोद्यमो विधेयः, यदुक्तमागमेऽपि—जरा जाव न पीलेइ । वाही जाव न वड्ढइ ॥ जावेंदिया न हायंति । ताव सेयं समायरे ॥ १ ॥ जराग्रस्तस्य क्व धर्मकरणोद्यमः? इंद्रियाणां हीनबलत्वात्. यदुक्तं—दंतैरुच्चलितं धिया तरलितं पाणिंद्रिया कंपितं । दृग्न्यां कुड्मलितं बलेन लुलितं रूपाश्रिया प्रोषितं ॥ प्राप्तायां यमन्नूपतेरिह महाधात्र्यां जरायामियं । तृष्णा केवलमेककैव सुन्नटी हृत्पत्तने नृत्यति ॥ १ ॥ इत्यादि तस्य दृढतां विलोक्य देवौ हृष्टौ तत्प्रशंसां कर्त्तुं लग्नौ. पश्चाज्जैनदेवेनोक्तं, दृष्टं जैनानां स्वरूपं? अधु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ना तापसपरीक्षां कुर्वः, इत्युक्त्वा चलितौ, वनं गतौ, तत्रैको जीर्णो जटाधारी तीव्रं तपस्तप्यन् ध्यानाधिरूढो यमदग्निनामा तापसो दृष्टः, तत्परीक्षायै चटकचटकिकयोः स्वरूपं कृत्वा ततश्मश्रुणि कुलायं बध्ध्वा तौ स्थितौ. तत्र स्थितश्चटको मनुष्यभाषया प्रोवाच, भो बाले त्वमत्र सुखं तिष्ट? अहं हिमवत्पर्वते गत्वा समागच्छामि; तदा चटकिकयोक्तं भो प्राणेश्वर अहं त्वां गंतुं न ददामि, यतो यूयं पुरुषा यत्र गच्छथ तत्रैव लुब्धा भवथ, यदि पश्चाद्भागच्छथ तदा मम का गतिः? अहमबलैकाकिनी कथमत्र तिष्ठामि? त्वद्वियोगः कथं मया सोढुं शक्यते? तदाकर्ण्य चटकेनोक्तं हे बाले किमर्थं कदाग्रहं करोषि? अहं सत्वरमेव समागमिष्यामि, यदि नागच्छामि तदा मम ब्रह्मस्त्रीभ्रूणगोघातपातकं, तदा पक्षिण्योक्तमहमेनं शपथं नानुमन्ये, परं चेद्यदि यमदग्नितापसपातकं शिरसि गृह्णीयास्तदाज्ञां समर्पयामि. तदा तेनोक्तं मैवं वद? एतत्पापं कोंगीकरोति? एतत् श्रुत्वा यमदग्निर्ध्यानाच्चलितः, क्रोधवशो भूत्वा चटकं चटकिकां च गृहीत्वा कथयतिस्म किमियन्मम पातकमस्ति? चटकिकयोक्तं भो मुने त्वं क्रोधं मा कुरु? भवतो धर्मशास्त्रण्यवलोकय? यतः—अपुत्रस्य गतिर्नास्ति। स्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्गो नैव च नैव च ॥ तस्मात्पुत्रमुखं दृष्ट्वा । स्वर्गे गच्छंति मानवाः ॥ १ ॥ इति ॥

अतो अपुत्रिणो भवतः कथं शुभा गतिर्भाविनी ? ततस्तव पातकं महदित्युक्त्वा परीक्षां कृत्वा देवौ स्वस्थानं गतौ. मिथ्यादृगपि परमजैनो जातः, पश्चाद्यमदग्निरपि पक्षिणो मुखात् श्रुत्वा मनसि विचारयति, सत्यमेतत्, स्त्रीकरपीडनं कृत्वा पुत्रमुत्पादयामि तदा मम गतिर्भवति. इति संचिंत्य कोष्टकनगरपतिजितशत्रुसमीपमागत्य तेन कन्या मार्गिता. राज्ञोक्तं मम पुत्रीणां शतं, तासां मध्ये या भवंतमभिलषति तां गृह्याण ? तदाकर्ण्य सोंतःपुरमागतः, तत्र स्थितास्निः कन्याभिर्जटाजूटधारिणं दुर्बलं मलमलिनगात्रं विपरीतरूपं यमदग्निमालोक्य थूत्कारः कृतः, क्रोधवशेन तेन सर्वा अपि ताः कुब्जाकृतयः कृताः, स पश्चाद्गलितो, राजगृहांगणे धूलिक्रीडां कुर्वत्येका राजपुत्री तेन दृष्टा, तस्या बीजपूरकं च दर्शितं, तद्गृहणाय तया करः प्रसारितः, तदा तेन राज्ञोऽग्रे निरूपितं यदियं मामभिलषतीति कथयित्वा गृहीता. पश्चाज्जीतेन राज्ञा सहस्रगवां गोकुलेन दासीवृंदेन च सहिता सा तस्मै दत्ता. तुष्टेन तेनाऽवशिष्टया तपःशक्त्या सर्वा अपि राजपुत्र्यः सज्जीकृताः, एवं सर्वमपि तपः कृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पयित्वा रेणुकां बालामादाय स वनमागतः, तत्र चाश्रमोटजानि विधाय स स्थितः.

क्रमेण सा यौवनं प्राप्ता, परिणीता च. प्रथमर्तुकाले यमदग्निस्तस्यै कथयतिस्म, नो सुलोचने शृणु ? त्वदर्थमहं चरुं मंत्रेणाभिमंत्र्य समर्पयामि, येन तव चारुपुत्रो भवेत्; ततो रेणुकयोक्तं नो स्वामिन् द्वौ चरू ममार्पय ? येनैकेन ब्राह्मणः पुत्रो भवेत्, एकेन च क्षत्रियः, क्षत्रियचरुं हस्तिनागपुराधिपाऽनंतवीर्यनृपपरिणीतायाः स्वभगिन्या अनंगसेनाया अहं समर्पयिष्यामि. द्वितीयं चाहं भक्षयिष्यामि. एवं रेणुकायाः कथनेन तेन चरुद्वयं मंत्रितं, स्वस्त्रियै च समर्पितं. पश्चाद्रेणुकया चिंतितं, मदीयः पुत्रः शूरो भवेत्तदा वरमिति विचार्य तया क्षत्रियचरुर्भक्षणं कृतं. द्वितीयो ब्राह्मणचरुरनंगसेनायाः प्रेषितस्तया च भक्षितः, तस्याः पुत्रो जातः, तस्य च कीर्त्तिवीर्य इति नाम दत्तं. रेणुकायाः पुत्रस्य राम इति नाम दत्तं. यौवनमनुप्राप्तः, तदवसरे कश्चिदतीसाररोगपीडितो विद्याधरस्तदाश्रममागतः, रामेण तस्य प्रतिपत्तिः कृता, औषधप्रयोगेण तस्य स्वास्थ्यं कृतं. हृष्टेन विद्याधरेण रामाय परशुविद्या दत्ता, तेन च सा साधिताः, ततस्तस्य परशुराम इति नाम प्रसिद्धं जातं. देवताधिष्ठितं कुठारायुधं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गृहीत्वा स यतस्ततः परिभ्रमति केनाप्यजेयः, एतदवसरे परशुरामजननी रेणुका हस्तिनागपुरे स्वभगिन्या मिलनार्थं गता, तत्र तस्याः स्वभगिनीपतिनाऽनंतवीर्येण साई संबंधो जातः, रेणुकायाः कुक्षौ कोऽपि जीवो गर्भत्वेनोत्पन्नः, क्रमेण पुत्रो जातः, पश्चात्पुत्रवती रेणुका यमदग्निना स्वाश्रममानीता. परशुरामेण मातुश्चरित्रं ज्ञात्वा पुत्रवती जननी निधनं प्रापिता, इयं प्रवृत्तिरनंतवीर्येण राज्ञा ज्ञाता. तेन तत्रागत्य यमदग्नितापसो मारितः, परशुरामेण तत्र गत्वा परशुशक्त्या कीर्त्तिवीर्यं हत्वा गजपुरराज्यं गृहीतं. तदवसरे कीर्त्तिवीर्यराज्ञ एका तारानाम्नी स्त्री चतुर्दशस्वप्नसूचितं गर्भं दधाना भर्तृमरणसमये नष्टा वनमध्ये तापसोटजे समागता. सर्वमपि स्वस्वरूपं कथितं, दयार्द्रचित्तैस्तापसैः प्रच्छन्नं भूमिगृहे सा स्थापिता. क्रमेण तस्यास्तत्रैव पुत्रो जातः, तस्य च सुभूम इति नाम दत्तं. क्रमेण स वर्द्धते. परशुरामेणापि क्षत्रियोपरि क्रोधं कृत्वा सप्तवारान् पुनः पुनः क्षत्रियरहिता पृथ्वी विहिता. मारितक्षत्रियाणां दंष्ट्रा एकीकृत्यैकं महत्स्थालं भृत्वा मुक्तं. एकदा भ्रमन् परशुरामस्तापसोटजमागतः, तत्परशुमध्याज्ज्वाला निःसृता, तदा परशुरामेण तापसानां पृष्टं, यूयं सत्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वदत? कोऽप्यत्र क्षत्रियो वर्त्तते? यतो मदीयपरशुमध्यादंगारवर्षणं जायते. तदा तैरुक्तं वयमेव क्षत्रियाः, तापसत्वान्मुक्ताः, एवं सर्वान् क्षत्रियान्मारयित्वा स निष्कंटकं गजपुराधिपत्यं भुंक्तेस्म. एकदा परशुरामेण कोऽपि नैमित्तिकः पृष्टः, मम मारकः को भविष्यतीति. नैमित्तिकेनोक्तं यं दृष्ट्वा क्षत्रियदंष्ट्राः क्षैरेयीभोजनं भविष्यंति, तद्भोक्ता तव मारको भविष्यति. तत् श्रुत्वा परशुरामेण तदभिज्ञानार्थं दानशाला निर्मिता, तत्र च सिंहासने दंष्ट्रापूर्णं स्थालं मुक्तं. तदवसरे वैताढ्यवासिना मेघनादविद्याधरेण नैमित्तिककथनतो भाविनं स्वपुत्रीवरं सुभूमं ज्ञात्वा, तत्रागत्य स्वपुत्री सुभूमायार्पिता, स्वयं च सुभूमस्य सेवको भूत्वा तिष्ठति. एकवारं सुभूमेन स्वमातुः पृष्टं, भो मातः कथय? भूमिः किमेतावत्येवास्ति? एतत्पुत्रवाक्यं श्रुत्वाऽश्रुधाराविललोचना सा गद्गदस्वरं तारा राज्ञी सर्वमपि पूर्वस्वरूपं कथयामास. भो पुत्र तव पितरं पितामहं च हत्वा, सर्वक्षत्रियाणां विनाशं कृत्वा आत्मीयं राज्यं परशुरामो भुंक्ते. आवां तद्भयेन नष्टौ तापसशरणमाश्रित्य स्थितौ भूमिगृहवर्त्तिनौ. स्वमातृमुखादेतदाकर्ण्य सरोषः सुभूमो भूमिगृहान्निर्गतः, मेघनादसहितो गजपुरपरिसरे दानशालायामागतः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तावत्तद्दंष्ट्रास्थालं सुन्नूमदृष्टौ पतितं, क्रौरेयी जाता; सुन्नूमो भक्षितुं लग्नः, तावत्तत्परशुरामेण ज्ञातं, सन्नद्धो भूत्वा ज्वलदंगारं परशुमादाय स बहिरागतः, सुन्नूमं दृष्ट्वा तत्पुण्यप्राग्भारतो निस्तेजः परशुरामायुधं जातं, पश्चाद्भोजनानंतरमुच्छ्रितेन सुन्नूमेन स्थालं परशुरामोपरि क्षिप्तं, तत्स्थालं च सहस्रदेवताधिष्ठितं चक्रं जातं. तेन च चक्रेण परशुरामस्य शिरश्छिन्नं. तदा तस्य चक्रवर्त्तिपदोदयो जातः, जयजयशब्दो जातः, देवैः पुष्पवृष्टिः कृता, क्षत्रियमारणवैरं स्मृत्वा तेनैकविंशतिवारान् निर्ब्राह्मणा भूमिर्निर्मिता.

चक्रबलेन षट्खंडानि निर्जित्य लोभान्निभृतः स परतो धातकीखंडस्थितभरतक्षेत्रसाधनार्थं चलितः, तत्राष्टचत्वारिंशत्क्रोशविस्तृतचर्मरत्नोपरि स्वकटकं स्थापयित्वा लवणसमुद्रांतर्गच्छन् समकालं सहस्रसंख्यैरपि देवैर्मुक्तचर्मरत्नो दलसहितो जले निपत्य मृतः, पापकर्मयोगात्सप्तम्यां च गतः, एवं संबंधिनामपि स्नेहः कृत्रिम एवाऽवसेय इत्युपदेशः ॥ इति परशुरामसुन्नूमयोः संबंधः षट्चत्वारिंशत्तमः ॥ ४६ ॥

॥ मूलम् ॥—कुलघर नियय सुहेसु य । सयणे य जणे य निच्च मुणिवसहा ॥ विहरं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति अणिस्साए । जह अज्जमहागिरी जयवं ॥ ५२ ॥ व्याख्या—' कुलघर इति ' कुलं कुटुंबं, गृहं मंदिरं, निजकाः संबंधिनः, सुखं देशग्रामोद्भवं, तेषु, स्वजने बंधुवर्गे, जने सामान्यलोके, एतेषु मध्ये नित्यं सदैव, मुनिषु मध्ये वृषभा इव धर्मधुरंधरत्वात् विहरंति, विहारं कुर्वंति, निश्रां विना कस्याऽप्यालंबनं विनेत्यर्थः, यथाऽऽर्यमहागिरिनामाऽगवानाचार्यो निश्रां विना विहृतस्तथाऽन्येनापीत्युपदेशः ॥ ५२ ॥ अत्र कथानकं—

श्रीस्थूलिभद्रशिष्यौ श्रीआर्यमहागिरिआर्यसुहस्तिनामानौ, तयोर्मध्ये वृद्धः श्रीआर्यमहागिरिसूरयो वैराग्यमादाय श्रीसुहस्तिसूरेर्गणशिक्षां समर्पयित्वा जिनकल्पतुलनां कर्तुं समुद्यता विहरंतिस्म; विशेषतश्च क्रियां कुर्वंति. श्रीसुहस्तिसूरयो यदा ग्राममध्ये समवसरंति, तदा श्रीआर्यमहागिरयो ग्रामाद्बहिस्तिष्ठंति; एवं ते गजनिश्रया विचरंतिस्म. एवं विहारं कुर्वंतः श्रीसुहस्तिसूरयः पाटलीपुरमागताः, तत्रार्यमहागिरयः क्वचस्य जागषट्कं कृत्वा पंचपंचदिनानि यावदेकैकस्मिन् जागे भिक्षार्थं गजंति, नीरसमाहारं च गृह्णंति. एतस्मिन् समये एकवारं श्रीआर्यसुहस्तिसूरयो वसुभूतिश्रावककुटुंबप्रतिबोधनाय गताः, धर्मदेशनां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ददति. तदवसरे श्रीआर्यमहागिरयोऽजानंतस्तद्गृहे भिक्षार्थमागताः, तान् दृष्ट्वा श्रीआर्यसुहस्तिसूरय उत्थिताः, विनयपूर्वकं च वंदितवंतः, तदा श्रीआर्यमहागिरयो भिक्षाग्रहणमंतरैव पश्चाद्वलिताः, वसुभूतिश्रावकेण पृष्टं. भगवन् कोऽयं महामुनिर्यद्विनयं यूयं कृतवंतः, तदा सुहस्तिसूरिणोक्तमेतेऽस्माकं वृद्धा गुरुभ्रातरः संति; महानुभावाश्च जिनकल्पतुलनां च कुर्वंति. तत् श्रुत्वा वसुभूतिश्रावकेण द्वितीयदिवसे नगरमध्ये सरसाहारो निर्मापितः, आर्यमहागिरिणा तमनेषणीयं ज्ञात्वा न गृहीतः, पश्चादागत्य सुहस्तिसूरीणामुपालंभो दत्तो यद्भवद्भिर्ममेदृग्विरुद्धं कृतं; यद्वसुभूतिगृहेऽस्माकमभ्युत्थानादिविनयः कृतस्ततस्तेन सर्वत्राऽप्यशुद्धाहारः कृतः, ततोऽद्यप्रभृति मयैकक्षेत्रे भवद्भिः सार्द्धं न स्थातव्यमिति कथयित्वाऽार्यमहागिरिणा पृथग् विहारः कृतः, गजनिश्रां मुक्त्वैकाकिनस्तपःसंयमावनुपाल्य स्वर्गं प्राप्ताः श्रीआर्यमहागिरयः, एवमन्येनापि प्रतिबंधो न विधेय इत्युपदेशः ॥ इत्यार्यमहागिरिप्रबंधः सप्तचत्वारिंशत्तमः ॥ ४७ ॥

॥ मूलम् ॥—रूवेण जोवणेण य । कन्नाहिं सुहेहिं वरसिरीए अ ॥ न य लुप्पंति सु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विहिया । निदरिसणं जंबुनामुत्ति ॥ ५३ ॥ व्याख्या—' रूवेण इति ' रूपेण कृत्वा यौवनेन च, गुणवंतीभिः कन्याभिः, सुखैः सांसारिकैः, वरया प्रधानया श्रिया लक्ष्म्या न च लुभ्यंति लोभं न प्राप्नुवंति, सुविहिताः साधवः, अत्र निदर्शनं जंबूनाम्नो महामुनेः, तत्संबंधः पूर्वमुक्तत्वान्नात्रोक्तः ॥ ५३ ॥

॥ मूलम् ॥—उत्तमकुलप्पसूआ । रायकुलवडिंसगावि मुणिवसहा ॥ बहुजइजणसंघट्टं । मेहकुमारुव्व विसहंति ॥ ५४ ॥ व्याख्या—' उत्तम इति ' उत्तमकुलप्रसूता उत्तमकुलसमुद्भवाः, राज्ञां कुलेऽवतंसका मुकुटसदृशा अपि मुनिवृषभा मुनिषु मध्ये श्रेष्ठा बहवः प्रचुराः पृथक्पृथक् कुलोद्भवा यतिजनास्तेषां संघट्टं मेघकुमार इव विसहंति विशेषेण सहंते क्षमंते, इति संक्षेपतः संबंधः ॥ ५४ ॥ अथ विस्तरतो मेघकुमारनिदर्शनं—

मगधदेशे राजगृहेपुरे श्रीश्रेणिको राजा राज्यं करोति, तस्य धारिणीनाम्नी राज्ञी, तस्याः कुक्षौ कोऽपि जीवः समुत्पन्नः, तत्प्रभावेण च तस्या अकाले मेघदोहदः समुत्पन्नः, अभयकुमारेणाऽष्टमभक्तकाराधितदेवसाहाय्येन च पूरितः, उत्तमवेलायां पुत्रो जातः, तस्य स्व- ॥ ३३७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रानुसारतो मेघकुमार इति तस्य नाम दत्तं; क्रमेण स यौवनं प्राप्तः, श्रेणिकेन सुरूपा अष्टौ कन्यकास्तस्यैकस्मिन् लग्ने परिणायिताः, तान्निर्विषयसुखमुपभुंजानो मेघकुमारोऽन्यदा श्रीवीरवंदनार्थं गतः, प्रभुदेशनां श्रुत्वा वैराग्यमापन्नेन तेन चारित्रं गृहीतं, शिक्षाग्रहणार्थं च स स्थविरांतिके मुक्तो भगवता, रात्रौ पौरुषीभणनानंतरं वृद्धत्वलघुत्वव्यवहारेण तस्य संस्तारकः सर्वसाधूनां प्रांते भपाश्रयाद्बहिरागतः, रात्रौ गच्छतामागच्छतां साधूनां चरणप्रहारेण संघट्टनादिनाऽतीवदूनो मेघमुनिर्विचिंतयति, क्व मे सुखावासः? क्व च मे सुकोमला पुष्परचिता शय्या? क्व चांगनासंगमोद्भवं सुखं? क्व चेदं बगरभुवि लुंठनं?

एते साधवो मयि पूर्वं सादरा अभूवन्, अधुना त्वेते एव पादादिना मां संघट्टयंति; ततोऽद्यतना रात्रिर्यदि सुखेन यास्यति, तदा प्रभाते प्रभुमापृच्छ्य रजोहरणादिवेषं च समर्पयित्वा स्वगृहं व्रजिष्यामीति संचिंत्य प्रातः स प्रभुसमीपमागतः, भगवता च स पूर्वमेव भाषितः, भो मेघ त्वयाऽद्य रात्रौ चतुर्षु प्रहरेषु दुःखमनुभूतं, गृहगमनमनोरथश्च कृतः, अयमर्थः सत्यः? मेघेनोक्तं स्वामिन् सत्यमेतत्, भो मेघ एतद्दुःखं कियन्मात्रं? यद्दुःखमितो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवात्तृतीयन्नवे त्वयाऽनुन्नूतं; तच्छृणु? त्वं पूर्वं वैताढ्यन्नूमौ श्वेतवर्णोऽत्युन्नतः सहस्रहस्तिनीयूथाधिपतिः षड्दंतः सुमेरुप्रन्नान्निधौ गजोऽन्नूः, एकवारं वनमध्ये दवो लग्नः, तस्मान्नीतस्तृषातुरो वनं भ्रमन्ननल्पकर्दमे सरसि प्रविष्टोंतरा कर्दमे निमग्नो जलं न प्राप. बहिरप्यागंतुं न शशाक. पश्चान्नूरिन्निर्वैरिन्निर्हस्तिन्निर्दंतमुशलैर्घातितः, सप्तदिवसान् पीडामनुन्नूयैकशतवर्षायुः प्रपूर्य कालं कृत्वा विंध्यन्नूमौ चतुर्दंतो रक्तवर्णो हस्ती सप्तशतहस्तिनीपतिर्मेरुप्रन्नान्निधानोऽन्नूः, तत्रापि दवं दृष्ट्वा जातिस्मरणतः पूर्वन्नवो दृष्टः, दवान्नीतो योजनप्रमाणन्नूमिमध्यात्तृणकाष्टादि दूरतो विक्षिप्तवान्.

नक्तं तृणवल्ल्यंकुरादिकं शुंडादंडेन सपरिकरः समूलमुन्मूलयामास. एकवारं पुनरपि दवो लग्नः, तदा त्वया कंडूयनार्थमेकोंहिरुर्ध्वीकृतः, तावत्कोऽपि शशकः स्थानमवाप्नुवन् तव चरणन्नूमावागत्य स्थितः, पश्चाच्चरणमधो मुंचता त्वया शशको दृष्टः, तदयाऽमनसा तथैव चरणो रक्षितः, एवं सार्द्धदिनद्वयं यावत्त्वमूर्ध्वचरणः स्थितः, दवे शांते गते च स्वस्थानं जंतुवर्गे पादमधो मुंचन् स्थूलशरीरत्वात्त्वं गिरेः कूटमिव त्रुटित्वा पतितो महतीं वे- ॥ ३३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दनामनुज्ञायायुःक्षये दयापरिणामतो निबद्धशुभकर्मा त्वमत्र श्रेणिकपुत्रो जातः, तत् त्वं विलोकय? सम्यक्त्वलाभमंतरेणापि तिर्यग्भवे स्वल्पकष्टसहनात्त्वया मनुष्यायुर्निबद्धं, तदा चारित्रग्रहणानंतरं कष्टसहने महत्फलं, अथवाऽनेन जीवेनानंतवारं नरकादिदुःखमनुभूतं, तत एतस्मात्साधुपादसंघट्टनोद्भवाद्दुःखात्किं दूयसे? साधुचरणरजोऽपि वंद्यं, ततोऽयं चारित्रमोचनमनोरथो न युक्तः, अग्निप्रवेशो वरं, विषभक्षणं वरं, परं गृहीतव्रतभंगो न वरमित्यादि भगवदुक्तवचनतोऽस्य जातिस्मरणमुत्पन्नं, सर्वमपि तत्तथैव तेन दृष्टं. भगवंतमभिवंद्य स कथयति, हे भगवन् भवकूपे निपतन्नहं समुद्धृतः, अद्यप्रभृति चक्षुर्द्वयमंतराऽन्यांगशुश्रूषा न विधेया. एनमभिग्रहं गृहीत्वा निरतीचारं चारित्रं प्रपालयन् स गुणरत्नसंवत्सरादि तपःकर्म कृत्वा निर्मलध्यानतो निजायुः प्रपूर्य समाधिमृत्युना विजयेऽनुत्तरविमाने देवत्वेनोत्पन्नः, ततश्च्युत्वा महाविदेहे सेत्स्यतीति मेघकुमारसंबंधोऽष्टचत्वारिंशत्तमः ॥ ४८ ॥

॥ मूलम् ॥—अवरूप्परसंबाहं । सुक्कं तुच्छं सरीरपीडा य ॥ सारणवारण चोयण । गुरुजण आयत्तया य गणे ॥ ५५ ॥ व्याख्या—' अवरूप्परेति ' परस्परमन्योऽन्यं संबंधः सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घट्टः, सुखं स्वेच्छादिप्रवर्त्तनं रूपमिंद्रियजन्यं वा तुच्छं स्वल्पं भवति, शरीरस्य पीडा परीषहोदयेन भवति, गणे वसतः स्मारणं भवति, इदं न कृतमिति प्रमादं कुर्वतां वारणं भवति, चोदनं प्रेरणं भवति मधुरकर्कशवचनैः, गुरुजनानामायत्तताऽधीनता, एते गुणा गणे समुदाये भवंतीत्यर्थः ॥ ५५ ॥

॥ मूलम् ॥—इक्कस्स कओ धम्मो । सच्छंदगईमईपयारस्स ॥ किं वा करेइ इक्को । परिहरउं कहमकज्जे वा ॥ ५६ ॥ व्याख्या—' इक्कस्स इति ' एकस्यैकाकिनो धर्मः कुतो भवति ? अपि तु न भवति. कीदृशस्यैकाकिनः ? स्वच्छंदं स्वेच्छया या गतिस्तस्यां मतिप्रचारो बुद्धिप्रचारो यस्य स तस्य, एतादृशस्य धर्मः कुतः ? अथवा किं करोति तपःक्रियादिकं ? एक एकाकी, वाऽथवा एकः कथमकार्यं परिहर्त्तुं शक्नोति? अपि तु न शक्नोति. अतो गुरुकुलवासे एव स्थातव्यमित्यर्थः ॥ ५६ ॥

॥ मूलम् ॥—कत्तो सुत्तत्थागम—पडिपुच्छणचोयणावइक्कस्स ॥ विणउ वेयावच्चं । आराहणयावि मरणंते ॥ ५७ ॥ व्याख्या—' कत्तो इति ' कुतः संपद्यते एकाकिनः सूत्रार्थान्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मागमप्राप्तिः? प्रतिपृच्छादि संदिग्धस्य पुनःपृच्छनं ' चोयणा इति ' प्रमादपतितस्य शिक्षादानं, एते लाभा एकाकिनः कुतः संपद्यंते इत्यर्थः, एकाकिनो विनयोऽपि कुतः? कस्य स विनयं करोति? वैयावृत्त्यं कुतः? कस्य स वैयावृत्त्यं करोति? मरणांतेऽपि मरणकाले आराधनापि कुतः? नमस्काराऽनशनादिरूपा आराधना एकाकिनः कुतः? ॥ ५७ ॥

॥ मूलम् ॥—पिल्लिज्जेसणमिक्को । पइन्नपमयाजणाउ निच्च भयं ॥ काऊं मणोवि अकज्जं । न तरइ काऊण बहुमज्झ ॥ ५८ ॥ व्याख्या—' पिलिज्जेति ' प्रेरयति उल्लंघयति एषणामाहारग्रहणशुद्धिं, एकः कदाचिदशुद्धमपि गृह्णीयात्, प्रकीर्ण एकाकी एतादृशो यः प्रमदाजनः स्त्रीजनस्तस्मान्नित्यं भयं, एकाकिनः स्त्रीजनाद्भयं भवतीत्यर्थः, कर्तुमना अप्यकार्यं प्रति अकार्याचरणमानसोऽपीत्यर्थः, न तरति न शक्नोति ' काऊण इति ' कर्तुं बहूनां यतिनां मध्ये, तस्मादेकाकिविहारः स्थविरकल्पिकानामयुक्तः ॥ ५८ ॥

॥ मूलम् ॥—उच्चारपासवणवंत–पितमुच्चाइ मोहिउ इक्को ॥ सद्दवभाणे विहडो । निरिक्खइ कुणइ वुड्ढाइं ॥ ५९ ॥ व्याख्या—' उच्चार इति ' उच्चारः पुरीषं प्रश्रवणं लघुनी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिः, वांतं वमनं, पित्तमूर्छा, आदिशब्दाद्वायुविकारविसूचिकादि ग्रहणं, एतैरातंकैर्मोहितो व्याकुल एकाकी साधुः सङ्घं पानीयसहितं यन्नाजनं तेन कृत्वा विहस्तो व्यग्रहस्त एतादृशः सन् एकाकी मुनिर्निक्षिपति यदि हस्ताद्भाजनं मुंचति तदा संयमविराधनाऽऽत्मविराधना स्यात्, एवमुच्चारादिकं यदि स करोति तदोड्डाहः प्रवचनलघुता स्यात् ॥ ५९ ॥

॥ मूलम् ॥—एगदिवसेण बहुआ । सुहा य असुहा य जीवपरिणामा ॥ एगो अ सुहपरिणउ । चइज्ज आलंबणं लद्धुं ॥ ६० ॥ व्याख्या—' एग इति ' एकदिवसमध्ये ' बहुआ इति ' बहवो भवंति शुभा उत्तमाः, अशुभा मध्यमाः, के भवंति ? जीवस्य परिणामा अध्यवसायस्थानानि. एक एकाकी अशुभपरिणतोऽशुभपरिणामे प्रवर्त्तमानः सन् त्यजेत्संयमंप्रति आलंबनं कारणं लब्ध्वा प्राप्य ॥ ६० ॥

॥ मूलम् ॥—सव्वजिणपडिकुट्ठं । अणवत्था थेरकप्पेउ अ ॥ इक्को य सुआउत्तोवि । हणइ तवसंजमं अइरा ॥ ६१ ॥ व्याख्या—' सव्व इति ' सर्वैर्जिनैः ' पडिकुट्ठं इति ' निषिद्धमेकाकित्वेन विचरणमित्यर्थः, अनवस्था मर्यादाभंगो भवति, स्थविराणां कल्प आचार- ॥ ३४३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तस्य नेदो नवति, अत एव एकाकी यद्यपि शुन्नाऽध्यवसाययुक्तोऽपि गाढमाचारयुक्तो नवति, तथापि हंति तपो द्वादशनेदं संयमं चारित्रमचिरात् स्तोककालेन ॥ ६१ ॥

॥ मूलम् ॥—वेसं जुन्नकुमारिं । पन्नवपइयं च बालविहवं च ॥ पासंमरोहमसइं । नवतरुणिं अरन्नजं च ॥ ६२ ॥ व्याख्या—' वेसं जुन्न इति ' वेश्यां गणिकां जुन्नकुमारिं इति ' अपरिणीतवृद्धकुमारिकां, पांथः परदेशवर्त्ती पतिर्यस्या एतादृशीं, बालविधवां बाल्यतो मृतनर्तृकां, अतिकामविह्वलामेतादृशीं, पाखंमेन व्रतेन रोधो विषयसंबंधी यस्याः सा तां, व्रतिनः स्त्रियमित्यर्थः, असतीं व्यनिचारिणीं नवतरुणीं नवयौवनां स्त्रियं, स्थविरस्य वृद्धस्य नार्यां स्त्रियं, एवंविधां परिहरेदित्युत्तरेण संबंधः ॥ ६२ ॥

॥ मूलम् ॥—सविमं नग्गडरूवा । दिट्ठा मोहेइ जा मणं इत्थी ॥ आयहियं चिंतंता । दूरयरेण यं परिहरंति ॥ ६३ ॥ व्याख्या—' सविमं इति ' शुन्नाऽध्यवसायनिवर्त्तकं, नग्गटमुदारं रूपं यस्याः, एतादृशी दृष्टा सती या मोहयति मोहयुक्तं करोति प्राणिनां मनः, एतादृशी स्त्री, आत्महितं चिंतयंतो विचारयंतः, एतादृशाः पुरुषा दूरतरेणाऽतिदूरत एतादृशीं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्वोक्तस्वरूपां स्त्रियं परिहरंति ॥ ६३ ॥

॥ मूलम् ॥—सम्मदिट्ठीवि कया—गमोवि अइविसयरागसुहवसउ ॥ भवसंकडंमि पविसइ । इअं तुह सच्चई नायं ॥ ६४ ॥ व्याख्या—' सम्मदिट्ठी इति ' सम्यग्दृष्टिरपि, कृतो ज्ञात आगमः सिद्धांतो येनैतादृशोऽपि, अतिशयितो यो विषयरागस्तस्य सुखं, तस्य वशतः पारवश्यात्, भवसंकटेऽवतरणकष्टे प्रविश्य बहुभवभ्रमणं करोतीत्यर्थः, एतस्मिन्नर्थे हे शिष्य ' तुह इति ' तव सत्यकी विद्याधर उदाहरणं, तत्संबंधो विस्तरतः कथानकगम्यः ॥६४॥ अथ सत्यकिविद्याधरोदाहरणं—

श्रीविशालायां महापुर्यां चेटको नामा राजा, तस्य सुज्येष्टाचिल्लणानाम्न्यौ द्वे पुत्र्यौ. तयोरतीव परस्परं स्नेहः, अन्यदा कुमारबुद्ध्या द्वाभ्यामपि राजा श्रेणिको वरणीय इत्यभिग्रहो गृहीतः, पश्चादभयकुमारेण सुरंगा दापिता, राजा श्रेणिकस्तया सुरंगया समायातः, द्वे अपि भगिन्यौ गृहीत्वा पश्चाद्वलितः श्रेणिकः, तदा सुरंगामुखे चिल्लणया चिंतितं, सुज्येष्टा मत्तोऽपि रूपेणाऽतीवश्रेष्ठा, अतोऽयं श्रेणिको राजा इमां बहु मानयिष्यति, पट्टराज्ञीं च क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिष्यति; इति विचार्य तया सुज्येष्टायाः कथितं हे भगिनि! त्वं पश्चाद्गत्वाऽद्भुतमाभूषणसमुद्गकं समानयेत्युक्त्वा तमानयितुं पश्चाद्गालिता. पश्चाच्चिलणयोक्तं भो स्वामिन् सत्वरं गम्यतां? कोऽपि ज्ञास्यति चेत्तदा विपरीतं भविष्यतीति भयं दर्शयित्वा सा सुरंगाया निःसृता. पश्चादागतया सुज्येष्टया चिंतितं यदि प्राणतोऽप्यधिकया चिल्लणयापि ममोपरि कूटं रचितं तदलं स्वार्थरसिकेन कुटुंबवर्गेण, धिगिमान् भोगिभोगोपमान् विषयान्! इति वैराग्यमापन्नया सुज्येष्टयाऽपरिणीतयैव चंदनबालासाध्वीपार्श्वे चारित्रं गृहीतं. षष्टाष्टमाद्यनेकतपः कुर्वंत्येकवारमातापनां गृहीत्वा स्थितास्ति.

'एतस्मिन्नवसरे पेढालनाम्ना विद्याधरेण गच्छता सा दृष्टा, मनसि चिंतितमियं सती ध्याने स्थिता महारूपवती वर्त्तते, ततो यद्यस्याः कुक्षौ पुत्रमुत्पादयामि तदा स पुत्रो मदीयविद्याभाजनं भवतीति चिंतयित्वा तेन विद्याबलेनांधकारं विकुर्व्य भ्रमररूपेण यथा सा न जानाति, तथा तां भुक्त्वा तद्योनौ वीर्यं मुक्तं, ततस्तस्याः कुक्षाववतीर्णः कोऽपि जीवः, अनुक्रमेण च वर्द्धितुं लग्नः, साध्व्या मनसि संदेह उत्पन्नः, पश्चाद् ज्ञानिनः पृष्टं, तेन तस्याः सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देहो नग्नो यत्नवायं न दोषस्त्वं च सती. क्रमेण पुत्रो जातः, तस्य सत्यकिरिति च नाम दत्तं. स साध्व्या उपाश्रये वर्द्धतेस्म. साध्वीनां मुखादागमं शृण्वतस्तस्य सर्वोऽप्यागमग्रंथो मुखाधीनो जातः, एकदा श्रीवर्द्धमानं वंदितुं सुज्येष्ठा समवसरणं गता, सत्यकिरपि मात्रा सार्द्धं तत्र गतः, तदवसरे एकः कालसंदीपकनामा विद्याधरः समागतः, तेन नगवतः पृष्टं, नगवन् कुतो मम नयं? नगवतोक्तमस्मात्सत्यकिबालतस्तव नयं. तत् श्रुत्वा कालसंदीपकेन तदवज्ञां विधाय स स्वकीयचरणयोः पातितः, तदा सत्यकिबालस्तदुपरि क्रुद्धः, पश्चात्पेढालनाम्ना जनकेन सत्यकये रोहिणीविद्या दत्ता, तां साधयतस्तस्य कालसंदीपको व्याघातं कर्त्तुं लग्नः, तदा रोहिण्यैव कालसंदीपको मारितः, यतः सत्यकिजीवेन पूर्वं पंचसु नवेषु रोहिणीं साधयता मरणं प्राप्तं, षष्ठे नवे रोहिणीविद्यां साधयतस्तस्य षण्मासावशिष्टे आयुषि प्रत्यक्षीनूय सा वदतिस्म, तवायुः षण्मासावशिष्टं वर्त्तते, ततस्त्वं कथयसि चेदद्य नवे सिद्धामि, नो चेदागामिनिनवे सिद्धिं गन्नामि. तदा सत्यकिजीवेन कथितं, यदि मदायुः स्तोकं तदाऽऽगामिन्येव नवे सिद्धिं प्राप्नुयाः? एवं पूर्वं कथितमासीत्, ततोऽस्मिन् नवे स्तोककालेनैव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सिद्धिं गता सा प्रत्यक्षीभूय वदतिस्म, दर्शयेकं त्वदीयं शरीरांगं ? तत्र प्रवेशं करोमि.

तदा सत्यकिना स्वकीयं भालं दर्शितं, रोहिणीविद्या ललाटमार्गेण तदंगे प्रविष्टा, तत्र च तृतीयं लोचनं जातं. पश्चात्स विद्याबलेन साध्वीव्रतभंगकारकत्वात्पेढालनामानं स्वपितरं जघान प्रथमतः सत्यकिः, ततो विद्याबलोर्जितं दुर्जयं सत्यकिं विज्ञाय कालसंदीपको विद्याधरो मायया त्रिपुरदैत्यरूपं विकुर्व्य पलायितः, लवणसमुद्रमध्ये गत्वा पातालकलशे प्रविष्टः, लोकमध्ये एतादृशी प्रवृत्तिर्जाता यत्त्रिपुरदैत्यः पाताले क्षिप्तोऽतोऽयमेकादशो रुद्रः सत्यकिनामोत्पन्नः, पश्चात्सत्यकिविद्याधरेण भगवतः पार्श्वे सम्यक्त्वं प्रतिपन्नं, अत्यंतं देवगुरुभक्तो जातः, त्रिसंध्यं भगवतोऽग्रे नृत्यं करोति; परमत्यंतं विषयसुखलालसत्वेन यां यां रूपवतीं राज्ञोऽथवा प्रधानस्य वा व्यवहारिणः कामिनीं पश्यति, तां तां गाढमालिंग्य स परिभुंक्ते, परं न कोऽपि तं वारयितुं शक्नोति. एकदोज्जयिन्यां महापुर्यां चंडप्रद्योतराज्ञोंतःपुरमध्ये पद्मां विनाऽन्याः सर्वा अपि राज्ञ्यस्तेन भुक्ताः, चंडप्रद्योतः क्रुद्धः कथयतिस्म, य एनं दुष्टकर्मकर्त्तारं सत्यकिं मारयति तस्य मनोऽभीष्टं पूरयामीति पटहवादनेन ज्ञापितं लोकानां, तदवसरे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्नगरवास्तव्यया नमानाम्न्या नगरनायिकया तत्प्रतिश्रुतं, पश्चादेकस्मिन् दिने नमा गृहगवाक्षस्थिता सत्यकिं विमानमार्गेण गच्छंतं दृष्ट्वा नाषयामास. नो चतुरशिरोमणे! सुरूपजनमुकुटमणे! तेजोविनिर्जितदिनमणे! त्वं प्रतिदिनं मुग्धामेव स्त्रियं वांछसि, परमस्मत्सदृशां कामकलाकुशलां दृष्ट्वापि न विलोकयसि, ततः कृतार्थय मदीयमगणं? विलोकयैकवारं कामचातुर्यमित्यादिवचनरसरंजितः कटाक्षविक्षेपविक्षिप्तमानसो विमानादवतीर्य स तद्गृहं गतः, तयापि विविधकामक्रीडाविनोदवशतस्तदीयं चित्तमावर्जितं; ततोऽसौ तां विहायान्यत्र कुत्रापि न गच्छति, प्रतिदिनमेव स तत्रायाति, प्रतिदिनमतीवप्रीतिरीतिः प्रवर्त्ततेस्म.

विश्वासं प्रापयित्वैकवारं तया पृष्टं, कथयत नो स्वामिन् यूयं स्वेच्छया परांगनासंगमं कुरुथ, परं न कोऽपि युष्मान्मारयितुं शक्नोति तत्कस्य बलेन? तदा सत्यकिनोक्तं नो वामलोचने मम विद्याबलमस्ति, तन्माहात्म्येन न कोऽपि मां मारयति. पुनरपि वेश्ययोक्तं तां विद्यां कदापि दूरतो मुंचथ वा न वेति? सत्यकिरुवाच यदा विषयसेवां करोमि तदा विद्यां मुंचामि, तत् श्रुत्वोभयया गत्वा राज्ञोऽग्रे कथितं हे राजन् एक एवास्य मारणोपायोऽस्ति,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यदि मां रक्षत तदा तं मारयतेति सर्वं सा कथयतिस्म. पश्चाद्वेश्याया उदरोपरि कमलपत्राणि संस्थाप्य राज्ञा खड्गेन छेदितानि, परं वेश्यायाः शरीरे न मनागपि खड्गो लग्नः, अनया रीत्या त्वामुद्धारयिष्याम इति विश्वासमुत्पाद्य सा गृहे मुक्ता. पश्चाज्ञाज्ञा रात्रौ निजसेवकाः प्रच्छन्नं द्वावपि मारणीयाविति शिक्षयित्वा वेश्यागृहे मुक्ताः, ते सेवकास्तयापि प्रच्छन्नं रक्षिताः, तदवसरे सत्यकिस्तत्रागतः, उभयया साकं विषयसेवां च करोति यावत्तावत्प्रच्छन्नस्थराजभटै रागत्य द्वयोरपि मस्तके छिन्ने.

सा प्रवृत्तिः सत्यकिविद्याधरस्य नंदीश्वरनाम्ना शिष्येण श्रुता, क्रुद्धेन तेनागत्य नगरोपरि शिला विकुर्विता, कथयतिस्म च भवद्भिर्मदीयो विद्यागुरुर्मारितोऽस्ति, अतो यादृश्याऽवस्थया मारितस्तद्रूपामेव मूर्त्तिं विधाय यदि सर्वे नागराः पूजयंति तदा सर्वानप्यहं मुंचामि, नो चेदनया शिलया सर्वानपि चूरयिष्यामीति श्रुत्वा भीतै राजादिभिस्तथैव युग्मतया मूर्त्तिः कारापिता, प्रासादमध्ये च स्थापिता, सर्वेऽपि लोकास्तां पूजयितुं लग्नाः, सत्यकिस्तु कालं कृत्वा नरकभूमौ गतः, पश्चात्कियत्कालानंतरं लज्जाकारिकां तां मूर्त्तिं दृष्ट्वा लिंगस्थाप- ॥ ३५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ना कृता. ततो विषयेऽत्यंतमनुरागो न विधेय इत्युपदेशः ॥ इति विषयोपरि सत्यकिविद्याधरसंबंध एकोनपंचाशत्तमः ॥ ४९ ॥

॥ मूलम् ॥—सुतवस्सिआण पूआ । पणामसक्कारविणयकज्जपरो ॥ बद्धंपि कम्ममसुहं । सिढिलेइ दसारनेआवा ॥ ६५ ॥ व्याख्या—' सुतवस्सिआण इति ' शोभना ये तपस्विनश्चारित्रिणस्तेषां महामुनीनामित्यर्थः, पूजा वस्त्रादिदानं, प्रणामो मस्तकेन वंदनं, सत्कारस्तदीयगुणवर्णनं, विनय आगतेऽभ्युत्थानं, एतेषु कार्येषु परस्तत्परः, एतादृशः पुमान् बद्धमपि आत्मप्रदेशैः सह संश्लिष्टमपि अशुभं मध्यमं कर्म शिथिलयति शिथिलं करोति. क इव? दशारनेता इव, दशाराणां नेता स्वामी कृष्ण इवेति संक्षेपतः संबंधः ॥६५॥ अत्र कथा—एकदा विहरन् श्रीनेमिजिनो द्वारिकायां समवसृतः, वंदनार्थं सपरिकरः श्रीकृष्णः समायातः, तन्मनस्येतादृशी चिंता समुत्पन्ना यदद्याहमष्टादशसहस्रसाधून्प्रत्येकं प्रत्येकं द्वादशावर्त्तवंदनेन वंदामि,इत्थं विचार्य स्वकीयचक्रतंतुवायेन वीराभिधेन साकं सर्वसाधूनां वंदनकदानेन श्रमातुरोऽसौ भगवत्समीपमागत्यैवं वदतिस्म, भगवन्नद्याष्टादशसहस्रसाधूनां वंदनदानेनाऽहमतीवखिन्नः, मया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यदा षष्ट्यधिकशततत्रयसंख्याकानि युद्धानि कृतानि तदाप्यहमेतादृशो न क्लिन्नः, तदा भगवतोक्तं हे महानुभाव यथा वंदनकदानेन त्वमतीव क्लिन्नस्तथा त्वया लाभोऽप्यतिशयेनोपार्जितः, तद्यथा—वंदनदानेन क्षायिकं सम्यक्त्वं लब्धं, तीर्थंकरनामकर्म चोपार्जितं, अथ च संग्रामकरणतो निबद्धसप्तमनरकपृथ्वीयोग्यं कर्म क्षपयित्वा तृतीयपृथ्वीयोग्यं स्थापितं. एतावान् लाभस्तव संपन्नः, तत् श्रुत्वा कृष्णेनोक्तं पुनरपि वंदनकं ददामि, येन तृतीयपृथ्वीयोग्यमपि कर्म क्षपयामि. तदा भगवतोक्तं भो कृष्ण! अधुना तादृशो भावो नाऽऽयाति, यूयं लोभमध्ये प्रविष्टाः, तदा पुनरपि कृष्णेनोक्तं भगवन् मम त्वेतावान् लाभो जातस्तदा ममानुयायिनो वीरान्निधानस्य तंतुवायस्य कियान् लाभः संपन्नः? भगवतोक्तं एतस्य केवलं कायक्लेश एव, भवतश्चंदानुवृत्तित्वमेवानेनाचरितं. ततो भावंविना न किंचिदपि फलं. इत्थमन्येनापि भावपूर्वकं साधूनां पूजादिकर्म विधेयमित्युपदेशः ॥ इति पंचाशत्तमः कृष्णप्रबंधः ॥

॥ मूलम् ॥—अब्भिगमण वंदण नमं—सणेण पडिपुच्छणेण साहूणं ॥ चिरसंचिअंपि कम्मं । खणेण विरलत्तणमुवेइ ॥ ६६ ॥ व्याख्या—' अब्भिगमण इति ' सन्मुखं गमनं तेन,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वंदनेन ' नमंसणेण इति ' सामान्यतो नमस्कारकरणेन शरीरनिराबाधत्वादिपृच्छनेन, साधूनामेतावत्पदार्थकरणेन चिरसंचितमपि बहुन्नवोपार्जितमपि कर्म पापकर्म क्षणेन स्तोककालेन विरलत्वमुपैति प्राप्नोति, अर्थात्पापकर्म क्षयं यातीत्यर्थः ॥ ६६ ॥

॥ मूलम् ॥—केइ सुसीला सुहमाइ–सज्जणु गुरुजणस्सवि सुसीसा ॥ विउलं जणंति सद्धं । जह सीसो चंमरुद्दस्स ॥ ६७ ॥ व्याख्या—' केइ इति ' केचित्सुशीला निर्मलस्वन्नाववंतः सु अतिशयेन धर्मवंतः, सज्जनाः सर्वोपरिमैत्रिन्नाववंतः, एतादृशाः सुशिष्या गुरुजनस्यापि स्वकीयगुरोरपि विपुलां विस्तीर्णां जनयंत्युत्पादयंति श्रद्धामास्तिक्यलक्षणां, अत्र दृष्टांतमाह—' जह इति ' यथा शिष्यश्चंमरुद्दाचार्यस्य श्रद्धामुत्पादयामासेति दृष्टांतः ॥ ६७ ॥ अत्र कथानकं—

श्रीउज्जयिन्यां महापुरि चंमरुद्दाचार्याः समवसृताः, ते चाऽत्यंतमीर्ष्यालवः क्रोधयुक्तास्ततस्ते स्वशिष्यवर्गेऽन्यो दूरतरं तिष्ठंति; एतस्मिन्नवसरे तत्रैको नवपरिणीतो व्यवहारिपुत्रः स्वकीयमित्रपरिवृतस्तत्राजगाम; साधूंश्च ववंदे, मित्रबालैर्हसितं स्वामिन्नेनं शिष्यं कुरुत?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदा साधुन्निरुक्तं न्नो महानुन्नाव यदि दीक्षाग्रहणमनोरथोऽस्ति तदा गम्यतां दूरस्थितानामस्मकुरूणामंतिके. तेऽपि बाला मित्रसहितास्तत्र गताः, गुरूनान्निमंत्र्य तथैव हास्यतो वदंतिस्म, तत् श्रुत्वाऽचार्यास्तूष्णीं स्थिताः, तदा पुनरपि बालैरुक्तं स्वामिन्नेनं नवपरिणीतमस्मन्मित्रं शिष्यं कुरुतेति. तथापि गुरवस्तूष्णीं स्थिताः, तृतीयवारं तैरुक्तं, तदा चंडरुद्राचार्याणां क्रोधोदयः संजातः, बलात्तं नवपरिणीतं बालं गृहीत्वा, चरणयोर्मध्ये निक्षिप्य तन्मूर्द्धजानां लोचः कृतः, तत्स्वरूपं दृष्ट्वा सर्वेऽपि नष्टाः, अहो किं जातमिति विलक्षवदनाः पलायिताः, पश्चान्नवदीक्षितेन शिष्येण कथितं, न्नगवन् वयमितोऽन्यत्र गन्नामः; यतो मदीया मातृपितृप्रमुखाः संबंधिनः श्वसुरवर्गीयाश्च यदि ज्ञास्यंति तदात्रागत्य न्नवतां महतीं बाधामुत्पादयिष्यंति, तदा गुरुन्निरुक्तमहं रात्रौ गंतुमसमर्थोऽस्मि.

तदा नवदीक्षितो गुरुं स्वस्कंधाधिरूढं विधाय जगाम. रात्रावंधकारपूरे गन्नतस्तस्य चरणावुच्चावचे न्नूमिप्रदेशे निपततः, तेन चंमरुद्राचार्यः क्रोधवशेन तस्य मस्तके दंमप्रहारं ददाति, रुधिरं निस्सरति, महती वेदना न्नवति, परं तस्य मनसि लवलेशतोऽपि न क्रोधः प्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुर्नूत्तः, स्वकीयमेवापराधं पश्यति, धिगस्तु मां पापकारिणं ! यतोऽयं गुरुर्ममनिमित्तं कष्टं प्राप्नोति, एते गुरवः सुखं स्वाध्यायध्यानस्थिताः पूर्वमभूवन्, मया दुष्टेन रात्रौ चालिताः, कथमेतदपराधमोक्षो भविष्यति ? इत्याद्यनित्यभावनां भावयन् शुभध्यानतो घातिकर्मक्षयतः केवलं प्राप्य स सम्यक् सरलतया मार्गे चचाल. गुरुभिरुक्तं अधुना कथं मार्गे सरलं गच्छसि ? संसारे सारोऽयं दंडप्रहारः, तद्वशादेव मार्गे सरलतया गच्छसि; तदा शिष्येणोक्तं यद्दृजुतरं गच्छामि सोऽयं तव प्रसादः, गुरुभिरुक्तं किं त्वयि किमपि ज्ञानमस्ति ? स आह स्वामिन् मयि केवलज्ञानं वर्त्तते. एतत् शिष्यवाक्यं श्रुत्वा गुरूणां पश्चात्तापः समुत्पन्नः, अहो मया विरुद्धं कृतं, धिगस्तु मां केवलिन आशातनाविधायिनं, मस्तके मया दंडप्रहारा दत्ताः, एतत्पातकं मम कथं यास्यति ? इति पश्चात्तापं कुर्वन् स शिष्यस्कंधादुत्तीर्य तस्य चरणयोः पपात, स्वापराधं च क्षामयामास. इत्थं पुनः पुनः स्वापराधं क्षामयतस्तस्यापि विशुद्धध्यानतः केवलमुत्पेदे, द्वावपि केवलित्वेन बहुकालं विहृत्य मोक्षं गतौ. इत्थं सुशिष्यो गुरोरपि धर्ममुत्पादयतीत्युपदेशः ॥ इति चंडरुद्राचार्यसंबंध एकपंचाशत्तमः ॥ ५१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—अंगारजीववहगो । कोइ कुगुरु सुसीसपरिवारो ॥ सुमिणे जईहिं दिट्ठा । कोलो गयकलहपरिकिन्नो ॥ ६८ ॥ व्याख्या—' अंगार इति ' अंगाररूपा जीवास्तेषां वधको हिंसकः, अजीवे जीवसंज्ञास्थापक इत्यर्थः, कोऽपि कुगुरुः कुवासनायुक्तो गुरुः, कीदृशः ? सुशिष्यपरिवारः, सुशिष्याणां परिवारो यस्य स सुशिष्यपरिवारः स्वप्ने स्वप्नमध्ये यतिभिर्दृष्टो विलोकितः, कोलः शूकरो गजकलभपरिकीर्णो व्याप्तः, त्रिंशदब्दकहस्तिवृंदपरिवृतः शूकरः स्वप्ने दृष्ट इत्यर्थः ॥ ६८ ॥

॥ मूलम् ॥—सो नग्गनवसमुद्दे । सयंवरमुवागएहिं राएहिं ॥ करहो वखरनरिंद । दिट्ठो पोराणसीसेहिं ॥ ६९ ॥ व्याख्या—' सो नग्ग इति ' स कुगुरुरुग्रे रुद्रे भवसमुद्रे परिभ्रमन् भवांतरे इति शेषः, स्वयंवरमंडपमुपागतैरेतादृशै राजभिर्भवांतरे पंचशतान्यप्यंगारमर्दकाचार्यशिष्या राजकुले समुत्पन्नाः, तै राजभिरित्यर्थः, करभ नष्टोंगारमर्दकाचार्यजीवः, कीदृशः ? ' वखरनरिंद इति ' भारेण भृतः, एतादृशो दृष्टः, कैः ? पुराणशिष्यैः प्राचीनभवसंबंधिशिष्यै राजभूतैर्मोचित इत्यर्थः ॥ ६९ ॥ विस्तरतोऽत्र निदर्शनमुच्यते—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

केचित् श्रीविजयसेनाह्वाः सूरयः, तेषां शिष्यै रात्रौ स्वप्नमध्ये पंचशतहस्तिकलभपरिवृत एकः शूकरो दृष्टः, प्रभाते गुरोरग्रे तत्स्वरूपं निवेदितं. तदा गुरुभिर्विमृश्योक्तं नो शिष्याः अद्य कश्चिदभव्यो गुरुः पंचशतसुशिष्यपरिवारवृत आगमिष्यति, एतत्स्वरूपं स्वप्नफलं भावि; अस्मिन्नवसरे रुद्देवनामाचार्यः पंचशतसुशिष्यपरिवृतस्तत्र समागतः, पूर्वस्थितैः साधुभिस्तेषामातिथेयं कृतं, पश्चाद् द्वितीये दिनेऽभव्यगुरुपरीक्षार्थं प्रश्नवणग्रहणस्थानके श्रीविजयसेनसूरिभिः स्वशिष्यपार्श्वाद्यथाऽभव्यो गुरुर्न जानाति तथांगारा भूमौ विक्षिप्ताः, रात्रावभव्यगुरुशिष्याः प्रश्नवणशंकानिवारणार्थमुत्थिताः, अंगारकाश्चरणैराक्रांताः, शब्दायमानांस्तानंगारका इत्यपरिजानंतः पश्चात्तापं कर्तुं लग्नाः, हा हा अजानद्भिरंधकारे कोऽपि जीवघातः कृत इति. ततः पुनर्मिथ्यादुष्कृतं दत्तवंतः, गत्वा संस्तारके च सुप्ताः, तावद्रुद्देवाचार्यः स्वयं प्रश्नवणचिंतार्थमुत्थितः, चरणाक्रांता इंगालका यथा यथा शब्दायंते तथा तथा स बहु आक्रामति, मुखेन चैवं वक्ति, एतेऽर्हतां जीवा आक्रम्यमाणाः पूत्कारं कुर्वंतीति वचः श्रीविजयसेनसूरिभिः श्रुतं, प्रभाते च तदीयशिष्याणामग्रे कथितं, यद्भवतां गुरुरयं रुद्देवा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चार्योऽनघ्योऽस्ति, अतस्त्यज्यतामिति श्रुत्वा तैर्गणाद्बहिः कृतो रुद्देवः, पश्चात्पंचशतसंख्याः शिष्या निरतिचारसंयमाः प्रांते समाधिना मृत्वा देवत्वेनोत्पन्नाः, ततश्च्युत्वा वसंतपुरे नगरे दिल्लीपराज्ञो गृहे पंचशतपुत्रत्वेनोत्पन्नाः, यौवनं प्राप्ताः, एकवारं ते पंचशतसंख्या राजपुत्रा गजपुरे नगरे कनकध्वजराजपुत्रीस्वयंवरमुपागताः, तदवसरेंगारमर्दकाचार्यजीवः संसारे परिभ्रमन्नुष्ट्रत्वेनोत्पन्नः, सोऽपि तत्रागतोऽस्ति.

भारारोपणे गाढं शब्दं कुर्वंतं तमुष्ट्रं वीक्ष्य तेषां मनसि कारुण्यमुत्पन्नं, विलोकंते तं वराकं गाढं भाराक्रांतं शब्दायमानं, किमनेन पूर्वभवेऽशुभं कृतं भविष्यतीति पुनः पुनश्चिंतयतां तेषां पंचशतराजपुत्राणां जातिस्मरणमुत्पन्नं; दृष्टं पूर्वभवस्वरूपं, ज्ञातमहो पूर्वभवसंबंधी अस्माकमनघ्यो गुरुरुष्ट्रत्वेनोत्पन्नोऽस्ति, विचित्रा कर्मणां गतिः, यद्यनेन ज्ञानं प्राप्यापि श्रद्धां विना विफलीकृतं, तदैतादृशीमवस्थां प्राप्तः, पुनरनंतानि जन्ममरणानि करिष्यतीति कथयित्वा स तेषां पार्श्वात्तैर्मोचितः, पश्चात्पंचशतैरपि राजपुत्रैरहोऽनित्योऽयं संसारः, सृतं चिरपरिचितैः किंपाकफलोपमैर्विषयसुखैः, धिगिमां कुंजरकर्णोपमां राज्यलक्ष्मी- ॥ ३५८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिति वैराग्यमापन्नैस्तैश्चारित्रं गृहीतं, सर्वेऽपि सद्गतिगामिनो जाताः, एवं सुशिष्या भवांतरेऽप्युपकारकारिणो भवंति ॥ इत्यंगारमर्दकाचार्यस्य द्विपंचाशत्तमः संबंधः ॥ ५२ ॥

॥ मूलम् ॥—संसारवंचणां नवि । गणंति संसारसूअरा जीवा ॥ सुमिणगएणवि केइ । बुझंति पुप्फचूलावा ॥ ७० ॥ व्याख्या—' संसार इति ' संसारमध्ये वंचनां नैव गणयंति, विषयासक्ता विषयमेव सारं गणयंति, न तु संसारवंचनामित्यर्थः, के गणयंति ? संसारशूकरा जीवाः, संसाररूपजलगर्त्तायां शूकरसदृशाः, एतादृशा जीवाः, केचित्लघुकर्माणश्च स्वप्नगतेनापि स्वप्नमध्ये दृष्टेनापि नरकादिस्वरूपेण प्रतिबोधं प्राप्नुवंति. का इव? यथा पुष्पचूलानाम्नी राज्ञी स्वप्नमध्ये नरकादिस्वरूपं दृष्ट्वा प्रतिबोधं प्रापत्, एतादृशा अपि केचिद्भवंति. ॥ ॥ ७० ॥ अत्र कथानकं—

पुष्पभद्रनाम्नि नगरे पुष्पकेतुर्नामा नराधिपः, तस्य पुष्पवती पट्टराज्ञी, एकदा तयाऽपत्ययुग्मं प्रसूतं, तन्मध्ये पुत्रस्य पुष्पचूल इति नाम दत्तं, पुत्र्याश्च पुष्पचूला इति नाम दत्तं, क्रमेण यौवनं प्राप्तौ, सर्वकलाकुशलौ जातौ, परस्परं तयोरतीवस्नेहः, एकैकं विना क्षण-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मात्रमपि न तिष्ठतः, तद् दृष्ट्वा पित्रा चिंतितं, एतौ पुत्रपुत्रीयुग्मजातौ परस्परं स्नेहवंतौ, यद्यन्यत्र पुत्रीमुद्वाहयिष्यामि तदैतयोः स्नेहभंगो भविष्यति, तत अनयोरेव परस्परं पाणिग्रहणसंबंधो भवतु? येन तयोर्वियोगो न भवति, इति विचिंत्य नगरलोकानाहूय राज्ञा पृष्टं, कथयत यूयं यदंतःपुरसमुद्भवं रत्नं स्वेच्छया को योजयितुं समर्थः? इति राज्ञोक्तं श्रुत्वा तदाशयमजानद्भिः प्रधानपुरुषैरुक्तं नो राजन् यत्संसारे रत्नमुत्पद्यते, तदप्यन्येन योजयितुं राजा समर्थो भवति, तर्हि किमंतःपुरसमुद्भवं रत्नं! इति छलेन तेषामनुज्ञां गृहीत्वांतःपुरपुरंध्रीर्निर्वार्यमाणोऽपि राजा भ्रातृभगिन्योः पाणिग्रहणं कारयामास; तन्महदसमंजसं दृष्ट्वा पुष्पवती माता वैराग्यतो दीक्षां गृहीत्वा तपस्तप्त्वा कालं कृत्वा देवत्वेनोत्पन्ना.

पश्चात्पुष्पकेतुराजापि परलोकं प्राप्तः, पुष्पचूलकुमारो राजा जातः, परिणीता पुष्पचूला भागिनी पट्टराज्ञी कृता, तया सार्द्धं विषयसुखमुपभुंजानोऽसौ बहुकालमतिवाहयामास. एतदवसरे मातृजीवेन देवेनाऽवधिज्ञानतोऽवलोकितं, स्नेहः समुत्पन्नः, मनसि चिंतितं चेमौ मदीयपूर्वभवसंबंधिनौ पुत्रीपुत्रौ एतादृशं पापकर्म कृत्वा नरकं गमिष्यतस्ततोऽमू प्रतिबोध- ॥ ३६० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यामीति चिंतयित्वा पुष्पचूलाया निजपुत्र्या रात्रौ स्वप्नमध्ये नरकसंबंधीनि दुःखानि दर्शितानि. तानि दृष्ट्वा भयभ्रांता राज्ञी प्रभाते राज्ञोऽग्रे कथयामास. राजापि नरकस्वरूपपृच्छार्थं योगिप्रमुखाऽन्यदर्शिनिनः समाकारयामास. पृष्टं नरकस्वरूपं, तैरुक्तं हे राजन् शोकवियोगरोगाऽन्नोगपारवश्यादीनि नरकदुःखानि ज्ञेयानि. पुष्पचूलयोक्तं यानि मया स्वप्ने दृष्टानि नरकदुःखानि, तानि तु भिन्नानि; पश्चादर्णिकापुत्रमाचार्यमाकार्य राज्ञा पृष्टं स्वामिन् कीदृशानि नरकदुःखानि? आचार्येण यादृशं स्वप्नमध्ये दृष्टं राज्ञ्या, तादृशमेवोक्तं. तत् श्रुत्वाऽाश्चर्यवती राज्ञी कथयामास, हे स्वामिन् भवद्भिरप्येतादृशं स्वप्नं किं दृष्टं? यन्मत्स्वप्नदृष्टसदृशान्येव दुःखानि भवद्भिरुक्तानि. आचार्येणोक्तमस्माभिः स्वप्नं तु न दृष्टं, परमागमवचनप्रामाण्याद् ज्ञायते. राज्ञ्योक्तं केन कर्मणैतादृशानि दुःखानि प्राप्यंते? गुरवः कथयंति पंचाश्रवसेवनया कामक्रोधप्रमुखपापाचरणेन नरकदुःखं लभंते प्राणिनः, इत्यादि कथयित्वा गुरवः स्वस्थानं गताः, पुनरपि द्वितीयदिवसे मातृजीवेन देवेन स्वप्नमध्ये सुरसौख्यानि दर्शितानि. प्रभाते तथैव तया राज्ञोऽग्रे निरूपितं; राज्ञाप्यन्ययूथिकानाहूय पृष्टं, यत्स्वर्गसुखं ॥ ३६१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कीदृशं? तैरुक्तं हे राजन् वरभोजनवरवसनपरिधानवल्लभजनसंयोगवरांगनाविलसितादीनि स्वर्गसुखानि. राज्ञोक्तं यानि मया स्वप्ने दृष्टानि स्वर्गसौख्यानि, तेषामसंख्यातमपि भागमेतानि नार्हंति. पश्चादर्णिकापुत्रमाहूय पृष्टं, तैः स्वप्नदृष्टसदृशान्येव सुखानि कथितानि. राज्ञा पृष्टमेतादृशानि सुखानि कथं प्राप्यंते? गुरुभिरुक्तं यतिधर्मपालनेन. तत्सर्वं धर्मस्वरूपं ज्ञात्वा वैराग्यमादाय पुष्पचूला चारित्रग्रहणार्थं पत्युराज्ञां मार्गयामास.

राजा जगाद त्वं ममातीवल्लभा, त्वद्विरहं सोढुं न शक्नोमि. अतो दीक्षाग्रहणाज्ञां कथं समर्पयामि? राज्ञा बहुभिरुपदेशैर्वालितस्तदा राज्ञोक्तं, यदि दीक्षां गृहीत्वाऽत्रैव तिष्ठसि, मदीयगृहे च भिक्षां गृह्णासि, तदाहं तव दीक्षाज्ञां समर्पयामि. राज्ञापि तत्प्रतिपन्नं. पश्चात्तयाऽर्णिकापुत्राचार्यसमीपे चारित्रं गृहीतं, तत्रैव च तिष्ठति, राज्ञो गृहे शुद्धां भिक्षां च गृह्णाति, शुद्धं चारित्रधर्मं पालयति. एकदाऽर्णिकापुत्राचार्येणापतंतं द्वादशवार्षिकं दुर्भिक्षं ज्ञात्वा सर्वयतयः प्रतिदिशं प्रेषिताः, स्वयं च गंतुमसमर्थत्वेन तत्रैव स्थिताः, पुष्पचूला साध्वी आहाराद्यानीय गुरवे समर्पयति, पितुरिव गुरोः सपर्यां करोति. एवं प्रतिदिनं गुरुभक्तिपराय- ॥ ३६२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णायाः पुष्पचूलायाः शुभध्यानतः केवलमुत्पन्नं, तथापि साऽाहाराद्यानीय समर्पयति. तत्रैकवारं मेघे वर्षति सत्यपि भिक्षां गृहीत्वाऽागता पुष्पचूला, गुरुभिरुक्तं हे वत्से किं करोषि? एकस्तावदहमेकस्थानवासी, द्वितीयं साध्व्याऽानीताहारग्रहणं, पुनर्मेघे वर्षति यदाहारमानीय ममार्पयसि तत्किं भव्यं करोषि? पुष्पचूलयोक्तं स्वामिन्नचिन्तोऽयं मेघः, गुरुभिरुक्तं तनु यः केवली भवेत्स एव जानाति, तदा तयोक्तं स्वामिन् भवतां प्रसादतस्तद् ज्ञानं ममाप्यस्ति.

तत् श्रुत्वाऽाचार्यः पश्चात्तापं कर्तुं लग्नः, धिगस्तु मां यत्केवली आशातितः, इत्थं खेदं कुर्वन् स मिथ्याडुष्कृतं दत्तवान्. साध्वी कथयति स्वामिन् कथं खेदं प्राप्नुथ? यूयमपि गंगानदीमुत्तरंतः केवलं प्राप्य मोक्षं गमिष्यथ. तत् श्रुत्वा गुरवो गंगायां समागत्य नावमारुह्य स्थिताः, तावत्कोऽपि पूर्वभववैरी देवः समागत्य यस्मिन् पार्श्वे गुरवस्तिष्ठंति, तत्पार्श्वं जलनिमग्नं करोति. तदा गुरवो नौमध्यभागे स्थिताः, तदा समग्रापि नौर्बुडितुं लग्ना, तदाऽनार्यलोकैर्ज्ञातं येतद्यतिनिमित्तं सर्वेषामपि मरणं भविष्यतीति विचिंत्य गृहीत्वा जलमध्ये क्षिप्तः, तावद्देवेनागत्य त्रिशूलं धृतं, तेन विद्धोऽर्णिकापुत्र आचार्यः पतद्रुधिरं दृष्ट्वा मनसि चिं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तयति, हाहा मदीयरुधिरेण जलजीवानां विराधना जायते, इत्याद्यनित्यभावनां भावयन् घातिकर्मक्षयतः स केवलज्ञानमासाद्य मोक्षे गतः, तत्र देवैर्महिमा चक्रे. लोकैर्ज्ञातं, यो गंगायां म्रियते स मोक्षमाप्नोति, तत्स्थाने प्रयागनाम्ना तीर्थस्थापना कृता. ॥ इति त्रिपंचाशत्तमः संबंधः ॥ ५३ ॥

॥ मूलम् ॥—जो अविकलं तवं सं-जमं च साहू करिज्ज पत्तावि ॥ अन्नियसु अव सो । निअगमट्ठमचिरेण साहेइ ॥ ७१ ॥ व्याख्या—' जो अविकलमिति, यः साधुरविकलं संपूर्णं तपो द्वादशभेदं, संयमं सर्वजीवरक्षारूपं सप्तदशभेदं ' करिज्जइत्ति ' करोति, पश्चादपि वृद्धावस्थायामपि, यो यौवने विषयासक्तोऽतिकालेऽपि धर्मं करोतीत्यर्थः, स वृद्धावस्थायां धर्मकारकः पुमानऽर्णिकासुत इव अर्णिकाचार्य इव निजकं स्वकीयमर्थं परलोकार्थसाधनस्वरूपमचिरेण स्तोककालेन साधयति ॥ ७१ ॥ अत्र पूर्वोक्तादवशिष्टोऽर्णिकापुत्रसंबंधः कथ्यते—

उत्तरमथुरायां नगर्यां कस्यापि व्यवहारिणः पुत्रौ कामदेवदेवदत्तनामानौ परिवसतः, परस्परमुभयोरतीवमैत्री, तावन्यदा स्वकीयमातृपितॄणामनुज्ञां गृहीत्वा व्यापारार्थं दक्षिणम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थुरायामागतौ. तत्रापि जयसिंहनाम्ना वणिक्पुत्रेण साकं तयोर्मैत्री जाता, जयसिंहस्याप्येकाऽर्णिकानाम्नी भगिनी वर्त्तते, साऽतीवरूपवती. एकवारं जयसिंहकुमारेण स्वभागिन्या अर्णिकायाः कथितं, त्वमद्य सरसां रसवतीं कुरु ? यतो मदीयसुहृदौ कामदेवदेवदत्तनामानावत्र भोजनं करिष्यतः, तदाऽर्णिकया सरसा रसवती निष्पादिता; पश्चाद्भोजनवेलायां ते त्रयोऽपि सुहृद एकभाजने भोजनं कर्त्तुं निविष्टाः, अर्णिकया भोजनं परिवेषितं, पश्चादग्रतः स्थिता स्वकीयवस्त्रांचलेन वातं करोति. तावत्तस्याः करकंकणरणत्कारं, स्तनोदरकटिप्रदेशं, नयनवदनयोर्विलसितं च दृष्ट्वा देवदत्तः कामातुरो जातः, घृतभाजनांतः प्रतिबिंबितमर्णिकाकन्यारूपं विलोक्य सोऽतीवकामरागपरवशो जातः, भोजनं तस्य विषरूपं जातं, किमपि तेन न भक्षितं, सत्वरमुत्थितश्च.

द्वितीयदिवसे स्वकीयाभिप्रायो मित्रकामदेवपार्श्वात्तेन जयसिंहस्य ज्ञापितः, तदा जयसिंहेनोक्तं मित्रेयं भगिनी ममातीववल्लभा, यूयं तु परदेशिनः, कथमेतस्या वियोगः सह्यते ? ततो य इमां पाणिगृहीतां कृत्वा मदीयगृह एव स्थास्यति तस्येमां समर्पयिष्यामि. त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो यदि देवदत्त एकपुत्रोत्पत्तिमपि यावदत्र तिष्ठति, तदैनां विवाहयामि. देवदत्तेन सर्वमपि प्रतिपन्नं, अर्णिका परिणीता, तया सह मनोऽभीष्टान् विषयानुपभुंजानो बहु कालमतिवाहयतिस्म. तदवसरेऽर्णिकाप्यापन्नसत्वा जाता. एकदोत्तरमथुरातो देवदत्तपितुः पत्रं समागतं, तन्मध्ये लिखितमस्ति, भो पुत्र तव देशांतरगतस्य बहुकालो जातः, अतः सत्वरमेवागंतव्यं, विलंबो न विधेयः, इति पितुर्लेखं वाचं वाचं वाचामगोचरं प्रेमभावमापन्नो मनसि चिंतयति धिगस्तु मां! योऽहं विषयाभिलाषतो वचनबद्धो वृद्धावस्थायां मातापितरौ मुक्त्वाऽत्रैव स्थितः, इति विषादवंतं स्वपतिं दृष्ट्वाऽर्णिकया स्वपतिहस्तात्पत्रं गृहीतं, तद्गतस्वरूपं वाचनतो ज्ञातं, स्वसुरमिलनोत्कंठया स्वबांधवानुज्ञां महता हठेन गृहीत्वा सा भर्त्रा साऽर्द्धं चलिता, मार्गे तस्याः पुत्रो बभूव, देवदत्तेनोक्तमधुनैतस्याऽर्णिक इति नाम स्थापनीयं, पश्चान्मातापितरौ यन्नामस्थापनां करिष्यतस्तत्प्रमाणं. क्रमेण गृहमागतोऽसौ विनयपूर्वकं पित्रोश्चरणयोर्निपतितः, पितुर्महानंदः समुत्पन्नः, उक्तं च वत्स एतावंतं कालं तत्र स्थितेन त्वया किमुपार्जितं? तदा देवदत्तेन स्वपुत्रोऽर्णिकापुत्रः पितुरुत्संगं मुक्तो, निजवधूश्च दर्शिता, प्रोक्तं चैतदर्जयित्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽागतोऽस्मि. पौत्रं पुत्रवधूं च दृष्ट्वाऽतीवहृष्टौ पितरौ, पश्चाज्जनकेनापि स्वपौत्रस्योचितं नाम दत्तं, परमर्णिकापुत्र इति लोकमध्ये प्रसिद्धं जातं. क्रमेणाऽर्णिकापुत्रो यौवनं प्राप्तः, परं स विषयविरक्तमना वैराग्यतश्चारित्रं जग्राह. गृहीतागमरहस्यो बहून् प्रतिबोधयन् आचार्यपदमवाप्य समुदायपरिवृतो विहारं कुर्वन् पुष्पभद्रनगरे समागतः, पश्चात्तत्र यज्जातं तत्पुष्पचूलाकथानकादवसेयं ॥ इत्यर्णिकापुत्राचार्यसंबंधश्चतुःपंचाशत्तमः ॥ ५४ ॥

॥ मूलम् ॥—सुहिन्न न चयइ भोए । चयइ जहा दुक्खिनत्ति अलियमिणं ॥ चिक्कणकम्मोलित्तो । न इमो न इमो परिच्चयइ ॥ ७२ ॥ व्याख्या—' सुहिन्न इति ' सुखी सुखभोक्ता पुमान् न त्यजति, कान् ? भोगान् विषयान्, त्यजति यथा दुःखित इति लोकैर्यदुच्यते, इदं लोकवाक्यमलीकं मिथ्यैव. यथा दुःख्येव त्यजतीति वाक्यं न नियतं. कथं ? चिक्कणकर्मणा निकाचितकर्मणाऽवलिप्तः सन् ' न इमोत्ति ' नायं दुःखी त्यजति ' न इमोत्ति ' नायं सुख्यपि त्यजति. अतः कर्मलघुतयैव भोगांस्त्यक्तुं समर्थो नान्यथेत्यर्थः ॥ ७२ ॥

॥ मूलम् ॥—जह चयइ चक्कवट्टी । पविहरं तत्तियं मुहुत्तेण ॥ न चयइ तहा अहन्नो ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुबुद्धी खप्परं दमनं ॥ ७३ ॥ व्याख्या—' जह इति ' यथा त्यजति चक्रवर्त्ती, चक्रेण वर्त्तते इत्येवं शीलश्चक्रवर्त्ती षट्खंडाधिपतिरित्यर्थः, कां त्यजति ? प्रविस्तरां विस्तारवतीं समग्रां मुहूर्त्तेन क्षणमात्रेण येन प्रकारेण चक्रवर्त्ती राज्यलक्ष्मीं त्यजति, तथा तेन प्रकारेण अधन्योऽकृतपुण्यो दुर्बुद्धिधारक एतादृशो ऽमको ऽनिक्षुः खप्परमपि न त्यजति, निबिडकर्मावलिप्तत्वादित्यर्थः ॥ ७३ ॥

॥ मूलम् ॥—देहो पिवीलीआहिं । चिलाइपुत्तस्स चालणिव्व कनं ॥ तणुवि मणप्पनसो । न चालिनं तेण ताणुवरिं ॥ ७४ ॥ व्याख्या—' देहो इति ' देहः शरीरं पिपीलिकाभिः कीटिकाभिश्चिलातिपुत्रनाम्नो महामुनेश्चालनीव कृतः, सञ्छिद्रः कृत इत्यर्थः, परं तनुरपि स्वल्पोऽपि मनःप्रदोषो मनोद्वेषो न चालितो नोत्पादितस्तेन चिलातिपुत्रेण ' ताणुवरिं इति ' तासां पिपीलिकानामुपरि ॥ ७४ ॥

॥ मूलम् ॥—पाणच्चएवि पावं । पिवीलिआएवि जे न इच्छंति ॥ ते कह जई अपावा । पावाइं करंति अन्नस्स ॥ ७५ ॥ व्याख्या—' पाणच्चए इति ' प्राणत्यागेऽपि प्राणनाशेऽपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पापं पापकर्म ' पिविलियाएवि इति ' पिपीलिकायाः कीटिकाया अप्युपरि ये न वांछंति, ते यतयः साधवः ' कह इति ' कथं अपापाः पापकर्मरहिताः पापानि कुर्वंति अन्यस्योपरि ? साधवोऽन्येषां सर्वथा प्रतिकूलं न कुर्वंतीत्यर्थः ॥ ७५ ॥

॥ मूलम् ॥—जिणपहअपंडियाणं । पाणहराणंपि पहरमाणाणं ॥ न करंति अ पावाइं । पावस्स फलं विआणंता ॥ ७६ ॥ व्याख्या—' जिणपह इति ' जिनमार्गस्याऽपंडिता अज्ञा एतादृशा अधमलोकास्तेषामज्ञातजिनधर्माणामित्यर्थः, प्राणहराः प्राणघातकाः, एतादृशानामपि, प्रहरमाणानां खड्गादिना प्रहारं ददतामपि, एतादृशानामप्युपरि न कुर्वंति पापानि तेषां मारणचिंतनरूपाणि, कीदृशाः संतस्तेषामुपरि द्वेषं न कुर्वंति? पापस्य फलं नरकादिरूपं विजानंतो जानंतः ॥ ७६ ॥

॥ मूलम् ॥—वहबंधणमारण–अप्पक्काणदाणपरधणविलोवईणं ॥ सव्वजहन्नो नदन्न । दसगुणिन इक्कसि कयाणं ॥ ७७ ॥ व्याख्या—' वह इति ' वधो यष्ट्यादिना कुट्टनं, बंधनं रज्ज्वादिना, मारणं प्राणतो व्यपरोपणं, अन्याख्यानमसद्दोषारोपणं, परधनानां विलोपनं चौ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्यं, आदिशब्दान्मर्मभाषणादिकं ज्ञेयं. एतेषां पापकर्मणामेतेषां सर्वेषामपि जघन्यः स्तोक उदयो विपाकः कियान् भवति? दशगुणितो भवति. कीदृशानामेतेषां पापकर्मणां? एकशः कृतानामेकवारं विहितानां, एकवारं मारितो जीवो दशवारं मारकं हंतीति भावः, इदं सामान्यतः फलमुक्तं. ॥ ७७ ॥

॥ मूलम् ॥—तिव्वयरे उ पओसे । सयगुणिओ सयसहस्सकोडिगुणो ॥ कोडाकोडीगुणो वा । हुज्ज विवागो बहुअरो वा ॥ ७८ ॥ व्याख्या—' तिव्वयरे इति ' तीव्रतरे तु प्रद्वेषे सति अतिक्रोधेन वधादिकं कुर्वत इत्यर्थः, शतगुणितो विपाक उदयमायाति. ततोऽपि तीव्रतरे द्वेषे शतसहस्रगुणितो लक्षगुणितो विपाक उदयमायाति, कोटिगुणोऽपि विपाकस्तस्य भवति, कोटाकोटिगुणो वा विपाकस्तीव्रतमक्रोधेन वधादि कुर्वत इत्यर्थः, ' हुज्ज इति ' भवेत्, ततोऽपि बहुतरो विपाकः, यादृशेन कषायेण बद्धस्तादृशो विपाकः ॥ ७८ ॥

॥ मूलम् ॥—के इत्थ करंति आलंबणं । इमं तिहुअणस्स अब्भेरं ॥ जह निअमाकुक्षिअंगी । मरुदेवी भगवई सिद्धा ॥ ७९ ॥ व्याख्या—' केइत्थ इति ' केचित्पुरुषा अत्रार्थे व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घादिविपाकरूपेऽर्थे इममालंबनमवष्टंभं गृह्णंति; कीदृशमालंबनं ? त्रिभुवनस्य त्रिभुवनवासिनो जनस्य ' अच्छेरं ' आश्चर्यभूतं. तत्किमालंबनं ? ' जह इति ' यथा नियमैस्तपःसंयमादिभिरक्षपितमंगं यस्याः सा पूर्वमप्राप्तधर्मापीत्यर्थः, एतादृशी मरुदेवी ऋषभजननी भगवती सिद्धा मोक्षं गता; तथा वयमपि वधादिविपाकवेदनं विनैव तपःसंयमाद्यनुष्ठानं विना मोक्षं गमिष्याम इत्यालंबनं गृह्णंति, परं तन्न ग्राह्यमिति भावः ॥ ७९ ॥ अत्र कथानकं—

यदा श्रीऋषभदेवेन चारित्रं गृहीतं तदा भरतो राज्याधिकारी जातः, प्रतिदिनं मरुदेवा स्वामिनी भरतमुपालंभतेस्म, हे वत्स त्वं राज्यसुखमोहितो मदीयपुत्रस्य शुद्धिमपि न गृह्णासि, अहं लोकमुखादेवं शृणोमि, मम ऋषभो वर्षमेकं जातं अन्नं जलं विना बुभुक्षितस्तृषितो वस्त्रमंतरा एकाकी वने विचरन्नस्ति. तापादिकं सहते, दुःखमनुभवति एकवारं तं मदीयं पुत्रमत्रानय ? तस्य भोजनमर्पयामि, पुत्रमुखं च विलोकयामि; तदा भरतेनोक्तं मातर्मा कुरु शोकं ? वयं शतसंख्या अपि तवैव पुत्राः स्मः, मरुदेव्योक्तं तत्सत्यं परमाम्रफलान्निलाषिणः किमाचाम्लिकाफलेन ? तमृषभं विना सर्वोऽप्ययं संसारो मम तु शून्य एव.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवं प्रतिदिनमुपालंभं ददानायाः, पुत्रवियोगतो रोदनं कुर्वाणायास्तस्या नेत्रयोः पटले वलिते. एवं सहस्रसंख्येषु वर्षेषु गतेषु स्वामिनः केवलमुत्पन्नं. चतुःषष्टिसुरेंद्रैरागत्य समवसरणं रचितं, भरतस्य वर्द्धापनिका दत्ता, भरतोऽपि समागत्य मरुदेवायै तत्स्वरूपं कथयामास, त्वं मम प्रतिदिनमुपालंभं ददासि यन्ममांगजः शीतातपादिपीडामनुभवति, एकाकी वने च विचरतीति, तदद्यागच्छ मया साई? तव पुत्रद्धिं दर्शयामि. इति वचनश्रवणतः सोत्कंठां पितामहीं हस्तिस्कंधे स्थापयित्वा स समवसरणमाजगाम. तत्र देवदुंदुभिनादं श्रुत्वा हर्षवती जाता मरुदेवी; देवदेवीनां जयजयशब्दं श्रुत्वा तस्या रोमोद्गमः संजातः, हर्षाश्रूणि नयनयोरुद्गतानि. तद्दृशतस्तिमिरे दूरं गते तया सर्वमपि प्राकारत्रितयाशोकभत्रचामरादि स्वरूपं दृष्टं. अनुपमां प्रातिहार्यादिऋद्धिं दृष्ट्वा मनसि चिंतयतिस्म मरुदेवी है है धिगस्तु संसारं! धिग्मोहं! अहमेवं ज्ञातवती यन्मदीयोंगज एकाको वने बुभुक्षितस्तृषितः परिभ्रमन् भविष्यति, परमयमेतावद्दाद्धिं प्राप्तोऽपि कदापि मम संदेशकमपि नाऽमुंचत्. अहं तु प्रतिदिनमेतन्मोहेनातीवदुःखिता जाता, ततो धिगस्तु कृत्रिममेकपाक्षिकं स्नेहं, कः पुत्रः? का

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माता ? सर्वोऽप्ययं स्वार्थरसिकः, कोऽपि न कस्यापि वल्लभः, इत्याद्यनित्यतां चिंतयंती घातिकर्मक्षयतः केवलमासाद्यांतर्मुहूर्त्ते सा मोक्षं गता; प्रथमसिद्ध इति कथयित्वा तच्छरीरं देवैः क्षीरसमुद्रे क्षिप्तं; एवमनेन दृष्टांतेन केचिद्वदंति, तपःसंयमाद्यनुष्ठानं विना यथा मरुदेवी सिद्धा, तथा वयमपि मोक्षं गमिष्याम इत्यालंबनं गृह्णंति, एतदालंबनं विवेकिभिर्न ग्राह्यमिति भावः ॥ इति मरुदेवीसंबंधः पंचपंचाशत्तमः ॥ ५५ ॥

॥ मूलम् ॥—किंपि कहिंपि कयाई । एगे लद्धीहिं केहिं निमित्तेहिं ॥ पत्तेयबुद्धलाभा । हवंति अन्नेरयभूया ॥ ८० ॥ व्याख्या—' किंपि इति ' किमपि वृषभादि वस्तु दृष्ट्वा 'कहिंपि ' कस्मिन्नपि क्षेत्रे, कदाचित्कस्मिन्नपि काले, एके केचन पुरुषाः, लब्ध्या आवरणकर्मक्षयोपशमेन, कैश्चिदपि निमित्तैः, जीर्णवृषभादिवस्तुदर्शननिमित्तैः, प्रत्येकबुद्धानां लाभाः सम्यग्दर्शनचारित्रादिलाभा भवंति आश्चर्यभूतास्तदालंबनं न ग्राह्यमिति भावः ॥ ८० ॥

॥ मूलम् ॥—निहिसंपत्तमहव्वो । पढिंतो जह जणो निरुत्तपो ॥ इह नासइ तह पत्तेय-बुद्धलठिं पमिढंतो ॥ ८१ ॥ व्याख्या—' निहि इति ' रत्नसुवर्णादिभृतं निधिं निधानं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

' संपत्तं इति ' प्राप्तं, अधन्योऽकृतपुण्यः प्रार्थयन् तं निधिं वांछन् ' जह इति ' यथा जनो लोकः ' निरुत्तप्पो इति ' निरुद्यमी भवति, तन्निधानग्रहणार्थं बलिविधानं न करोतीत्यर्थः, इह लोकमध्ये तथा नाशयति हस्तगतं निधानमित्यर्थः, प्रत्येकबुद्धलक्ष्मीं प्रतिभन् वांछन्, तपःसंयमादिबलिविधिमकुर्वन्मोक्षरूपं निधानं नाशयतीत्यर्थः ॥ ८१ ॥

॥ मूलम् ॥—सोऊण गइं सुकुमालिआए । तह ससगब्भसगब्भइणीउ ॥ ताव न वीससिअव्वं । सेअट्ठीधम्मिउ जाव ॥ ८२ ॥ व्याख्या—' सोऊण इति ' सुकुमालिकाया गतिमवस्थां श्रुत्वा ' तह इति ' तथा ससकब्भसकनाम्नोर्द्वयोः साध्वोर्भगिन्याः संबंधं श्रुत्वा, तावत्पर्यंतं न विश्वसितव्यं, विषयरागादीनां विश्वासो न कर्त्तव्य इत्यर्थः, श्वेतान्युज्ज्वलानि अस्थीनि रुधिरमांसविवर्जितत्वेन यस्याऽसावेतादृशो धार्मिको धर्मस्वभावो यावद्भवति तावत्पर्यंतमित्यर्थः, एतावता कोऽर्थः ? शरीररुधिरामिषे शुक्रे भवतः, अस्थीनि श्वेतानि जातानि तथापि धर्मवता साधुना विषयादीनां विश्वासो न कर्त्तव्य इत्यर्थः ॥ ८२ ॥ अत्र सुकुमालिकायाः संबंधो निरूप्यते—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वसंतपुरे सिंहसेनो नृपस्तस्य सिंहलानाम्नी राज्ञी, तत्कुक्षिसमुत्पन्नौ शशकन्नसकनामानौ द्वौ पुत्रौ, द्वावपि तौ सहस्रयोधारौ, तयोरेका सुकुमालिका नाम्नी भगिनी, साऽतीवरूपवती, एकदा कस्याऽप्याचार्यस्याऽनुपमरसाममृतसमां देशनां श्रुत्वा शशकन्नसकाभ्यां चारित्रं गृहीतं, क्रमेण तौ गीतार्थौ जातौ, पश्चादागत्य ताभ्यां स्वभगिनी सुकुमालिका प्रतिबोधिता; तयापि चारित्रं गृहीतं. साध्वीनां समीपे च मुक्ता. सा षष्ठाष्टमाद्यातापनाविशेषितं तपः कुर्वंती स्वकीयरूपदर्पं दलयतिस्म. तथापि तद्रूपमोहिता अनेके कामिनः पुरुषास्तत्रागत्य सन्मुखं तिष्ठंति, तया सार्द्धं विषयाशंसां च कुर्वंति; क्षणमात्रमपि तदीयं संगं न मुंचंति. तद् ज्ञात्वा साध्वीभिः सोपाश्रयमध्ये एव रक्षिता; तथापि कामिनः पुरुषास्तद्रूपमोहिता उपाश्रयद्वारे समागत्य तिष्ठंति. तदीयमुखावलोकनलालसा उन्मत्तवद्भ्रमंति. तत्साध्वीभिर्गुरवे निवेदितं, स्वामिन् एतत्सुकुमालिकायाश्चारित्रमस्माभिः पालयितुमशक्यं, यतो बहवस्तरुणाः कामसेवार्थिनः समागत्योपद्रवं कुर्वंति; तेऽस्माभिः कथं वारयितुं शक्याः? तदा गुरुभिः सुकुमालिकाया बांधवौ शशकन्नसकावाहूय भणितं, भो वत्सौ गम्यतं? स्वभ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गिन्याश्च रक्षां कुरुतं ?

एतस्याः शीलपालनसाहाय्ये महान् लाभः, एतद्गुरुवाक्यं श्रुत्वा द्वावपि भ्रातरौ तस्या रक्षां कर्तुं लग्नौ. एक उपाश्रयद्वारे तिष्ठति, द्वितीयश्च भिक्षार्थं व्रजति, एकवारं तैस्तरुणैः सार्द्धं युद्धं जायमानं विलोक्य सुकुमालिकया चिंतितं धिगस्तु मदीयं रूपं यतो मदीयबांधवौ मन्निमित्तं स्वाध्यायध्यानाध्ययनादि मुक्त्वा क्लेशं सहेते, ततोऽहमनशनं विधाय यदर्थमेते कामिनस्तप्यंते तच्छरीरं व्युत्सृजामि, इति स्वयमेव विचार्य तयाऽनशनं गृहीतं. म्लानपुष्पमिव म्लानीभूता क्षीणशरीरा जाता. तस्मादेकवारं श्वासरोधेन मूर्छामापन्ना, भ्रातृभ्यां मृतेति ज्ञात्वा ग्रामाद्बहिर्वनभूमौ परिष्ठापिता, ग्राममध्ये समागतौ, पश्चाच्छीतलेन वायुना सचेतनीकृता भणिता सा प्रतिदिशं विलोकितुं लग्ना; तदवसरे तत्समीपे कश्चित् सार्थवाहः समागतस्तदीयलोका जलेंधनगृहणार्थं वने भ्रमंति, तैर्वनदेवतासदृशं तस्या रूपं विलोक्य सा गृहीता, सार्थवाहाय समर्पिता, तेनापि तैलाभ्यंगनपूर्वकं सज्जीकृता, पथ्यभोजनादिना नवयौवना कृता, पश्चात्तद्रूपमोहितेन सार्थवाहेनोक्तं भो सुभगे पुरुषभोगं विना न चैवं तवेदं शरीरं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शोभते; अथ च यदि तव विषयसुखास्वादे विमुखत्वमस्ति, तदा त्वदीयमिदमनुपमं रूपं किमर्थं विधिना घटितं? हे कमलाक्षि त्वद्विलोकनानंतरं ममान्यांगना न रोचते, यथा कल्पवल्लीकामुको भ्रमरोऽन्यवल्ल्या मनोरथं न करोति, तथा त्वद्रूपमोहितमनसो ममाप्यन्या न रोचते. अतः कृपां कुरु? मदनाब्धिमज्जितं मामुद्धर? एतत्सार्थवाहवाक्यं श्रुत्वा सुकुमालिकया चिंतितं संसारमध्ये विचित्रा कर्मणां गतिः, असंभाव्यं विधिविलसितं. यतः—

अघटितघटितानि घटयति । सुघटितघटितानि जर्जरीकुरुते ॥ विधिरेव तानि घटयति। यानि पुमान्नैव चिंतयति॥ १ ॥ कथमन्यथा भ्रातृन्यां मृतेति ज्ञात्वा वनभूमौ त्यक्ताया ममायं सार्थवाहसंबंधो मिलितः, तदेवं दृश्यते यन्ममाद्यापि किमपि भोगकर्मास्ति; अथायं सार्थवाहोऽपि महानुपकारी मम, अतोऽस्य मत्संगमाभिलाषं पूरयामीति संचिंत्य सार्थवाहचरणयोर्निपत्य करौ मुकुलीकृत्य सैवं वदति, स्वामिन् त्वदायत्ता मदंगवल्ली, गृहाणेदं स्तनस्तबकयुग्मं? पूरयस्व यथेष्टं स्वमनोरथं? ततः सार्थवाहेन सा नगरमानीता, निःशंकं तयासह विषयसुखमनुभवतस्तस्य बहुकालो गतः, अस्मिन्नवसरे विहारं कुर्वतौ शशाकभसक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नामानौ तौ द्वौ साधू तन्नगरमागतौ, आहारार्थं च नगरमध्ये निर्गतौ, कर्मयोगतस्ताभ्यां सुकुमालिकाया गृहे धर्मलाभो दत्तः, तौ दृष्ट्वा सुकुमालिकयोपलक्षितौ, परं भ्रातृभ्यां सा सम्यग्नोपलक्षिता; सन्मुखं विलोकयितुं लग्नौ. सुकुमालिकयोक्तं स्वामिन् किं सन्मुखमवलोक्य स्थितौ? साधुभ्यामुक्तं तव सदृशी अस्माकमेका भगिनी पूर्वमासीत्. तदाऽश्रुपातं मुंचंत्या तया सर्वमपि पूर्ववृत्तान्तस्वरूपं कथितं; पश्चाद्बंधुभ्यां सार्थवाहप्रतिबोधनपूर्वकं सा गृहवासान्मोचिता, पुनरपि दीक्षा दत्ता, शुद्धचारित्रमाराध्य प्रांते शुद्धालोचनपूर्वकं मृत्वा सा देवत्वं गता, एतत्सुकुमालिकायाः संबंधं श्रुत्वा धर्मवता विषयविश्वासो न विधेयः, एवं न विचारणीयं यदहं जराजीर्णोऽस्मि, मम किं करिष्यंति विषयाः? ॥ इति सुकुमालिकायाः संबंधः षट्पंचाशत्तमः ॥ ५६ ॥

॥ मूलम् ॥ खरकरहतुरयवसहा । मत्तगयंदावि नाम दम्मंति ॥ इक्को नवरि न दम्मइ । निरंकुसो अप्पणो अप्पा ॥ ८३ ॥ व्याख्या—' खर इति ' खरा रासभाः, करभा उष्ट्राः, तुरगा अश्वाः, वृषभा बलिबर्दाः, एतेषां द्वंद्वः, मत्तगजेंद्रा अपि मत्तहस्तिनोऽपि, नामे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति प्रसिद्धौ, एतेऽपि दम्यंते वशीक्रियंते, ' नवरि इति ' परं एको न दम्यते न वशीक्रियते, कः ? एकोंकुशरहित आत्मन आत्मा ॥ ८३ ॥

॥ मूलम् ॥—वरं मे अप्पा दंतो । संजमेण तवेण य ॥ माहं परेहिं दम्मंतो । बंधणेहिं वहेहि य ॥ ८४ ॥ व्याख्या—' वरमिति ' वरं प्रधानं मे इति मम यत्स्वीकय आत्मा दांत इति दम्यते, केन कृत्वा ? संयमेन चारित्रेण, अथ च ' तवेण य इति ' तपसा कृत्वा ' मा इति निषेधे ' एतादृशो मा भूयां अहमित्यर्थः, कुगतौ गतोऽहं परैरन्यैर्दाम्यन् ताप्यमानो वध्यमानीयमानो माभूवमित्यर्थः, कैः कृत्वा ? बंधनैः शृंखलारज्जुप्रमुखबंधनैः, अथ च वधैर्यष्ट्यादिना हननैः ॥ ८४ ॥

॥ मूलम् ॥—अप्पा चेव दमेअव्वो । अप्पा हु खलु दुद्दमो ॥ अप्पा दंतो सुही होइ । अस्सि लोए परत्थ य ॥ ८५ ॥ व्याख्या—' अप्पा इति ' चेवइति निश्चये आत्मैव ' दमेयव्वो इति ' दांतव्यो वश्यमानेतव्य इत्यर्थः, ' हु इति ' संभावनायां, ' खलु इति ' वाक्यालंकारे, आत्मा दुर्दमो दुःखेन दम्यते इति दुर्दमः, तत्रात्मा दांतः सन् सुखी भवति, अस्मि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न लोके इह भवे, परत्र च परभवेऽपीत्यर्थः ॥ ८५ ॥

॥ मूलम् ॥—निच्चं दोससहगउ । जीवो अ विरहिअमसुहपरिणामो ॥ नवरं दिन्ने प-
सरे । तो देइ पमायमयरेसु ॥ ८६ ॥ व्याख्या—' निच्चं इति ' नित्यं दोषो द्वेषः, उपलक-
णत्वाद्रागस्यापि ग्रहणं, ताभ्यां सहगतो रागद्वेषसहचारीत्यर्थः, एतादृशोऽयं जीवः, अविर-
हितं निरंतरं अशुभाः परिणामा यस्येति, एतादृशो वर्त्तते, नवरं केवलं यद्यात्मनः प्रसरो
दीयते, मुत्कलो मुच्यते इत्यर्थः, ' तो इति ' तदा ददाति प्रमादं विषयकषायादिकं, केषु ?
' मयरेसु इति ' संसारसमुद्रमध्ये लोकविरुद्धेष्वागमविरुद्धेषु कार्येष्वित्यर्थः ॥ ८६ ॥

॥ मूलम् ॥—अच्चिअ वंदिअ पूइअ । सक्कारिअ पणमिउ महग्घविउ ॥ तं तह करेइ
जीवो । पामेइ जह अप्पणो गणं ॥ ८७ ॥ व्याख्या—' अच्चिअ इति ' अर्चितो गंधादिना,
वंदितोऽनेकलोकैर्गुणस्तवेन, पूजितो वस्त्रादिना, सत्कारित उन्नानादिना, प्रणतो मस्तकेन,
' महग्घविउत्ति ' आचार्यपददानान्महत्वं प्रापित इत्यर्थः, एतादृशो जीवो गर्वितः सन् प्र-
मादादिकं तत्कार्यं तथा करोति, यथा स जीव आत्मनः स्थानं महत्वलक्षणं पातयति ॥८७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—सीलव्वयाइं जो बहु–फलाइं हंतूण सुक्खमहिलसई ॥ धिइदुब्बलो तवस्सी । कोडीए कागिणिं किणइ ॥ ८८ ॥ व्याख्या—' सील इति ' शीलः सदाचारो, व्रतानि पंचमहाव्रतानि, शीलश्च व्रतानि चेति द्वंद्वः, यः पुमान्, कीदृशानि? बहूनि फलानि स्वर्गमोक्षादीनि येभ्यस्तानि, एतादृशानि शीलव्रतानि ' हंतूण इति ' हत्वा लुप्त्वा यो मूर्खः सुखं विषयसेवारूपमभिलषति वांछति, धृत्या संतोषेण दुर्बलोऽसमर्थ एतादृशस्तपस्वी वराकः, किं करोति? कोट्या कोटिमूल्यार्पणेन काकिणीं रूपकाऽशीतिभागरूपां क्रीणाति गृह्णाति ॥ ८८ ॥

॥ मूलम् ॥—जीवो जहा मणसिअं । हिअइच्छिअं पत्थिएहिं सुक्खेहिं ॥ तो से ऊणं न तीरइ । जावज्जीवेण सव्वेण ॥ ८९ ॥ व्याख्या—' जीवो इति ' जीवोऽयं संसारी यथा मानसैर्मनोऽभिलाषानुकूलैरित्यर्थः, अथवा येन प्रकारेण मनसि चिंतितैरित्यर्थः, वा हितैः ' इच्छित इति ' वांछितैः प्रार्थितैरेतादृशैः कलत्रादिसुखैस्तोषयितुं संतोषयितुं न तीर्यते न पार्यतेऽयं जीवः, ' जावज्जीवेण सव्वेण इति ' समग्रेणापि तन्मनोनिरंतरमनुभूतेनापि विषयसुखे- ॥ ३८१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न नायं संतोषं प्राप्नोतीत्यर्थः ॥ ८९ ॥

॥ मूलम् ॥—सुमिणंतराणुन्नूअं । सुक्कं समइन्द्रिअं जहा नन्नि ॥ एवमिमंपि अईअं । सुक्कं सुविणोवमं होइ ॥ ९० ॥ व्याख्या—' सुमिणं इति ' स्वप्नांतरे स्वप्नमध्येऽनुन्नूतं भुक्तं, एतादृशं सौख्यं समतिक्रांतं जागरणानंतरं ' जह इति ' यथा नास्ति न वर्त्तते, स्वप्नदृष्टं सुखं यथा जाग्रदवस्थायां न न्नवति एवममुना प्रकारेण, इदमपि प्रत्यक्षतो भुज्यमानमपि विषयसुखमतीतं सत्, वर्त्तमानकालातिक्रांतं सत् कीदृशं न्नवति? सौख्यं विषयरूपं स्वप्नेनोपमा तुलना यस्य तत्स्वप्नोपमं स्वप्नसदृशं न्नवति, अतो नैतस्मिन्नादरो विधेय इति न्नावः.

॥ मूलम् ॥—पुरनिग्गमणे जक्खो । महुरामंगू तहेव सुअनिहसो ॥ बोहेइ सुविहिअजणं । विसोअइ बहुं च हिअएण ॥ ९१ ॥ व्याख्या—' पुर इति ' नगरजलनिर्गममार्गे ' लोकन्नाषया नगरखाले ' तत्समीपस्थितयक्षप्रासादे इत्यर्थः, यक्षोऽधिष्टायकत्वेनोत्पन्नः, क न-त्पन्नः? मथुरायां नगर्यां मंगूनामाचार्यः, पुनस्तथैव श्रुतनिकषः सिद्धांतपरीक्षायाः कषपाषाणतुल्यो बोधयति प्रतिबोधयति सुविहितजनं सुविहितसाधुलोकं, अर्थात्स्वकीयशिष्यवर्गमि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यर्थः, विशोचति बहु यथा स्यात्तथा हृदयेन शिष्यान् प्रतिबोधयन् मनसा बहु शोचति; तदेवाग्रेतनगाथायां कथयति ॥ ए१ ॥ अत्र कथानकं—

श्रीमथुरायां नगर्यामेकवारं श्रुतजलनिधयो युगप्रधानाः श्रीमंगूनामाचार्याः समवसृताः, तत्र बहवो धनाढ्याः श्राद्धाः परिवसंति, साधूनामतीवभक्तिकारकाः, तैराचार्याणां बह्वी सपर्या कृता, आचार्या अपि तत्र स्थिताः संतः पठंति पाठयंति व्याख्यानं च कुर्वंति. तेन श्रावकाणां चित्तान्यतीवावर्जितानि, मंगूनामाचार्याणामुपरि ते विशेषतो भक्तिमंतः संजाताः, एवं च ते जानंति यदेतेषामाहारादिसमर्पणेन वयं संसारपारं प्राप्स्यामः, एवं ज्ञात्वा तत्रत्याः श्रावकास्तेभ्यो मिष्टं सरसमाहारमर्पयंति. तमाहारमुपभुंजानानां तेषामाचार्याणां रसगृध्रता जाता, मनसि चिंतितं चान्यत्र विहारं कुर्वाणैरस्माभिरेतादृश आहारः कुत्रापि न प्राप्तः, श्राद्धा अपि विशेषतो भक्तिं कुर्वंति, तदत्रैव स्थानं समीचीनमिति विचार्य ते स्थानवासित्वेन तत्र स्थिताः, गृहिभिः परिचयो जातः, पश्चान्मिष्टाहारभोजनेन, सुकोमलशय्याशयनेन, समीचीनोपाश्रयवासेन स रसगृध्रो जातः, आवश्यकादिकृत्यमपि न करोति, मन- ॥ ३८३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्यन्निमानं वहति, यन्मां श्राद्धः कीदृशं सरसमाहारं समर्पयंतीत्यादि स रसगारवं करोति. इत्यादि गारवत्रयनिमग्नोऽसौ सर्वमपि तृणप्रायं गणयति. मूलगुणमध्येऽपि कदाचिदतिचारादिना स शिथिलो भवति.

एवं बहुकालं यावदतिचारादिदूषितं चारित्रं प्रपाल्य प्रांते तदनालोच्य मृत्वा तन्नगरजलनिर्गमनस्थानसमीपवर्त्तियक्षायतने स यक्षो जातः, विभंगज्ञानेन स्वपूर्वभवं दृष्ट्वा पश्चात्तापं चकार. हा हा अज्ञानेन मया जिह्वास्वादवशेनैतादृशी देवदुर्गतिः प्राप्ता, एवं विचार्य स्वकीयशिष्यवर्गं बाह्यभूमौ गत्वा पश्चात्समीपमायांतमुद्दिश्य जिह्वां बहिर्निष्कास्य स दर्शयतिस्म. तां दृष्ट्वा शिष्यसाधुवर्गो दृढीभूय तं पृच्छतिस्म, त्वं कः? किमर्थं जिह्वां बहिर्निष्कासयसि? यक्षेणोक्तमहं भवतां गुरुर्मंगूनामाचार्यो जिह्वास्वादपरवशो मृत्वाऽपवित्रदेवो जातोऽस्मि; मया गृहं मुक्त्वा चारित्रं गृहीत्वा जिनोदितो धर्मो नाऽाराधितः, गारवत्रयेणायमात्मा मलिनीकृतः, चारित्रशिथिलतया निजायुः क्षयं नीतं, अधुनाऽहमधन्योऽकृतपुण्योऽविरतश्च किं करोमि? विरतिमनुपालयितुमसमर्थः, स्वकीयमात्मानं शोचामि, अयं पापो जी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वो वीतरागधर्ममवाप्यापि सम्यक् तमकुर्वन् बहुकालं संसारोपरि भ्रमणं करिष्यति, तस्मा-
न्नो साधवो यूयं जिनधर्मं प्राप्य मा रसलंपटा भवत ? यदि जिह्वास्वादिनो भविष्यथ तदा
ममेव पश्चात्तापं प्राप्स्यथ; एवं पूर्वभवशिष्याणां शिक्षां दत्वा स यक्षस्तिरोदधे. पश्चात्ते चा-
रित्रं सम्यगाराध्य सद्गतिभाजो जाताः, एवं ज्ञात्वा जिह्वास्वादस्त्याज्यः ॥ इति मंगूनामा-
चार्यदृष्टांतः सप्तपंचाशत्तमः ॥ ५७ ॥ यक्षेण यत् शोचितं तदग्रेतनगाथायामाह—

॥ मूलम् ॥—निग्गंतूण घराउ । न कउ धम्मो मए जिणक्खाउ ॥ इड्ढिरसायगरुअ-
त्तणेण न य चेइउ अप्पा ॥ ९२ ॥ व्याख्या—' निग्गंतूण इति ' निर्गत्य गृहान्मंदारात्
' मए इति ' मया धर्मो न कृतः, कीदृशो धर्मः ? जिनाख्यातो जिनभाषितः, केन कृत्वा ?
ऋद्धिर्वासवस्त्रादीनां, रसो मिष्टाहारादीनां सातं कोमलशय्यादिकं, एतेषु ' गुरुअत्तणेण ' आ-
दरत्वेन न च चेतितो न सावधानीकृतः, आत्मा स्वकीयजीवः ॥ ९२ ॥

॥ मूलम् ॥—उसन्नविहारेण हा । जह कीणंमि आउए सव्वं ॥ किं काहामि अहन्नो ।
संपइ सोआमि अप्पाणं ॥ ९३ ॥ व्याख्या—' उसन्न इति ' उसन्नविहारिणं चारित्रविष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ये शिथिलत्वेन व्यवहरणं तेनेत्यर्थः, हा इति खेदे यथा येन प्रकारेण ' कीणंमि इति ' क्रयं गतं सर्वमप्यायुः, प्राकृतत्वाद्विभक्तिव्यत्ययः, अधन्यो निर्भाग्योऽहं किं करिष्यामि ? संप्रत्यधुना शोचाम्यात्मानं ॥ ९३ ॥

॥ मूलम् ॥—हा जीव पाव भमिहसि । जाइजोणिसयाइं बहुआइं॥ भवसयसहस्सदुलहं–पि जिणमयं एरिसं लद्धुं ॥ ९४ ॥ व्याख्या—' हा जीवेति ' हा इति खेदे हे जीव ' पाव इति ' हे पाप हे दुरात्मन् भ्रमिष्यसि बहुकालं यावत्, कानि भ्रमिष्यसीत्याह–जातय एकेंद्रियाद्याः, योनयः शीतोष्णाद्यास्तेषां शतानि बहूनि, भवानां शतसहस्रैर्दुर्लभं दुःप्रापमेतादृशमपि जिनानां तीर्थंकराणां मतं धर्मं ' एरिसमिति ' अचिंत्यचिंतामणिसदृशं लब्ध्वा प्राप्य तदनाराधनेनेत्यर्थः ॥ ९४ ॥

॥ मूलम् ॥—पावो पमायवसउ । जीवो संसारकज्जमुज्जुत्तो॥ दुक्खेहिं न निविन्नो । सुक्खेहिं न चेव परितुट्ठो ॥ ९५ ॥ व्याख्या—' पावो इति ' पापः पापीयान्, प्रमादवशतः प्रमादवशवर्त्तीत्यर्थः, एवंविधो जीवः संसारी संसारकार्यविषये उद्यत उद्यमवान्, एतादृशो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जीवो दुःखैः कृत्वा ' न निर्विन्नो इति ' न खेदं प्राप्तः, सुखैः कृत्वा न चैव, एवेति निश्चये न चैव परितुष्टः संतोषं प्राप्तः, यतोऽसौ नवं नवं सुखं वांछति ॥ ९५ ॥

॥ मूलम् ॥—परितप्पिएण तणुन्न । आहारो जइ घणं न नज्जमइ ॥ सेणियराया तं तह । परितप्पंतो गन्न नरयं ॥ ९६ ॥ व्याख्या—' परितप्पिएण इति ' पापकर्मणां निंदा-गर्हापश्चात्तापादिकरणेन ' तणुन्न इति ' तनुर्लघुर्भवति, गर्हादिकरणेन शिथिलकर्मैव याति, न तु दृढनिबद्धमित्यर्थः, अथवा ' परितप्पिएण इति ' पश्चात्तापकरणेन तनुरेव स्वल्प एवाधारो भवति, न तु महान् कर्मक्षय इत्यर्थः, यदि घनमत्यर्थं ' न नज्जमइत्ति ' नोद्यमं करोति तपःसंयमविषये तदा स्वल्प एव कर्मक्षय इत्यर्थः, श्रेणिकनामा राजा ' तं तह इति ' तत्तेन प्रकारेण ' परितप्पंतो इति ' हा मया विरतिर्न कृतेति शोचन्नपि नरकं गतः, अतः पश्चात्तापेन स्वल्प एव कर्मक्षय इत्यर्थः ॥ ९६ ॥

॥ मूलम् ॥—जीवेण जाणि न विस–ज्जियाणि जाईसएसु देहाणि ॥ थेवेहिं तन्न सयलंपि । तिहुअणं हुज्ज पब्भिहलं ॥ ९७ ॥ व्याख्या—' जीवेण इति ' जीवेन प्राणधारकेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूर्वं गृहीत्वा यानि शरीराणि ' विसज्जियाणि इति ' विसर्जितानि मुक्तानि त्यक्तानीति यावत्. केषु ? जातिशतेषु, जातीनामेकेंद्रियादीनां शतेषु शरीराणि, स्तोकैरपि ' तइ इति ' तैः शरीरैः, न तु सर्वैरित्यर्थः, ' सयलंपि इति ' सकलमपि संपूर्णमपि त्रिभुवनं भुवनत्रयं ' हुज्ज इति ' भवेत् पडिहडं संपूर्णं, एतावंति शरीराणि गृहीत्वा मुक्तानि तथापि न संतुष्ट इति ॥ ९७ ॥

॥ मूलम् ॥—नहदंतमंसकेसट्ठि–एसु जीवेण विप्पमुक्केसु ॥ तेसुवि हविज्ज कइलास–मेरुगिरिसंनिभा कूडा ॥ ९८ ॥ व्याख्या—' नह इति ' नखा दंता मांसं केशा अस्थीनि, एतानि शरीराऽवयवभूतानि, तेषां हंहस्तेषु, कीदृशेष्वेतेषु ? जीवेन पूर्वभवे गृहीत्वा विप्रमुक्तेषु तेष्वपि नखादिषु, यदि तानि सर्वाण्येकत्र क्रियंते तदा ' हविज्ज इति ' भवंति कैलासो हिमगिरिः, मेरुः कनकाद्रिः, गिरयः सामान्यपर्वताः, तैः समाः सदृशाः कूटा इति पुंजा भवंति, अत एतेषु न प्रतिबंधो विधेय इत्युपदेशः ॥ ९८ ॥

॥ मूलम् ॥—हिमवंतमलयमंदर–दीवोदहिधरणिसरिसरासीउ ॥ अहिअपरो आहारो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। छुहिएणाहारिन हुज्जा ॥ ९९ ॥ व्याख्या—' हिमवंत इति ' हिमवान् पर्वतः, मलयाचलो दक्षिणदिग्वर्त्ती पर्वतः, मंदरो मेरुः, द्वीपा जंबूद्वीपाद्या असंख्याताः, उदधयो लवणाद्याः संख्यातीताः, धरित्र्योऽन्नपानाद्याः सप्त, एतेषां द्वंद्वः, तैः सदृशा राशयः समूहाः क्रियंते, तेभ्योऽप्यधिकतरोऽतिशयेन महानाहारोऽशनादिकः क्षुधितेन बुभुक्षितेनाऽनेन जीवेनाऽाहारितो भवेत्. अनंतानि पुद्गलद्रव्याणि एकेन जीवेन भक्षितानीति भावः ॥ ९९ ॥

॥ मूलम् ॥—जन्नेण जलं पीयं । घम्मायवजगमिएण तंपि इहं ॥ सव्वेसुवि अगडतलाय । नई समुद्देसु नवि हुज्जा ॥ १०० ॥ व्याख्या—' जन्नेण इति ' यदनेन जीवेन जलं पीतं, कीदृशेन ? ' घम्मायवजगमिए इति ' ग्रीष्मातपपीडितेन एतादृशेन, तदपि जलं पूर्वभवेषु पीतं ' इहं इति ' अस्मिन् संसारे यद्येकत्र क्रियते तदा तावज्जलं सर्वेष्वपि ' अगडा इति ' कूपास्तटाकाः सरांसि, नद्यो गंगाद्याः, समुद्राः लवणाद्यास्तेष्वपि ' न हुज्जा इति ' न भवेत्. सर्वेभ्योऽपि कूपादिजलेभ्यः पूर्वं पीतं जलमनंतगुणमित्यर्थः ॥ १०० ॥

॥ मूलम् ॥—पीयं थणयच्छीरं । सागरसलिलाउ बहुअयरं ॥ संसारंमि अणंते । मन्न-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णं अन्नमन्नाणं ॥ १ ॥ व्याख्या—' पीयं इति ' पीतं अनेन जीवेन स्तन्यक्षीरं समुद्जलादपि ' हुज्ज इति ' भवेत्, बहुतरं समुद्जलादप्यनंतगुणं मातुः क्षीरं पीतमित्यर्थः; संसारे भवे कीदृशे ? अनंते न विद्यते अंतो यस्य तस्मिन्, स्तन्यक्षीरं कासां ? मातृणां जननीनां, कीदृशीनां मातृणां? ' अन्नमन्नाणं इति ' अन्यानामन्यानां भिन्नानां भिन्नानामित्यर्थः ॥१॥

॥ मूलम् ॥—पत्ता य कामभोगा । कालमणंतं इहं स उवभोगा ॥ अपुव्वमिव मन्नइ । तहवि य जीवो मणे सुखं ॥ २ ॥ व्याख्या—' पत्ता इति ' प्राप्ताः कामभोगाः, अनेन जीवेन कालमनंतं यावत् ' इहं इति ' अस्मिन् संसारे, कीदृशाः कामभोगाः, स उवभोगा इति ' उपभोगेन सहिता एतादृशा भोगा अनंतवारं प्राप्ताः, अपूर्वमिव नवीनमिवाऽननुभूतमिव मन्यते, तथापि अयं जीवो ' मणे इति ' मनसि सुखं विषयजनितं नवीनमिव मन्यते इत्यर्थः ॥ २ ॥

॥ मूलम् ॥—जाणइ जह भोगिद्धि–संपया सव्वमेवं धम्मफलं ॥ तहवि दढमूढहियउ । पावे कम्मे जणो रमइ ॥ ३ ॥ व्याख्या—' जाणइ इति ' जानात्ययं जीवः ' जह इ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति ' यथा भोगा इंद्रियजनितानि सुखानि, ऋद्धयो राजलक्ष्म्यः, संपदो धनधान्याद्याः, एतत्सर्वं, एवेति निश्चयेन धर्मफलं धर्मस्य फलं कार्यं, धर्मकारणत्वात्, एवं जानाति, तथापि दृढमूढहृदयो दृढमत्यर्थं मूढमज्ञानावृतं हृदयं यस्यैतादृशो जनो लोकः ' पावे कम्मे इति ' पापकर्मणि रमते क्रीडां करोति तत्सुको भवतीत्यर्थः, जानन्नपि अजानान इव प्रवर्त्तते इत्यर्थः ॥ ३ ॥

॥ मूलम् ॥—जाणिज्जई चिंतिज्जइ । जम्मजरामरणसंभवं दुक्खं ॥ न य विसएसु विरज्जइ । अहो सुबद्धो कवडगंठी ॥ ४ ॥ व्याख्या—' जाणिज्जइ इति ' ज्ञायते गुरुणामुपदेशेन चिंत्यते विचार्यते मनसि, किं तत् ? जन्माऽवतरणं जरा वयोहानिः, मरणं प्राणत्यागः तत्संभवं तज्जनितं दुःखं ज्ञायते जीवेन, तथापि विषयेषु न विरज्यते न विरक्तो भवति, ' अहो इति ' महदाश्चर्यं सुबद्धः केनापि शिथिलीकर्त्तुं न शक्यः, कपटग्रंथिर्मोहग्रंथिः, तद्वशादेवायं जीवो विषयेषु रज्यते इत्यर्थः ॥ ४ ॥

॥ मूलम् ॥—जाणइ य जह मरिज्जइ । अमरंतंपि जरा विणासेइ ॥ न य उविग्गो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लोन। अहो रहस्सं सुनिम्मायं ॥ ५ ॥ व्याख्या—' जाणइ इति ' ज्ञायते एवं यत्सर्वोऽप्ययं स्वस्वायुःक्षये मरिष्यते, अमरंतमपि जीवंतमपि पुरुषं जरा विनाशयति, न चोद्विग्नो लोकस्तथापि संसारान्न खिन्नो भवतीत्यर्थः, अहो इति महदाश्चर्यमिदं ' रहस्समिति ' एकांते ' सुनिम्मयं इति ' गाढत्वेन निर्मापितं ॥ ५ ॥

॥ मूलम् ॥—दुप्पयं चउप्पयं बहु-पयं च अपयं समिद्धमहणं वा ॥ अणविकएवि कयंतो । हरइ हयासो अपरितंतो ॥ ६ ॥ व्याख्या—' दुप्पयं इति ' द्विपदं मनुष्यादिकं, चतुष्पदं गोमहिषीप्रमुखं, बहुपदं भ्रमरादिकं, अपदं पदरहितं सर्पादिकं, समृद्धं धनाढ्यं, अधनं निर्धनं, वाशब्देन पंडितमूर्खादयः सर्वेऽपि ग्राह्याः, अनपकृतेऽप्यपराधमंतरेणापि कृतांतो मरणांतान् पूर्वोक्तान् सर्वानपि हरति मारयति. कीदृशः कृतांतः ? हता आशा येनेति हताशः, पुनः कीदृशः ? ' अपरितंतो ' अपरिक्लिन्नोऽखिन्न इति यावत् ॥ ६ ॥

॥ मूलम् ॥—न य नज्जइ सो दियहो । मरियव्वं चावसेण सव्वेण ॥ आसापासपरद्धो । न करेइ हियं सहि वप्पो ॥ ७ ॥ व्याख्या—' न य इति ' न च ' नज्जइ इति ' ज्ञायते, स

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिवसो मरणदिवसः ' मरियव्वं इति ' मर्त्तव्यं, तु अवश्येनैव ' सव्वेण इति ' सर्वैरपि जीवैरित्यर्थः, आशा मनोरथास्तद्रूपा ये पाशास्तैः ' परद्धो इति ' व्याप्तः परवश इत्यर्थः, एतादृशो जीवो यद् हितं धर्मानुष्ठानादि, तन्न करोति, कीदृशो? वध्यो मरणमुखे तिष्टन्नित्यर्थः.

॥ मूलम् ॥—संझरागजलबुब्बुयोवमिए । जीविए य जलबिंदुचंचले ॥ जुव्वणे य नईवेगसन्निभे । पावजीव किमयं न बुझसि ॥ ८ ॥ व्याख्या—' संझराग इति ' संध्यायां यो रागः पीतनीलादिः, जलेषु ये बुद्बुदाः सिबुकास्तैरुपमा यस्य, तदेतादृशं जीवितं प्राणिनां वर्त्तते; पुनः कीदृशं जीवितं? जलबिंदुः कुशाग्रस्थितपानीयबिंदुस्तद्वच्चंचलं चपलं, अथ च यौवनं नदीवेगेन सन्निभं सदृशं वर्त्तते, तथापि हे पापजीव ' किमयं इति ' जीवितयौवनाद्यस्थिरं ज्ञात्वा किमु न प्रतिबोधं प्राप्नोषि? ॥ ८ ॥

॥ मूलम् ॥—जं जं नजइ असुइ । लज्जिजइ कुच्छणिज्जमेयंति ॥ तं तं मग्गइ अंगं । नवरि मणंगुच्च पडिकूलो ॥ ९ ॥ व्याख्या—' जं जं इति ' यद् यद् ज्ञायतेऽशुचि अपवित्रं, येनांगेन दृष्टेन लज्ज्यते, यदंगं ' कुच्छणिज्जमिति ' जुगुप्सनीयं ' एयंति ' एतत्स्त्रीणां जघ- ॥३९३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नादि तत्तदंगं मार्गयत्यन्विलषति मूढात्मा ' न वरमिति ' केवलं ' मणंगुन्न इति ' मदनः कंदर्प एवात्र प्रतिकूलः शत्रुः, तद्वशादेवायं जुगुप्सनीयमप्यतिरमणीयं मन्यते इत्यर्थः ॥ ९ ॥

॥ मूलम् ॥—सव्वगहाणं पन्नवो । महागहो सव्वदोसपायट्टी ॥ कामग्गहो दुरप्पा । जेणन्निन्नूयं जगं सव्वं ॥ १० ॥ व्याख्या—' सव्व इति ' सर्वेषां ग्रहाणामुन्मादानां प्रन्नव उत्पतिस्थानं, महाग्रहो महानुन्मादः, सर्वे दोषाः परस्त्रीगमनादयस्तेषां ' पायट्टी इति ' प्रवर्त्तकः, एतादृशः कामगृहः कामसमुत्पन्नश्चित्तविन्नमः, कीदृशः ? दुरात्मा दुष्ट इत्यर्थः, येन कामग्रहेण सर्वं जगदन्निन्नूतं परान्नूतिमायत्तीकृतमिति यावत्. अतः कामग्रह एव दुस्त्याज्य इत्यर्थः ॥ १० ॥

॥ मूलम् ॥—जो सेवइ किं लहइ । थामं हारेइ दुब्बलो होइ ॥ पावइ वेमणुस्सं । दुक्खाणि अ अत्तदोसेणं ॥ ११ ॥ व्याख्या—' जो सेवइ इति ' यस्तं कामं सेवते स किं लन्नते ? किं प्राप्नोतीत्याह—' थामं इति ' वीर्यं हारयति, दुर्बलः क्षीणशरीरो नवति, अथ च प्राप्नोति वैमनस्यं चित्तोद्वेगरूपं, च पुनर्दुःखानि राजयक्ष्मादिरोगान् प्राप्नोति ' अत्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दोसेणं इति ' आत्मनो दोषेणाऽपराधेनेति. ॥ ११ ॥

॥ मूलम् ॥—जह कच्छुलो कच्छुं । कंडुयमाणो दुहं मुणइ सुक्खं ॥ मोहाउरा मणुस्सा । तह कामसुहं सुहं विंति ॥ १२ ॥ व्याख्या—' जह इति ' यथा कच्छुलः ' कंडुयमाणो इति ' नखाग्रैर्विलिखन् ' दुहं इति ' दुःखं यदुत्पद्यते तत्सुखमिति मन्यते. ' तहेति ' तथा मोहेनाऽऽतुरा विह्वला मनुष्या विकृतरुधिरपुरुषवत् कामदुःखं विषयसेवनरूपं दुःखं सुखमिति कृत्वा मन्यंते इत्यर्थः ॥ १२ ॥

॥ मूलम् ॥—विसयविसं हालाहलं । विसयविसं नक्कडं पियंताणं ॥ विसयविसाइन्नंपिव । विसयविसविसूइया होइ ॥ १३ ॥ व्याख्या—' विसय इति ' विषयाः शब्दादयस्तद्रूपं विषं संयमजीवितविनाशित्वात्, कीदृशं ? हालाहलं तत्कालमारकविषतुल्यं, विशदमुज्ज्वलं शुभ्रं वा विषं कामसेवनारूपं, कीदृशं ? नत्कटं कालकूटतुल्यं ' पियंताणं इति ' तद्विषं पिबतां सतां प्राणिनां, विषयविषादन्निसेवितात् ' इन्नंपिव इति ' बह्वाहारादजीर्णमिव विषयविषस्याऽतिविशूचिकाऽजीर्णं नवति, तदाऽनंतानि मरणान्यवाप्नोतीत्यर्थः ॥ १३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—एवं तु पंचहिं आसवेहिं । रयमायणित्तु अणुसमयं ॥ चउगइदुहपरेतं । अणुपरियट्टंति संसारे ॥ १४ ॥ व्याख्या—' एवंतु इति ' एवमनेन प्रकारेण तु पुनः ' पंचहिं आसवेहिं इति ' पंचभिरिंद्रियैः प्राणातिपातादिभिर्वा, रजः पापकर्मरूपं ' आयणित्तु इति ' आदाय गृहीत्वा ' अणुसमयं इति ' प्रतिसमयं चतसृणां गतीनां नारकादिकानां यानि दुःखानि, तेषां ' परंतं इति ' पर्यंतं यावत् ' अणुपरियट्टंति इति ' भ्रमंति संसारमध्ये ॥१४॥

॥ मूलम् ॥—सव्वगइं पक्कंदे । काहिंति अणंतए अकयपुन्ना ॥ जे य न सुणंति धम्मं । सोऊण य जे पमायंति ॥ १५ ॥ व्याख्या—' सव्वगइं इति ' सर्वासु गतिषु प्रस्पंदाः परावर्त्तरूपा भ्रमणानीति यावत्. ' काहिंति ' करिष्यंति. कस्मिन् अनंतके अंतरहितेऽर्थात्संसारे इत्यर्थः, के करिष्यंति ? अकृतपुण्याः, च पुनर्ये प्राणिनो धर्मं दुर्गतिप्रपतत्प्राणिनां धारणरूपं जिनभाषितं न शृण्वंति, च पुनः श्रुत्वापि धर्मं निशम्यापि ये प्रमाद्यंति प्रमादमाचरंति, तेऽनंतवारं चतुर्गतिपरावर्त्तान् कुर्वंतीत्यर्थः ॥ १५ ॥

॥ मूलम् ॥—अणुसिट्ठा य बहुविह । मिच्छदिट्ठीय जे नरा अहमा ॥ बद्धनिकाइयक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

म्मा । सुणंति धम्मं न य करेंति ॥ १६ ॥ व्याख्या—' अणुसिट्ठा इति ' बहुविधं बहुभिः प्रकारैः ' अणुसिट्ठा य इति ' अनुशिष्टा धर्मोपदेशादिना प्रेरिताः, एतादृशा ये मिथ्यादृष्टयः सम्यग्ज्ञानरहिता अधमा मध्यमा नरा भवंति, कीदृशा नराः ? बद्धानि निकाचितानि, नष्टत्तनादीनां करणादीनामन्यतरेणापि क्षेप्तुमशक्यानि, एतादृशानि कर्माणि ज्ञानावरणादीनि यैस्ते, एतादृशास्ते पुरुषाः कदाचित्स्वजनादिप्रेरणया धर्मं शृण्वंति, परं न कुर्वंति सम्यग् नाचरंति, अतो लघुकर्मणामेव सुप्रापोऽयं धर्म इत्यर्थः ॥ १६ ॥

॥ मूलम् ॥—पंचेवि नष्पिऊणं । पंचेव रक्खिऊण भावेणं ॥ कम्मरयविप्पमुक्का । सिद्धिगइमणुत्तरं पत्ता ॥ १७ ॥ व्याख्या—' पंचेवित्ति ' पंच हिंसादीनि पदानि ' नष्पिऊणं इति ' त्यक्त्वा, एवेति वाक्यालंकारे, अहिंसादीनि पंच व्रतानि ' भावेण इति ' भावेन शुद्धात्मपरिणामेन ' रक्खिऊण इति ' रक्षयित्वा पालयित्वेत्यर्थः, कर्माणि ज्ञानावरणादीन्येव रजांसि, तैर्विप्रमुक्ता अष्टकर्मरजोमलक्षपणोद्भूतविशदात्मभावा इत्यर्थः, एतादृशा अनुत्तरां सर्वोत्कृष्टां सिद्धिगतिं प्राप्ताः, अनेके प्राणिन इति शेषः, अतो हिंसादित्यागादहिंसादिपालनमेव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सिद्धिगतिनिबंधनमित्यर्थः ॥ १७ ॥

॥ मूलम् ॥—नाणे दंसण चरणे । तवसंयमसमिइगुत्तिपच्छित्ते ॥ दमनस्सग्गववाई । दव्वाइं अन्निग्गहे चेव ॥ १८ ॥ व्याख्या—' नाणे इति ' ज्ञाने सम्यगवबोधरूपे, दर्शने तत्वश्रद्धानलक्षणे, चरणे इति चारित्रे आश्रवनिरोधलक्षणे, तपसि द्वादशभेदे, संयमे सप्तदशभेदे, समितयः सम्यक्प्रवृत्तिरूपा ईर्यासमित्यादयः पंच तासु, गुप्तयो निवृत्तिरूपा मनोगुप्त्यादयस्तासु, प्रायश्चित्ते पापक्रियानिवृत्तिरूपे दशप्रकारे, दमे पंचेंद्रियदमनरूपे, नत्सर्गे शुद्धमार्गाचरणरूपे, अपवादे रोगादिकारणे समुत्पन्ने विवर्जितवस्तुग्रहणरूपे द्रव्यादिचतुर्विधेऽभिग्रहे, अभिग्रहश्चतुर्धा, द्रव्यतः १ क्षेत्रतः २ कालतः ३ भावतश्च ४ ॥ १८ ॥

॥ मूलम् ॥—सद्दहणायरणाए । निच्चं नज्जुत्त एसणाइठिइ ॥ तस्स भवोअहितरणं । पव्वज्जा एयजम्मं तु ॥ १९ ॥ व्याख्या—' सद्दहणा इति ' श्रद्धानपूर्वकं यदाचरणं, एतेषु पदार्थेषु श्रद्धयाऽऽचरणेनेत्यर्थः, श्रद्धानमंतरेणाचरणं न मोक्षसाधकं, यतः—क्रियाशून्यस्य यो भावो । भावशून्यस्य या क्रिया ॥ अनयोरंतरं दृष्टं । भानुखद्योतयोरिव ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नित्यं निरंतरमुद्युक्तः संयमाराधने उद्यमवान्, एषणायां द्विचत्वारिंशद्दोषरहितायामाहार-शुद्धौ स्थितः, तस्यैतादृशगुणविशिष्टस्य साधोर्भवोदधितरणं भवसमुद्तारकं भवति, प्रव्रज्या-शब्देन दीक्षाग्रहणं, तु पुनर्जन्मशब्देन मानुष्यं, एतादृग्गुणविशिष्टस्यैव भवसमुद्तारणं, ए-तद्गुणरहितस्य दीक्षा जन्म द्वयमपि निरर्थकमेवेत्यर्थः ॥ १९ ॥

॥ मूलम् ॥—जे घरसरणपसन्ना । छक्कायरिउ सकिंचण असंजया ॥ नवरं मुत्तूण घ-रं । घरसंकमणं कयं तेहिं ॥ २० ॥ व्याख्या—' जे घर इति ' ये यतयो गृहस्य शरणं स-ज्जीकरणं तत्र प्रसक्तास्तदारंभसहिता इत्यर्थः, षट्कायानां पृथिव्यादीनां रिपवो विराधकाः, सकिंचना द्रव्यादिपरिग्रहसहिताः, असंयता असंवृतमनोवाक्काययोगा इत्यर्थः, एतादृशैः किं कृतमित्याह—नवरं केवलं पूर्वं गृहं मुक्त्वा वेषमिषेण ' तेहिं इति ' तैः साधुवेषधारकैरसंयतै-र्गृहसंक्रमणं कृतं, नवीनगृहप्रवेशो विहितः, अन्यत्किमपि नेत्यर्थः ॥ २० ॥

॥ मूलम् ॥—नस्सुत्तमायरंतो । बंधइ कम्मं सुचिक्कणं जीवो ॥ संसारं च पवड्ढइ । मायामोसं च कुव्वइ य ॥ २१ ॥ व्याख्या—' नस्सुत्तमायरंतो इति ' नत्सूत्रं सूत्रविरुद्धमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चरन् समाचरन् बध्नाति आत्मप्रदेशैः सह संश्लिष्टं करोति. किं? कर्म ज्ञानावरणादि, कीदृशं? सुचिक्कणं अतिगाढं निकाचितमित्यर्थः, ' जीवो इति ' सोऽयं जीवः पुनः किं करोति? संसारं प्रवर्द्धते वृद्धिं प्रापयति च पुनः ' मायामोसं इति ' मायामृषां मायायुक्तमसत्यभाषणरूपमष्टादशपापस्थानकं करोति, तत्प्रत्ययमनंतसंसारवर्द्धनं करोतीति भावः ॥ २१ ॥

॥ मूलम् ॥—जइ गिण्हइ वयलोवो । अहव न गिण्हइ सरीरवुच्छेउ ॥ पासत्थसंगमोवि य । वयलोवो तो वरमसंगो ॥ २२ ॥ व्याख्या—' जइ इति ' यदि गृह्णाति पार्श्वस्थानीतमाहारादि तदा व्रतलोपो व्रतनाशो भवति. अथवा तन्न गृह्णाति तदा ' सरीरवुच्छेउ इति ' शरीरव्युच्छेदो भवति, उभयथापि कष्टं. अपि चेति निश्चये, पार्श्वस्थसंगमे कृते एव यदि व्रतलोपो भवति ' तो इति ' तदा ' असंगो इति ' पार्श्वस्थाऽसंगम एव वरं प्रधानमित्यर्थः ॥

॥ मूलं ॥—आलावो संवासो । वीसंभो संथवो पसंगो य ॥ हीणायारेहिं समं । सव्वजिणिंदेहिं पडिकुट्ठो ॥ २३ ॥ व्याख्या—' आलावो इति ' आलापः पार्श्वस्थेन सार्द्धं जल्पनं, संवासस्तेन सार्द्धमेकत्र वासः, विश्रंभो विश्वासः, संस्तवः परिचयः, प्रसंगो वस्त्रादि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गृहणार्पणादिव्यवहारः, हीनाचारैः पार्श्वस्थादिभिः समं सार्द्धमेते पदार्थाः सर्वजिनैश्च सर्वतीर्थकरैः ऋषभादिभिः ' पमिकुट्ठा इति ' निषिद्धाः, एकैकापेक्षयैकवचनं ॥ २३ ॥

॥ मूलम् ॥—अन्नुन्नजंपिएहिं। हसिएहिं नऊसिएहिं खिप्पमाणोअ॥ पासत्थमझयारे । बलावि जइ वाउली होइ ॥ २४ ॥ व्याख्या—' अन्नुन्न इति ' अन्योऽन्यं परस्परं जल्पितैर्नाषितैर्विकथादिकथनैरित्यर्थः, हसितैर्हास्यैः, नऊर्षितै रोमोद्गमैः कृत्वा ' खिप्पमाणो अ इति ' पार्श्वस्थादिभिः प्रेर्यमाणः पार्श्वस्थानां मध्ये बलादपि हठादपि यतिर्व्याकुलो भवति, स्वधर्माद्भ्रष्टो भवतीत्यर्थः, अतस्तत्संगमस्त्याज्य एवेत्यर्थ ॥ २४ ॥

॥ मूलं ॥—लोएवि कुसंगइ—पियं जणं दुन्नियन्नमइवसणं ॥ निंदइ निरुज्जमं पिय—कुसीलजणमेव साहुजणो ॥ २५ ॥ व्याख्या—' लोएवि इति ' लोकमध्येऽपि कुसंगतिः प्रिया वल्लभा यस्यैतादृशं जनं लोकं ' दुनियन्नं इति ' दुष्टं विपरीतं वेषधारिणं, अतिव्यसनमतिद्यूतादिव्यसनसहितमेतादृशं यथा निंदति लोकस्तथा निरुद्यमं चारित्रविषये शिथिलादरं, प्रिया वल्लभाः कुशीलजना यस्यैतादृशं कुवेषधारिणं, एवेति निश्चये साधुजनो निंदति ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—निच्चं संकियनीउ । गम्मो सव्वस्स खलियचारित्तो ॥ साहुजणस्स अवमउ । मउवि पुण दुग्गइं जाइ ॥ २६ ॥ व्याख्या—' निच्चं इति ' नित्यं शंकितो मा कोऽपि मदीयां प्रवृत्तिं कथयतु, ' नीउ इति ' नीतः, पुनः कीदृशः ? सर्वस्य बालादेरपि गम्यः पराभवितुं योग्यः, एतादृशः कः ? स्खलितचारित्रः स्खलितं विराधितं चारित्रं येनैतादृशः, सोऽत्र कीदृशो भवति ? साधुजनस्याऽवमतोऽनिष्टो भवतीह लोके, मृतोऽपि परलोकं प्राप्तोऽपि दुर्गतिं याति गच्छति, अतः प्राणांतेऽपि चारित्रं न विराधनीयमित्युपदेशः ॥ २६ ॥

॥ मूलम् ॥—गिरिसुअपुप्फसुआणं । सुविहिय आहरणं कारण विहन्नू ॥ वज्जिज्ज सीलविगले । उज्जूअ सीले हविज्ज जई ॥ २७ ॥ व्याख्या—गिरिः पर्वतः, तात्स्थ्यात्तद्व्यपदेश इति न्यायाद्गिरिसमीपवर्त्तिनो लोका गिर्यादयस्तेषां शुकः, पुष्पशब्देन वाटिकोपलक्षणं तस्य शुकः, तयोर्द्वयोः, हे सुविहित हे सुशिष्य 'आहरणं इति' उदाहरणं तयोः शुकयोः, कीदृशमुदाहरणं ? कारणं गुणदोषयोः, उत्तमाधमसंसर्गो गुणदोषकारणमिति ज्ञात्वा शीलविकलानाचाररहितान् वर्जयेत् तत्संगं त्यजेदित्यर्थः, ' उज्जुय इति ' ऋजुमान् शीले चा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रित्राचारे ' हविज्ज इति ' भवेत् यतिः साधुः ॥ २७ ॥ अत्र शुकयोरुदाहरणं—

वसंतपुरे पत्तने कनककेतुर्नृपालः, स एकदा वनक्रीडां कर्तुं बहिर्निर्गतो वक्रशिक्षिते-
नाश्वेनापहृतः श्रांतो वनमध्ये एकाकी परिभ्रमन्, तत्र जल्पतो बहुजनानाकर्ण्य विश्रामार्थं
यावद्गच्छति, तावद्वृक्षशाखावबद्धपंजरस्थित एकः शुको जजल्प, अरे धावत भिल्लाः कोऽपि
महान् राजा गच्छति, एनं गृह्णीध्वं? लक्षप्रमितं धनं दास्यतीति शुकवाक्यं श्रुत्वा बहवो भि-
ल्ला धाविताः, तान् दृष्ट्वा राजा पवनजवेनाश्वेन सत्वरं चलितः, क्षणेन च योजनमेकं जगा-
म. तत्रैकस्तापसाश्रमस्तेन दृष्टः, तत्पार्श्वे च समीचीनैका पुष्पवाटिका दृष्टा, तस्या नच्चवृ-
क्षोपरि पंजरस्थित एकः शुको वर्त्तते, तेन नश्यंतं राजानं समागच्छंतमवलोक्य जल्पितं, भो
तापसा आगच्छत आगच्छत? भवदाश्रमे कोऽपि महानतिथिरागच्छति; तत्सेवां कुरुत? एतत्
शुकवाक्यश्रवणतः संजातहर्षाः सर्वेऽपि तापसाः सन्मुखं गताः, राजानं स्वाश्रमं चानिन्युः
तस्य चाऽशनादिना सपर्या कृता, राजाऽतीवतुष्टो जातः, तदा राज्ञा तस्मै शुकाय पृष्टं भो
शुकराज भवत्सदृश एव शुको भिल्लपल्ल्यां मया दृष्टः, तेन च मम बंधनोपायः कृतः, त्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

या तु मे महती भक्तिः कारिता, तत्किं कारणं ?

शुकेनोक्तं कादंबर्यां महाटव्यां वटवृक्षे स चाहं द्वावपि भ्रातरौ वसतःस्म; द्वयोरप्येकः पिता, माताप्येका; परमियान् विशेषः, स पल्लिभिल्लैर्गृहीतः पर्वतसमीपे च स्थितः, इति तस्य पर्वतशुक इति नाम जातं, अथाहं तापसैर्गृहितोऽस्यां वाटिकायां च स्थापितः, ततः पुष्पशुक इति ममापि नाम जातं. तत्र तिष्टता तेन भिल्लानां मुखान्मारणबंधनकुट्टनग्रहणादीनि वचनानि शृण्वता तादृशं शिक्षितं. अथ ममापि तापससंगत्या शुभशब्दानि शृण्वतः शुभ एव गुणः समुत्पन्नः, ततो हे राजन् प्रत्यक्षदृष्टमेतत् शुभाशुभसंगतिफलं. यत उक्तं—महानुभावसंसर्गः । कस्य नोन्नतिकारणं॥ गंगाप्रविष्टरण्यांबु । त्रिदशैरपि वंद्यते ॥ ॥ १ ॥ इति. वरं पर्वतदुर्गेषु । भ्रांतं वनचरैः सह ॥ न मूर्खजनसंपर्कः । सुरेंद्रभवनेष्वपि ॥ ॥ २ ॥ इति श्रुत्वा राजा प्रसन्नो जातः, तावत्सर्वमपि पृष्टतः स्वसैन्यमागतं, राजा स्वनगरं गतः, इत्थं संगतिफलं विचार्य शिथिलाचारिणां संगतिस्त्याज्या, तपसि च यत्नो विधेयः, सिद्धांतेऽप्युक्तं—वरमग्गिंमि पवेसो । वरं विसुद्धेण कम्मुणा मरणं ॥ मा गहियव्वयभंगो । मा ॥४०४॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जीयं खलियसीलस्स ॥ १ ॥ इति गिरिशुकपुष्पशुकयोः संबंधोऽष्टपंचाशत्तमः ॥ ५८ ॥

॥ मूलम् ॥—उसन्नचरणकरणं । जइणो पप्प कारणं वंदंति परं ॥ जे सुविइयपरमत्था । ते वंदंतो निवारंति ॥ २८ ॥ व्याख्या—' उसन्न इति ' अवसन्नं शिथिलं चरणं महाव्रतादिमूलगुणरूपं, करणं पंचसमित्यादि उत्तरगुणरूपं यस्य, एतादृशमपि यतयः साधवः कारणं प्राप्य निर्वाहप्रमुखं कारणमपेक्ष्य यतयः शिथिलाचारमपि वंदंते; परं ये सुविदितपरमार्था ज्ञाततत्वाः, सुविहितवंदापनमस्माकं न घटते इति ज्ञातनिजदोषा एतादृशाःपार्श्वस्था वंदमानानपि तान् साधून्निवारयंति, यूयं मां मा वंदतेति वारयंति ॥ २८ ॥

॥ मूलम् ॥—सुविहियवंदावंतो । नासेइ अप्पयं तु सुपहाउ ॥ दुविहपहविप्पमुक्को । कहमप्पं न याणइ मूढो ॥ २९ ॥ व्याख्या—' सुविहिय इति ' सुविहितानुत्तमसाधून् वंदापयन् तं वंदंतमनिवारयन् किं करोति ? ' नासेइ इति ' नाशयति, ' अप्पयं इति ' स्वकीयमात्मानं, कस्मात् ? तु निश्चये, सुपथान्मोक्षमार्गादात्मानं नाशयति. ' दुविहपह इति ' द्विप्रकारौ पंथानौ मार्गौ श्रावकसाधुमार्गलक्षणौ, ताभ्यां विप्रमुक्तो भ्रष्टः सन् कथमात्मानं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न जानाति? मूढो मूर्खः, यदहं मार्गदृयाद्भ्रष्टो भवामि, मम का गतिर्भाविनीति. ॥ २९ ॥

॥ मूलम् ॥—वंदइ भन्नइ कालंपि । चेइयाइं थयथुइपरमो ॥ जिणवरपडिमाघरधूव-पुप्फगंधच्चणुज्जुत्तो ॥ ३० ॥ व्याख्या—' वंदइ इति ' श्रावक भन्नयकालमपि चैत्यानि वंदते, कीदृशः सः? स्तवो भक्तामरादिस्तवनं, स्तुतिः संसारदावादिका, तयोः परमः प्रधानः, पुनः कीदृशः श्राद्धः? जिनानां प्रतिमा बिंबानि, गृहाणि चैत्यानि, तेषु धूपोऽगुरुप्रमुखः, पुष्पाणि मालतीप्रमुखाणि, गंधाः सुगंधद्रव्याणि, तैरर्चनं पूजनं तत्रोद्युक्त उद्यमवानेतादृशः श्राद्धो भवतीत्यर्थः ॥ ३० ॥

॥ मूलम् ॥—सुविणिच्चिय एगमई । धम्मंमि अनन्नदेवउ पुणो ॥ न य कुसमएसु रज्जइ । पुव्वावरवाहयवज्जेसु ॥ ३१ ॥ व्याख्या—' सुविणिच्चिय इति ' सुविनिश्चिता निश्चला एकाग्रा मतिर्बुद्धिर्यस्यैतादृशः, कस्मिन्? ' धम्मंमि इति ' धर्मे जिनधर्मविषये, पुनः कीदृशः? ' अनन्नदेवउ इति ' न विद्यतेऽन्यो जिनव्यतिरिक्तो देवो यस्यैतादृशः श्राद्धः ' कुसुमएसु इति ' कुशास्त्रेषु न च रज्यति न च रक्तो भवति. कीदृशेषु कुशास्त्रेषु? पूर्वापरं व्या- ॥४०६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हता विरुद्धा विघटमाना अर्था येषु तानि, एतादृशेषु उक्तस्थभाषितत्वादिसंबंधेष्वित्यर्थः ॥३१॥

॥ मूलम् ॥—दट्ठूण कुलिंगीणं । तसथावरभूयमद्दणं विविहं ॥ धम्माउ न चालिज्जइ । देवेहिं सइंदएहिंपि ॥ ३२ ॥ व्याख्या—' दट्ठूण इति ' दृष्ट्वा, कुत्सितं लिंगं येषां ते कुलिंगिनो बौद्धादयस्तेषां, किं दृष्ट्वा ? त्रसा द्वींद्रियादयः, स्थावराः पृथिव्यादयो ये भूताः प्राणिनस्तेषां मर्दनं विनाशनं, कीदृशं ? विविधं स्वयंपाकाद्यनेकप्रकारं; धर्माज्जिनोदितान्न चाल्यते सम्यग्जिनधर्मरक्तः श्राद्ध इत्यर्थः, कैर्न चाल्यते ? ' देवेहिं इति ' सर्वैरपि देवैः, कीदृशैर्देवैः ? सेंद्रकैरिंद्रसहितैरपि ॥ ३२ ॥

॥ मूलम् ॥—वंदइ पडिपुच्छइ । पज्जुवासेइ साहूणो सययमेव ॥ पढइ सुणेइ गुणेइ । जणस्स धम्मं परिकहेइ ॥ ३३ ॥ व्याख्या—' वंदइ इति ' वंदते प्रणामं करोति, प्रतिपृच्छति स्वसंदेहं पृच्छति, पर्युपास्ते सेवां करोति, कस्य ? साधोर्मुक्तिमार्गसाधकस्य मुनेः, विभक्तिव्यत्ययात्साधून् वंदते प्रतिपृच्छति साधून् पर्युपास्ते सुश्राद्ध इति शेषः, कथं ? सततमेव निरंतरमेव, पुनः श्राद्धः किं करोति ? पठति धर्मशास्त्रं, शृणोत्यर्थतो जिनभाषितं, ' गुणेइ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ' यत्पठितं तदर्थतो विचारयति, पुनर्जनस्याऽज्ञातलोकस्य धर्मं परिकथयति आत्मीयबुद्ध्याऽन्यं बोधयतीत्यर्थः ॥ ३३ ॥

॥ मूलम् ॥—दढसीलवयनियमो । पोसहआवस्सएसु अक्खलिउ ॥ मउमज्जमंसपंचविहं । बहुबीयफलेसु पडिक्कंतो ॥ ३४ ॥ व्याख्या—' दढइति ' पुनः श्राद्धः कीदृशो भवति ? दृढं शीलं सदाचारः, व्रतानि अणुव्रतानि, तेषां नियमो निश्चयो यस्यैतादृशः, पोषं धर्मस्य पुष्टिं दधातीति निरुक्त्या पौषधोऽष्टम्यादिपर्वसु सावद्यत्यागरूपो नियमविशेषः, आवश्यकान्यवश्यं कर्त्तव्यानि सामायिकादीनि षट्, तेष्वस्खलितो निरतीचार इत्यर्थः, मधु क्षौद्रं, मद्यं सुरा, मांसं पिशितं, पंचविधानि पंचप्रकाराणि वटोदुंबरादीनि जीवसंसक्तानि, बहुबीजानि वृंताकप्रमुखाणि, एतादृशानि फलानि, पश्चात्सर्वेषां द्वंद्वः, तेषु प्रतिक्रांतः, प्राकृतत्वात्तेभ्यो निवृत्त इत्यर्थः, अर्थादभक्ष्यादिनियमवानित्यर्थः, एतादृशः श्राद्धो भवति. ॥ ३४ ॥

॥ मूलम् ॥—नाहम्मकम्मजीवी । पच्चक्काणे अभिक्कमुज्जुत्तो ॥ सव्वं परिमाणकडं । अवरुज्झइ तंपि संकंतो ॥ ३५ ॥ व्याख्या—' नाहम्म इति ' अधर्मेण कर्मणा इंगालादिपंच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दशन्नेदानामन्यतरेण जीवतीत्येवंशीलो न न्नवतीति नाऽधर्मकर्मजीवी शुद्ध्यवसायकारीत्यर्थः, प्रत्याख्याने दशविधे अन्नीक्ष्णं निरंतरमुद्युक्त न्नत्साहवान् न्नवति. पुनस्तस्य श्राद्धस्य सर्वं धनधान्यादिकं ' परिमाणकडं इति ' प्रमाणकृतं न्नवति परिग्रहप्रमाणवान् न्नवतीत्यर्थः, यत्पुनरपराध्यति आरंन्नादिकं करोति तदपि शंकमान इव करोति, आलोचनादिग्रहणेन तस्मादपि शुद्धो न्नवतीत्यर्थः ॥ ३५ ॥

॥ मूलम् ॥—निक्कमणनाणनिव्वाण–जम्मन्नूमिन वंदइ जिणाणं ॥ न य वसइ साहुजण–विरहियंमि देसे बहुगुणेवि ॥ ३६ ॥ व्याख्या—' निक्कमण इति ' निष्क्रमणं तीर्थंकराणां दीक्षा, ज्ञानं केवलं, निर्वाणं मुक्तिः, जन्म प्रसूतिः, तेषां न्नूमयः स्थानानि कल्याणकस्थानानीत्यर्थः, वंदते नमस्करोति, केषां कल्याणकस्थानानि? जिनानां तीर्थंकराणां, पुनः श्राद्धः साधुजनविरहिते बहुगुणेऽपि अपराऽनेकगुणसहितेऽपि, एतादृशेऽपि साधुविहाररहिते देशे न च वसति न वासं करोति ॥ ३६ ॥

॥ मूलम् ॥—परतिन्थियाण पणमण । नप्पावण थुणण न्नत्तिरागं च ॥ सक्कारं सम्मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एं । दाणं विणयं च वज्जेइ ॥ ३७ ॥ व्याख्या—' परतित्थियाण इति ' पुनः श्राद्धः परतीर्थिकानां बौद्धतापसादीनां प्रणमनं प्रणामकरणं वर्जयति, पुनस्तेषामुद्भावनं परस्याग्रे तद्गुणप्रशंसनं वर्जयति, पुनः ' थुणण इति ' बौद्धादीनामग्रे तदीयदेवस्तवनं वर्जयति. पुनस्तेषां भक्तिरागं बहुमानं वर्जयति. पुनस्तेषां सत्कारं वस्त्रादिदानं वर्जयति, पुनस्तेषां सन्मानमागतेऽभ्युत्थानं न करोति, पुनस्तेषां सुपात्रबुद्ध्या भोजनादिदानं वर्जयति. पुनर्विनयं पादप्रक्षालनादिरूपं वर्जयति. ॥ ३७ ॥ तर्हि केषां भोजनादि पात्रबुद्ध्या ददाति ? तदाह—

॥ मूलम् ॥—पढमं जईण दाऊण । अप्पणा पणमिऊण पारेइ ॥ असइअ सुविहिआणं । भुंजेइ कयदिसालोउ ॥ ३८ ॥ व्याख्या—' पढमं इति ' प्रथमं पूर्वमित्यर्थः, यतीनामिंद्रियदमनप्रयत्नवतां साधूनां ' दाऊण इति ' आत्मना स्वयं ' पणमिऊण इति ' प्रणम्य प्रणामपूर्वकं प्रथमं साधूनां दत्वेत्यर्थः, पश्चात्स्वयं पारयति भोजनं करोति; ' असइअ इति ' साधवो यदि न भवंति तदा किं करोति ? सुविहितानां शुद्धचारित्रवतां कृतदिशालोकः सन् भुंक्ते भोजनं करोति. दिगभिमुखं विलोकयति, यदि साधवः समागच्छंति तदा भ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्यमिति विचार्य भोजनं करोतीत्यर्थः ॥ ३८ ॥

॥ मूलम् ॥—साहूण कप्पणिज्जं । जं नवि दिन्नं कहिंवि किंपि तहिं ॥ धीरा जहुत्तकारी । सुसावगा तं न भुंजंति ॥ ३९ ॥ व्याख्या—' साहूण इति ' साधूनां कल्पनीयमेषणीयं शुद्धमित्यर्थः, एतादृशं यन्नैव ' दिन्नं इति ' दत्तं ' कहिंवि इति ' कस्मिन्नपि देशकालविषये, किमपीति स्तोकमपि ' तहिं इति ' तेषां साधूनां, धीराः सत्त्ववंतो यथोक्तकारिणो यादृशः श्राद्धमार्गस्तस्य कर्त्तार इत्यर्थः, एतादृशाः सुश्रावकाः सुश्राद्धा यत्साधूनां न दत्तं तन्न भुंजंते इत्यर्थः ॥ ३९ ॥

॥ मूलम् ॥—वसहीसयणासणभत्त-पाणभेसज्जवत्थपत्ताइं ॥ जइवि न पज्जत्तधणो । थोवाविहु थोवयं देइ ॥ ४० ॥ व्याख्या—' वसही इति ' वसतिर्वासस्थानं, शयनं शयनार्थं पट्टिका, आसनं पादपीठादिकं, भक्तमन्नं, पानं जलं, भैषज्यमौषधं, वस्त्रं पात्रं चैतेषां द्वंद्वः, एवमादिर्यस्य तत्, यद्यपि न पर्याप्तं पूर्णं धनं यस्य सः, एतादृशो यद्यप्यऽसंपूर्णधनत्वात्तं पूर्णं दातुमसमर्थस्तथापि स्तोकादपि ' हु इत्यलंकारे ' स्तोकं दीयते, संविभागं विना न भो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्तव्यमित्यर्थः ॥ ४० ॥

॥ मूलम् ॥—संवच्छरचाउम्मासिएसु । अट्ठाहियासु अतिहीसु सव्वा ॥ येरेण लग्गइ जिणवरपूआतवगुणेसु ॥ ४१ ॥ व्याख्या—' संवच्छर इति ' वार्षिके पर्वणि ' चाउम्मासिएसु इति ' चतुर्मासीत्रयेषु ' अट्ठाहियासु इति ' चैत्राषाढाद्यष्टाह्निकासु ' तिहीसु इति ' अष्टम्यादितिथिषु, एतेषु शुभदिवसेषु विशेषतः सर्वादरेण सर्वोद्यमेन लगति आसक्तो भवति, केषु? जिनवराणां पूजा भक्तिस्तपः षष्ठाष्टमादि, गुणा ज्ञानादयस्तेषु विशेषत आदरवान् भवतीत्यर्थः ॥ ४१ ॥ पुनः श्राद्धः किं करोतीत्याह—

॥ मूलम् ॥—साहूण चेइयाण य । पडणीयं तह अवन्नवायं च ॥ जिणपवयस्स अहिअं । सव्वत्थामेण वारेइ ॥ ४२ ॥ व्याख्या—' साहूण इति ' साधूनां मुनीनां चैत्यानां जिनप्रासादप्रतिमानां प्रत्यनीकमुपद्रवकारकं ' तह इति ' तथा च पुनरवर्णवादकं कुवचनभाषकं, जिनप्रवचनस्य जिनशासनस्याऽहितमहितकारकं शत्रुमित्यर्थः, एवंविधं जनं स श्रावकः,' सव्वत्थामेण इति ' स्वकीयसर्वशक्त्या निवारयति ॥ ४२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—विरया पाणवहाउ । विरया निच्चं च अलियवयणाउ ॥ विरया चोरिक्काउ । विरया परदारगमणाउ ॥ ४३ ॥ व्याख्या—विरया इति ' विरता निवृत्ताः, कस्मात् ? प्राणवधाज्जीवमारणात्, च पुनर्विरता निवृत्ताः ' निच्चं इति ' नित्यं सदैवालीकवचनान्मिथ्याभाषणात्, पुनः कीदृशाः श्राद्धाः ? विरताः ' चोरिक्काउ इति ' चौर्यात्, पुनर्विरताः कस्मात् ? परदारगमनात् परस्त्रीसेवनात् ॥ ४३ ॥

॥ मूलम् ॥—विरया परिग्गहाउ । अपरिमिआउ अणंततण्हाउ ॥ बहुदोससंकुलाउ । नरयगइगमणपंथाउ ॥ ४४ ॥ व्याख्या—' विरया इति ' पुनः कीदृशाः ? विरताः परिग्रहात् धनधान्यादिनवविधपरिग्रहात्, कीदृशात्परिग्रहात् ? अपरिमितादकृतपरिमाणात्. पुनः कीदृशात् ? अनंततृष्णात्, अनंता तृष्णा लोभो यस्मात्स एतादृशात्, पुनः कीदृशात्परिग्रहात् बहवो दोषा वधबंधादयस्तैः संकुलाद्भृतात्. पुनः कथंभूतात्परिग्रहात् ? नरकगत्यां यद्गमनं तस्य पंथा मार्गस्तस्मात् ॥ ४४ ॥

॥ मूलम् ॥—मुक्का कुज्जणमित्ती । गहिया गुरुवयणसाहुपडिवत्ती ॥ मुक्को परपरिवा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न । गहिन जिणदेसिन धम्मो ॥ ४५ ॥ व्याख्या—' मुक्ता इति ' पुनर्यैः सुश्रावकैर्दुर्जनमैत्री खलसंगतिर्मुक्ता, यैर्गुरुवचनस्य तीर्थंकरादिवचनस्य साध्वी शोभना प्रतिपत्तिः प्रतिज्ञा गृहीतांगीकृता. पुनर्यैः परपरिवादः परापवादभाषणं मुक्तं, पुनर्यैर्जिनदर्शितो जिनभाषितो धर्मो गृहीतः ॥ ४५ ॥

॥ मूलम् ॥—तवनियमसीलकलिया । सुसावगा जे हवंति इह सुगुणा ॥ तेसिं न दुल्लहाइं । निव्वाणविमाणसुक्खाइं ॥ ४६ ॥ व्याख्या—' तव इति ' तपो द्वादशभेदं, नियमोऽनंतकायादिप्रत्याख्यानं, शीलं सदाचारस्तैः सहितास्तपोनियमतत्परा इत्यर्थः, एतादृशा ये इह लोके सुश्रावका भवंति, कीदृशाः ? सुगुणाः शोभना गुणा येषु ते सुगुणाः, एतादृशानां श्राद्धानां किं फलं भवतीत्याह—तेषां श्राद्धानां न दुर्लभानि न दुःप्रापाणि, कानि ? निर्वाणं मुक्तिः, विमानं देवमंदिरं, तयोः सौख्यानि, स्वर्गसौख्यानि भुक्त्वा परंपरया मुक्तिमप्यवाप्नुवंतीत्यर्थः ॥ ४६ ॥

॥ मूलम् ॥—सीइज्ज कयावि गुरु । तंपि सुसीसा सुनिक्कणमहुरेहिं ॥ मग्गे ठवंति पु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णरवि । जह सेलगपंथगो नायं ॥ ४७ ॥ व्याख्या—' सीइज्ज इति ' कदाचित्कर्मवैचित्र्यादु-
रुरपि सीदेन्मार्गान्निश्चिलो भवेत्, तमपि भ्रष्टाचारमपि निजगुरुं सुशिष्या उत्तमशिष्याः सु-
निपुणमधुरैरतिशयेन दक्षकोमलैर्वाक्यैरिति शेषः, मार्गे संयममार्गे पुनरपि स्थापयंति, उत्प-
थगामिनं सत्पथमानयंति. यथेति दृष्टांतेऽत्र सेलकनामाचार्यः, पंथकनामा च शिष्यस्तयो-
र्ज्ञातमुदाहरणं ॥ ४७ ॥ अत्र कथानकं—

धनदनिर्मितायां श्रीद्वारिकायां पुरि श्रीकृष्णाभिधानो वासुदेवो राज्यं करोति. तस्या-
मेका थावच्चानाम्नी सार्थवाही परिवसति, तदंगजस्थावच्चाकुमारो द्वात्रिंशत्कामिनीपतिरतीव-
सुंदरो मंदिरे देवांगनाकवद्विषयसुखान्युपभुंक्ते. तदवसरे श्रीनेमिजिनस्तत्रागात्. पुरुषसहस्रेण
सार्द्धं स्थापत्यापुत्रेण चारित्रं गृहीतं, क्रमेण स चतुर्दश पूर्वाण्यधीतवान्. एकवारं श्रीनेमि-
जिनाज्ञां गृहीत्वा सहस्रशिष्यपरिवृतोऽसौ भूमौ विहरन्नेकदा सेलकपुरमागतः स्थापत्यापु-
त्रानगारः, तन्नगरपतिः सेलको नाम राजा वंदनार्थमागतः, स्थापत्यापुत्राचार्यपार्श्वे द्वादशव्र-
तधारी श्रावकश्च जातः, पश्चात्ते विहरंतः सौगंधिकायां पुर्यां नीलाशोकवने समवसृताः, तत्र शु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कपरिव्राजकव्यक्तेन सुदर्शनश्रेष्ठिना स्थापत्यापुत्राचार्यपार्श्वे मिथ्यात्वं शौचमूलं धर्मं त्यक्त्वा श्रीजिनानां विनयमूलो धर्मोंगीकृतः, सा प्रवृत्तिः शुकपरिव्राजकेण श्रुता, सहस्रशिष्यपरिवृतोऽसौ तत्रागत्य सुदर्शनश्रेष्ठिनं पृष्टवान्.

भो सुदर्शन ! अस्मदीयं शौचमूलं धर्मं त्यक्त्वा विनयमूलोऽयं धर्मः कस्य पार्श्वे त्वया गृहीतः? सुदर्शनेनोक्तं मया विनयमूलो धर्मः श्रीस्थापत्यापुत्राचार्याणां पार्श्वे गृहीतः, तेऽपि गुरवोऽत्रैव वसंति, स्पर्द्धया सुदर्शनेन सार्द्धं सोऽपि तत्रागतः, स्थापत्यापुत्रेण वादे निरुत्तरीकृतो विनयमूलं धर्मं सत्यं ज्ञात्वा सहस्रशिष्यपरिवृतेन तेन शुकेन चारित्रं गृहीतं; क्रमेण च द्वादशांगान्यधीतानि. योग्यं ज्ञात्वा तमाचार्यपदे संस्थाप्य श्रीस्थापत्यापुत्राचार्याः श्रीशत्रुंजये गत्वा सहस्रसाधुभिः सार्द्धमेकमासिक्या संलेखनया केवलमवाप्य मोक्षं गताः, श्रीशुकाचार्याः सहस्रशिष्यैः परिवृता एकवारं श्रीसेल्लकपुरं गताः, तदा सेल्लकराजा श्रीशुकाचार्यवंदनार्थं निर्गतः, धर्मं श्रुत्वा प्रतिबुद्धो मंडुकुमारं राज्ये संस्थाप्य पंथकप्रभृतिभिः पंचशतीमितैरमात्यैः सार्द्धं चारित्रं जग्राह; क्रमेण स द्वादशांगीधारको जातः, तमाचार्यपदे सं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्थाप्य श्रीशुकाचार्यैः श्रीसिद्धगिरावनशनं कृतं. सहस्रशिष्यपरिवृता मासांते केवलमवाप्य मोक्षं प्राप्ताः, तदनंतरं श्रीसेल्लकाचार्यस्य अरसविरसाहारतः शरीरे महांतो रोगाः समुत्पन्नाः, सोढुमशक्यास्तथापि दुस्तपं तपस्तप्यमाना एकदा ते सेल्लकपुरमागताः, मंडुकनामा राजा वंदनार्थं गतः, देशनां श्रुत्वा जीवाजीवादिनवतत्वज्ञायको जातः, पश्चात्पितुः सेल्लकराजर्षेः शरीरं शुष्कं रुधिरमांसवर्जितं दृष्ट्वा मंडुकराज्ञा विज्ञप्तिः कृता, नो स्वामिन् भवदीयं शरीरं रोगजर्जरं दृश्यते, ततोऽत्रैव मदीययानशालायां तिष्ठत? यथाहं शुद्धौषधेन पथ्यभोजनेन च भवदीयं शरीरं रोगरहितं करोमि. आचार्येणापि तत्प्रतिश्रुतं, यानशालायां स्थिताः, राज्ञापि औषधादिना चिकित्सा कारापिता, रोगा गताः, तथापि राज्ञः सरसाहारगृद्धेन ते गृध्रा जाताः, कुत्रापि विहारं न कुर्वंति.

तदैकं पंथकनामानं शिष्यं तत्पार्श्वे सेवार्थं मुक्त्वाऽन्यैः सर्वैरपि शिष्यैर्विहारः कृतः, पश्चात्सेल्लकाचार्या अतीवरसलंपटा जाताः, पंथकोऽपि तेषां सम्यक् सेवां करोति. अशुद्धमप्याहारमानीय गुरवे ददाति, स्वयं च शुद्धमाहारं गृह्णाति. एकवारं कार्तिकचतुर्मासिकदिने

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गुरवः सरसाहारं कृत्वा सुखनिद्रया संध्यायामेव सुप्ताः संति. एतस्मिन्नवसरे पंथकश्चातुर्मासिकप्रतिक्रमणं कुर्वन् गुरुचरणे मस्तकमारोप्य चातुर्मासिकक्षामणकं क्षामयति. तावद् गुरवो गतनिद्रा जाताः, क्रोधातुराः कथयंतिस्म केन पापीयसा मम निद्राभंगः कृतः? तदा पंथकेनोक्तं भगवन्नद्य चातुर्मासिकक्षामणकं कुर्वतो मम मस्तकं भवच्चरणे लग्नं, तेन भवतां निद्रांतरायः संजातः, क्षंतव्योऽयं ममापराधः, अद्यप्रभृत्येतादृशमपराधं न करिष्यामीति वारंवारं स्वापराधमेव वदंतं तं दृष्ट्वा गुरुचित्तं सावधानं जातं, मनसि ते चिंतयितुं लग्ना अहो! कीदृशीयं शिष्यक्षमा! धन्योऽयमधन्योऽहं यदद्य चातुर्मासिकदिनेऽपि सरसाहारं भुक्त्वा सुप्तोऽस्मीति स्वात्मनिंदां कुर्वतस्तस्य वैराग्यमुत्पन्नं. पंथकं कथयति भो वत्स त्वयाऽद्य भवसमुद्रे निपतन्नहमुद्धृतः, इति कथयित्वा स प्रमादं विहाय शुद्धं चारित्रं जग्राह. सर्वेऽपि शिष्या गुरुसमीपमागताः, पश्चाद्बहुकालं बहून् भव्यान् प्रतिबोध्य पंचशतशिष्यसहितास्ते श्रीशत्रुंजयेऽनशनेन सिद्धिं गताः, एवं सुशिष्याः प्रमादिनं निजगुरुमपि सन्मार्गमानयंतीति पंथकशिष्यदृष्टांत एकोनषष्टितमः॥ ५९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—दस दस दिवसे दिवसे । धम्मं बोहेइ अहिव अहिअयरो ॥ इय नंदिसेण सत्ती । तहवि य से संजमविवत्ती ॥ ४८ ॥ व्याख्या—' दस दस इति ' दशदशसंख्याकान् पुरुषान् दिवसे दिवसे इति प्रतिदिनं धर्मं बोधयति, अथवा दशतोऽप्यधिकतरान्नरान् बोधयति वचनलब्ध्या ' इअ इति ' एतादृशी नंदिषेणनाम्नो मुनेः शक्तिर्देशनालब्धिरित्यर्थः, तथापि ' से इति ' तस्य नंदिषेणस्य संयमस्य चारित्रस्य ' विवत्ती इति ' विनाशो जातः, अतो बलीयान्निकाचितकर्मन्नोग इति न्नावः ॥ ४८ ॥ अथ नंदिषेणसंबंधः कथ्यते—तत्र प्रथमं नंदिषेणस्य पूर्वन्नवः सम्यग् निरूप्यते—कस्मिन्नपि ग्रामे मुखप्रियनामा वास्तव्यः परिवसति. तेन लक्षब्राह्मणन्नोजनोद्यमः कृतः, तेन चिंतितं यन्मद्गृहे कार्यकरणार्थमेकः सेवको यदा न्नवेत्तदा न्नव्यमिति विचार्य पार्श्ववर्त्तिनं न्नीमनामानं दासं स पृष्टवान्. तेनोक्तं यदि लक्षब्राह्मणन्नोजनावशिष्टमन्नं ममार्पयेत तदा तव गृहकार्यं करोमि. तेनापि तत्प्रतिपन्नं. सोऽपि दासस्तद्गृहकार्यं करोति.

पश्चात्तदुक्तेनान्नेन नगरमध्यस्थितान्साधून् साध्वीश्चाकार्य स प्रतिलान्नयति. इत्थं तत्पुण्य- ॥ ४१९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्तेन भोगकर्मोपार्जितं; प्रांते मृत्वा स दासजीवो देवत्वेनोत्पन्नः, ततश्च्युत्वा राजगृहे स श्रीश्रेणिकपुत्रो नंदिषेणनामा जातः, अथ च स लक्षब्राह्मणभोजनार्पको ब्राह्मणजीवो बहुभवं भ्रांत्वा कस्यांचिदटव्यां हस्तिनीकुक्षौ समुत्पन्नः, तदा हस्तिन्या ज्ञातं मत्कुक्षौ गर्भः समुत्पन्नस्ततः केनाप्युपायेनैनं यदि प्रच्छन्नं जनयामि तदायं जीवति, यूथाधिपतिश्च भवति. इति चिंतयित्वा सा व्याजेन खंजीभूय गच्छति, प्रहरांतरेण यूथस्य मिलतिस्म. एवं क्रमेण सा त्रित्रिदिनांतरे यूथस्य मिलितुं लग्ना.

प्रसवसमये तापसाश्रमे गत्वा कलभं जनयामास. पुनरपि नित्यं तथैव पृष्ठतः स्थित्वा तत्राश्रमे गत्वा कलभस्य स्तन्यं पाययति. तत्राश्रमे स्थितोऽसौ हस्तिबालस्तापसैः पुत्रवत्परिरक्षितः, तेषामतीवप्रीतिपात्रं च स संजातः, पश्चात्तेषां संगत्या सोऽपि हस्तिबालः शुंडादंडेन जलमानयति, आश्रमस्थितान् वृक्षांश्च सिंचति, ततस्तापसैस्तस्य सेचनक इति यथार्थं नाम दत्तं. क्रमेण स वृद्धो जातः, महाबलयुक्तः, पश्चादेकदा वने परिभ्रमता तेन सेचनकेन यूथाधिपतिः स्वकीयजनको दृष्टः, तेनापि स कलभो दृष्टः, परस्परमुभयोर्युद्धं लग्नं.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बलवता तेन जनको यममंदिरं नीतः, स्वयं च यूथाधिपतिर्जातः, तदा तेन मनसि चिंतितं यथा मदीयजनन्याऽहं प्रच्छन्नं यदि प्रसूतस्तदा पितरं हत्वा यूथाधिपो जातः, अथाऽन्यापि तद्वदत्र चेत्प्रसविष्यति तदा सोऽपि मां मारयिष्यतीति ज्ञात्वा स तापसानामुटजान् बभंज. तदा तापसैश्चिंतितमहो महान् कृतघ्नोऽयं जातः, अस्माभिः पुत्रवल्लालितः परमनेन विरुद्धं कृतं. अतोऽमुं कष्टे पातयाम इति चिंतयित्वा तैः श्रेणिकाय निरूपितं, हे राजन् यद्वने वयं वसामस्तद्वने चैकं हस्तिरत्नं राजयोग्यं वर्त्तते. अतस्तद् ग्राह्यमिति श्रुत्वा श्रेणिकेन सपरिवारेण वनं गत्वा वारिप्रमुखेण महतोपायेन गृह्यमाणोऽपि स हस्ते नाऽयाति. तदवसरे नंदिषेणशब्दं श्रुत्वा तं पश्यतो हस्तिराजस्याऽवधिज्ञानमुत्पन्नं; पूर्वभवो दृष्टस्तदा स शांतो जातः, पश्चान्नंदिषेणोऽपि हस्तिनः करं गृहीत्वोपरि स्थित्वा नगरे समानीय तं राजद्वारे बद्धवान्. क्रमेण नंदिषेणोऽपि यौवनमनुप्राप्तः, पित्रा च तस्य पंचशतस्त्रीणां पाणिग्रहणं कारितं. ताभिः सह स विषयसुखमुपभुंजान आस्ते.

एतस्मिन्नवसरे तत्र श्रीवर्द्धमानं समवसृतं ज्ञात्वा नंदिषेणो वंदनार्थं गतः, प्रभुं न-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वा नंदिषेणेन पृष्टं भगवन् मां दृष्ट्वा सेचनकस्य कथं स्नेहः समुत्पन्नः? तदा भगवता सर्वमपि पूर्वभवस्वरूपं कथितं. तत् श्रुत्वा नंदिषेणेन चिंतितं यदि साधूनामशनाद्यर्थेणैतावत्पुण्यं संपन्नं, तर्हि दीक्षां गृहीत्वा यदि तपः क्रियते तस्य तु महदेव फलं, इत्थं विचिंत्य वैराग्यमनाः स भगवंतं विज्ञपयतिस्म, भगवन् दीक्षादानेन मां समुद्धर? भगवतोक्तं वत्स निकाचितं भोगकर्म तव वर्त्तते, ततो मा दीक्षां गृहाणेति तदवसरे नभोवागपि जाता. तथापि स दृढचित्तो भूत्वा पंचशतस्त्रीणामुपभोगं त्यक्त्वा चारित्रग्रहणायोद्यतो जातः, भगवतापि तादृशं भाविभावस्वरूपमवलोक्य तस्य दीक्षा दत्ता, स्थविराणामंतिके च मुक्तः, तत्र सामायिकादीनि दश पूर्वाणि तेनाऽधीतानि. यथा यथा स षष्ठाष्टमातापनादिमहाकष्टं करोति, उपसर्गांश्च सहते तथा तथा तस्य बह्वयो लब्धयः समुत्पद्यंते.

अथ च कामोदयोऽपि तस्य प्रतिदिनं प्रवर्द्धमानो जायते, मनसि च स जानाति यदेवेन निवार्यमाणेनापि मया दीक्षा गृहीतास्ति, कंदर्पपारवश्याच्च मा मे व्रतभंगो भवत्विति विचिंत्य कंदर्पाद्विन्नताऽऽत्मघातार्थं शस्त्रघातकंठपाशादयोऽनेके उपायास्तेन कृताः, परं ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वेऽपि शासनदेवतया विफलीकृताः, एवमेकदा तस्याऽत्युग्रकामग्रहो व्याप्तस्तदा पर्वतोपरि झंपापाताय चटित्वा पतन्नसौ शासनदेवतया गृहीतः, कथयतिस्म च सा नो महानुभाव एवमात्मघाते कृते किं निकाचितकर्ममोक्षो भविष्यति? वृथैव तव यत्नः, तीर्थंकराणामपि विना भोगं न कर्ममोक्षः, तदा भवतां किमुच्यते? इति शासनदेवताया वचनं श्रुत्वा नंदिषेणोऽपि साधुरेकाकी विहरन्नेकदा षष्टपारणके आहारार्थं राजगृहमागतः, अजानन्नुच्चावचेषु कुलेषु परिभ्रमन् वेश्यागृहे गत्वा धर्मलाभं दत्तवान्. तद्वचं श्रुत्वा वेश्या जगाद, नो साधो अस्माकं गृहे तु अर्थलाभोऽवलोक्यते. यूयं तु वराका अकिंचनाः, इति तद्वचः श्रुत्वा सान्निमानो मुनिस्तृणमाकृष्य तपोलब्ध्या तत्र सार्द्धद्वादशकोटिस्वर्णवृष्टिं चकार; कथितवांश्च यदि तव धर्मलाभप्रयोजनं नास्ति, तदा गृहाणैनमर्थसंचयमित्युक्त्वा स यावत्पश्चाद्वलितस्तावद्गणिकाऽग्रत आगत्य तद्वस्त्रांचलं गृहीत्वा स्थिता, नंदिषेणं च कथयतिस्म. नो प्राणेश एतद्वचनं न घटते युष्माकं, यतो वयं पण्यांगनाः स्वकीयदेहेन पुरुषस्य सुखमुत्पादयित्वा तच्चित्तं प्रसन्नं कृत्वा पश्चात्तदर्पितं स्वोपार्जितं धनं गृह्णीमः, ततो धनं गृहीत्वा व्रज?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोचेदत्र स्थित्वा मया सार्द्धं विषयसुखमुपभुंक्ष्व ? केदं यौवनं वयः ? क्वेदं तपःकष्टं ? एतद्यौवनमयं रम्यो ममावास इत्यादि सर्वसुखोपेतं भोगयोगं प्राप्य को मुग्धस्तपःकष्टादिना देहं शोषयति ?

एतादृशानि सुकोमलानि तद्वाक्यानि श्रुत्वा भोगकर्मोदयतः स तत्रैव स्थितः, प्रतिदिनं दश दश पुरुषाः प्रतिबोध्या इत्यभिग्रहं गृहीत्वा रजोहरणादिसाधुवेषमूर्ध्वं स्थापनिकायां मुक्त्वा तया सार्द्धं स विषयसुखमुपभुंक्तेस्म; प्रातर्दशपुरुषप्रतिबोधनमंतरा स मुखे जलमपि न गृह्णाति. यांश्च प्रतिबोधयति ते भगवत्समीपमागत्य चारित्रं गृह्णंति. एवं तत्र तिष्ठतस्तस्य द्वादशवर्षाणि यातानि. द्वादशवर्षांते चैकदा नव पुरुषाः प्रतिबुद्धाः, दशमश्च स्वर्णकारो मिलितः, स प्रतिबोधं न प्राप्नोति, कथयति चान्यं प्रतिबोधयंतो यूयं स्वयं किं कुरुथ ? चारित्रं मुक्त्वा कथमत्र गणिकागेहे स्थिताः ? एवं प्रतिकूलमेव स वक्ति, परं प्रतिबोधं न प्राप्नोति. तदवसरे वेश्यया सरसा रसवती निष्पादिता, आकारणार्थं चागता, वदति च भो प्राणेश रसवती शीतला जायतेऽत भुज्यतां ? तदिषेणेनोक्तं दशमं प्रतिबोध्य समागच्छा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मीति पश्चाद्गालिता. पश्चाद् द्वितीयवारं रसवतीं निष्पाद्य सा तत्रैवाकारणार्थमागता, एवं तृतीयवारमप्यागता, कथयामास च नो प्राणनाथ संध्या व्यतीता, अहमपि च क्षुधिता स्थितास्मि, तदा नंदिषेणेनोक्तं नो सुलोचने दशमप्रतिबोधनमंतरा नोजने मम नियमनंगो जायते, ततः कथमागच्छामि? तथाऽाकर्ण्य हास्यमिषेण तयोक्तं यद्यद्य दशमः प्रतिबोधं न प्राप्नोति, तदाद्य तत्स्थाने यूयमेव नवतेति वेश्यावाक्यं श्रुत्वा नोगकर्मक्षयं च ज्ञात्वा तेन यतिवेषं परिधाय धर्मलानो दत्तः, वेश्ययोक्तं हे स्वामिन् मया हास्येनैवोक्तमेतत्, मामेकाकिनीं मुक्त्वा कथं गच्छथ? नंदिषेणेनोक्तं तव मम चैतावानेव संबंध इति कथयित्वा श्रीमहावीरसमीपमागत्य तेन पुनश्चारित्रं गृहीतं, चारित्रं प्रपाल्य प्रांते चाऽनशनेन मृत्वा स देवत्वेनोत्पन्नः, एवं दशपूर्वधरोऽपि देशनाशक्तिमानपि यदि निकाचितकर्मनोगान्न मुक्तस्तदाऽन्येषां का वार्त्तेति नंदिषेणप्रबंधः षष्ठीतमः ॥ ६० ॥

॥ मूलम् ॥—कलुसीकन अ किट्टी–कन अ खयरीकन मलिणिन अ ॥ कम्मेहिं एस जीवो । नाऊणवि मुञ्चइ जेण ॥ ४९ ॥ व्याख्या—' कलुसीकन इति ' कलुषीकृतः, र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जोन्नृतं जलं यथा पंकिलं न्नवति तथाऽयमपि जीवः कर्मरजोन्निः कलुषीकृत इत्यर्थः, पुनरयं जीवः कर्मन्निः किट्टीकृतः, लोकन्नाषया ' लोहे काट वले तेम कटायेलो कीधोछे ' ' खयरीकन इति ' चलितरसमोदकवत्स्वन्नावांतरं प्रापित इत्यर्थः, पुनरयं जीवः कर्मन्निर्मलिनितो मलयुक्तवस्त्रवत्कर्मन्निर्ज्ञानावरणीयादिन्निरष्टन्निः, एतादृशो जीवः कृत इत्यर्थः, येन कारणेनायं जीवो ज्ञात्वापि मुह्यति मोहं प्राप्नोति मूढो न्नवतीति यावत्. तत्कर्मण एवायं दोष इत्यर्थः ॥ ४९ ॥

॥ मूलम् ॥—कम्मेहिं वज्जसारो–वमेहिं जन्ननंदणोवि पमिबुद्धो ॥ सुबहुंपि विसुरंतो । न तरइ अप्पखमं कानं ॥ ५० ॥ व्याख्या—' कम्मेहिं इति ' वज्रसारोपमैर्वज्रसारसदृशैरतिकठिनैर्निकाचितैरिति यावत्, एतादृशैः कर्मन्निः कृत्वा यदुनंदनोऽपि श्रीकृष्णोऽपि प्रतिबुद्धः क्षायिकसम्यक्त्वधारित्वेन जाग्रन् सन् सुबहुमप्यतिघनमपि ' विसूरंतो इति ' पश्चात्तापं कुर्वन् ' न तरइ इति ' प्राकृतत्वान्न शशाक न समर्थो बन्नूव. किं कर्तुं? आत्मकममात्महितं क्रियानुष्ठानादि कर्तुं विधातुं ॥ ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—वाससहस्संपि जइ । काऊणं संयमं सुविउलंपि ॥ अंते किलिट्ठभावो । न विसुज्झइ कंडरीउव्व ॥ ५१ ॥ व्याख्या—' वाससहस्सं इति ' वर्षसहस्रमपि यावत् यतिः साधुः ' काऊणं इति ' कृत्वा संयमं चारित्रं, सुविपुलं संयमं कृत्वापि यद्यंते क्लिष्टभावोऽशुभपरिणामः समायाति तदा स न विशुद्ध्यति शुद्धो न भवति, अर्थात्कर्मक्षयं न करोति, दुर्गतिं च गच्छतीत्यर्थः, क इव ? कंडरीक इव, यथा कंडरीको बहुवर्षं तपस्तप्त्वापि अंते क्लिष्टपरिणामतो मृत्वा नरकं गत इत्यर्थः ॥ ५१ ॥

॥ मूलम् ॥—अप्पेणवि कालेणं । केइ जहा गहियसीलसामन्ना ॥ साहंति नियय-कज्जं । पुंडरियमहारिसिव्व जहा ॥ ५२ ॥ व्याख्या—' अप्पेणवि इति ' अल्पेनापि कालेन स्तोकेन कालेन केचित्साधवः ' जहा गहियसीलं इति ' यथा गृहीतं, यादृशेन भावेन गृहीतं तादृशमेव शीलं सदाचारः, अथ च श्रामण्यं चारित्रं येषां ते, एतादृशाः साधवः 'साहंति इति ' साधयंति ' नियय कज्जं इति ' निजकार्यं मोक्षसाधनलक्षणं, क इव ? पुंडरीकमहर्षिरिव, ' जहा इति ' यथा पुंडरीकनामा ऋषिः स्तोकेनापि कालेन सद्गतिं गतस्तथेत्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्थः, विस्तरतस्तत्संबंधः कथानकगम्यः ॥ ५२ ॥ अत्र कथानकं—

जंबूद्वीपे महाविदेहे पुष्कलावतीविजये पुंडरीकिण्यां महानगर्यां महापद्मो राजा, तद्गृहे पद्मावती राज्ञी, तत्कुक्षिसमुद्भवौ पुंडरीककंडरीकनामानौ द्वौ पुत्रौ. तन्मध्ये पुंडरीकं राज्येऽधिरोप्य, कंडरीकं च यौवराज्ये संस्थाप्य महापद्मेन चारित्रं गृहीतं, स्थविराणां पार्श्वे क्रमेण स चारित्राराधनतः केवलमवाप्य मुक्तिं गतः, पश्चात्पुंडरीको नृपोऽन्यदा राज्यं पालयन् स्थविरांतिके धर्मं शुश्राव. श्रुत्वा द्वावपि भ्रातरौ प्रतिबुद्धौ. गृहमागत्य पुंडरीको वृद्धभ्राता कंडरीकं कथयतिस्म, हे बंधो गृहाणेदं राज्यं, प्रजां च प्रजावत्पालय? अहं स्थविरांतिके चारित्रं गृहीष्यामि. तत् श्रुत्वा लघीयसा कंडरीकेणोक्तं हे भ्रातः किं कार्यं मम राज्येन? पित्रा तव राज्यं समर्पितमतस्त्वमेवेदं भुंक्ष्व? अहं स्थविरांतिके चारित्रं गृहीष्यामि, इति कथयित्वा वृद्धभ्रातरमापृच्छ्य तेन चारित्रं गृहीतं, एकादशांगीधारकश्च जातः, क्रमेण स्थविरैः सार्द्धं विचरतोऽरसविरसाहारं कुर्वतस्तस्य शरीरे महांतो रोगाः समुत्पन्नाः, स्थविरैः सार्द्धं स एकदा पुंडरीकिण्यां समागतः, पुंडरीको राजा वंदनार्थमागतः, स्थविराणां पार्श्वे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देशनां श्रुत्वा पश्चात्स्वभ्रातरं कंडरीकं वंदतेस्म. तच्छरीरे रोगोत्पत्तिं विज्ञाय तेन स स्वयानशालायां रक्षितः, शुद्धौषधैश्च स तस्य भ्रातुश्चिकित्सां कारयति, क्रमाच्च स नीरोगी जातः, तदा स्थविरैः पुंडरीकनृपो विहारार्थं याचितः, परं कंडरीकसाधुर्मिष्टान्नपानमूर्छितो नृपांतिके विहाराज्ञां न मार्गयति. तदा पुंडरीकनृपः स्थविरानन्निबंध स्वभ्रातुः प्रशंसां करोतिस्म. धन्यस्त्वं कृतपुण्यस्त्वं कृतार्थस्त्वं, लब्धं त्वया सुमानुष्यजन्मजीवितफलं; यतश्चारित्रं गृहीत्वा त्वं तपःसंयममाराधयसि, अधन्योऽहमकृतपुण्योऽहं, यतो राज्ये मूर्छितोऽस्मीति स्तुतिपथं नीतोऽपि कंडरीकमुनिर्न सम्यग्मनसि ररंज; परं लज्जया स नृपाज्ञां गृहीत्वा स्थविरैः सार्द्धं विजहार, वर्षाणामेकसहस्रं यावच्चारित्रमनुपाल्य नग्नपरिणामो जातः, एकाक्येव गुर्वाज्ञां विना स पुंडरीकिण्यां समागतः, नृपभुवनसमीपेऽशोकवाटिकायामशोकवृक्षाधस्तादुपकरणानि वृक्षशाखायां स्थापयित्वा दुर्मनाश्चिंतातुरः स्थितोऽस्ति. तदवसरे राज्ञो धात्रीमात्रा स दृष्टः, तया समागत्य पुंडरीकनृपाग्रे सर्वं तत्स्वरूपं कथितं.

पश्चाद्राज्ञापि तत्रागत्य तं दृष्ट्वा तदन्निप्रायो ज्ञातः, एकांते च पृष्टं भ्रातर्नवतः किं नो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गाभिलाषो वर्त्तते? तेनोक्तं मम राज्यभोगेच्छा वर्त्तते. तत् श्रुत्वा पुंडरीकनृपेण स्वकुटुंबिक-पुरुषानाहूय तदीयो राज्याभिषेकः कारितः, कंडरीको राजा जातः, तस्मिन्नेव दिने सरसाहारतो निर्वज्रशरीरस्य तस्य महतीवेदना समुत्पन्ना. केनापि तस्यौषधं न कृतं, ज्ञातं च यदनेन पापीयसा चारित्रं मुक्त्वा राज्यं गृहीतं, तदस्माकमयं किं सुखदाता भविष्यतीति. तदा कंडरीकस्य प्रधानप्रमुखाणामुपर्यतीवक्रोधः समुत्पन्नः, चिंतितवांश्च भव्यं यद्यधुना कोऽपि न मे सपर्यां करोति, परं यदा सज्जीभविष्यामि तदा सर्वेषां निग्रहं करिष्यामीति रौद्रध्यानवशतो मृत्वा स सप्तमीं पृथिवीं गतः, त्रयस्त्रिंशत्सागरोपमायुः, एवमन्योऽपि यश्चारित्रं मुक्त्वा विषयाशंसां करोति, सोऽपि कंडरीकवद्दुर्गतिभाग्भवति. अथ पुंडरीकनृपः स्वयं चतुर्महाव्रतोच्चारपूर्वकं तान्येव कंडरीकमुक्तोपकरणान्यादाय, यावत्स्थविरान्नाऽभिवंदामि तावदाहारं न गृह्णामीत्यभिग्रहं कृत्वा गृहान्निर्गतो मार्गे कंटककर्कराद्युपसर्गान् सहमानो मनस्येवं चिंतयति यत्कदाहं स्थविरान् वंदिष्ये? इति दृढपरिणामो द्वितीयदिवसे स्थविरानभिवंद्य तत्पार्श्वे पुनरपि चत्वारि महाव्रतान्युच्चारितवान्. पश्चात्पष्टपारणके तेन नीरसलूक्षयाद्दशताद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शाहारः कृतः, तेन मध्यरात्रिसमये तस्य शरीरे महाव्यथोत्पन्ना. सर्वान् क्षांत्वा विशुद्ध्या-
नतस्तदैव कालं कृत्वा स सर्वार्थसिद्धे महाविमाने त्रयस्त्रिंशत्सागरोपमायुर्देवो जातः, तत-
श्च्युत्वा महाविदेहे सेत्स्यतीति. एवं स्तोककालमपि यो विशुद्धं चारित्रं पालयति स पुंमरी-
कवत्सुखं प्राप्नोतीति कंमरीकपुंमरीकयोः संबंध एकषष्टितमः ॥ ६१ ॥

॥ मूलम् ॥—काऊण संकिलिट्ठं । सामन्नं दुल्लहं विसोहिपयं ॥ सुज्झिज्जा एगयरो । क-
रिज्ज जइ उज्जमं पच्छा ॥ ५३ ॥ व्याख्या—' काऊण इति ' कृत्वा ' संकिलिट्ठं इति ' सं-
क्लिष्टं मलिनं. किं कृत्वा? श्रामण्यं चारित्रं पूर्वं मलिनं कृत्वेत्यर्थः, पश्चात्तस्य चारित्रविराध-
कस्य ' विसोहिपयं इति ' विशुद्धिपदं दुर्लभं, येन पूर्वं चारित्रं मलिनीकृतं तस्य पश्चाच्चारि-
त्रनिर्मलीकरणं दुर्लभमित्यर्थः, एकतरः कोऽपि भाग्यवान् यो भवति स शुद्ध्येन्निर्मलीभवे-
त्. कुर्याद्यदि उद्यमं पश्चात्, यदि विराधितसंयमोऽपि पश्चात्प्रमादं विहाय चारित्रपालनोद्य-
मं करोति तदा शुद्ध्येदपीत्यर्थः ॥ ५३ ॥

॥ मूलम् ॥—उप्पिज्ज अंतरच्चिय । खंमिय सबलादउव्व हुज्ज खणं ॥ उसन्नो सुहलेहम

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

। न तरिज्ज पन्न उज्जमिउं ॥ ५४ ॥ व्याख्या—' उज्झिज्ज इति ' उज्झेत्त्यजेत् ' अंतरच्चिय इ-ति ' मध्ये एव चारित्रं प्रतीत्यर्थः, खंमितं करोति व्रतभंजनात् ' सबलादउव्व इति ' नाना-विधातिचाराचरणेन मलिनं ' हुज्ज इति ' करोति क्षणं ' उसन्नो इति ' अवसन्नः शिथिलः सन् सुखलंपटः सन् ' न तरिज्ज इति ' न शक्नुयात्पश्चात् ' उज्जमिउं इति ' उद्यमं कर्तुं चारित्रविषये इत्यर्थः ॥ ५४ ॥

॥ मूलम् ॥—अवि नाम चक्कवट्टी । चइज्ज सव्वंपि चक्कवट्टिसुहं ॥ न य उसन्नविहारी । दुहिउ उसन्नयं चयइ ॥ ५५ ॥ व्याख्या—' अविनाम इति ' अप्येतादृशं नामेति संभा-व्यते चक्रवर्त्ती षट्खंमाधिपतिस्त्यजेत्सर्वमपि चक्रवर्त्तिसुखं, परं ' उसन्नविहारीति ' शिथि-लविहारी यो भवति, स दुःखितोऽपि सन् ' उसन्नयं चयइत्ति ' शिथिलत्वं न त्यजति, चि-क्कणकर्मावलिप्तत्वादिति भावः ॥ ५५ ॥

॥ मूलम् ॥—नरयग्गो ससिराया । बहु भणइ देहलालणासुहिउ ॥ पम्हिनमि भए भा-उ । तो मे जाएअ तं देहं ॥ ५६ ॥ व्याख्या—' नरयग्गो इति ' नरकस्थः शशिप्रभनामा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राजा ' बहु भणइ इति ' बहु कथयति भ्रातरमित्यर्थः, अहं ' देहलालणासुहिउ इति ' देहपोषणेन सुखितः सन् पतितोऽस्मि, भये नरकविषये, हे भ्रातः ' तो इति ' तस्मात्कारणात् ' मे इति ' मम देहं पूर्वभवशरीरं यातय ? कदर्थयेति यावत् ॥५६॥ अत्र कथानकं—

कुसुमपुरे नगरे जितारिनामा नृपः, तस्य शशिप्रभसुरप्रभनामानौ द्वौ पुत्रौ, शशिप्रभं राज्येऽधिरोप्य सुरप्रभं च यौवराज्ये निधाय जितारिर्धर्मोद्यतो बभूव. तदवसरे चतुर्ज्ञानधराः श्रीविजयघोषाचार्याः समवसृताः, शशिप्रभसुरप्रभौ च वंदनार्थं निर्गतौ, देशनां श्रुत्वा सुरप्रभः प्रतिबुद्धो गृहमागत्य शशिप्रभं कथयतिस्म, हे बंधो असारोऽयं संसारः, ततो विषयसुखं त्यक्त्वा, दीक्षां गृहीत्वा तपःसंयमोद्यमः क्रियते, यथा स्वर्गमोक्षावाप्तिः स्यात्. शशिप्रभेणोक्तं भो भ्रातरद्य त्वं केनापि धूर्त्तेन वंचितो दृश्यसे, यतः प्राप्तानि विषयसुखानि त्यक्त्वाऽग्रेतनसुखवांछां करोषि, त्वं महान् मूर्खः, केन दृष्टान्यग्रेतनसुखानि ? को जानाति धर्मफलं भविष्यति वा न वा. सूरप्रभेणोक्तं हे भ्रातः किमिदमुक्तं ? धर्मफलं निश्चितं, प्रत्यक्षदृष्टानि पुण्यपापफलानि, यत एको जीवः सरोगः, एको रूपवान्, एकः कुरूपवान्, एको

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धनी, एको निर्धनः, एकः सौभाग्यवान्, एको दौर्भाग्यवानित्यादि सर्वं पुण्यपापफलं, एवमनेकप्रकारं बोधितोऽपि शशिप्रभो बहुलकर्मत्वान्न बुद्धः ।

तदा सूरप्रभो दीक्षां गृहीत्वा तपःसंयममाराध्य पंचमं ब्रह्मदेवलोकं गतः, शशिप्रभो राज्यं पालयित्वा विषयसुखमग्नो व्रतप्रत्याख्यानं विनाऽविरतः कालं कृत्वा तृतीयपृथिव्यां नारकित्वेनोत्पन्नः, पश्चात्सुरप्रभो देवोऽवधिज्ञानेन पूर्वभवभ्रातरं नरकस्थितं विलोक्य स्नेहतो नरकभूमावागत्य पूर्वभवभ्रातुरग्रे पूर्वभवस्वरूपं कथयामास. भ्रातः पूर्वभवे त्वया मम कथनं न कृतमतो नरके समुत्पन्नः, तेनापि ज्ञानेन स्वपूर्वभवस्वरूपं ज्ञातं. पश्चान्नरकस्थितः शशिप्रभनारकः सूरप्रभदेवं कथयति, हे भ्रातर्मया पूर्वं विषयसुखलंपटेन धर्मो न कृतस्ततो नरके निपतितः, तदधुना त्वं तत्र गत्वा मदीयशरीरे व्यथामुत्पादय? भूमिपतितं मम पूर्वभवशरीरं कदर्थय? यथाहं नरकान्निःसरामि. तदा सूरप्रभदेवेनोक्तं—' किं तेण इति ' हे भ्रातरधुना तव जीवरहितपूर्वशरीरकदर्थनया को गुणः? यदि पूर्वं तपःसंयमाराधनेन तव देहोऽपतिष्यत्तदा त्वं नारको नाऽभविष्यः, अधुना स्वकृतकर्माण्युपभुंक्ष्व? त्वदीयदुःखाऽपन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

येन न कोऽपि समर्थ इति कथयित्वा सूरप्रभदेवः स्वर्लोकं गतः, एवं ज्ञात्वा भो भव्यजनाः 'जावाउ इति' यावत्पर्यंतमायुः, अथ च यावत्स्तोकोऽपि शरीरमनसोरुत्साहस्तावत्पर्यंतं धर्मानुष्ठानं तपःक्रियादि करणीयं. परं प्रांते शशिप्रभवन्मा पश्चात्तापभाजो भवतेत्युपदेशः ॥ इति शशिप्रभसूरप्रभसंबंधो द्वाषष्टितमः ॥ ६२ ॥

॥ मूलम् ॥—किं तेण जीवरहिएण । संपयं जाइएण हुज्ज गुणो ॥ जइसि पुरा जायंतो । ता नरए नेव निवडंतो ॥ ५७ ॥ व्याख्या—'को तेण इति' कस्तेन जीवरहितेन शरीरेण पूर्वभवदेहेन? सूरप्रभदेवः कथयति संप्रत्यधुना, कीदृशेन शरीरेण? 'जाइएण इति' कदर्थितेन पीडितेन 'हुज्ज इति' भवेत्कुणः, तेन मृतशरीरकदर्थनेन तव को गुण इत्यर्थः 'जइसि इति' यदि त्वया पूर्वमेव देहः 'जायंतो इति' तपःसंयमाभ्यां पीडितोऽभविष्यत् 'तो इति' तर्हि त्वं 'नरए इति' नरके, एवेति निश्चयेन नाऽपतिष्यत्, लोकभाषया 'न पडत' इत्यर्थः, एवं नरकस्थितं शशिप्रभजीवं स्वबांधवं प्रतिबोध्य सूरप्रभदेवो देवलोकं गतः ॥ ५७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जावन्न सावसेसं । जावय थेवोवि अत्थि ववसान्न ॥ ताव करिज्जप्पहियं । मा ससिरायाव सोहिसि ॥ ४९ ॥ व्याख्या—' जावन्न इति ' यावत्पर्यंतं विद्यते आयुः, कीदृशं ? सावशेषं अवशेषेण सहितं ' जावय इति ' यावत्पर्यंतं ' थेवोवि इति ' स्वल्पोऽपि व्यवसायः शरीरमनसोरुत्साहोऽस्ति तावत्पर्यंतं ' अप्पहियं ' आत्मनो हितमनुष्ठानं तपःक्रियादि ' करिज्ज इति ' कुर्यात्, परं शशिप्रन्नराजेव ' मा सोहिसित्ति ' मा शोचेत् लोकन्नाषया ' रखे शोक करे ' ॥ ५८ ॥

॥ मूलम् ॥—घित्तूणवि सामन्नं । संजमजोगेसु होइ जो सिढिलो ॥ पडइ जइवयणिज्जे । सोअइ अ गन्न कुदेवत्तं ॥ ५९ ॥ व्याख्या—' घित्तूण इति ' गृहीत्वापि श्रामण्यं चारित्रं संयमयोगेषु चारित्रक्रियाकलापेषु यः शिथिलः प्रमादी न्नवति, स पतति यतेः साधोर्वचनीयतायां, अर्थादिह लोके निंद्यो न्नवतीत्यर्थः, अथ च कुदेवत्वं परन्नवे किल्बिषत्वं गतः सन् शोचति ॥ ५९ ॥

॥ मूलम् ॥—सुच्चा ते जीअलोए । जिणवयणं जे नरा न जाणंति ॥ सुच्चाणवि ते सु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च्चा । जे नाऊण नवि करंति ॥ ६० ॥ व्याख्या—' सुच्चा इति ' शोच्याः शोचनार्हास्ते पुरुषा अस्मिन् जीवलोके, हा का गतिरेषां भाविनीति शोच्याः, के पुरुषाः शोच्याः ? ये नरा मनुष्या जिनवचनमर्हद्वचनं न जानंति अविवेकित्वादित्यर्थः, शोच्यानामपि पुरुषाणां मध्ये ते विशेषतः शोच्याः, के ? ये पुरुषा जिनवचनं ज्ञात्वापि ' नवि करंति ' नैव कुर्वंति प्रमादित्वादित्यर्थः, जागृतामपि प्रमादो महाऽनर्थहेतुरित्यर्थः ॥ ६० ॥

॥ मूलम् ॥—दावेऊण धणनिहिं । तेसिं नप्पाडियाणि अच्छीणि ॥ नाऊणवि जिणवयणं । जे इह विहलंति धम्मधणं ॥ ६१ ॥ व्याख्या—' दावेऊण इति ' दर्शयित्वा धनं रत्नस्वर्णादि तस्य निधिं निधानं, रंकाय रत्ननिधानं दर्शयित्वेत्यर्थः, पश्चात्तेषां रंकाणामुत्पाटितानि निष्कासितानि अक्षीणि लोचनानि यथा, तथा ज्ञात्वापि जिनवचनं, जिनास्तीर्थंकरास्तेषां वचनं भाषितं, तद् ज्ञात्वापि ये पुरुषा इहाऽस्मिन् संसारे विफलीकुर्वंति धर्मरूपं धनं, तेषां पूर्वदृष्टांतोपमा ज्ञातव्या. ॥ ६१ ॥

॥ मूलम् ॥—गाणं नच्चुच्चयरं । मग्गं हीणं च हीणतरगं वा ॥ जेण जहिं गंतव्वं । चि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ठावि से तारिसी होइ ॥ ६२ ॥ व्याख्या—' गणं इति ' स्थानमुच्चं देवलोकरूपं ' उच्चयरं इति ' ततोऽप्युच्चतरं मोक्षगतिरूपं स्थानं, मध्यमं स्थानं मनुष्यगतिरूपं, च पुनर्हीनं स्थानं तिर्यग्गतिरूपं, वाऽथवा हीनतरं नरकगतिरूपं, येन पुरुषेण ' जहिं इति ' यत्र स्थाने गंतव्यं भवति ' से इति ' तस्य पुरुषस्य चेष्टापि तादृशी भवति ' जल्लेसे मरइ तल्लेसे उववज्जइइति ' ॥ ६२ ॥

॥ मूलम् ॥—जस्स गुरुंमि परिभवो । साहुसु अणायरो खमा तुछा ॥ धम्मे अ अणहिलासो । अहिलासो दुग्गए एउ ॥ ६३ ॥ व्याख्या—' जस्स इति ' यस्य पुरुषस्य ' गुरुंमित्ति ' गुरुविषये परिभवः पराभवोऽवज्ञाकरणमिति यावत् ' साहुसु इति ' मोक्षमार्गसाधकेष्वनगारेषु अनादर आदराऽभावः, यस्य क्षमा तुछा स्तोका, अथ च यस्य धर्मे क्षांत्यादिरूपे दशविधेऽनभिलाषोऽभिलाषाऽभावः, तस्य पुरुषस्याऽभिलाषो वांछा दुर्गतेर्नरकगतेर्ज्ञेयः, ' एउ इति ' अयं ॥ ६३ ॥

॥ मूलम् ॥—सारीरमाणसाणं । दुक्खसहस्साण वसणपरिन्नीया ॥ नाणंकुसेण मुणि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णो । रागगइंदं निरुंभंति ॥ ६४ ॥ व्याख्या—' सारीर इति ' शारीराणि शरीरसंबंधीनि, मानसानि मनःसंबंधीनि, तेषामेतादृशानां दुःखसहस्राणां, दुःखानां सहस्राणि दुःखसहस्राणि, तेषां व्यसनं पीडा कष्टमिति यावत्, तस्मात्परिभीता भयं प्राप्ता एतादृशाः ' मुणिणो इति ' मुनयो ज्ञानं त्रिकालस्वरूपं, ज्ञानांकुशेन ज्ञानस्वरूपेणांकुशेन कृत्वा रागरूपं गजेंइं ' निरुंभंति इति ' रुंधंति, न तस्य प्रसरं ददतीत्यर्थः ॥ ६४ ॥

॥ मूलम् ॥—सुगइमग्गपईवं । नाणं दिंतस्स हुज्ज किमदेयं ॥ जह तं पुलिंदएणं । दिन्नं सिवगस्स नियगच्छि ॥ ६५ ॥ व्याख्या—' सुगइ इति ' सद्गतिर्मोक्षरूपा तस्या मार्गः पंथास्तत्प्रकाशनेन प्रदीपं दीपसदृशमेतादृशं ज्ञानं, ज्ञायते परिच्छिद्यते वस्त्वनेनेति ज्ञानं, अत्र श्रुतज्ञानं ग्राह्यं, तद्ददतां ज्ञानमर्पयतां ' हुज्ज इति ' भवेत्किमदेयं? एतावता यदि ज्ञानदाता जीवितं मार्गयति तदा सुशिष्येण तदपि देयमित्यर्थः, अत्र दृष्टांतमाह—यथा तेन 'पुलिंदएणं इति ' भिल्लेन ' दिन्नं इति ' दत्तं शिवस्य महादेवस्य निजकमक्षि लोचनं, तत्स्वरूपं कथानकगम्यं. ॥ ६५ ॥ अथात्र कथा—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विंध्याटव्यां पर्वतगुहायामेका व्यंतराधिष्ठिता शिवमूर्त्तिः, तत्पूजनाय पार्श्ववर्त्तिग्राम-वास्तव्यो मुग्धगणनामा जनः प्रतिदिनमागच्छति, स समागत्य प्रथमं तत्स्थानं प्रमार्जयति, पश्चात्पवित्रेण जलेन शिवमूर्त्तिं प्रक्षाल्य काश्मीरजन्मप्रमुखैः सुगंधिद्रव्यैरर्चयति, पश्चात्पुष्पमालाधूपोत्क्षेपादि करोति, एकेन चरणेन भूमौ स्थित्वा तद्ध्यानस्तवनादि कृत्वा गृहे याति, मध्याह्ने च भोजनं करोति, एवं स प्रतिदिनं पूजां कर्तुमागच्छति. एकवारं पूजार्थमागतेन तेन स्वकीयपूजाऽपनयनपूर्वकमर्कधत्तूरककणवीरपुष्पादिभिः पूजितं शिवं दृष्ट्वा मनसि चिंतितं, अहो अस्यामटव्यां कः पुमानेतादृशोऽस्ति! यो मदीयपूजामपनीय प्रतिदिनं शिवं पूजयति. तं विलोकयामीति विचार्य प्रच्छन्नवृत्त्या स तत्र स्थितः, तावत्तृतीयप्रहरे एको भिल्लः समागतः, श्यामवर्णो वामहस्ते धनुर्बाणधरो दक्षिणहस्तेऽर्कधत्तूरकपुष्पादिपूजोपकरणधारी समागत्य पादत्राणसहितो मुखभृतजलेन तदीयमंगमेकेन चरणेन प्रक्षाल्याऽर्कधत्तूरकपुष्पैस्तमर्चयामास. मांसपेशी च तेन तन्मुखाग्रे ढौकिता. ॥ ४४० ॥

एवंविधां भक्तिं विधाय 'नमोऽस्तु महादेवाय परमेश्वरायेति' नमस्कारं कृत्वा स ब-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिर्निर्गतः, तदा शिवः प्रकटीभूय तं संभाषयामास, हे सेवक अद्य कथमियान्विलंबो जातः? त्वं भोजनं सुखेन प्राप्तोषि? तव निर्विघ्नं च वर्त्तते? इत्यादिसुखप्रश्नपूर्वकं शिवेन तस्य प्रवृत्तिः कृता. तदा निःस्नेनोक्तं स्वामिन् यदि त्वं प्रसन्नोऽसि तदा मम का चिंता? इति कथयित्वा निःस्नो गतः, तदा प्रच्छन्नस्थितेन मुग्धगणेनागत्य महादेवायोक्तं, ज्ञातं मया तवैश्वर्यं, यादृशोऽयं निःस्नसेवकस्तादृशस्त्वमेवासि. यतोऽहं नित्यं काश्मीरजन्मादिना ते पवित्रपूजां करोमि तथापि त्वं ममोपरि न प्रसन्नो भवसि, मया सार्द्धं प्रवृत्तिं च न करोषि. अपवित्रेण चाशातनाकारकेण निःस्नेन सार्द्धं तु प्रकटीभूय प्रवृत्तिं करोषि. महादेवेनोक्तं वत्स त्वदीयैतदीयभक्त्योरंतरं दर्शयिष्यामि. इति श्रुत्वा मुग्धगणः स्वगृहं गतः, द्वितीयदिवसे च तथैव स शिवपूजार्थमागतः, तदवसरे शिवेनैकं नाललोचनमदृश्यीकृतं, तद् दृष्ट्वा मुग्धगणो मनसि दूनो बभूव. हा हा किं जातमिदं? केनापि पापीयसा परमेश्वरनालोचनं निष्कासितं विलोक्यते इति कथयित्वोच्चैःस्वरेण स रुरोद. इत्थं बहुवारं रुदित्वा पश्चान्नित्यकृत्यं पूजादिकं स चकार. तावता स निःस्नोऽपि तत्रागतः, तेन शिवनाले लोचनं न दृष्टं, क्षणं यावच्चोचपरो ॥४४१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूत्वा स्वबाणेन स्वकीयमेकं लोचनं निष्कास्य तेन शिवभाले स्थापितं. तदा लोचनत्रयं जातं, पश्चात्तेन नित्यकार्यं पूजादिकं कृतं. तदा शिवेन प्रत्यक्षीभूयोक्तं, हे वत्स त्वदीयभक्त्याहं तुष्टोऽद्यप्रभृति तव बह्वी संपन्नविष्यतीति वरो दत्तः, पश्चात्तेन मुग्धगणस्य कथितं, दृष्टं त्वया त्वद्भक्तिभिल्लभक्त्योरंतरं? वयमांतरभक्त्या प्रसन्ना भवामः, परं बाह्यभक्त्या नेत्युक्त्वा शिवस्तिरोदधे. यथा भिल्लेन शिवभक्तिः कृता, तथाऽन्येनापि शिष्येण ज्ञानदातुर्गुरोर्भक्तिर्विधेयेत्युपदेशः ॥ इति भिल्लसंबंधस्त्रिषष्टितमः ॥ ६३ ॥

॥ मूलम् ॥—सिंहासणे निसन्नं । सोवागं सेणिउ नरवरिंदो ॥ विज्जं मग्गइ पयउ । इअ साहुजणस्स सुअविणउ ॥ ६४ ॥ व्याख्या—' सिंहासणे इति ' सिंहासने आसने निषण्णं स्थितं, अर्थात्स्वयमेव स्थापितमित्यर्थः, एतादृशं श्वपाकं चांडालं नरवरेंद्रः श्रेणिको नाम राजा विद्यां मार्गयति याचते ' पयउ इति ' हस्तद्वययोजनपूर्वकं, यथा श्रेणिकेन विद्यार्थं श्वपाको विनयपूर्वकं याचितः ' इय ' इत्यनेन दृष्टांतेन साधुजनस्य विनयो विधेयः ॥६६॥ अत्र कथानकं—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मगधविषये राजगृहे पुरे श्रेणिको नामा महाराजा, तस्य चिल्लणानाम्नी राज्ञी, तस्या एकवारं गर्भप्रभावतः परितो वाटिकासहितैकस्तंभावासमनोरथः समुत्पन्नः, तदा राज्ञाऽभयकुमारस्य तद् ज्ञापितं, पश्चादभयकुमारेण देवताऽाराधनेन सर्वर्तुफलपुष्पवृक्षसहितः, सर्वतो दुर्गयुतश्चैकस्तंभावासो निष्पादितः, तं दृष्ट्वा चिल्लणाऽतीवहृष्टा, तद्वनं षट्स्वपि ऋतुषु फलितं पुष्पितमेवास्ते, तत्परितो राजभटास्तिष्ठंति पत्रमात्रमपि कोऽपि गृहीतुं न शक्नोति. इतश्च तन्नगरे कोऽपि सिद्धविद्यश्चांडालः परिवसति, तस्य स्त्रियो गर्भप्रभावतः कार्त्तिकमासे आम्रफलभक्षणदोहदः समुत्पन्नः, तया स्वकीयभर्त्रेनिवेदितं, तदा तेनांत्यजेन चिंतितं, अद्याऽकाले आम्रफलानि राज्ञो देवनिर्मितवाटिकायामेव वर्त्तंते, नान्यत्रेति चिंतयित्वा स रात्रौ तत्रागतः, दुर्गाद्बहिः स्थित्वा तेनाऽवनामिनी विद्याबलेनाम्रतरुशाखा नामिता फलानि गृहीत्वा च पुनरुन्नामिता, स्त्रियो दोहदश्च संपूर्णीकृतः, प्रभाते फलरहितां वृक्षशाखां दृष्ट्वाऽारक्षकै राज्ञोऽग्रे तन्निरूपितं. राज्ञापि सर्वत्र शुद्धिः कारापिता, परं चौरो न कुत्रापि दृष्टः, ततोऽभयकुमारमाहूय राज्ञोक्तमाम्रफलचौरमानय? अभयेनोक्तमानयामि. तदवसरे चतुष्पथे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाट्यविलोकनार्थं बहवः पौरलोका मिलिताः, अन्नयोऽपि तत्रागत्य कथयतिस्म, भो लोकाः शृणुत? यावदयं नटो न नृत्यति तावदेकामहं कथां कथयामि, लोकाः सर्वेऽपि श्रोतुं लग्नाः, तत्कथानकं यथा—

पुण्यपुरे नगरे गोवर्द्धननामा श्रेष्टी तद्गृहे सुंदरीनाम्नी वृद्ध कुमारी वर्त्तते, साऽतीवरूपयौवनशालिनी प्रतिदिनं वांछितवरार्थं वाटिकातः प्रच्छन्नवृत्त्या पुष्पाण्यादाय कामदेवनाम्नो यक्षस्य पूजां करोति. एकदा मालाकारेण पुष्पाणि चिन्वती सा दृष्टा, हस्ते गृहीत्वा चौरकलंकं दत्वा मालाकारेणोक्तं त्वं कथं प्रतिदिनं चौर्यं करोषि? यदि त्वं मदीयं कथनं करोषि तदा त्वां मुंचामि. वृद्धकन्ययोक्तं हे मित्र शृणु? अद्याप्यहं कुमारिकास्मि, ततोऽद्यतः पंचमे दिवसे मदीयं लग्नमस्ति, तद्दिने परिणयनानंतरं प्रथमतस्तव समीपमागत्य पश्चाद्भर्तुः पार्श्वे गमिष्यामि; इति शपथपूर्वकं कथयित्वा सा गृहमागता. पश्चात्पंचमे दिने पाणिग्रहणानंतरं पतिसमीपे गत्वा तया सर्वोऽपि मालाकारवृत्तांतो निवेदितः, भर्त्रा सत्यवक्त्रीति ज्ञात्वाऽज्ञा दत्ता. पश्चात्सकलभोगसामग्रीमादाय शुभ्रवेषं च परिधाय मध्यरात्रौ सा गृहान्निर्गता.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मार्गे प्रथमतस्तस्याश्चौरा मिलिताः, तैराभरणभूषिता सा दृष्टा, लुंटनार्थमागताः, तदा तया चौराग्रे सर्वं मालाकारसमीपगमनस्वरूपं निवेदितं, कथितं च पश्चाद्गंत्यहं भवद्भयो ममाभरणानि समुत्तार्य समर्पयिष्यामि, सत्यवादिनीयमिति ज्ञात्वा चौरैर्मुक्ता, अग्रे गच्छंत्यास्तस्या राक्षसो मिलितः, तथैव स्वरूपे निवेदिते पश्चात्त्वयात्रागंतव्यमिति कथयित्वा राक्षसेनापि सा मुक्ता, क्रमेण वाटिकायां मालाकारपार्श्वे गता. सोऽपि नवपरिणीतां नवयौवनामत्यद्भुतरूपधारिणीं तां दृष्ट्वा हृष्टः पृच्छतिस्म, कथय भो वामलोचने कथमद्य रात्रावेकाकिनी समागता? तदा तया सर्वोऽपि मार्गोदंतो निरूपितः, मालाकारेण चिंतितं धन्येयं या स्ववचनबद्धा एतादृश्यां श्यामरात्रौ स्वबुद्धिबलेन चौरराक्षसावनुज्ञाप्य मत्पार्श्वमागता. सा यदा भर्त्रा चौरै राक्षसेन च मुक्ता तदा मयापि मोचनीया, इति चिंतयित्वा मालाकारेणोक्तं त्वं मम भगिनी, अहं च तव भ्राता, क्षमस्वापराधमिति तच्चरणयोर्निपत्य तेन सा पश्चाद्बालिता. ॥४४५॥

पश्चादागच्छंत्यास्तस्या राक्षसो मिलितः, तदग्रे तया सर्वं मालाकारस्वरूपं कथितं, तदा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राक्षसेन चिंतितमेतादृशी नवयौवनेयं यदि तेन न भुक्ता, तदाहं सत्यवादिनीमिमां सतीं कथं नक्षयामीति विचार्य तेनापि त्वं मम भगिनीत्युक्त्वा मुक्ता. पुनरप्यग्रे आगच्छंत्यास्तस्याश्चौरा मिलिताः, लुंटनार्थमागतैस्तैरपि तथैव तद्वृत्तांतं श्रुत्वा मुक्ता. क्रमेण भर्तुः समीपमागता, सर्वं तद्वृत्तांतं श्रुत्वा सोऽतीवप्रसन्नो जातः, सर्वोऽपि गृहाधिकारस्तस्यै समर्पितः, इति कथयित्वाऽभयकुमारेणोक्तं कथयत भो लोकाः! एतेषां चतुर्णां मध्ये को दुःकरकारकः? तदा ये स्त्रियामविश्वासवंतस्तैरुक्तं तदीयो भर्त्ता दुष्करकारको येन नवपरिणीता नवयौवना निजस्त्री प्रथमसंगमे परपुरुषपार्श्वे मुक्ता. अथ ये कामिनः परस्त्रीलंपटास्तैरुक्तं मालाकारो दुष्करकारको येन रात्रिसमये विजनप्रदेशे सन्मुखमागतापि कृशोदरी त्यक्ता, स्वकीयं मनश्च रक्षितं, अतो धन्योऽयं मालाकारः, अथ ये मांसाशनलुब्धास्तैराक्षसो वर्णितः, तदाऽाम्रफलचौरेणोक्तमेतेभ्यस्त्रिभ्योऽपि चौराः समीचीनाः, यैरात्मरमणभूषिता समीपमागतापि सा नोच्छलुसिता. तत् श्रुत्वाऽभयकुमारेण स चांडालो ग्राहितः, कथितं च त्वमाम्रफलचौरोऽसि. ततः सत्यं वद? नो चेत्तव निग्रहं करिष्यामि. तदा चांडालेनोक्तं सत्यं मया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

फलानि गृहीतानि, अभयकुमारेण पृष्टं कथं गृहीतानि? तेन सर्वं स्त्रीदोहदस्वरूपं विद्यासामर्थ्यं च निवेदितं।

पश्चात्तं गृहीत्वा श्रेणिकसमीपे समागतोऽभयकुमारः, तदा राज्ञा तन्मारणादेशो दत्तः, दयापरेणाभयेनोक्तं राजन्नेकवारमेतत्पार्श्वाद्विद्यां गृह्णीत? पश्चाद्यथेष्टं कुरुत? तदा सिंहासनस्थितेन राज्ञा बद्धहस्तादग्रस्थिताच्चौराद्विद्या शिक्षितुमारब्धा, चांडालः कथयति परं राज्ञो मुखेऽक्षरमात्रमपि न चटति. तदाऽभयकुमारेणोक्तं राजन्नेवं विद्या नायाति, विनयकरणतो विद्या समायाति. तत एनं सिंहासने स्थापयत? यूयं च करौ मुकुलीकृत्याग्रे तिष्ठत? राज्ञापि तथैव कृतं, सम्यग्विद्या समायाता, पश्चात्पुनरपि राज्ञा तद्वधादेशो दत्तः, तदाऽभयकुमारेणोक्तं राजन्नघटमानमेतत्, यत एकाक्षरदातारमपि यो गुरुं न मन्यते, स शतवारं शूनां योनिं गत्वा पश्चाच्चांडालेषु गच्छति, ततोऽयं चांडालो भवतां विद्यागुरुः संजातः, अतः कथं मारणीयः? अधुना त्वयं पूजनार्हः, एतत् श्रुत्वा राज्ञा चांडालस्य महती भक्तिः कृता, धनवस्त्रादिना तस्य सत्कारः कृतः, स्वगृहे च प्रेषितः, एवं शिष्येणापि विनयपूर्वकं गुरुपा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वेऽध्ययनं विधेयमित्युपदेशः ॥ इति चांडालदृष्टांतश्चतुःषष्टितमः ॥ ६४ ॥ पुनरपि प्रकारांतरेण विनयमेवाह—

॥ मूलम् ॥—विज्जाए कासवसमप्पियाए । दगसूअरो सिरिं पत्तो ॥ पडिउ मुसं वयंतो । सुअनिह्नवणा इअ अप्पिच्छा ॥ ६७ ॥ व्याख्या—' विज्जाए इति ' विद्यया ' कासवसमप्पियाए इति ' काश्यपो नापितस्तत्समर्पितया नापितदत्तविद्ययेत्यर्थः ' दगसूअरो इति ' त्रिकालस्नानकर्त्ता कश्चित्त्रिदंडिकः ' सिरिं इति ' लक्ष्मीं प्राप्तः ' पडिउ इति ' पश्चात्पतितः, किं कुर्वन्? मृषा वदन्, स्वकीयं विद्यागुरुमपलपन्नित्यर्थः, ' सुअनिह्नवणा इति ' श्रुततदातुरपलपनं ' इअ इति ' अनेन प्रकारेण दकसूकरदृष्टांतेनाऽपथ्यं कर्मरोगवृद्धिकारकत्वादित्यर्थः ॥ ६७ ॥ अत्र कथासंप्रदायः—

स्तंबपुरे नगरे एकश्चंडिलनामा नापितः परिवसति, अतीवकुशलः, स विद्याबलेन श्मश्रुकर्म विधाय क्षुरमाकाशे स्थापयति, एकदा केनापि त्रिदंडिना स दृष्टः, तमाराध्य तत्पार्श्वोर्त्तन विद्या शिक्षिता. पश्चात्परिभ्रमंस्त्रिदंडिकोऽसौ गजपुरमागतः, तत्र पद्मरथो राजा, स

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रिदंमिकस्तत्र स्वविद्याबलेन निजत्रिदंडमाकाशे स्थापयति. तद् दृष्ट्वा बहवो लोकाश्चमत्कृताः, तं चातीवपूजयामासुः, श्रुततदवदातेन पुराधीशेन तच्चरणयोर्निपत्य विनयपूर्वकं पृष्टं, स्वामिन् यूयं यत्त्रिदंमंतरिक्षे स्थापयथ तत्तपःशक्तिः किंवा विद्याशक्तिः ? तदा त्रिदंमिनोक्तं राजन् विद्यासामर्थ्यमिदं, तदा पुनरपि राज्ञोक्तं कथयत कुतः सकाशादधीतेयमंतश्चमत्कारकारिणी विद्या ? तदा लज्जमानेन तेन नापितनाम न दत्तं, कल्पितवार्त्तां च कथयतिस्म. राजन् पुरा मया हिमवत्पर्वते तपःकष्टाद्यनुष्ठानेन सरस्वती समाराधिता, तया प्रत्यक्षीभूयेयमंबरावलंबिनी विद्या दत्ता. ततो विद्यादाता गुरुर्मे सरस्वतीति यावत्स कथयति, तावदाकाशतः षट्षट्शब्दं कुर्वाणस्त्रिदंमो भूमौ पतितः, पश्चाल्लज्जितोऽसौ लोकैरुपहासपूर्वकं धिक्कृतोऽतीवदुःखभाग्बभूवेति संप्रदायः, यथा त्रिदंडिना गुरोरपलपनेन दुःखं प्राप्तं, तथाऽन्येऽपि ये गुरोरपलपनं करिष्यंति तेऽपि दुःखभाजो भविष्यंतीति त्रिदंमिकसंबंधः पंचषष्टितमः ॥ ६५ ॥

॥ मूलम् ॥—सयलंमिवि जीयलोए । तेण इहं घोसिउ अमारिउ ॥ इक्कंपि जो उह-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्त्तं । सत्तं बोहेइ जिणवयणे ॥ ६६ ॥ व्याख्या—' सयलंमिइति ' सर्वस्मिन्नपि जीवलोके चतुर्दशरज्जुप्रमाणे इत्यर्थः, ' तेण इति ' तेन प्रकारेण ' इहं इति ' अत्रस्थितेन घोषितो वादितः ' अमारिन्ह इति ' अमारीपटहः ' इक्कंपि इति ' एकमपि यः पुमान् दुःखार्त्तं दुःखपीडितं संसारदुःखान्निभृतमेतादृशं ' सत्तं इति ' सत्त्वं प्राणिनं बोधयति प्रतिबोधयति ' जिणवयणे इति ' जिनवचनैः कृत्वा ॥ ६७ ॥

॥ मूलम् ॥—सम्मत्तदायगाणं । दुप्पडियारं भवेसु बहुएसु ॥ सव्वगुणमेलियाहिवि । तवयारसहस्सकोडीहिं ॥ ६९ ॥ व्याख्या—' सम्मत्त इति ' सम्यक्त्वदायकानां सम्यक्त्वप्रापकाणामेतादृशानां गुरूणां ' दुप्पडियारं इति ' दुःप्रतीकारं, प्रतीकारः कर्त्तुमशक्य इत्यर्थः, केषु ? बहुषु भवेषु, न त्वेकस्मिन्नेव भवे इत्यर्थः, सर्वैरपि गुणैर्द्विगुणत्रिगुणत्वात्तैर्मीलितान्निरेतादृशीन्निरप्युपकाराणां सहस्राणि, तेषां कोटयस्तान्निः, गुरुणा सम्यक्त्वार्पणेन यदुपकृतं, तस्यानंतं गुणितान्निरप्युपकारकोटीन्निः प्रत्युपकारः कर्त्तुमशक्य इत्यर्थः, एतेन सम्यक्त्वदातुर्गुरोर्महती भक्तिर्विधेयेति भावः ॥ ६९ ॥ अथ सम्यक्त्वफलमाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—सम्मत्तंमिउ लद्धे । ठइयाइं नरयतिरियदाराइं ॥ दिव्वाणि माणुसाणि य । सुक्खसुहाइं सहीणाइं ॥ ७० ॥ व्याख्या—' सम्मत्तं इति ' सम्यक्त्वे च लब्धे प्राप्ते सति ' ठइयाइं इति ' स्थगितानि मुद्रितानि नरकतिर्यग्गतिद्वाराणि, नरकतिर्यग्गतीनां बहुत्वाद् द्वाराणीत्यत्र बहुवचनं. सम्यक्त्वलाभेन मनुजानां दिव्यानि देवसंबंधीनि, च पुनर्मनुष्यसंबंधीनि, अथ च मोक्षसुखानि ' सहीणाइं इति ' स्वाधीनानि भवंति ॥ ७० ॥ पुनः सम्यक्त्वफलमेव प्रकारांतरेण दर्शयति—

॥ मूलम् ॥—कुसमयसुइणमहणं । सम्मत्तं जस्स सुट्ठियं हियए ॥ तस्स जगुज्जोयकरं । नाणं चरणं च भवमहणं ॥ ७१ ॥ व्याख्या—' कुसमय इति ' कुसमयाः कुदर्शनसिद्धांतास्तेषां श्रुतयः श्रवणानि, तासां मर्दनं निर्नाशनं, एतादृशं सम्यक्त्वं यस्य पुरुषस्य हृदये सुस्थितं सुस्थिरं वर्त्तते, तस्य पुरुषस्य जगद्द्योतकरं जगत्प्रकाशकं ज्ञानं केवलज्ञानरूपं, च पुनश्चरणं यथाख्यातचारित्रं सर्वविरतिरूपं भवमथनं संसारनाशनं भवति. सम्यक्त्वाऽभावे ज्ञानाऽभावस्तदभावे च मोक्षाऽभाव इत्यर्थः ॥ ७१ ॥ ॥४५१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥मूलम्॥—सुपरिठ्ठियसम्मत्तो । नाणेणालोइयत्तसब्भावो ॥ निव्वणचरणाउत्तो । इंदियमत्तं पसाहेइ ॥ ७२ ॥ व्याख्या—' सुपरिठ्ठिय इति ' दृढसम्यक्त्वगुणवानेतादृशः, अत एव ज्ञानेनालोकितो विज्ञातोऽर्थानां जीवादिपदार्थानां सद्भावः स्वरूपं येनैतादृशः, पुनः कीदृशः? निर्व्रणचरणायुक्तो निर्व्रणं व्रणरहितमतीचाररहितं निर्दोषमितियावत्, एतादृशं यच्चरणं चारित्रं तत्र युक्तश्चारित्रोपयोगवानित्यर्थः, एतादृशः पुमानीप्सितं मनोऽभीष्टं मोक्षसुखरूपमर्थं प्रसाधयति ॥ ७२ ॥ अथ प्रमादाचरणेन सम्यक्त्वकालुष्यं दृष्टांतेन दर्शयति—

॥ मूलम् ॥—जह मूलताणए पंडुरंमि डुव्वन्नरागवन्नेहिं ॥ बीअत्ता पडसोहा । इय सम्मत्तं पमाएहिं ॥ ७३ ॥ व्याख्या—' जह इति ' यथेति दृष्टांतोपन्यासे, पांडुरे धवले मूलतानके तंतुसंतानके ' डुवन्नरागवन्नेहिं इति ' दुष्टकृष्णरक्तादिवर्णैः, वर्णविकृत्या बीअत्सा कुत्सिता पटशोभा वस्त्रशोभा भवति. ' इअइति ' इत्थमनेन दृष्टांतेन सम्यक्त्वमपि प्रमादैर्बीभत्सं कुत्सितं मलिनं भवतीति गाथार्थः, अतः सम्यक्त्ववैरिणः प्रमादा स्त्याज्या इत्यर्थः ॥ ७३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—नरएसु सुरवरेसु य । पावं पुण्णं समायरं जीवो ॥ बंधइ पलियस्सायु । कोऊिसहस्साणि दिवसेणं ॥ ७४ ॥ व्याख्या—' नरएसु इति ' पापकर्म समाचरन् ' नरएसु ' नरकगतिषु, अथ च पुण्यकर्म समाचरन् सुरवरेषु देवगतिषु, यः पुमान् शतवर्षायुष्क एकं सागरोपमं बध्नाति, तस्य प्रतिदिनं कियंति पल्योपमानां सहस्राणि आगतानि? तदेव कथयति. स पुमान् पल्योपमानां दुःखसुखसंबंधिनां कोटिसहस्राणि बध्नाति, एतावतीं पुण्योपार्जनामेकदिवसमध्ये करोतीत्यर्थः, अतः प्रमादाचरणं विहाय प्रतिदिनं पुण्योपार्जने एव यत्नो विधेय इत्यर्थः ॥ ७४ ॥

॥ मूलम् ॥—पलिनवमसंखेज्जं । नागं जो बंधइ सुरगणेसु ॥ दिवसे दिवसे बंधइ । स वासकोडी असंखिज्जा ॥ ७५ ॥ व्याख्या—' पलिनवम इति ' यः पुमान् पुण्याचरणेन नरनवस्थितो देवगणेषु देवतादिवृंदेषु पल्योपमस्य संख्येयो नागस्तत्परिमितं स्वल्पमप्यायुर्बध्नाति, तस्य प्रतिदिनं कियंत्यो वर्षकोट्यः समागताः? तदेवोत्तरार्द्धेन दर्शयति. दिवसे दिवसे शतवर्षायुष्को देवजातिषु पल्योपमसंख्येयनागपरिमितायुर्बंधको नरोऽसंख्याता वर्षकोटी- ॥४५३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बध्नाति प्रतिदिनं, यदि पल्यसंख्येयो भागो विभज्य शतवर्षाणां दीयते, तदा प्रतिदिनमसंख्याता वर्षकोट्यः समागच्छंतीत्यर्थः ॥ ७५ ॥

॥ मूलम् ॥—एस कम्मो नरएसु । बुहेण नाऊण नाम एयंपि ॥ धम्मंमि कहप्पमाय । निमेसमित्तंपि कायव्वो ॥ ७६ ॥ व्याख्या—' एस कम्मो इति ' एष क्रमो नरकेष्वपि, पापकर्म कुर्वन् प्रतिदिनं असंख्याता वर्षकोटीर्नरकायुषो बध्नातीत्यर्थः, बुधेन पंडितेन ' नामेति ' प्रसिद्धौ, एतदपि ' नाऊण इति ' ज्ञात्वा, एतत्पूर्वोक्तं पुण्यपापसमर्जनस्वरूपं विज्ञाय ' धम्मंमि इति ' धर्मविषये क्षांत्यादिदशविधे ' कह इति ' कथं प्रमादः शैथिल्यं ' निमेसमित्तं इति ' निमेषमात्रमपि स्तोककालमपि ' कायव्वो इति ' करणीयः, सर्वथा प्रमादो न करणीय एवेत्यर्थः ॥ ७६ ॥

॥ मूलम् ॥—दिव्वालंकारविभूसणाइं । रयणुज्जलाणि य घराइं ॥ रूवं भोगसमुदउ । सुरलोगसमो कउ इहयं ॥ ७७ ॥ व्याख्या—' दिव्वा इति ' दिव्याः प्रधाना अलंकारसिंहासनछत्रादयः, विभूषणानि मुकुटादीनि, तेषां द्वंद्वः, रत्नैरुज्ज्वलानि विशदानि ' घराइं इति '

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गृहाणि ' रूवं इति ' रूपं शरीरसौन्दर्यं, न्दोगसमुदायो न्दोगसंयोगः, सुरलोकसदृशः कुतो न्दवति ? ' इहयंति ' इह मनुष्यलोके, अपितु सर्वथा न न्दवति ॥ ७७ ॥

॥ मूलम् ॥—देवाण देवलोए । जं सुक्खं तं नरो सुन्दणिन्दवि ॥ न न्दणइ वाससएण-वि । जस्सवि जीहासयं हुज्जा ॥ ७८ ॥ व्याख्या—' देवाण इति ' देवानां देवलोके यत्सौख्यं वर्त्तते, तत्सौख्यं नरो मनुष्यः सुन्दणितोऽप्यतिवाचालोऽपि न न्दणति वर्षशतेनापि. वर्षशतं यावद्यदि तदेव सुखं स वर्णयति, तथापि स तत्पारं न प्राप्नोतीत्यर्थः, यस्य पुरुषस्य जिह्वाशतमपि न्दवेत्, सोऽपि शतवर्षैर्देवसुखवर्णनं कर्त्तुं न शक्नोति, किमुतान्य इत्यर्थः !!

॥ मूलम् ॥—नरएसु जाइं कक्कडाइं । दुक्काइं परमतिक्काइं ॥ को वन्नेही ताइं । जीवंतो वासकोडीवि ॥७९॥ व्याख्या—' नरएसु इति ' नरकेषु यान्यतिकर्कशानि दुस्सहानि दुःखानि क्षुत्तृड्पारवश्यादीनि वर्त्तते. कीदृशानि ? परमतीक्ष्णानि विपाकवेदनतः, तानि दुःखानि कः पुमान् ' वन्नेहीति ' वर्णयितुं शक्नोति ? अपितु न कोऽपि, कीदृशः पुमान् ? जीवन्, कियता कालेन न वर्णयितुं शक्नोति ? ' वासकोडीवि इति ' वर्षकोट्यापि, कोटिसंख्यै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्षैरपीत्यर्थः ॥ ७९ ॥

मूलम् ॥—कक्कडदाहं सामलि। असिवणवेयरणिपहरणसएहिं॥ जा जायणा उ पावंति । नारया तं अहम्मफलं ॥ ८० ॥ व्याख्या—' कक्कडदाहमिति ' कर्कशो यो दाहोऽग्निर्मध्ये पाचनरूपः, अनुस्वारः प्राकृतत्वात्. शामलिशब्देन शाल्मलिवृक्षपत्रैरंगच्छेदनं, असिवणशब्देन खड्गसदृशानि यस्य पत्राणि संति, एतादृशे वने भ्रमणं, वेयरणिशब्देन वैतरणीनाम्नी नदी, तत्र तप्ततप्रपुसदृशं यज्जलं तस्य पानं, प्रहरणानां कुठारादीनां शतानि, तैरंगच्छेदनं, एतेषां वृंदैः, तैः कृत्वा यातनाः पीडाः कदर्थना इति यावन्नारकाः प्राप्नुवंति, तत्सर्वमप्यधर्मस्य धर्मविरुद्धस्य पापस्य फलं बोधव्यं ॥ ८० ॥ अथ तिर्यग्गतिदुःखमाह—

॥ मूलम् ॥—तिरिया कसंकुसारा । निवायवहबंधणमारणसयाइं ॥ नवि इहयं पावंता । परत्र जइ नियमिया हुंता ॥ ८१ ॥ व्याख्या—' तिरिया इति ' तिर्यंचस्ते के? अश्वगजवृषभादयः, कशाशब्देन रश्मिः, अंकुशः शृणिः, आरशब्देन प्राजनं, ' निवाय इति ' भूमौ पातं, वधो यष्ट्यादिना कुट्टनं, बंधनं रज्जुशृंखलादिना, मारणं जीवितान्ययरोपणं, एतेषां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दंदः, तेषां शतानि. ' इहयं इति ' इह लोके ' न पावंता इति ' नाऽप्राप्स्यन्, ' परत्र इति ' परत्र परभवे यदि ' नियमिया इति ' नियमवंतो ' हुंता इति ' अभविष्यन् ॥ ८१ ॥ मनुष्यगतिदुःखान्याह—।

॥ मूलम् ॥—आजीवसंकिलेसो । सुरकं तुछं नवद्दवा हुया ॥ नीयजणसिट्ठणावि य । अणिट्ठवासो अ माणुस्से ॥ ८२ ॥ व्याख्या—' आ जीव इति ' यावज्जीवं संक्लेशो मानसी चिंता, सौख्यं वैषयिकं तुछमसारं स्वल्पकालिनं, उपद्रवा अग्निचौरादिजनिता बहवः प्रचुराः, नीचजना अधमलोकास्तेषां ' सिट्ठाणावि य इति ' आक्रोशादिदुर्वचनसहनं ' अणिट्ठ इति ' अनिष्टे स्थानके पारवश्येन वासोऽवस्थानं, एतानि ' माणुस्से इति ' मनुष्यभवे दुःखकारणानि ॥ ८२ ॥ पुनरपि दुःखहेतूनाह—

॥ मूलम् ॥—चारगरोहवहबंध–रोगधनहरणमरणवसणाइं ॥ माणसंतावो अजसो । विग्गोवणया य माणुस्से ॥ ८३ ॥ व्याख्या—' चारग इति ' चारके रोधः केनाप्यपराधेन रुंधनं, वधो यष्ट्यादिना ताडनं, बंधनं रज्जुशृंखलादिना, रोगा वातपित्तकफोद्भवाः, धनहरणं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ड्व्यापहारः, मरणं प्राणव्यपरोपणं, व्यसनं कष्टं, एतेषां पदानां द्वंद्वः, यत्रैतानि दुःखकारणानि तत्र किं सौख्यमित्यर्थः, मनःसंतापश्चित्तोद्वेगः, अयशोऽपकीर्त्तिः, ' विग्गोवणया इति ' अन्यान्यपि बहूनि विगोपनानि ' माणुस्से इति ' मनुष्यभवे ॥ ८३ ॥

॥ मूलम् ॥—चिंतासंतावेहिं य । दारिद्दरुआहिं दुप्पउत्ताहिं ॥ लद्धूणवि माणुस्सं । मरंति केई सुनिव्विन्ना ॥ ८४ ॥ व्याख्या—' चिंता इति ' चिंता कुटुंबभरणादिका, संतापाश्चौरादिसमुद्भवाः, तैः, दारिद्र्यं निर्धनत्वं, रुजो रोगा राजयक्ष्मादयस्ताभिः, कीदृशाभिः ? ' दुप्पउत्ताहिं इति ' दुष्टैः पूर्वभवनिर्मितैः कर्मभिः प्रयुक्ताभिः, एतैर्दुःखहेतुभिर्लब्ध्वापि मानुष्यं भवं ' मरंति इति ' म्रियंते केचित्प्राणिनः सुनिर्विण्णाः, सु अतिशयेन निर्विण्णाः खेदवंतः ॥ ८४ ॥ देवानामपि न सौख्यमित्याह—

॥ मूलम् ॥—देवावि देवलोए । दिव्वाभरणाणुरंजियसरीरा ॥ जं परिवडंति तत्तो । तं दुक्खं दारुणं तेसिं ॥ ८५ ॥ व्याख्या—' देवावि इति ' देवा अपि ' देवलोए इति देवलोके दिव्यैः प्रधानैराभरणैरनुरंजितान्यलंकृतानि शरीराणि येषां ते, एतादृशा देवास्ततो देवलो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कात्प्रतिपतंति, अशुचिगर्भावासे समागच्छंति, तत्तेषां देवानां दारुणमतीवदुस्सहं दुःखं, ततो देवलोकेऽपि न सौख्यमित्यर्थः ॥ ८५ ॥

॥ मूलम् ॥—तं सुरविमाणविन्नवं । चिंतिय चवणं च देवलोगाउ ॥ अइबलियं चिय जं नवि । फुट्टइ सयसक्करं हिययं ॥ ८६ ॥ व्याख्या—' तं सुर इति ' तं प्रसिद्धमत्यद्भुतकारणं सुरविमानविन्नवं देवविमानैश्वर्यं चिंतयित्वा मनसा विचार्य, च पुनस्ततो देवलोकाच्च्यवनं ' चिंतयित्वेति पदं ' घंटालालान्यायेनोन्नयत्रापि योज्यं. क्व विमानन्नवो विन्नवः? क्व चाऽस्माकं नीचस्थानावतारः? एवं चिंतयतामपि देवानां यत् हृदयं ' सयसक्करं इति ' शतखंडं यथा स्यात्तथा न स्फुटति ततोऽतिबलवदेवाऽतिकठिनमेव तेषां हृदयं, न तु सुकोमलमित्यर्थः ॥ ८६ ॥ पुनरपि देवगतिदुःखमाह—

॥ मूलम् ॥—ईसाविसायमयकोह–माणमायालोन्नेहिं एवमाईहिं ॥ देवावि समन्निन्नूया । तेसिं कत्तो सुहं नाम ॥ ८७ ॥ व्याख्या—' ईसा इति ' ईर्ष्या परस्परं मत्सरः, विषादो देवकृतपराभवः, मदोऽहंकारः, क्रोधोऽप्रीतिरूपः, मानं परगुणाऽसहनं, मायाऽनार्ज- ॥४५९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वं, लोभो गार्द्ध्यं, एतेषां पदानां द्वंद्वः, तैरेवमादिकैश्चित्तविकारैर्देवा अपि सुरा अपि समन्निनूताः परानूना वर्त्तंते. अतः कारणात्तेषां देवानां कुतः सुखमिति. अपितु नैवेत्यर्थः ॥ ८७ ॥

॥ मूलम् ॥—धम्मंपि नाम नाऊण । कीस पुरिसा सहंति पुरिसाणं ॥ सामित्ते साहीणे । को नाम करिज्ज दासत्तं ॥ ८८ ॥ व्याख्या—' धम्मंपि इति ' नामेति प्रसिद्धौ, दुःखनिवारकत्वेन शिवसुखकारकत्वेन च प्रसिद्धमपि धर्मं ' नाऊण इति ' ज्ञात्वा ' कीस इति ' किमर्थं सहंते क्षमंते पुरुषाः समानावयवधारिणः पुरुषाणामाज्ञां निर्देशादिकं, को नाम मूर्खः स्वाधीने आत्मायत्ते स्वामित्वे सति परस्य दासत्वं कुर्यात्? परनिर्देशवज्जिनाज्ञानिर्देशे वर्त्तमानः स्वामित्वं लभते इत्यर्थः ॥ ८८ ॥

॥ मूलम् ॥—संसारचारए चार-एव आपीलियस्स बंधेहिं ॥ उव्विग्गो जस्स मणो । सो किर आसन्नसिद्धिपहो ॥ ८९ ॥ व्याख्या—' संसार इति ' संसारश्चतुर्गतिरूपस्तत्र चरणं चारः परिभ्रमणं, तस्मिन् संसारचारे, कीदृशे? चारके इव कारागारतुल्ये, बंधैः कर्मरूपैर्बंधनैरापीडितस्य निगडितस्य, एतादृशस्य यस्य पुरुषस्य मनश्चित्तं ' उव्विग्गो इति ' उ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्विग्नं जातं संसारसंचारकात्, पुंस्त्वं प्राकृतत्वात्. स पुमान् ' किर इति ' निश्चयेन आसन्नः समीपवर्त्ती सिद्धिपथो मोक्षमार्गो यस्य, एतादृशो बोध्यः, परित्तसंसारिण एवैतल्लक्षणं ॥७९॥

॥ मूलम् ॥—आसन्नकालभवसिद्धि-यस्स जीवस्स लक्खणं इणमो ॥ विसयसुहेसु न रज्जइ । सव्वत्थामेसु उज्जमइ ॥ ८० ॥ व्याख्या—' आसन्न इति ' आसन्नकाला स्वल्पकाल-भाविनी भवात्सिद्धिर्मुक्तिर्यस्य, तस्य शीघ्रं मुक्तिगामिन इत्यर्थः, एतादृशस्य जीवस्य ' इ-णमो इति ' इदं लक्षणं विज्ञेयं, तल्लक्षणेन शीघ्रमुक्तिगामित्वं लक्ष्यते इत्यर्थः, किं तल्लक्ष-णमित्याह—विषयाः शब्दादयः पंचेंद्रियजनितास्तेषां सुखेषु न रज्यति न रक्तो भवति ' स-व्व इति ' सर्वत्र तपःसंयमाद्यनुष्ठाने ' थामेसु इति ' स्थाम्ना बलेन ' उज्जमइ इति ' उद्यमं करोति, प्राकृतत्वात्तृतीयार्थे सप्तमी ॥ ८० ॥

॥ मूलम् ॥—हुज्ज व न व देहबलं । धिइमइसत्तेण जइ न उज्जमसि ॥ अक्खिहिसि चिरकालं । बलं च कालं च सोअंतो ॥ ८१ ॥ व्याख्या—' हुज्ज व इति ' हुज्ज व न व इ-ति भवति वा न वा, देहबलं शरीरसामर्थ्यं, स्वीयशरीरसामर्थ्यमित्यर्थः, धृतिर्मनसो धैर्यं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मतिः स्वकीया बुद्धिः, सत्त्वं साहसं, एतैः कृत्वा हे शिष्य यदि न उज्झसि, अधुनोद्यमं न करिष्यसि, तदा चिरंकालं बहुकालं यावत् ' अच्छिहिसि स्थास्यसि संसारमध्ये बलं शोचन्, शरीरसामर्थ्यं नास्तीति चिंतयन्, च पुनः कालं शोचन्, अद्य कालो नास्ति, एवं विचारयन् धर्ममकुर्वाणश्चिरकालं शोचिष्यसीत्यर्थः ॥ ९१ ॥

॥ मूलम् ॥—लद्धिन्द्रियं च बोहिं । अकरिंताणागयं च पत्थिंतो ॥ अन्नदा तं बोहिं । लप्पसि कयरेण मूलेणं ॥ ९२ ॥ व्याख्या—' लद्धिन्द्रियं इति ' अस्मिन् भवे लब्धां बोधिं जैनधर्मप्राप्तिमकुर्वन्, अनागतामागामिभवसंबंधिनीं च धर्मप्राप्तिं प्रार्थयन् वांछन् हे मूर्ख, एतादृशस्त्वं ' अन्यस्मिन् भवे बोधिं धर्मावाप्तिं ' कयरेण इति ' केन मूल्येन प्राप्स्यसि ? यद्यस्मिन् भवे धर्मं नाऽऽराधयसि तर्हि आगामिनि भवे कथं प्राप्स्यसीति ॥ ९२ ॥ पुनरपि धर्मोद्यमरहितानामुपदेशमाह—

॥ मूलम् ॥—संघयणकालबलदूस–मारुयालंबणाइं घित्तूणं ॥ सव्वं चिय नियमधुरं । निरुज्जमाउ पमुच्चंति ॥ ९३ ॥ व्याख्या—' संघयण इति ' संघयणशब्देन संहननं, अद्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तादृक् सत्त्वं संहननं नास्ति, कालोऽप्यद्य तादृग् नास्ति, बलमपि तादृशं नास्ति, दुःखमा पंचमारको वर्त्तते, ' रुया इति ' रोगरहितत्वं नास्ति. कथं धर्मः कर्तुं शक्यः? एतान्यालंबनान्युत्तरवचनानि ' घित्तूणं इति ' गृहीत्वा ' चिय इति ' निश्चयेन सर्वो नियमस्य चारित्रक्रियातपःप्रमुखस्य धुरं नारोहनरूपां निरुद्यमा आलस्यवंतः संतः 'पमुच्चंति इति ' मुंचंते.

॥ मूलं ॥—कालस्स य परिहाणी । संजमजोगाइं नत्थि खित्ताइं ॥ जयणाए वट्टियव्वं । न हु जयणा भंजए अंगं ॥ ९४ ॥ व्याख्या—' कालस्स य इति ' च पुनः कालस्य परिहानिः दिवसंदिवसंप्रति हीयमानता वर्त्तते. संयमनिर्वाहयोग्यानि क्षेत्राण्यप्यधुना न संति. तर्हि किं विधेयं? यतनया वर्त्तितव्यं. यतनापूर्वकं प्रवर्त्तनीयमित्यर्थः, ' हु इति ' निश्चयेन यतनायां क्रियमाणायामंगं चारित्ररूपं ' न भंजए इति ' न विनाशं प्राप्नोति. अतो यतनापूर्वकं यथाशक्त्या चारित्रोद्यमो विधेय इत्यर्थः ॥ ९४ ॥

॥ मूलम् ॥—समिईकसायगारव-इंदियमएबंभचेरगुत्तीसु ॥ सज्झायविणयतवसत्ति-ए अ जयणा सुविहियाणं ॥ ९५ ॥ व्याख्या—' समिइ इति ' समितय ईर्याद्याः पंच, ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सां पालनं, कषायाः क्रोधादयस्तेषां निग्रहः, गारवशब्देन ऋद्धिरससातगारवत्रयं तेषां निवारणं ' इंदिय इति ' इंद्रियाणां वशीकरणं, मदा जातिमदादयोऽष्टौ, तेषां निवारणं, नव ब्रह्मचर्यगुप्तयस्तासां पालनं, एतेषां पदानां द्वंद्वे सप्तमीबहुवचनं, स्वाध्यायो वाचनादिः पंचविधः, विनयो दशविधः, तपो बाह्याभ्यंतरभेदेन द्वादशविधं, एतेषां करणं, च पुनः ' सत्तिउ इति ' शक्तेरगोपनं, इत्यादिका यतना सुसाधुना विधेया, शोभनं विहितमाचरणं येषां ते सुविहितास्तेषां ॥ ९५ ॥ यतनामेवाग्रेतनगाथया कथयति.

॥ मूलम् ॥——जुगमित्तंतरदिट्ठा । पयं पयं चक्खुणा विसोहंतो ॥ अव्वाखित्तावत्तो । इरियासमिउ मुणी होइ ॥ ९६ ॥ व्याख्या—' जुग इति ' युगमात्रं चतुर्हस्तप्रमाणं यत्क्षेत्रं तस्यांतरे मध्ये दृष्टिर्यस्य एतादृशः ' पयं पयं इति ' पदे पदे इत्यर्थः, चक्षुषा नेत्रेण भूमिं ' विसोहंतो इति ' सम्यगवलोकमानः, अव्याक्षिप्तो व्याक्षेपरहितः, शब्दादिविषयेऽदत्तमनोयोगादित्यर्थः, अत एवाऽयुक्तो धर्मध्यानयुक्तः, अनयोः पदयोः कर्मधारयः, एतादृशो मुनिस्त्रिकालवेत्ता, ईरणं ईर्या गमनं, तत्र समितः सम्यगुपयुक्तो भवतीतीर्यासमितिपाल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कः कथ्यते—॥ ९६ ॥

॥ मूलम् ॥—कज्जे भासइ भासं । अणवज्जमकारणे न भासइ य ॥ विग्गहविसुत्तिय परि-वज्जिउ य जइ भासणासमिउ ॥ ९७ ॥ व्याख्या—' कज्जे इति ' कार्ये ज्ञानादिकार्ये समुत्पन्ने सति भाषां वचनं भाषते. कीदृशीं भाषां? अनवद्यां निर्दोषां, अकारणे कारणंविना नैव भाषते; विग्रहशब्देन विकथाचतुष्टयं, ' विसुत्तिय इति ' विरुद्धवचनजल्पनाचिंतनं, ताभ्यां परिवर्जितो रहितः, एतादृशो यतिः साधुः ' भासणासमिउ इति ' भाषणे जल्पने समितः सावधानः कथ्यते इत्यर्थः ॥ ९७ ॥

॥ मूलम् ॥—बायालमेसणाउ । भोयणादोसे य पंच सोहेइ ॥ सो एसणाइ समिउ । आजीवी अन्नहा होइ ॥ ९८ ॥ व्याख्या—' बायाल इति ' द्विचत्वारिंशद्विधान्, एषणाशब्देनाहारदोषान्, च पुनः पंचसंख्यकान् संयोजनादिकान् भोजनदोषान् यः शोधयति, स साधुः ' एसणाइ इति ' एषणायामाहारविषये समितः कथ्यते, अन्यथाऽशुद्धदोषदुष्टाहारग्रहणेन ' आजीवि इति ' आजीविकाकारी भवति, वेषमात्रधारणेनाजीविकाकृत्कथ्यते इत्यर्थः. ॥ ४६५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—पुव्विं चक्खू परिक्किय । पमज्जिउ जो ववेइ गिह्णइ वा ॥ आयाणभंड-निक्खे—वणाइ समिउ मुणी होइ ॥ ९९९ ॥ व्याख्या—' पुव्विं इति पूर्वं ग्रहणात्प्रथमं चक्षुषा नेत्रेण परीक्ष्य सम्यगवलोक्य, पश्चाच्च रजोहरणादिना प्रमार्ज्य यः साधुरनया रीत्या किमपि वस्तु स्थापयति भूमौ, वाऽथवा गृह्णाति भूमितः, आदानं भूमितो वस्तूनां ग्रहणं भांडस्योपकरणस्य ' निक्खेवण इति ' भूमौ स्थापना, तस्यां समितः सावधानो भवति, यतनापूर्वकं गृह्णन् मुंचन् वा आदाननिक्षेपणासमितः कथ्यते इत्यर्थः ॥ ९९९ ॥

॥ मूलम् ॥—उच्चारपासवणखेल–जल्लसिंघाणएप्पमाणविही ॥ सुविवेएइ पएसे । निसिरंतो होइ तस्स मिउ ॥ ३०० ॥ व्याख्या—' उच्चार इति ' उच्चारशब्देन वृहन्नीतिः, प्रश्रवणशब्देन लघुनीतिः, खेलशब्देन मुखमलः, जल्लशब्देन शरीरमलः, सिंघाणशब्देन नासिकामलः, एतेषां द्वंद्वः, तान्, अन्योऽपि परिष्ठापनयोग्याऽशुद्धभक्तपानविधिस्तं, ' सुविवेएइ ' शब्देन त्रसस्थावरजंतुरहिते सम्यक्शोधिते ' पएसे इति ' भूमिप्रदेशे ' निसिरंतो इति ' परिष्ठापयन् तत्समितो भवति, स पारिष्ठापनिकासमितः कथ्यते इत्यर्थः ॥ ३०० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—कोहो माणो माया । लोभो हासो रई य अरई य ॥ सोगो भयं दुगंछा । पच्चक्कली इमे सव्वे ॥ १ ॥ व्याख्या—' कोहो इति ' क्रोधोऽप्रीतिरूपः, मानो गुणाऽसहनरूपः, माया स्नेहरूपा, लोभो गार्द्ध्यं, हासो हसनं, रतिश्च पुनररतिः, शोकः शोचनं, भयं, जुगुप्सा, प्रत्यक्षं साक्षादिमे सर्वेऽपि ' कली इति ' क्लेशरूपा ज्ञातव्याः ॥ १ ॥ प्रथमं क्रोधभेदानाह—

॥ मूलम् ॥—कोहो कलहो खारो । अवरुप्परमच्छरो अणुसय अ ॥ चंडत्तणमणुवसमो । तामसभावो असंतावो ॥ २ ॥ व्याख्या—' कोहो इति ' क्रोधोऽप्रीतिमात्रं, कलहो वचनराटिः, ' खारो इति ' परोपरि दुष्टाशयः, परस्परं मत्सरोऽन्योन्यं मत्सरधारणं, तदपि क्रोधभेदः, क्रोधात्पश्चात्तापः समुत्पद्यते, अतः क्रोधस्याप्यनुशय इति नाम, चंडत्वं वक्रभृकुटित्वं, अनुपशमः शाम्याऽभावः, तामसभावः, च पुनः संतापः, एते सर्वेऽपि क्रोधस्य पर्याया इत्यर्थः ॥ २ ॥

॥ मूलम् ॥—निल्लोमणनिप्पिवणं । निराणुवत्तित्तणं असंवासो ॥ कयनासो अ असम्मं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बंधइ घणचिक्कणं कम्मं ॥ ३ ॥ व्याख्या—' निब्बोडण इति ' निब्बोडणशब्देन क्रोधादात्मनो मलिनीभवनं, निर्भर्त्सनं नाम क्रोधात्परस्परतर्जनं ' निराणुवत्तिणं ' क्रोधात्परछंदाऽननुवर्त्तित्वं, तदपि क्रोधस्य पर्यायः कथ्यते. संवसनं परिवारमध्ये वसनं संवासः, तदभावोऽसंवासः, क्रोधादेकाकी विचरति, अतः क्रोधस्यापि ' असंवास ' इति नाम, कृतस्योपकारस्य नाशनं, कृतनाशकोऽपि क्रोधपर्यायः, अशाम्यं शमताऽभावः, एतेषु क्रोधपर्यायेषु वर्त्तमानो जीवो घनं निबिडं, चिक्कणमतिकटुकरसयुक्तं निकाचितं कर्म बध्नाति. अतः क्रोधस्त्याज्य एवेत्यर्थः ॥ ३ ॥ अथ मानपर्यायानाह—

॥ मूलम् ॥—माणो मयहंकारो । परपरिवाउ अ अत्तउक्करिसो ॥ परपरिभवोवि य तहा ॥ परस्स निंदा असूआ य ॥ ४ ॥ व्याख्या—' माणो इति ' मानोऽभिमान इति सामान्यनाम, मदो जात्याद्युत्कर्षः, अहंकरणमहंकारो हुंकार इत्यर्थः, परेषां परिवादोऽवर्णवादः परपरिवादो माननाम कथ्यते. ' अ इति ' च पुनरात्मोत्कर्ष आत्मन उत्कर्षः स्वकीयोच्चत्वदर्शनं, मानपर्यायः, अपि चेति समुच्चये, ' तहा इति ' तथा परपरिभवः परेषां पराभवकर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णं, सोऽपि मानहेतुत्वान्मान उच्यते. परस्य निंदनं निंदाकरणमपि मान उच्यते. असूया गुणेषु दोषाविष्करणं मानपर्यायः ॥ ४ ॥

॥ मूलम् ॥—हीला निरोवयारित्तणं । निरवणामया अविणउ अ ॥ परगुणपच्छायणया । जीवं पाडंति संसारे ॥ ५ ॥ व्याख्या—' हीला इति ' हीलनाशब्देन हीलनं परेषां जात्याद्युद्घाटनं मानपर्यायः, निरुपकारित्वमुपकाररहितत्वं मानः कथ्यते, निरवनामता स्तब्धत्वमनम्रत्वमिति यावत्. अविनयो गुर्वादेरभ्युत्थानासनप्रदानादेरकरणं, सोऽपि मानपर्यायः, परेषां गुणा ज्ञानादयस्तेषां प्रच्छादनताऽऽच्छादनं मानपर्यायः, एते सर्वेऽपि मानपर्यायाः सेव्यमानाः संतो जीवं प्राणिनं संसारे चतुर्गतिरूपे पातयंति, अतः शत्रुकार्यकारित्वान्मानस्त्याज्य एवेत्यर्थः ॥ ५ ॥ मायापर्यायानाह—

॥ मूलम् ॥—मायाकुडंगिपच्छन्न–पावया कूडकवडवंचणया ॥ सव्वत्थअसप्पावो । परनिक्केवावहारो अ ॥ ६ ॥ व्याख्या—' माया इति ' माया इति सामान्यनाम, ' कुडंगित्ति ' महागहनं मायापर्यायः, प्रच्छन्नं पापकर्मणः करणं माया कथ्यते. कूडशब्देन वक्र मा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यापर्यायः, कपटमपि कथ्यते, वंचनता मायया परस्परं वंचनं, सर्वेषामर्थानामसद्भावोऽसत्प्ररूपणं, अन्यद्भवति कथयति चाऽन्यत्. परनिक्षेपस्य परकीयन्यासस्याऽपहरणमपलपनं परनिक्षेपापहारः स्थापनिकामोष इत्यर्थः, सोऽपि मायाभेद एव. ॥ ६ ॥

॥ मूलम् ॥—बलबोमसंवइयरो । गूढायारत्तणं मई कुटिला ॥ वीसंभघायणंपि य । भवकोडिसएसुवि नमंति ॥ ७ ॥ व्याख्या—' बलबोम इति ' मायया परं बलयतीत्यतश्चलमिति नाम. बोमशब्देन ब्रह्मनाम कथ्यते. संव्यतिकरो मायया ग्रथिलत्वं करोति स्वकीयकार्यसाधनार्थं, सोऽपि मायाभेदः, गूढाचारित्वं, कुटिला वक्रा मतिरपि मायाभेदः, च पुनर्विश्रंभघातनमपि विश्वासघातकरणमपि माया कथ्यते. एते मायापर्याया भवकोटीनां शतानि भवकोटिशतानि तेष्वपि नमंति दुःखदायिनो भवंति, न तु मायाजनितानि कर्माण्यभुक्तानि क्षयं यांतीत्यर्थः ॥ ७ ॥ अथ लोभभेदानाह—

॥ मूलम् ॥—लोभो अइसंचयसीलया य । किलट्ठत्तणं अइममत्तं ॥ कप्पब्भमपरिभोगो । नट्ठविणट्ठे य आगल्लं ॥ ८ ॥ व्याख्या—' लोभो इति ' प्रथमं लोभ इति सामान्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाम, लोभेनाऽनेकवस्तूनामेकवस्तुनो वाऽतिसंचयोऽतिसंग्रहस्तत्करणशीलत्वं लोभभेदः कथ्यते. क्लिष्टत्वं लोभेन मनसः कलुषीकरणत्वं, वस्तूपर्यतिममत्वं ममकारः, कल्प्यं नोक्तुं योग्यं यदन्नादि वस्तु तस्याऽपरिभोगः, कृपणतया कुत्सितान्नादिभोगो लोभभेदः, नष्टेऽश्वादिके वस्तुनि, विनष्टे धान्यादिके, आगच्छं रोगादिभवनं, तन्नष्टविनष्टाकल्पं नाम लोभभेदः कथ्यते.

॥ मूलम् ॥—मुच्छा अइबहुधणलोभ—या य तब्भावभावणा य सया ॥ बोलंति महाघोरे । जरमरणमहासमुद्दंमि ॥ ९ ॥ व्याख्या—' मुच्छा इति ' मूर्च्छा मौढ्यं अर्थेषु तीव्रराग इति यावत्. अत्यर्थं बहुषु धनेषु लोभस्तद्भावस्तत्रातिबहुधनलोभता लोभभेदः, तद्भावेन लोभभावेन मनसो भावश्चिंतनं तद्भावभावना लोभभेदः, ' सया इति ' सदा, एते सर्वेऽपि सामान्यविशेषा लोभभेदाः संसारिणं महाघोरेऽतिभयंकरे, जरामरणान्येव प्रवाहरूपत्वान्महासमुद्रस्तस्मिन् बोलंति निमज्जयंति, अतो दारुणत्वात्त्याज्य एव लोभः ॥ ९ ॥

॥ मूलम् ॥—एएसु जो न वट्टिज्जा । तेण अप्पा जहट्ठिउ नाउ ॥ मणुआण माणणिज्जो । देवाणवि देवयं हुज्जा ॥ १० ॥ व्याख्या—' एएसु इति ' एतेषु क्रोधादिषु कषायेषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यो ज्ञाततत्वो न वर्त्तेत, कषायान्न कुर्यादित्यर्थः, तेन पुरुषेण स्वकीय आत्मा यथास्थितः सत्यः कर्मभिः शुद्धस्वरूपो ज्ञातः, स कीदृशो भवति? मनुजानां मानवानां माननीयो भवेत्, देवानामपि इंद्रादीनामपि दैवतं भवेत्, इंद्रादीनामपि पूज्यो भवतीत्यर्थः, देवतैव दैवतं, स्वार्थेऽण ॥ १० ॥ अथ कषायाणां सर्पादिभिरौपम्यमाह—

॥ मूलम् ॥—जो भासुरं भुयंगं । पयंडदाढाविसं विघट्टेइ ॥ तत्तो चिय तस्संतो । रोसभुयंगोवमाणमिणं ॥ ११ ॥ व्याख्या—' जो भासुरं इति ' यः पुमान् भासुरं रौद्रं भुजंगं सर्पं, कीदृशं? प्रचंडं दंष्ट्रायां विषं यस्यैतादृशं प्रचंडदंष्ट्राविषं सर्पं यो विघट्टयति यष्ट्यादिना स्पृशति, ' तत्तो इति ' ततः सर्पात् ' चिय इति ' निश्चयेन तस्य पुरुषस्यांतो मरणं भवति, स इति रोषस्य क्रोधस्य भुजंगोपमानं बोध्यं, रोषभुजंगोऽपि स्पृष्टः सन् संयमजीवितं नाशयतीत्यर्थः ॥ ११ ॥

॥ मूलम् ॥—जो आगलेइ मत्तं । कयंतकालोवमं वणगइंदं ॥ सो तेणं चिय छुज्जइ । माणगइंदेण इत्थुवमा ॥ १२ ॥ व्याख्या—' जो इति ' योऽज्ञानी पुमान् मत्तं मदोन्मत्तं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृतांतकालो मरणकालस्तेनोपमा यस्य तद्वदतिभयंकरस्तमेतादृशं वनगजेंइं वनहस्तिनं ' आगलेइ इति ' प्रकोपयति स मूर्खः पुमान् ' तेणं इति ' तेन वनगजेन, अनुस्वारः प्राकृतत्वात्, ' चिय इति ' निश्चयेन ' छुज्जइ इति ' चूर्णीक्रियते, एवं मानस्य गजेंइणात्रोपमा ज्ञेया. मानगजोऽपि शमालानादिभंजनादिकं महांतमनर्थं करोतीत्यर्थः ॥ १२ ॥

॥ मूलम् ॥—विसवल्लीमहागहणं । जो पविसइ साणुवायफरिसविसं ॥ सो अचिरेण विणस्सइ । माया विसवल्लिगहणसमा ॥ १३ ॥ व्याख्या—' विसवल्ली इति ' विषवल्लीनां महद्गहनमतिसंकीर्णं वनं यः पुमान् प्रविशति तत्र प्रवेशं करोति. कीदृशं वनं ? ' साणुवायत्ति ' अनुकूलो यो वायुस्तत्र स्पर्शादेव विषं तेन सह वर्त्तमानं सानुवायुस्पर्शविषं, यस्मिन् वने वायुस्पर्शादेव विषं लगतीत्यर्थः, एतादृशं विषवल्लिगहनं यः प्रविशति सोऽचिरेण स्तोककालेन ' विणस्सइत्ति ' विनाशं प्राप्नोति. एवं मायापि विषवल्लिगहनसमा ज्ञेया ॥१३॥

॥ मूलम् ॥—घोरे भयागरे सा—गरंमि तिमिमगरगाहपूरंमि ॥ सो पविसइ जो पविसइ । लोभमहासागरे भीमे ॥ १४ ॥ व्याख्या—' घोरे इति ' घोरे रौद्रे ' भयागरे इ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति ' भयस्थानके एतादृशे ' सागरंमि ' समुद्रे तिमयो मत्स्याः, मकरा गाहाश्च जीवविशेषाः, तेषां पूरो यस्मिन्नेतादृशे, बीभत्सजलजंतुपूर्णे इत्यर्थः, एतादृशे समुद्रे स पुमान् प्रविशति. कः ? यः प्रविशति भीमे भयंकरे लोभमहासागरे, यथा समुद्रे प्रविष्टोऽनर्थं प्राप्नोति, तथा लोभसमुद्रे पतितः पुमानपि महांतमनर्थं प्राप्नोतीति भावः ॥ १४ ॥

॥ मूलम् ॥—गुणदोसबहुविसेसं । पयं पयं जाणिऊण नीसेसं ॥ दोसेसु जणो न विरज्ज–इत्ति कम्माण अहिगारो ॥ १५ ॥ व्याख्या—' गुणदोस इति ' गुणा ज्ञानादयो मोक्षहेतवः, दोषाः क्रोधादयः संसारहेतवः, तेषां बहुर्विशेषो महान् विशेषो महदंतरमिति यावत्. तं ' पयं पयं इति ' पदे पदे श्रीसर्वज्ञसिद्धांतं ' जाणिऊण इति ' ज्ञात्वा ' नीसेसं इति ' संपूर्णतया, दोषेषु क्रोधादिकेषु जनो लोको यन्न ' विरज्जइत्ति ' न विरक्तो भवति, अयं कर्मणामधिकारो दोषः, एतावता जानानोऽपि कर्मवशतो दोषांस्त्यक्तुं न शक्नोतीत्यर्थः ।

॥ मूलम् ॥—अट्टट्टहासकेली–किलत्तणं हासखिड्डुजमगरुइ ॥ कंदप्प भवहसणं । परस्स न करंति अणगारा ॥ १६ ॥ व्याख्या—' अट्टट्ट इति ' अट्टट्टहासो महान् हासः, के-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लीकिलत्तणं नाम परस्य क्रीडायामसंबद्धवचनभाषणं तत्केलीकिलहासः कथ्यते. हासखिड्डु इति ' हास्येन परांगस्य पुनः पुनः स्पर्शनं, लोकभाषया ' खसखुंटीयानुं करवुं ' ' जमगरु इति ' समकालं हस्ततालप्रदानं, ' कंदप्पत्ति ' कौतुककरणं, उपहसनं सामान्येन हासः, अनगारा न विद्यतेऽगारं गृहं येषां तेऽनगाराः साधवः, एतान् हास्यप्रकारान् परस्य ' न करंति इति ' न कुर्वंति. ॥ १६ ॥ अथ रतिद्वारमाह—

॥ मूलम् ॥—साहूण अप्परुइ । सरीरपलोअणा तवे अरइ ॥ सुन्निअवन्नो अइपह–रिसं च नत्थि सुसाहूणं ॥ १७ ॥ व्याख्या—' साहूण इति ' साधूनां ' अप्परुइत्ति ' आत्मरुचिः, मा मां शीतातपादयः पराभवंत्विति. ' सरीरपलोअणा इति ' स्वशरीरस्य स्वदेहस्याऽऽदर्शादिष्ववलोकनं, तपस्यरतः, शरीरं दुर्बलं भविष्यतीति बुद्ध्या ' सुन्निअवन्नो इति ' अहं भव्योऽस्मीति स्वात्मप्रशंसनं. अतिमहति लाभे जाते सति हर्षधारणं, एते रतिप्रकाराः ' नत्थित्ति ' न संति सुसाधूनां, साधुभिरेते न सेव्या इत्यर्थः ॥ १७ ॥ अरतिद्वारमाह—

॥ मूलम् ॥—भवेवन अ अरणा–मन अ अरमंतिया य अरइ य ॥ कलमलो अ अ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णेगगा-याय कत्तो सुविहियाणं ॥ १८ ॥ व्याख्या—' उव्वेवउ इति ' उद्वेगो धर्मसमाधेश्चलनं, ' अरणामउ ' अन्निविषयेषु मनसो गमनं, ' अरमंतियायत्ति ' धर्मविषये मनसोऽरमणं विमुखत्वमित्यर्थः, च पुनररतिर्गाढं चित्तोद्वेगः, कलमलशब्देन विषयेषु मनसो व्याकुलत्वं, अनेकाग्रता असंबद्धं मनश्चिंतनं, अहममुकं पश्यामि, अमुकस्य च परिवास्यामीति चिंतनं, एते मनःसंकल्पा अरतिप्रकाराः, ' कत्तो इति ' कुतः सुविहितानां साधूनां भवंति ? अपितु न भवंतीत्यर्थः ॥ १८ ॥ अथ शोकद्वारमाह—

॥ मूलम् ॥—सोगं संतावं अधिइं च । मत्तुं च वेमणस्सं च ॥ कारुन्नरुन्नभावं । न साहू धम्मंमि इच्छंति ॥ १९ ॥ व्याख्या—' सोगं इति ' शोकं स्वसंबंधिनि मृते शोकधारणं, संतापं गाढमुच्चाटधारणं, अधृतिं हा कथमहमेतादृशं ग्राममुपाश्रयं वा मोक्ष्यामीति चिंतनं, च पुनर्मन्युर्मिंद्रियरोधमिंद्रियविकलत्वं वा, ' वेमणस्सं इति ' वैमनस्यं शोकेनात्मघातचिंतनं, कारुन्नशब्देन ईषद्रोदनं, रुन्नभावं महता शब्देन रुदनं, साधुधर्मे स्थिताः साधव एतेषां शोकभेदानां मध्ये एकमपि भेदं भेदंतीत्यर्थः ॥ १९ ॥ अथ भयद्वारमाह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—भयसंखोहविसाय । मग्गविन्नेय विन्नीसियाय अ ॥ परमग्गदंसणा-

णि य । दढधम्माणं कय हुंति ॥ २० ॥ व्याख्या—' भय इति ' भयं कातरत्वेनाऽकस्मा-
भीतिः, संक्षोभश्चौरादिकं दृष्ट्वा पलायनं, विषादो दीनता, मार्गविभ्रेदो मार्गे सिंहादिकं दृष्ट्वा
त्रासः, इदं पदद्वयं जिनकल्पमार्गानुसारिणां बोध्यं. परेषामन्येषां कुतीर्थिकानां ये मार्गास्ते-
षां दर्शनानि प्ररूपणानि, भयतो वा स्वार्थतो वा, अथवा परेषां पांथानां मार्गा अध्वानस्ते-
षां दर्शनानि, एते सर्वेऽपि भयप्रकाराः, ' दढधम्माणं इति ' दृढो धर्मो येषां ते दृढधर्माणः,
एतादृशा ये साधवस्तेषां कुतो भयं भवति ? ॥ २० ॥ अथ जुगुप्साद्वारमाह—

॥ मूलम् ॥—कुच्छा चिलाणमलसं—कमेसु सवेवय अणिट्ठेसु ॥ चक्खुनियत्तमसु—भे-
सु नत्थि दवेसु दंताणं ॥ २१ ॥ व्याख्या—' कुच्छा इति ' कुत्साशब्देन जुगुप्सा न विधेयेति
संबंधः, केषु ? चिलाणशब्देनाऽपवित्रो मलस्तेन ' संकडेसु इति ' मृतेषु मृतकलेवरेषु ' सवे-
वय अ इति ' सद्वेगधरणं, केषु ? अनिष्टेषु मलिनदेहवस्त्रादिषु सद्वेगो न करणीय इत्यर्थः, पु-
नरशुभेषु कीटभक्षितेषु कुर्कुरादिषु क्वेषु दृष्टिमागतेषु चक्षुषो नियंत्रणं पश्चाद्वालनं, एते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जुगुप्साप्रकारा दांतानां न संति. ॥ २१ ॥

॥ मूलम् ॥—एयंपि नाम नाऊण । मुम्रियवंति नूण जीवस्स ॥ फेडेऊण न तीरइ । अइबलिउ कम्मसंघाउ ॥ २२ ॥ व्याख्या—' एयंपि इति ' एतदपि पूर्वोक्तं कषायादिनिग्रहकरणं, नामेति प्रसिद्धौ जिनन्नाषितं ज्ञात्वापि नूनं निश्चितं जीवस्य प्राणिनः ' मुम्रियवंति ' मूढतया नवनं किं योग्यं ? अपितु न योग्यमित्यर्थः, कथं तर्हि मूढो नवतीत्याह—स्फेटयितुं न तीर्यते, जीवेन कषायो दूरीकर्तुं न शक्यते. तत्र कारणमाह—यतः ' कम्मसंघाउत्ति ' अष्टकर्मसमुदायोऽतिबलवान् वर्त्तते, येन परवशोऽयं जीवोऽकार्यसन्मुखः क्रियते इत्यर्थः ॥ २२ ॥

॥ मूलम् ॥—जह जह बहुस्सुउ सम्मउ अ । सीसगणसंपरिवुमो य ॥ अविणिच्चिउ अ समए । तह तह सिद्धंतपमिणीउ ॥ २३ ॥ व्याख्या—' जह जह इति ' यथा यथा बहुश्रुतो जातः, बहु श्रुतमाकर्णितं येन सः, अथवा बहुश्रुताध्ययनकारी, च पुनः सम्मत्तो बहूनामज्ञानिलोकानामिष्टः, पुनः शिष्यगणेन बहुपरिवारेण परिवृतः, एतादृशोऽपि यदि ' समए इति ' जिनमार्गे जिनसिद्धांतेऽविनिश्चितोऽज्ञातरहस्यो नवति, अलब्धानुनवो नवति '

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तह तह इति ' तथा तथा सिद्धांतस्य प्रत्यनीको ज्ञातव्यः, ज्ञाततत्वः स्वल्पश्रुतोऽपि मोक्ष-मार्गाराधक इति नावः ॥ २३ ॥ अथ ऋद्धिगारवमाह—

॥ मूलम् ॥—पवराइं वत्थपायासणो–वगरणाइं एस विन्नवो मे ॥ अवि य महाजण-नेया । अहंति अह इड्ढिगारविउ ॥ २४ ॥ व्याख्या—' पवराइं इति ' प्रवराणि प्रधानानि वस्त्राणि पात्राणि आसनान्युपकरणानि, एतेषां द्वंद्वः, इत्येवमादिरेषोऽयं मे मम विन्नवः संपत्तिर्वर्त्तते, अपिचेति पुनरर्थे समुच्चये वा, महाजनानां प्रधानलोकानां नेता नायकोऽस्मि, अहमेतादृशोऽस्मीति चिंतनेन ऋद्धिगारववान् कथ्यते. ' अह इति ' अथवा अप्राप्तामपि ऋद्धिं यो वांछति सोऽपि ऋद्धिगारववान् ॥ २४ ॥ अथ रसगारवमाह—

॥ मूलम् ॥—अरसं विरसं लूहं जहो–ववन्नं च निन्हिए भुत्तूं ॥ निद्धाणि पेसलाणि य । मग्गइ रसगारवे गिद्धो ॥ २५ ॥ व्याख्या—' अरसं इति ' अरसं रसेन रहितं, विरसं जीर्णौदनादि, लूहं वल्लादिकं यथापन्नं भिक्षायां भ्रमता यादृशं लब्धमेतादृशं भक्तं पानं च भोक्तुं न वांछति, स्निग्धानि स्नेहयुक्तानि बहुघृतसहितानि पेशलानि पुष्टिकारीणि, एतादृशा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नि भक्तपानानि रसो जिह्वारसस्तस्य गारवे ' गिद्धो इति ' गृद्धो लोलुपः सन् ' मग्गइत्ति ' वांछति, न तु यथाप्राप्तानीत्युक्तो रसगारवः ॥ २५ ॥

॥ मूलम् ॥—सुस्सूसइ सरीरं । सयणासणवाहणापसंगपरो ॥ सायागारवगुरुओ । दुक्खस्स न देइ अप्पाणं ॥ २६ ॥ व्याख्या—' सुस्सूसइत्ति ' शुश्रूषते स्नानादिना शरीरं, स्वशरीरशोभां करोतीत्यर्थः, शयनं सुकुमालशय्या, आसनं पादपीठादि, तेषां ' वाहणा इति ' कारणं विना सेवनं, तत्र प्रसंग आसक्तिः, तस्यां परस्तत्परः, एतादृशः सातागारवेण गुरुको, गुरुरेव गुरुकः, दुःखस्यात्मानं न ददाति, आत्मनो दुःखं न ददातीत्यर्थः ॥ २६ ॥ अथेंद्रियद्वारमाह—

॥ मूलम् ॥—तवकुल गायाभंसो । पंडिच्चफंसणा अणिट्ठपहो ॥ वसणाणि रणमुहाणि य । इंदियवसगा अणुहवंति ॥ २७ ॥ व्याख्या—' तवकुल इति ' तपो द्वादशविधं, कुलं पितृपक्षः, गाया स्वशरीरशोभा, एतेषां भ्रंशो नाशो भवति, पांडित्यस्य चातुर्यस्य ' फंसणा इति ' मलिनता, अनिष्टपथो महान् संसारमार्गस्तं वक्ष्यतीत्यर्थः, ' वसणाणि इति '

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनेकान्यापन्मरणादिकानि कष्टानि, च पुनः रणमुखानि संग्राममुखे पतनानि, इंद्रियवशवर्त्तिनः पुरुषा एतान्पदार्थाननुभवंति ॥ २७ ॥

॥ मूलम् ॥—सद्देसु न रज्जिज्जा । रूवं दट्ठुं पुणो न इक्खिज्जा ॥ गंधे रसे अ फासे । अमुच्छिन उज्जमिज्ज मुणी ॥ २८ ॥ व्याख्या—' सद्देसु इति ' शब्देषु वीणास्त्रीगीतादिकेषु न रज्येन्न रक्तो भवेत्, रूपं स्त्र्यादीनां शरीरावयवसौंदर्यं दृष्ट्वा पुनः पुना रागबुद्ध्या नेक्षेत न विलोकयेत्. गंधे कर्पूरादिसुगंधद्रव्ये, रसे समीचीने शर्कराप्रमुखाणामास्वादे, स्पर्शे सुकोमलशय्यादीनां, एतेष्वमूर्छितः सन् मुनिः साधुः ' उज्जमिज्जत्ति ' धर्मविषये उद्यमं कुर्यात्.

॥ मूलम् ॥—निहयाणि हयाणि य । इंदियाणि घाएहणं पयत्तेणं ॥ अहियट्ठे निहयाइं । हियकज्जे पूयणिज्जाइं ॥ २९ ॥ व्याख्या—' निहयाणि इति ' साधूनामिंद्रियाणि निहतानि वर्त्तंते, रागद्वेषकरणाऽभावेन, अथ चेंद्रियाणि अहतान्यपि वर्त्तंते, आकारदर्शनेन स्वविषयग्रहणेन च, किंचिद् हतानि किंचिदहतानि, एतादृशानींद्रियाणि, णमिति वाक्यालंकारे, घातयत वशीकुरुत प्रयत्नेन. अहितेऽर्थे स्वकीयविषये रागद्वेषकरणरूपे ' निहयाइं इति ' हं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तुं योग्यानि. हितकार्ये सिद्धांतश्रवणादिके च पूजनीयानि, पूजितुं रक्षितुं योग्यानीत्यर्थः ॥ ॥ २९ ॥ अथ मदद्वारमाह—

॥ मूलम् ॥—जाइकुलरूवबलसुअ । तवलाभेस्सरियअट्ठमयमत्तो ॥ एयाइं चिय बंधइ । असुहाइं बहुं च संसारे ॥ ३० ॥ व्याख्या—' जाइ इति ' जातिर्ब्राह्मणादिका, कुलं स्वकीयो वंशः, रूपं शरीरसौन्दाग्यं, बलं शरीरसामर्थ्यं, श्रुतं शास्त्रज्ञानं, तपः षष्ठाष्टमादि, लाभो ऽन्यादिप्राप्तिः, ऐश्वर्यं प्रभुत्वं, एतेषां अष्टानां पदानां यो मदोऽहंकारस्तेन मत्तो गर्वकारकः पुमान् एतानि जात्यादीनि ' चिय इति ' निश्चयेन बध्नाति, अशुभानि ' बहुं इति ' बहुशो वारान् संसारे वर्त्तमानो जीवः, यस्य वस्तुनो गर्वं करोति तद्वस्तु आगामिनि भवे हीनतरं प्राप्नोतीत्यर्थः ॥ ३० ॥

॥ मूलम् ॥—जाइइ उत्तमाए । कुले पहाणंमि रूवमिस्सरियं ॥ बलविज्जाइतवेण य । लाभमएणं वाजेखिंसे ॥ ३१ ॥ व्याख्या—' जाइ इति ' उत्तमया जात्या, मदीया जातिरुत्तमा, त्वदीया जातिर्हीनेत्यादिप्रकारेण यः परं खिंसतीति संबंधः, प्रधानकुले स्थितः सन्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यः परकीयं कुलं निंदति, यो रूपं खिंसति, अनेन प्रकारेण ऐश्वर्यं यः खिंसति, बलेन सामर्थ्येन विद्यया ज्ञानेन तपसाथवा लाभमदेन लाभाहंकारेण यः परं खिंसेन्निंदति, तस्य किं भवतीत्याह— ॥ ३१ ॥

॥ मूलम् ॥—संसारमणवयग्गं । नीयट्ठाणाइं पावमाणो य ॥ भमइ अणंतं कालं । तह्मा उ मए विवज्जिज्जा ॥ ३२ ॥ व्याख्या—' संसार इति ' संसारे चतुर्गतिभ्रमणरूपे, ' अणवदग्ग इति ' अनंते, सप्तम्यर्थे द्वितीया, नीचस्थानानि हीनजात्यादिकानि प्राप्नुवन् भ्रमन्नो भ्रमति अनंतकालं यावत्, अनंतसंसारवर्द्धनं करोतीत्यर्थः, तस्मात् प्राज्ञः पुमान् मदान् विवर्जयेदित्यर्थः ॥ ३२ ॥

॥ मूलम् ॥—सुट्ठुवि जइ जयंतो । जाइमयाईसु मुज्झइ जोउ ॥ सो मेअज्जरिसी जहा । हरिएसबलुव्व परिहाइ ॥ ३३ ॥ व्याख्या—' सुट्ठुवि इति ' गाढमपि यतिः साधुर्यतन् यतनां कुर्वाणोऽपि यो जातिमदादिषु मुह्यति गर्वं करोति, ' जोउ इति ' यः कोऽपीत्यर्थः, स पुमान् यथा मेतार्यऋषिस्तथा जात्यादिहीनतां प्राप्नोतीत्यर्थः, हरिकेशिबलनामा साधुस्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृत् ' परिहाइत्ति ' जात्यादिभ्रिः परिहीनो भवति, अनयोः संबंधस्तु पूर्वमुक्तः ॥ ३३ ॥

॥ मूलम् ॥—इत्थिय सुसंकिलिट्ठं । वसहिं इत्थिकहं च वज्जंतो ॥ इत्थिजणसंनिसिज्जं । निरूवणं अंगुवंगाणं ॥ ३४ ॥ गतं मदद्वारं, अथ ब्रह्मचर्यगुप्तिद्वारमाह—व्याख्या—' इत्थि इति ' स्त्री मानुषी दैवी वा पशवस्तिर्यंचस्तैः संक्लिष्टं सहितमित्यर्थः, एतादृशीं वसतिं उपाश्रयं, च पुनः स्त्रीकथां वेषरूपादिकां वर्जयन्, इदं ब्रह्मचर्यगुप्तिद्वयं, स्त्रीजनस्योत्थितानंतरं यावत् संनिषद्या तदासनं तत्रावस्थानं वर्जयेदिति तृतीयं गुप्तिस्थानं, स्त्र्यादीनां अंगोपांगानि चक्षुर्मुखहृदयादीनि तेषां निरूपणं रागबुद्ध्या अवलोकनं वर्जयेदिति चतुर्थः ॥ ३४ ॥

॥मूलम्॥-पुव्वरयाणुस्सरणं । इत्थिजणविरहरूवविलवं च ॥ अइ बहुअं अइ बहुसो । विवज्जंतो अ आहारं ॥ ३५ ॥ व्याख्या—' पुव्वरया इति ' पूर्वं शीलधारणात् गार्हस्थ्ये यद्दतं कामक्रीडा तस्यानुस्मरणं न विधेयमिति पंचमं, स्त्रीजनानां विरहरूपो यो विलापशब्देन विलापवचनं तदाकर्णनमपि रागहेतुत्वात् त्याज्यमिति षष्ठं गुप्तिस्थानं, ' अइबहुअं इति ' आकंठं यावत् पूर्णं, अतिस्निग्धमधुरत्वादिना बहुप्रकारं वा, आहारमेतादृशं सरसं विवर्जय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न आहारनिष्टं ब्रह्मगुप्तिद्वयं ॥ ३५ ॥

॥ मूलम् ॥—वज्जंतो अ विन्नूसं । जइज्ज इह बंभचेरगुत्तीसु ॥ साहू तिगुत्तिगुत्तो । निहुअ दंतो पसंतो य ॥ ३६ ॥ व्याख्या—' वज्जंतो इति ' च पुनः विन्नूषां शरीरशोभां विवर्जयन्, इदं नवमं, यतेत यत्नं कुर्यात्, ' इह इति ' एतासु ब्रह्मचर्यगुप्तिषु रक्षणार्थं यत्नं कुर्यादित्यर्थः, कः ? साधुः, कीदृशः ? तिसृभिर्गुप्तिभिर्निर्वृत्तिरूपाभिर्गुप्तो निरुद्धमनोवाक्काययोग इत्यर्थः, पुनः कीदृशो ? निभृतः शांतत्वेन निर्व्यापारः, पुनः कीदृशो ? दांतो दमनपरः, पुनः प्रशांतो जितकषायबलः ॥ ३६ ॥

॥ मूलम् ॥—गुप्पोरुवयणकक्खो-रुअंतरे तह थणंतरे दट्ठुं ॥ संहरइ तओ दिट्ठिं । न य बंधइ दिट्ठिए दिट्ठिं ॥ ३७ ॥ व्याख्या—' गुप्पोरु इति ' गुह्यं स्त्रीचिन्हं उरुशब्देन जंघायुगलं, वदनं मुखं कक्षा बाह्वोर्मूलं, उरसूशब्देन हृदयं, तेषां अंतराणि, तथा ' थणंतरे इति ' स्तनयोरंतरे ' दट्ठुं इति ' दृष्ट्वा, ततस्तस्मात् स्थानकात् दृष्टिं संहरति, न बंधयति न मेलयति ' दिट्ठिएत्ति ' स्त्रीदृष्ट्या सार्द्धं स्वकीयां दृष्टिं, कार्ये समापतिते न्यग्वदनः स्त्रियमालापये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दित्यर्थः, उक्तं ब्रह्मचर्यद्वारं षष्ठं ॥ ३७ ॥

॥ मूलम् ॥—सज्झाएण पसत्थं । झाणं जाणइ य सव्व परमट्ठं ॥ सज्झाए वट्टंतो । खणे खणे जाइ वेरग्गं ॥ ३८ ॥ व्याख्या—अथ सप्तमं स्वाध्यायद्वारमाह ' सज्झाएत्ति ' स्वाध्यायेन वाचनादिपंचप्रकारेण प्रशस्तं भव्यं ध्यानं धर्मध्यानादि समायाति, अथ च जानाति सर्वं परमार्थं वस्तुस्वरूपं, स्वाध्याये वर्त्तमानस्य साधोः क्षणे क्षणे वैराग्यं जायते, रागद्वेषविषोत्तरणान्निर्विघ्नो भवतीत्यर्थः ॥ ३८ ॥

॥ मूलम् ॥—उड्ढमहतिरियलोए । जोइसवेमाणियाय सिद्धीय ॥ सव्वो लोगालोगो । सज्झायविउस्स पच्चक्खो ॥ ३९ ॥ व्याख्या—' उड्ढ इति ' ऊर्द्धं इति ऊर्ध्वलोकस्वरूपं ' अह इति ' अधोलोकस्वरूपं ' तिरियलोएत्ति ' तिर्यग्लोकः, ज्योतिष्काः चंद्रसूर्यादयः, वैमानिका विमानवासिनः, सिद्धिशब्देन मोक्षस्वरूपं, सर्वोऽयं लोकश्चतुर्दशरज्जुप्रमाणो, अलोको लोकान्निर्गतोऽपरिमितः, स्वाध्यायविदः सिद्धांतज्ञातुर्मुनेः प्रत्यक्षः साक्षात् वर्त्तते, स्वाध्यायेन सर्वमपि लोकालोकस्वरूपं जानातीत्यर्थः ॥ ३९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जो निच्चकालतवसं–जमुज्जुत्तं न करेइ सज्झायं ॥ अलसं सुहसीलजणं । नवि तं ठावेइ साहुपए ॥ ४० ॥ व्याख्या—' जो निच्च इति ' यः साधुर्नित्यकालं निरंतरं तपसि अथ च संयमे पंचाश्रवरोधरूपे उद्युक्तो भवत्युद्यमवान् भवति. ' सज्झायं इति ' स्वाध्यायं अध्ययनाऽध्यापनादिरूपं न करोति, स्वाध्याये उद्यमं न करोति, तदा तमलसमालस्ययुक्तं ' सुहसीलजणं इति ' सुखलंपटं मुनिं साधुपदे साधुमार्गे जना नैव स्थापयंति. ज्ञानक्रियाभ्यां मोक्ष इत्यर्थः ॥ ४० ॥ उक्तं स्वाध्यायद्वारं सप्तमं, अथाष्टमं विनयद्वारमाह—

॥ मूलं ॥—विणउ सासणे मूलं । विणीउ संजमे भवे ॥ विणयाउ विप्पमुक्कस्स । कउ धम्मो कउ तवो ॥ ४१ ॥ व्याख्या—' विणउ इति ' विनयः शासने द्वादशांगरूपे जिनभाषिते मूलं धर्ममूलं वर्त्तते. विनयवान् संयतः साधुर्भवति, विनयाद्विप्रमुक्तस्य रहितस्य भ्रष्टस्येति यावत्, कुतो धर्मः? कुतस्तपः? विनयमंतरा धर्मोऽपि न, तपोऽपि नेत्यर्थः ॥४१॥

॥ मूलम् ॥—विणउ आवहइ सिरिं । लहइ विणीउ जसं च कित्तिं च ॥ न कयाइ दुविणीउ । सकज्जसिद्धिं समाणेइ ॥ ४२ ॥ व्याख्या—' विणउ इति ' विनयः श्रियं बाह्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्यंतररूपां लक्ष्मीं प्रापयति, अथ च विनीतः पुमान् लभते. किं? यशः सर्वदिग्व्यापि, अथ च कीर्त्तिमेकदिक्प्रसारिणीं, न कदाचिदपि दुर्विनीतः पुमान् स्वकीयस्य सिद्धिं निष्पत्तिं समानयति प्रापयति, अविनीतस्य कार्यसिद्धिर्न भवतीत्यर्थः ॥ ४२ ॥ उक्तं विनयद्वारमथ तपोद्वारमाह—

॥ मूलम् ॥—जह जह खमइ सरीरं । धुवजोगा जहजहा न हायंति ॥ कम्मक्खओ अ विउलो । विवित्तया इंदिअदमो अ ॥ ४३ ॥ व्याख्या—' जह जह इति ' यथा यथा क्षमते शरीरं न्यूनबलं न भवति. ध्रुवयोगा नित्ययोगाः प्रतिलेखनाप्रतिक्रमणादिका यथा यथा ' न हायंतित्ति ' न हीना भवंति, कर्त्तुं शक्यंते इति भावः, एवं तपः कुर्वतां विपुलो विस्तीर्णः कर्मक्षयः स्यात्. ' विवित्तया इति ' विविक्ततया, अयं जीवो देहाद्भिन्नो, देहश्च जीवाद्भिन्न इति भावनया इंद्रियाणां दमोऽपि भवति ॥ ४३ ॥

॥ मूलम् ॥—जइ ता असक्कणिज्जं । न तरसि काऊण तो इमं कीस ॥ अप्पायत्तं न कुणसि । संजमजयणं जइजोगं ॥ ४४ ॥ व्याख्या—यदि तावत् हे शिष्य! ' असक्कणिज्जं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ' अशक्यमेतत् भिक्षुप्रतिमातपःप्रभृति न तरसीति न शक्नोषि कर्तुं, एतत्कर्तुं यदि न समर्थोऽसीत्यर्थः, ' तो इति ' तर्हि हे जीव इमां प्रसिद्धां ' कीस इति ' कथमात्मायत्तां स्वाधीनां संयमयतनां, पश्चादुक्तक्रोधादिजयं कथं न करोषि? कथंभूतां संयमयतनां? ' जइजोगं इति ' यतियोग्यां साधूनां योग्यां ॥ ४४ ॥ उक्तं तपोद्वारं.

॥ मूलम् ॥—जायंमि देहसंदेह–यंमि जयणाए किंचि सेविज्जा ॥ अह पुण सज्जो अ निरु–ज्जमो अ तो संजमो कत्तो ॥ ४५ ॥ व्याख्या—' जायंमि इति ' देहसंदेहे शरीरसंदेहे जाते सति महति रोगादिकष्टे समुत्पन्ने सतीत्यर्थः, यतनयाऽऽज्ञापूर्वकं किंचित्सावद्यमपि अशुद्धमिति यावत् सेवेत गृह्णीयात्. अथ यदि पश्चात्पुनः सज्जो निरोगी जातः, परं निरुद्यमी शुद्धाहारग्रहणं न करोति, अशुद्धं गृह्णाति, ' तोइति ' तदा तस्य संयमः कुतः? आज्ञाविरुद्धाचरणादित्यर्थः ॥ ४५ ॥

॥ मूलम् ॥—मा कुणउ जइ तिगिच्छं । अहियासेऊण जइ तरइ सम्मं ॥ अहियासंतस्स पुणो । जइ से जोगो न हायंति ॥ ४६ ॥ व्याख्या—' मा कुणउ इति ' मा करोतु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यतिः साधुश्चिकित्सां रोगप्रतिक्रियां, ' अहियासेऊण इति ' अध्यासितुं यदि तं रोगमिति समर्थो भवति, सम्यक्प्रकारेण यदि तं रोगमध्यासितुं कर्तुं समर्थो भवति, तदा तत्प्रतिक्रिया न कार्येत्यर्थः, पुनरध्यासतस्तितिक्षतः ' सेइति ' तस्य साधोर्यदि नित्ययोगा प्रतिलेखनादिकाः प्रहीना न भवंति तदौषधं न करोति, यदि च संयमयोगाः सीदंति तदा भैषजं करोतीत्यर्थः

॥ मूलम् ॥—निच्चं पवयणसोहा–कराण चरणजुआण साहूणं ॥ संविग्गविहारीणं । सव्वपयत्तेण कायव्वं ॥ ४७ ॥ व्याख्या—' निच्चं इति ' नित्यं प्रवचनस्य जिनशासनस्य शोभायाः कराः कारकास्तेषां, चरणे चारित्रे उद्यतानामुद्यमवतामेतादृशानां साधूनां. कीदृशानां ? संवेगो मोक्षाभिलाषस्तेन विहरंतीत्येवंशीलाः संवेगविहारिणः, एतादृशानां साधूनां सर्वेण प्रयत्नेन शरीरशक्त्या वैयावृत्त्यं कार्यमित्यर्थः ॥ ४७ ॥

॥ मूलम् ॥—हीणस्स विसुद्धपरूवगस्स । नाणाहियस्स कायव्वं ॥ जणचित्तगाहणट्ठं । करिंति लिंगावसेसेवि ॥ ४८ ॥ व्याख्या—' हीणस्स इति ' हीनस्य चारित्रेण न्यूनस्यापि शिथिलाचारस्यापीत्यर्थः, एतादृशस्यापि शुद्धप्ररूपकस्य शुद्धभाषकस्य ज्ञानेन सिद्धांतज्ञाने- ॥ ४९० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नाधिकस्य संपूर्णस्य वैयावृत्यं ' कायव्वं इति ' कार्यं, क्रियाहीनस्यापि ज्ञानिनो वैयावृत्यमुचितमित्यर्थः. कुतः ? जनानां लोकानां चित्तानि, तेषां ग्रहणार्थं रंजनार्थं, एते धन्या गुणवंतोऽप्युपकारबुद्ध्या निर्गुणस्यापि वैयावृत्यं कुर्वंतीति लोकचित्तप्रसत्त्यर्थं, ' लिंगावसेसेवित्ति ' लिंगमात्रधारकेऽपि वैयावृत्यं कुर्वंति. लोकापवादनिवारणार्थं क्रियाहीनस्यापि वेषधारिणो वैयावृत्यं विधेयमित्यर्थः ॥ ४८ ॥ ' समिइकसायवारकेत्यादि ' गाथादशकस्यार्थो निरूपितः, अधुना लिंगधारिस्वरूपमाह—

॥ मूलम् ॥—दगपाणं पुप्फफलं । अणेसणिज्जं गिहत्थकिच्चाइं ॥ अजया पडिसेवंती । जइवेसविडंबगा नवरं ॥ ४९ ॥ व्याख्या—' दगपाणं इति ' दगपाणं शब्देन सचित्तजलपानं, पुष्पं जात्यादीनां, फलमाम्रादीनां, ' अणेसणिज्जं इति ' आधाकर्मादिदोषदुष्टमाहारादि, अयता असंयताः प्रतिसेवंते प्रतिकूलमाचरंति, न वरं केवलं ते वेषविडंबका एव, न तु स्वल्पमपि परमार्थसाधका इत्यर्थः ॥ ४९ ॥

॥ मूलम् ॥—जसन्नया अबोही । पवयणजसावणा य बोहिन ॥ जसन्नोवि वरं पिहु ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पवयणउप्पावणापरमो ॥ ५० ॥ व्याख्या—' उसन्नया इति ' एतादृशानां भ्रष्टाचाराणामवसन्नता पराभवो भवति, अबोधिर्धर्मप्राप्त्यभावः स्यात् यतः प्रवचनस्य, शासनस्योद्भावनायां प्रभावनायां वर्द्धितायां सत्यां बोधिरूपं फलं भवति, न तु प्रवचनहीलनायां कृतायामित्यर्थः, ' उसन्नोवित्ति ' अवसन्नोऽपि कर्मपारवश्येन शिथिलाचारोऽपि वरं श्रेष्ठः, यदि ' पिहुत्ति ' पृथुपृथुतरं यथा स्यात्तथा प्रवचनस्य शासनस्योद्भावना प्रभावना शोभेति यावत्, तस्यां परमः प्रधानो भवति. व्याख्यानादिना शासनप्रभावकोऽवसन्नोऽपि वरमित्यर्थः ॥५०॥

॥ मूलम् ॥—गुणहीणो गुणरयणा—यरेसु जो कुणइ तुल्लमप्पाणं ॥ सुतवस्सिणो अहीलइ । सम्मत्तं कोमलं तस्स ॥ ५१ ॥ व्याख्या—' गुणहीणो इति ' गुणेन चारित्रादिना हीन एतादृशो गुणरत्नाकरैर्गुणसमुद्रैः साधुभिः सार्द्धं यः स्वकीयमात्मानं तुल्यं करोति, वयमपि साधव इति मन्यते, तस्य पुरुषस्य सम्यक्त्वं कोमलमसारमर्थात्स मिथ्यादृष्टिरित्यर्थः

॥ मूलम् ॥—उसन्नस्स गिहिस्स व । जिणपवयणतिव्वभावियमइस्स ॥ कीरइ जं अणवज्जं । दढसम्मत्तस्स वत्ताऽसु ॥ ५२ ॥ व्याख्या—' उसन्नस्सेति ' अवसन्नस्य पार्श्वस्था-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिकस्य वाऽथवा गृहस्थस्य, कीदृशस्य? जिनस्तीर्थंकरस्तस्य प्रवचने सिद्धांते धर्मेण तीव्रभाविता मतिर्यस्य तस्य, जिनधर्मरागरक्तस्यैतादृशस्याऽवसन्नस्य श्रावकस्य वा यद्वैयावृत्त्यादि क्रियते, तत्सर्वमनवद्यं निष्पापं निर्दूषणमिति यावत्. कीदृशस्य? दृढसम्यक्त्वस्य निश्चलदर्शनस्य, कदा वैयावृत्त्यादि करोति? अवस्थासु क्षेत्रकालाद्यवस्थासु ॥ ५२ ॥

॥ मूलम् ॥—पासत्थोसन्नकुसील–नायसंसत्तं जणं महाछंदं ॥ नाऊणं तं सुविहिया । सव्वपयत्तेणं वज्जंति ॥ ५३ ॥ व्याख्या—' पासत्थो इति ' पार्श्वे ज्ञानदर्शनचारित्राणां समीपे तिष्ठतीति पार्श्वस्थः, अवसन्नश्चारित्रविषये शिथिलाचारः, कुशीलः, नायशब्देन यो न ज्ञणनाद् ज्ञानविराधकः, ' संसत्तं जणं इति ' संसक्तो, यो यत्र यादृशो मिलति, तत्र तत्संगत्या तादृशो भवति स संसक्त इत्युच्यते. यथाछंदः स्वकीयमत्योत्सूत्रप्ररूपकः, एतेषां स्वरूपं ज्ञात्वा सुविहिताः शोभनानुष्ठानाः साधवस्तं पार्श्वस्थादिकं सर्वप्रयत्नेन सर्वशक्त्या वर्जयंति, तत्संगतिं न कुर्वंति, चारित्रविनाशकारित्वादित्यर्थः ॥ ५३ ॥ अथ पार्श्वस्थादीनां लक्षणानि कथयति—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—बायालमेसणाउ । न रक्खइ धाइसिज्जापिंडं च ॥ आहारेइ अन्निरुं । विगइउ सन्निहि खाइ ॥ ५४ ॥ व्याख्या—' बायाल इति ' द्विचत्वारिंशत्संख्याका एषणा इति आहारविषया गवेषणास्तान् न रक्षति, न पालयति, आहारदोषान्न निवारयतीत्यर्थः, च पुनर्धात्रीपिंडं न रक्षति, न निवारयति. ' सिज्जत्ति ' शय्यातरपिंडं गृह्णाति. अभीक्ष्णं पुनः पुनर्विकृतीर्दुग्धदधिप्रमुखाः कारणं विनाऽाहारयति. ' सन्निहिं इति ' रात्रावथवा रात्रिरक्षितं वस्तु खादति भक्षयतीत्येवंशीलः ॥ ५४ ॥

॥ मूलम् ॥—सूरप्पमाणभोजी । आहारेइ अन्निरुमाहारं ॥ न य मंडलीइं भुंजइ । न य भिक्खं हिंडइ अलसो ॥ ५५ ॥ व्याख्या—' सूर इति ' सूर्यप्रमाणं भवयादारभ्याऽस्तं यावद्भुंक्ते इत्येवंशीलः, अभीक्ष्णं निरंतरमाहारमशनाद्याहरति भुंक्ते, न च साधुमंडल्यां भोजनं करोति, एकाक्येव भोजनं करोति. न च भिक्षार्थं हिंडति भ्रमति, गोचर्यां न गच्छति, अलसः सन् स्तोके एव गृहे बहुतरं गृह्णातीत्यर्थः ॥ ५५ ॥

॥ मूलम् ॥—कीवो न कुणइ लोअं । लज्जइ पडिमाइ जलमवणेइ ॥ सोवाहणो अ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिंडइ । बंधइ कडिपट्टयमकज्जे ॥ ५६ ॥ व्याख्या—' कीवो इति ' क्लीवः कातरत्वेन लोचं केशलुंचनं न करोति, ' पडिमाइति ' कायोत्सर्गं कुर्वन् लज्जते. जलं शरीरमलं हस्तेनापनयति. ' सोवाहणोअ इति ' पादत्राणसहितो हिंडति, बध्नाति कटिप्रदेशे पट्टकं चोलपट्टकं ' अकज्जे इति ' कार्यं विना ॥ ५६ ॥

॥ मूलम् ॥—गामं देसं च कुलं । ममाए पीढफलगपडिबद्धो ॥ घरसरणेसु पवज्जइ । वहरइ य सकिंचणोरित्तो ॥ ५७ ॥ व्याख्या—' गामं इति ' ग्रामे देशे अथच कुले ' ममाए इति ' ममतया विचरति, एतानि मदीयानीति ममत्ववान्, पीठफलकेषु प्रतिबद्धः, वर्षाकालं विनापि शेषकाले तद्धक इत्यर्थः, ' घरसरणेसु इति ' गृहाणां पुनर्नवीनकरणे प्रसज्यति प्रसंगं करोति, चिंताकारको भवतीत्यर्थः, विहरति विहारं करोति ' सकिंचणोत्ति ' सुवर्णादिद्रव्यसहितः सन् अहं रिक्तोऽस्मि, द्रव्यरहितो निर्ग्रंथोऽस्मीति लोकानामग्रे कथयति.

॥ मूलम् ॥—नहदंतकेसरोमे । जमेइ अन्नोलघोइणो ॥ अजइ वाहेइ पलिअंकं । अइरेगप्पमाणमच्छुरइ ॥ ५८ ॥ व्याख्या—' नह इति ' नखा दंताः, केशा मस्तकसंबंधिनः,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोमाणि शरीरसंबंधीनि च, एतेषां द्वंद्वः, तानि ' जमेइत्ति ' न्रूषयति. अन्नोलशब्देन बहुपानीयेन धावनं हस्तपादादीनां यस्यैतादृशः ' अजनत्ति ' अयतनया युक्तः ' वाहेइयत्ति ' वाहयति गृहस्थवदुपभुंक्ते पल्यंकं मंचकमतिरेकप्रमाणं प्रमाणातिरिक्तं संस्तारकोत्तरपट्टाधिकमास्तरति सुखशय्यां करोतीत्यर्थः ॥ ५८ ॥

॥ मूलम् ॥—सोवइ य सव्वराइं । नीसट्ठमचेयणो न वा झरइ ॥ न पमज्जंतो पविसइ । निसिहियावस्सियं न करेइ ॥ ५९ ॥ व्याख्या—' सोवइय इति ' स्वपिति शयनं करोति सर्वस्यां रात्रौ रात्रिप्रहरचतुष्टयेऽपीत्यर्थः, निसट्ठं निर्न्नरमचेतनश्चेतनारहितः काष्ठवत् शयनं करोतीत्यर्थः, ' न वा झरइत्ति ' रात्रौ गुणनादिकं स्वाध्यायं न करोति, रात्रौ रजोहरणादिना न्रूमिमप्रमार्जयन्नुपाश्रये प्रविशति. नैषेधिकीं सामाचारीं प्रवेशसमये, निर्गमनसमये चावश्यिकीं न करोति ॥ ५९ ॥

॥ मूलम् ॥—पाय पहे न पमज्जइ । जुगमयाए न सोहए इरियं ॥ पुढवीदगअगणिमारुअ–वणस्सइतसेसु निरविक्खो ॥ ६० ॥ व्याख्या—' पायपहे इति ' पहेति पथि मार्गे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्रजन्, ग्रामसीम्नि प्रविशन् निस्सरन् वा न पादौ चरणौ प्रमार्जयति, युगमात्रायां युगप्रमाणायां भूमौ ईर्यां न शोधयति. पृथ्वीशब्देन पृथ्वीकायः, दगशब्देनापकायः, अगणिशब्देन तेजस्कायः, मारुतो वायुकायः, वनस्पतिकायस्त्रसकायश्च. एतेषु षट्सु जीवनिकायेषु निरपेक्षोऽपेक्षारहितो विराधयन्न शंकते इत्यर्थः ॥ ६० ॥

॥ मूलम् ॥—सव्वं थोवं उवहिं । न पेहए न य करेइ सज्झायं ॥ सद्दकरो झंझकरो । लहुओ गणभेयतप्पिल्लो ॥ ६१ ॥ व्याख्या—' सव्वं इति ' सर्वं स्तोकमप्युपधिं मुखवस्त्रिकामात्रमपि न प्रेक्षते, न प्रतिलेखते. न च करोति स्वाध्यायं वाचनादिकं. रात्रौ शयनानंतरं गाढं शब्दं करोतीति. झंझशब्देन कलहस्तं करोतीति. लघुको न तु गंभीरो न गुणयुक्तः, गणस्य संघाटकस्य भेदे भेदकरणे ' तप्पिल्लोत्ति ' तत्परः ॥ ६१ ॥

॥ मूलम् ॥—खित्ताईयं भुंजइ । कालाईयं तहेव अविदिन्नं ॥ गिण्हइ अणुज्जयसूरे । असणाई अहव उवगरणं ॥ ६२ ॥ व्याख्या—' खित्ताईयं इति ' क्रोशद्वयादुपरिक्षेत्रादानीतमाहारं यदाहरेत्तत्क्षेत्रातीतं, कालातीतमिति यदानीताहारं प्रहरत्रयाऽनंतरं, भक्षयति. ' अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णुश्य इति ' अनुज्ञते सूर्ये गृह्णाति, सूर्योदयात्प्रथममाहारं गृह्णाति, अशनादिकं चतुर्विधमाहारं, अथवोपकरणं वस्त्रादि. एवंविधः पार्श्वस्थादिः कथ्यते इत्यर्थः ॥ ६२ ॥

॥ मूलम् ॥—ठवणाकुले न ठवेइ । पासत्थेहिं च संगयं कुणइ ॥ निच्चमवण्णारुहो । नय पेहपमज्जणासीलो ॥ ६३ ॥ व्याख्या—' ठवणा इति ' स्थापनाकुलानि वृक्षग्लानादीनामतीवभक्तिकराणि, तानि न स्थापयति न रक्षति, निष्कारणं तत्राऽऽहारार्थं गच्छतीत्यर्थः, च पुनः पार्श्वस्थैर्भ्रष्टाचारैः सार्द्धं संगतं मैत्र्यं करोति, नित्यं निरंतरमपध्याने रतस्तत्परः, न च प्रेक्षा दृष्ट्या विलोक्य वस्तुनो ग्रहणं, प्रमार्जना रजोहरणादिकेन प्रमार्ज्य वस्तुनो भूमौ स्थापनं, तच्छीलस्तदाचरणस्वभावो नेत्यर्थः ॥ ३६ ॥

॥ मूलम् ॥—रीयइ य दवदवाए । मूढो परिभवइ तहय रायणिए ॥ परपरिवायं गिह्णइ । निट्ठुरभासी विगहसीलो ॥ ६४ ॥ व्याख्या—' रीयइ य इति ' गच्छति ' दवदवाए इति ' सत्वरं मूर्खः सन्, पराभवति ' तहय इति ' तथा ' रायणिएत्ति ' ज्ञानादिगुणरत्नैरधिका वृद्धास्तान्, तैः सह स्पर्द्धते इत्यर्थः, परेषां परिवादोऽवर्णवादस्तं गृह्णाति, निष्ठुरं कठिनं भाष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ते, इत्येवंशीलः, विकथा राजकथाद्यास्तासां शीलः स्वभावो यस्य सः ॥ ६४ ॥

॥ मूलम् ॥—विज्जं मंतं जोगं । तेगिच्छं कुणइ भूइकम्मं च ॥ अक्करनिमित्तजीवी । आरंभपरिग्गहे रमइ ॥ ६५ ॥ व्याख्या—' विज्जं इति ' विद्यां देवाधिष्ठितां, मंत्रं देवाधिष्ठितं, योगमदृश्यीकरणादि, ' तेगिच्छं इति ' रोगप्रतिक्रियां करोति, च पुनर्भूतिकर्मेति रक्षाद्यभिमंत्र्य गृहस्थेभ्यः समर्पयति, अक्करशब्देन लेखकानामक्षरविद्याप्रदानं, निमित्तं शुभाशुभयोर्लेभबलेन प्रकाशनं, तेन जीवतीत्येवंशीलः, आरंभः पृथिव्याद्युपमर्दः, परिग्रहोऽधिकोपकरणरक्षणं, तत्र रमते तत्रासक्त इत्यर्थः ॥ ६५ ॥

॥ मूलम् ॥—कज्जेण विणा भगाइ—मणुजाणावेई दिवसभ सुअइ ॥ अज्जियलाभं भुंजइ । इत्थिनिसिज्जासु अभिरमई ॥ ६६ ॥ व्याख्या—' कज्जेण इति ' कार्येण विना निरर्थकमित्यर्थः, अवग्रहं स्थित्यर्थमनुज्ञापयति, गृहस्थानां भूमिकां ज्ञापयित्वा मुंचतीत्यर्थः, दिवसे स्वपिति निद्रां करोति, आर्यिकाया लाभं साध्वीलब्धमाहारं भुनक्ति, स्त्रीणां निषद्या आसनानि, तत्राभिरमते, स्त्रीणामुत्थानानंतरं तत्कालमेव तत्र तिष्ठतीत्यर्थः ॥ ६६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—उच्चारे पासवणे । खेले सिंघाणए अणाउत्तो ॥ संथारगणवहीणं । पडि- क्कमइ सवासपाउरणो ॥ ६७ ॥ व्याख्या—' उच्चारे इति ' उच्चारो मलस्तत्र, प्रस्रवणं मूत्रं तत्र, तत्परिष्ठापने इत्यर्थः, खेलशब्देन श्लेश्म तत्र ' सिंघाणएत्ति ' नाशिकामलेऽनायुक्तोऽसा- वधानः, अयतनया तत्परिष्ठापक इत्यर्थः, संस्तारकस्योपरि स्थित एव प्रतिक्रमणं करोति. कीदृशः ? वासो वस्त्रं तस्य प्रावरणं प्रकर्षेण वेष्टनं, तेन सह वर्त्तमानः, अथवा स इति नि- र्न्नं पदं वा अथवेत्यर्थः, संप्रावरण इति विशेषणं. ॥ ६७ ॥

॥ मूलम् ॥ न करेइ पहे जइणं । तलिआणं तह करेइ परिभोगं ॥ चरइ अणुबद्धवा- सो । स परकपरपक्कनमाणो ॥ ६८ ॥ व्याख्या—' न करेइ इति ' न करोति पथि मार्गे यतनां ' तलियाणंति ' पादतलरक्षकाणां पादत्राणभेदानां परिभोगमुपभोगं करोति, चरति गच्छति ' अणुबद्धवासे ' वर्षाकालेऽपि विहारं करोति. स्वपक्षाणां साधूनां मध्ये, परपक्षाणा- मन्यदर्शनिनां मध्येऽपमाने सति अयोग्यं विचारयतीत्यर्थः ॥ ६८ ॥

॥ मूलम् ॥—संजोअइ अ बहुअं । इंगालसाधूमगं अणट्ठाए ॥ भुंजइ रूवबलट्ठा । न घ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रेइ अ पायपुंछणयं ॥ ६९ ॥ व्याख्या—' संजोअइ इति ' संयोजयति भिन्नभिन्नस्थितानां द्रव्याणां आस्वादार्थं संयोगं करोतीत्यर्थः, अतिबहुकं भुंक्ते, इंगालशब्देन समीचीनं भक्तादि रागबुद्ध्या जेमति. ' साधूमगं इति ' अनिष्टभक्तादि मुखविकारेण जेमति. 'अणट्ठाए इति' क्षुधावेदनीयवैयावृत्त्यादिकारणं विना ' भुंजइत्ति ' भोजनं करोति. किमर्थं? रूपबलनिमित्तं इति ' न धरेइत्ति ' न धारयति च पादप्रोंछनकं ॥ ६९ ॥

॥ मूलं ॥—अट्ठमछट्ठचउत्थं । संवच्छरचाउमासपक्खेसु ॥ न करेइ सायबहुलो । न य विहरइ मासकप्पेणं ॥ ७० ॥ व्याख्या—' अट्ठम इति ' अष्टमं तपः, षष्ठं तपश्चतुर्थं तपश्च न करोति. कस्मिन् कस्मिन् दिने? तदाह—सांवत्सरिके पर्वणि अष्टमं, चातुर्मासिके षष्ठं, पक्षे पक्षदिवसे चतुर्दशीदिने चतुर्थं तपो न करोति, कीदृशः सन्? सातेन बहुलः सुखशीलः सन्, न च विहरति विहारं न करोति, मासकल्पेन मासकल्पमर्यादया शेषकाले सत्यपि क्षेत्रे इत्यर्थः ॥ ७० ॥

॥ मूलम् ॥—नीयं गिण्हइ पिंडं । एगागि अन्नए गिहत्थकहो ॥ पावसुआणि अहिज्जइ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अहिगारो लोगगहणंमि ॥ ७१ ॥ व्याख्या—' नीयं इति ' नीयं नित्यमेतस्मिन् गृहे एतावान् ग्राह्य इति नियतिपूर्वकं पिंडं गृह्णाति, एकाकी ' अच्छएइति ' तिष्ठति, समुदाये न तिष्ठति. गृहस्थानां कथाप्रवृत्तिर्यत्र तां गृहिप्रवृत्तिं करोति. पापश्रुतानि ज्योतिर्वैद्यकादीनि ' अहिज्जइत्ति ' अधीते पठति. अधिकारं करोति, लोकशब्देन लोकानां मनांसि, तेषां ग्रहणे रंजने वशीकरणे इति यावत्. ॥ ७१ ॥

॥ मूलम् ॥—परिन्नवइ उग्गकारी । सुद्धं मग्गं निगूहए बालो ॥ विहरइ सायागुरुउ । संजमविगलेसु खित्तेसु ॥ ७२ ॥ व्याख्या—' परिन्नवइत्ति ' परान्नवति, कान्? उग्रकारिणउग्रविहारिणामुपहवं करोतीत्यर्थः, शुद्धं निर्दूषणं ' मग्गंति ' मोक्षमार्गं निगूहयत्याच्छादयति बालो मूर्खः, ' विहरइत्ति ' विचरति ' सायागुरुउत्ति ' साते सौख्ये गुरुरेव गुरुकोऽर्थाल्लंपट इत्यर्थः, क्व विहरति? संयमविकलेषु सुसाधुन्निरनधिवासितेषु क्षेत्रेषु ॥ ७२ ॥

॥ मूलम् ॥—उग्गाइ गाइ हस्सइ । असंवुडो सया करेइ कंदप्पं ॥ गिहिकज्जचिंतगोवि य । उसन्ने देही गिल्लइ वा ॥ ७३ ॥ व्याख्या—' उग्गाइत्ति ' उग्रतया महता शब्देन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

'गाइत्ति' गायति, 'हसइत्ति' हसति, असंवृतो विकसितमुखः, 'सया इति' सदैव 'कंदप्पं इति' कंदर्पोद्दीपकां प्रवृत्तिं करोति. अपिचेति समुच्चये, गृहिकार्यचिंतकः, अवसन्नाय ददाति वस्त्रादि, गृह्णाति च तस्मात् ॥ ७३ ॥

॥ मूलम् ॥—धम्मकहाउ अहिज्जइ । घराघरं भमइ परिकहंतो ॥ अगणणाइपमाणेण य । अइरित्तं वहइ उवगरणं ॥ ७४ ॥ व्याख्या—'धम्मकहाउ इति' धर्मकथा अधीते जानाति, जनचित्तरंजनार्थमित्यर्थः, च पुनः परिकथयन् धर्मकथां कथयन् गृहाद्गृहं भ्रमति गच्छति, गणनया साधूनां चतुर्दशसंख्यायाः साध्वीनां च पंचविंशतिसंख्याया उपकरणानि, प्रमाणेन यादृशं कल्पते चोलपट्टकादीनां मानं तस्मादतिरिक्तमधिकं संख्यया प्रमाणेन चोपकरणं वहति धारयति ॥ ७४ ॥

॥ मूलं ॥—बारस काइयत्तिय । तिन्नि य उच्चारकालभूमीउ ॥ अंतो बहिं च अहियासि । अणहियासे न पमिलेहे ॥ ७५ ॥ व्याख्या—'बारस इति' द्वादशसंख्याः 'काइयत्ति' लघुनीतियोग्याः स्थंडिलभूमयः 'तिन्नियत्ति' तिस्र उच्चारकालग्रहणयोग्याः स्थंडिल- ॥५०३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नूमयः, एवं सर्वा अपि सप्तविंशतिसंख्याः स्थंडिलनूमयः, नपाश्रयस्यांतर्मध्येऽथ बहिश्च ' अहियासित्ति ' यद्यध्यासितुं शक्यंते तदा दूरे योग्याः, ' अणहियासेत्ति ' ईक्षितुं न शक्यते सा योग्या समीपवर्तिनी, एतादृशीं भूमिकां न प्रतिलेखति नावलोकयति ॥ ७५ ॥

॥ मूलम् ॥—गीयत्थं संविग्गं । आयरिअं मुअइ वलइ गच्छस्स ॥ गुरुणो अणापुच्छा । जंकिंचिवि देइ गिह्णइ वा ॥ ७६ ॥ व्याख्या—' गीयत्थं इति ' गीतार्थं सूत्रज्ञातारं ' संविग्गंति ' मोक्षाभिलाषिणं, एतादृशं ' आयरियंति ' स्वकीयं धर्माचार्यं ' मुअइत्ति ' मुंचति निःकारणं त्यजति. ' वलइत्ति ' वलति सन्मुखमुत्तरं ददाति. ' गच्छस्सत्ति ' समुदायस्य शिक्षां ददतः सन्मुखं वदतीत्यर्थः, गुरूननापृच्छ्य गुर्वाज्ञां विनेत्यर्थः, यत्किंचिद्वस्तु वस्त्रादि ददाति परस्मै, वाऽथवा गृह्णाति स्वयं परस्मात् ॥ ७६ ॥

॥ मूलम् ॥—गुरुपरिन्नोगं भुंजइ । सिज्जासंथारनवगरणजायं ॥ कित्तियतुमंति न्नास- इ । अविणीन गविन लुद्धे ॥ ७७ ॥ व्याख्या—' गुरु इति ' गुरुपरिन्नोग्यं गुरूणां परिन्नोग्यं न्नोक्तुं योग्यं स्वयं भुनक्ति, शय्या शयनन्नूमिः संस्तारकस्तृणादिमयः, नपकरणानि क- ॥ ५०४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ल्पककंबलप्रमुखाणि, तेषां जातः समुदायस्तं. गुरुभिर्भाषितः सन् ' किंत्तिय तुमंति ' किं त्वमिति तुंकारेण भाषते, न तु भगवन् इति बहुमानपूर्वकं. अविनीतः सन् गर्वितः सन् लुब्ध इति विषयादिषु लंपटः सन् एवं भाषते इत्यर्थः ॥ ७७ ॥

॥ मूलम् ॥—गुरुपच्चक्खाणगिलाण–सेहबालाउलस्स गच्छस्स ॥ न करेइ न य पुच्छइ । निद्धम्मो लिंगमुवजीवी ॥ ७८ ॥ व्याख्या—' गुरु इति ' गुरुप्रत्याख्याना अनशनादितपःकारकाः, ग्लाना रोगिणः, ' सेहत्ति ' नवदीक्षिताः ' बालात्ति ' लघुक्षुल्लकाः, एतैराकुलस्य भृतस्य गच्छस्य समुदायस्य न करोत्युपेक्षते वैयावृत्त्यादि स्वयं, नैव पृच्छति परं ज्ञातारमहं किं करोमीति. ' निद्धम्मो इति ' धर्मरहितः सन् लिंगस्य वेषमात्रस्योपजीवी उपजीवकः, लिंगेनाजीविकाकारीत्यर्थः ॥ ७८ ॥

॥ मूलम् ॥—पहगमणवसहिआहार–सयणथंडिल्लविहिपरिठवणं ॥ आयरइ नेव जाणइ । अज्जावट्टावणं चेव ॥ ७९ ॥ व्याख्या—' पहगमण इति ' पथि मार्गे गमनं, ' वसहित्ति ' उपाश्रयः स्थित्यर्थं, आहारशब्देनाहारग्रहणं, शयनं, थंडिल्लशब्देन स्थंडिलशोधनं,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एतेषां पदानां यो विधिस्तं, ' परिठवणंत्ति ' अशुद्धनक्तादीनां परिष्ठापनं त्यजनं, एतत्सर्वं जानन्नपि निर्द्धर्मतया नाद्रियते, अथवा नैव जानाति. अज्ञाशब्देन साध्वी, तस्याः ' वट्टावणं इति ' लोकज्ञापया ' वर्त्तावेवुं ' तदपि न जानाति. ' चेव इति निश्चयेन ॥ ७९ ॥

॥ मूलम् ॥—सच्छंदगमणनट्ठाण–सोअणो अप्पणेण चरणेण ॥ समणगुणमुक्कजोगी । बहुजीवखयंकरो भमइ ॥ ८० ॥ व्याख्या—' सच्छंद इति ' स्वेच्छया गमनमुत्थानमुध्वींभवनं ' सोअणोत्ति ' शयनं यस्यैतादृशः, ' अप्पणेणत्ति ' आत्मना कल्पितेनाचरणेनाचारेण गच्छति, श्रमणगुणा ज्ञानादयस्तेषां मुक्तो योगो व्यापारो येन सः, बहुजीवानां बहुप्राणिनां क्षयंकरो विनाशकर एतादृशो भ्रमति. ॥ ८० ॥

॥ मूलम् ॥—बत्थिव्व वायुपुन्नो । परिभमइ जिणमयं अयाणंतो ॥ अद्धो निव्विन्नाणो । न य पिच्छइ किंचि अप्पसमं ॥ ८१ ॥ व्याख्या—' बत्थित्ति ' बस्तिरिव वायुपूर्णः, यथा वायुपूर्णो बस्तिर्दृतिरुत्फुल्लो दृश्यते, तथा गर्वेण भृतः सन् परिभ्रमणं करोति, जिनानां मतं रागादिरोगौषधमजानन् सन् स्तब्धोऽनम्रः सन् निर्विज्ञानो ज्ञानरहितो न च प्रेक्षते किंचिच्छ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वलेशमपि आत्मना समं तुल्यं. एतावता सर्वानपि तृणसमान् गणयतीत्यर्थः ॥ ८१ ॥

॥ मूलम् ॥—सच्चंदगमणनट्ठाण–सयणो भुंजइ गिहीणं च ॥ पासत्थाइगणा । हवंति एमाइया एए ॥ ८२ ॥ व्याख्या—' सच्चंद इति ' स्वेच्छया गमनोत्थानशयनः, अस्य विशेषणस्य पुनरुपादानं गुर्वाज्ञां विना गुणप्राप्तिर्न भवतीतिख्यापनार्थं, च पुनः ' भुंजइत्ति ' भोजनं करोति गृहस्थानां मध्ये. पार्श्वस्थादीनां स्थानकानि, एते पूर्वोक्तानि पार्श्वस्थादीनां लक्षणानि भवंतीत्यर्थः ॥ ८२ ॥ तर्हि साधवो न संतीत्याशंकायामाह—

॥ मूलम् ॥—जो हुज्जइ असमत्थो । रोगेणवपिलिउ झरियदेहो ॥ सव्वमपि जहा भणियं । कयाइं न तरिज्ज काउं जे ॥ ८३ ॥ व्याख्या—' जो हुज्ज इति ' यः साधुः स्वभावेनाऽसमर्थो भवेत् हीनबलो भवेत्, वाऽथवा रोगेण श्वासज्वरादिना पीडितः सन् पराभूतः सन् जीर्णदेहो भवेत्, सर्वमपि यथा भणितं यादृशं जिनेनोक्तं तादृशमित्यर्थः, कदाचित् ' न तरिज्जत्ति ' न शक्नोति ' काउंत्ति ' कर्तुं, जे इत्यलंकारे ॥ ८३ ॥

॥ मूलम् ॥—सोविय नियपरिक्कम–ववसाय धिईबलं अगूहंतो ॥ मुत्तूण कूडचरियं । ॥५०७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जई जयंतो अवस्स जई ॥ ८४ ॥ व्याख्या—' सोवि य इति ' सोऽपि च दुर्निष्करोगाद्यापदि पतितोऽपि सन् निजकं पराक्रमं स्वकीयं संहननबलं, व्यवसायः शरीरोद्यमः, धृतिः संतोषो, बलं मनोबलं, एतेषां द्वंद्वस्तानि ' अगूहंतोत्ति ' अगोपयन् ' मुत्तूण इति ' मुक्त्वा ' कूटचरियं ' कूटाचरणं कपटं त्यक्त्वेत्यर्थः, यतिः साधुर्यतनं चारित्रविषये नयमं कुर्वन्नवश्यं यतिः कथ्यते ॥ ८४ ॥ अथ मायाविनः स्वरूपमाह—

॥ मूलम् ॥—अलसो सढोवलित्तो । आलंबणतप्परो अईपमाई ॥ एवंठिनवि मन्नइ । अप्पाणं सुट्ठिनमित्ति ॥ ८५ ॥ व्याख्या—' अलसो इति ' धर्मकर्त्तव्यविषये आलस्यवान्, शठो मायावी, अवलिप्तोऽहंकारी, ' आलंबणतप्परो इति ' केनचिन्मिषेण प्रमादसेवने तत्परः, अत्यर्थं प्रमादी निद्राविकथादिप्रमादवान्, एवंस्थित एतादृशः सन्नपीत्यर्थः, मन्यते स्वकीयमात्मानमहं सुस्थितोऽस्मि नव्योऽस्मीति बुद्ध्या ॥ ८५ ॥ अथ मायाविनां शोचनं नवति, तदुपरि कपटकृपतापसदृष्टांतमाह—

॥ मूलम् ॥—जोविय पाडेऊणं । मायामोसेहिं खाइ मुद्धजणं ॥ तिग्गाममझवासी ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सो सोअइ कवडखवगुव्व ॥ ०६ ॥ व्याख्या—' जोविय इति ' योऽपि च मायावी लोकान् पातयित्वाऽात्मनो वशे कृत्वा, कैः ? माया कपटकरणं, मोषः कूटभाषणं तैः ' खाइत्ति ' वंचयति अज्ञानलोकं, स पुमान् त्रिग्रामं ग्रामत्रयं, तस्य मध्ये वसतीत्येवंशील एतादृशो यः कपटकृपकः कूटतपस्वी तद्वत् शोचति शोचं करोति. तद्दृष्टांतमाह, अत्र कथासंप्रदायो लिख्यते—उज्जयिन्यां पुरि एकोऽघोरशिवनामामहाधूर्त्तो वाग्भवः परिवसति, स महाकपटी महाधूर्त्तो महापापी च वर्त्तते. ततोऽसौ राज्ञा देशाद्बहिर्निष्कासितः, तदा स चर्मकारदेशे गतः, तत्र गत्वा चौरपल्ल्यां चौरैः साई मिलितः, चौराणां च कथयति यदि लोकमध्ये यूयं मदीयां प्रशंसां कुरुथ, तदाहं परिव्राजकवेषं कृत्वाऽस्य ग्रामत्रयस्यांतराऽटव्यां तिष्ठामि, भवतां च बहुधनं समर्पयामि, तदा चौरैरपि तदंगीकृतं पश्चात्स ब्राह्मणस्तापसवेषं गृहीत्वा ग्रामत्रयांतराले स्थितो मासकृपणं करोति, कूटवृत्त्या चौरा अप्येवं कथयंति, धन्योऽयं महातपस्वी मासकृपणपारणकपूर्वं निरंतरं तपः करोति.

इमां प्रवृत्तिं दृष्ट्वा सर्वेऽपि मुग्धजनास्तं वंदंते, भोजनार्थं च स्वगृहे नयंति, इच्छाभोज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नं समर्प्य स्वकीयगृहलक्ष्मीं तस्य दर्शयंति, सर्वामपि गृहप्रवृत्तिं तदग्रे कथयंति, निमित्तादिकं पृच्छंति, सोऽपि लग्नबलेन लोकानां सर्वमागामिकस्वरूपं कथयति. पश्चात्स कूटकृपको रात्रौ चौरानाहूय दृष्टमंदिरेषु क्षात्रं दापयित्वा चौर्यं कारयति. एवं चौर्यं कारयता तेन ग्रामत्रयीलोका निर्धनीकृताः, एकदा ते चौरा एकस्य कृषीवलस्य गृहे क्षात्रं दातुं गताः, क्षात्रदानावसरे कृषीवलसुतेन ज्ञातं, नष्टाः सर्वेऽपि तस्कराः, एकश्च गृहीतः, तं गृहीत्वा स राज्ञोऽग्रे समागातः, राज्ञा पृष्टं सत्यं वद? नो चेन्मारयिष्यामि. तेनोक्तं नो महाराज अस्माकमयं कूटकृपकतापसो गृहं दर्शयति, तत्रैव यं चौर्यं कुर्मः, पश्चात्तापससहिताः सर्वेऽपि चौरा राज्ञा समाकारिताः, सर्वेपि च निधनं प्रापिताः, तापसस्य चक्षुषी निष्कास्य स मुक्तः, पश्चात्स तापसो महावेदना अनुभवन्मनसि पश्चात्तापं कर्तुं लग्नो हा हा धिगस्तु मां, येन मया ब्राह्मणेन सता कूटतपस्विवेषं विधाय महान् जनो विप्रतारितो लोकानां च बहुदुःखकारणमुत्पादितं, मलिनीकृतोऽयमात्मा, भवद्वयं हारितं, यतो यदशुभं क्रियते तत्सर्वं निंद्यमेव, परं तपस्वी भूत्वा यः पापं करोति, स त्वतीवनिंद्यो, मलिनानां मध्ये च मलिन इति स्वकी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यमात्मानं शोचन् स तापसोऽतीवदुःखभाजनं जातः, एवमन्योऽपि यो धर्मविषये कपटं करोति सोऽपि दुःखभाग्भवतीति संबंधः षट्षष्टितमः ॥ ६६ ॥ अथ विराधकस्वरूपमाह—

॥ मूलम् ॥—एगागी पासत्थो । सच्छंदो गणवासि उसन्नो ॥ उगमाइसंजोगा । जह बहुआ तह गुरूहंति ॥ ८७ ॥ व्याख्या—' एगागीत्ति ' एकाकी धर्मबंधवशिष्यरहितः १ पार्श्वस्थो ज्ञानादीनां पार्श्ववर्त्ती २ ' सच्छंदोत्ति ' गुर्वाज्ञारहितः ३ स्थाने एकस्मिन्नेव स्थाने वसतीति स्थानवासी ४ ' उसन्नो इति ' प्रतिक्रमणादिक्रियाशिथिलः ५ एतेषां दोषाणां मध्ये द्व्यादिसंयोगाः, द्वौ दोषौ, त्रयो दोषाः, चत्वारो दोषाः, पंच दोषाः, एवं मिलिताः ' जह इति ' यथा यस्मिन् पुरुषे बहवो भवंति ' तह इति ' तथा स गुरुविराधको भवतीत्यर्थः ॥ ८७ ॥ अथाराधकस्वरूपमाह—

॥ मूलम् ॥—गच्छगउ अणुउगी । गुरुसेवी अनिययवासयाउत्तो ॥ संजोएणं पयाणं । संजमआराहणा भणिया ॥ ८८ ॥ व्याख्या—' गच्छ इति ' गच्छगतो गच्छमध्ये तिष्ठति ' अणुउगीत्ति ' अनुयोगो ज्ञानाद्यासेवनं तत्रोद्यमवान्, गुरुसेवाकारकः, अनियतवासी मासक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ढ्यादिना विहारकारी, आयुक्तः प्रतिक्रमणादिक्रियायां, एतेषां पंचपदानां संयोगेन संयमस्य चारित्रस्याराधका ज्ञणिताः, यत्रैते गुणा बहवः स विशेषेणाराधक इत्यर्थः ॥ ८८ ॥

॥ मूलम् ॥—निम्ममनिरहंकारा । उवउत्ता नाण दंसणचरित्ते ॥ एकस्किंतेवि छिया । खवंति पोराणयं कम्मं ॥ ८९ ॥ व्याख्या—' निम्मम इति ' निर्ममा ममत्वरहिताः, निरहंकारा अहंकाररहिताः, उपयुक्ताः सावधानाः, ज्ञाने विशेषावबोधके, दर्शने तत्वश्रद्धानरूपे, चारित्रे आश्रवरोधरूपे, एवंगुणविशिष्टा महापुरुषा एकक्षेत्रेऽपि एकदेशेऽपि स्थिताः संतः ' खवंतीति ' क्षपयंति नाशयंति, ' पोराणयंति ' प्राचीनत्नवोपार्जितं कर्म ज्ञानावरणादि.

॥ मूलम् ॥—जियकोहमाणमाया । जियलोन्नपरीसहा य जे धीरा ॥ वुड्ढावासेवि छिया । खवंति चिरसंचियं कम्मं ॥ ९० ॥ व्याख्या—' जिय इति ' जितः क्रोधो मानो माया यैस्ते जितक्रोधमानमाया एतादृशाः, पुनर्जितलोन्ना लोन्नसंज्ञारहिताः, जिता :परीषहाः क्षुत्पिपासादिरूपा यैस्ते, विशेषणोन्नयपदकर्मधारयः, एतादृशा ये धीराः सत्त्ववंतः साधवस्ते ' वुड्ढावासेवित्ति ' वृद्धावस्थायामपि स्थिता एकक्षेत्रेऽवस्थिताः क्षपयंति विनाशयंति, चिरं ब-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हुकालं यावत्संचितमेकीकृतमेतादृशं कर्म ज्ञानावरणादि, सदाचाराणां कारणेनैकत्रस्थानेऽपि जिनाज्ञेत्यर्थः ॥ ९० ॥

॥ मूलम् ॥—पंचसमिया तिगुत्ता । नज्जुत्ता संजमे तवे चरणे ॥ वाससयंपि वसंता । मुणिणो आराहगा भणिया ॥ ९१ ॥ व्याख्या—' पंच इति ' पंचभिः समितिभिः समिताः, तिसृभिर्गुप्तिभिर्गुप्ताः, नद्युक्ता नद्यमवंतः, संयमे सप्तदशविधे, अथवा संयमे षड्कायरक्षारूपे, तपसि द्वादशभेदे, चरणे पंचमहाव्रतरूपक्रियायां, वर्षशतमपि यावदेकक्षेत्रे वसंत एतादृशा मुनयः साधव आराधका भणिताः, जिनाज्ञाप्रतिपालकानामेकत्रावस्थानेऽपि न दोष इत्यर्थः ॥ ९१ ॥

॥ मूलम् ॥—तम्हा सव्वाणुन्ना । सव्वनिसेहो य पवयणे नत्थि ॥ आयं वयं तुलिज्जा । लाहाकंखिव्व वाणिन ॥ ९२ ॥ व्याख्या—' तम्हा इति ' तस्मात्कारणात् ' सव्वाणुन्ना इति ' सर्वेषां वस्तूनामनुज्ञाऽऽज्ञा, इदमित्थमेव करणीयमितिरूपा, च पुनरेकांतेन सर्ववस्तूनां निषेधः, इदं नाचरणीयमित्यादिरूपः, प्रवचने जिनशासने नास्ति, स्याद्वादरूपत्वादित्यर्थः, ॥ ५१३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आयं ज्ञानादिलाभं, व्ययं ज्ञानादिहानिं ' तुलिज्जात्ति ' तोलयेत्, क इव ? लाभाकांक्षी वणिगिव यथा लाभार्थी वणिक् यत्र लाभं जानाति तदेव वस्तु गृह्णाति, तद्वत्साधुरपि लाभाऽलाभादि विचारयतीत्यर्थः ॥ ९२ ॥

॥ मूलम् ॥—धम्मंमि नत्थि माया । न य कवडं वट्टइय धम्मंमि ॥ आणुयत्ति अणेगविहो । दंसणनाणेसु अट्ठट्ठ ॥ ९७ ॥ व्याख्या—' धम्मंमित्ति ' धर्मे साधुधर्मविषये माया नास्ति, मायाधर्मयोरत्यंतवैरत्वादित्यर्थः, न च कपटं परवंचनं धर्मे वर्त्तते, दर्शनज्ञानेष्वष्टावष्टावाचारा बोधव्या इत्यर्थः ॥ ९७ ॥

॥ मूलम् ॥—जं जयइ अगीयत्थो । जं च अगीयत्थनिस्सिउ जयइ ॥ वट्टावेइ गच्छं । अणंतसंसारिउ होइ ॥ ९८ ॥ व्याख्या—' जं जयइत्ति ' यत्किंचिद्यतते तपःक्रियासूद्यमं करोति, ' अगीयत्थो इति ' अगीतार्थः सिद्धांताऽनभिज्ञः, यच्च पुनः ' अगीयत्थनिस्सिउ इति ' अगीतार्थनिश्रितः सन्, अगीतार्थं प्रतिपद्यते इत्यर्थः ' जयइत्ति ' क्रियानुष्ठानं करोति, स्वयमगीतार्थः सन् गच्छं प्रवर्त्तयति, क्रियानुष्ठाने प्रेरयति, तदा सोऽनंतसंसारिको भवति; गी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तार्थस्येव तत्क्रियानुष्ठानं मोक्षफलदायि न नवतीत्यर्थः ॥ ९८ ॥

॥ मूलम् ॥ कहन्न जयंत साहू । वट्टावेइ य जो न गन्नं ॥ संजमजुत्तो होनं । अणंतसंसारिन्न होइ ॥ ९९ ॥ व्याख्या—' कह इति ' हे नगवन् ' कहन्नत्ति ' कथं ' जयंतोत्ति ' तपःसंयमविषये यत्नं कुर्वन् ' साहूत्ति ' साधुः, अथ च यश्च तपःसंयमविषये गन्नं प्रवर्त्तयति, संयमेन युक्तः सहितः, एतादृशो नूत्वाऽनंतसंसारिको नवति ? एतादृशस्याऽनंतसंसारित्वं कथमुक्तमित्यर्थः ॥ ९९ ॥ गुरुरेतस्योत्तरमाह—

॥ मूलम् ॥—दव्वं खित्तं कालं । नावं पुरिसपमिसेवणान्न य ॥ नवि जाणइ अगीन्न । नस्सग्गववाईयं चेव ॥ ४०० ॥ व्याख्या—' दव्वं इति ' द्रव्यं क्षेत्रं कालं नावं च, एतच्चतुष्टयमगीतार्थो न जानातीत्यर्थः, पुरिसत्ति पुरुषोऽयं योग्योऽयोग्यो वेति न जानाति, प्रतिसेवनां पापसेवनां, अनेन स्ववशेन कृतं, किं वा परवशेन कृतमिति नैव जानात्यगीतार्थः, ' नस्सग्गत्ति ' औत्सर्गिकं, सति सामर्थ्ये यथोक्तानुष्ठानस्यैव करणं ' ववाइयं इति ' रोगादिकारणेऽल्पदोषसेवनमपवादस्तं न जानात्यगीतार्थः, अगीतार्थस्यानुष्ठानं निष्फलमित्यर्थः ॥४००॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जहट्ठियदव्वं न याणइ । सचित्ताचित्तमीसियं चेव ॥ कप्पाकप्पं च तह। जुग्गं वा जस्स जं होइ ॥ १ ॥ व्याख्या—' जहट्ठियं इति ' यथास्थितं द्रव्यस्वरूपं न जानाति, अगीतार्थत्वात्. पुनः सचित्तमिव सचित्तं सजीवं वस्तु, इदमचित्तं, इदं मिश्रं वस्तु, एतदपि निश्चयेन न जानाति. ' तहइत्ति ' तथा ' कप्पाकप्पं इति ' इदं कल्पनीयमिदमकल्पनीयमित्यपि न जानाति, वाऽथवा यत् यस्य बालग्लानादेर्योग्यं भवति, तदपि न जानाति.

॥ मूलम् ॥—जहट्ठियखित्तं न जाणइ । अद्धाणे जणवए अ जं भणिअं ॥ कालंपि य नवि जाणइ । सुन्निक्कदुन्निक्क जं कप्पं ॥ २ ॥ व्याख्या—जहट्ठिय इति ' पुनरगीतार्थो यथास्थितं क्षेत्रं, किं भद्रकमभद्रकं वेदं क्षेत्रमिति तत्स्वरूपं न जानाति. ' अद्धाणे इति ' दूरमार्गे ' जणवएत्ति ' देशमध्ये विहारे क्रियमाणे यद्विधिस्वरूपं भणितं, तदपि न जानाति. च पुनः कालमपि कालस्वरूपमपि न जानाति, पुनरगीतार्थः सुन्निक्केऽपि च दुर्निक्के यद्वस्तु कल्प्यं कल्पनीयं, अथवा यदकल्पनीयं, तदपि न जानाति. ॥ २ ॥

॥ मूलम् ॥—भावे दट्ठगिलाण । नवि जाणइ गाढागाढकप्पं च ॥ सहुअसहु पुरिस-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्थु–मवत्थुं च नवि जाणइ ॥ ३ ॥ व्याख्या—' न्नावे इति ' न्नावद्वारे अयं हृष्टो नीरोगी वर्त्ततेऽतोऽस्येदं देयं, अयं च ग्लानो वर्त्ततेऽतोऽस्येदमेव देयमेतन्न जानात्यगीतार्थः, ' गाढ इति ' महति कार्ये एतत्करणीयं, अगाढे स्वान्नाविके च कार्ये एतद्देयं कल्प्यं योग्यं, च पुनः ' सहुत्ति ' समर्थशरीरं ' असहु इति ' असमर्थशरीरं पुरुषं न जानाति. वस्तुशब्देनाचार्यादीनां स्वरूपं, अवस्तुशब्देन च सामान्ययतिस्वरूपं स न जानाति. ॥ ३ ॥

॥ मूलम् ॥—पडिसेवणा चनद्धा । आनट्टिप्पमायदप्पकप्पेसु ॥ नवि जाणइ अगीन्न । पन्निन्नं चेव जं तन्न ॥ ४ ॥ व्याख्या—' पडिसेवणा इति ' प्रतिसेवना निषिद्धवस्तूनामाचरणं, चतुर्धा इति चतुर्भिः प्रकारैर्न्नवति, ' आनट्टित्ति ' एकं पापं ज्ञात्वा करोति १ एकं पापं प्रमादेन निद्रादिना करोति २ एकं पापं धावनवल्गनादिना करोति ३ ' कप्पेसुत्ति ' एकं पापं कारणेन करोति ४ एतत्पापप्रकारचतुष्टयं न जानाति. अगीतार्थोऽज्ञातसिद्धांतरहस्यः, चेवेति निश्चयेन यत्प्रायश्चित्तं आलोचनादि, तत्र यद्देयं तत्र जानात्यगीतार्थः ॥ ४ ॥

॥ मूलम् ॥—जह नाम कोइ पुरिसो । नयणविहूणो अदेशकुसलो य ॥ कंतारम्मी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्जीमे । मग्गपणट्ठस्स सत्थस्स ॥ ५ ॥ व्याख्या—' जह नामेति ' यथेतिदृष्टांतोपन्यासे, नामेति प्रसिद्धौ, कश्चित्पुरुषो ज्ञवति. कीदृशो ज्ञवति ? ' नयणविहुणोत्ति ' नेत्राज्यां विहीनोंध इत्यर्थः, पुनः कीदृशः ? न देशे मार्गज्ञाने कुशलोऽदेशकुशलो मार्गाऽनज्ञिज्ञ इत्यर्थः, एतादृशः कश्चिदंधपुरुषो ज्जीमायां ज्जयंकरायां कांताराटव्यां विषमाटव्यां, प्राकृतत्वात्परनिपातः, मार्गप्रणष्टस्य मार्गज्ञ्रष्टस्य सार्थस्य लोकसमुदायस्य ॥ ५ ॥

॥ मूलम् ॥—इज्जइय देसियत्तं । किं सोज्ज समज्ज देसियत्तस्स ॥ दुग्गाइं अयाणंतो । नयणविहूणो कहं देसे ॥ ६ ॥ व्याख्या—' इज्जइय इति ' तस्य सार्थस्यांधो मार्गदर्शकत्वमिज्जति, यदहमेतेषां मार्गं दर्शयामीति वांछति, परं सोंधः पुरुषो मार्गदर्शकत्वस्य किं समर्थः ? अपि तु न समर्थः, ' दुग्गाइंत्ति ' विषमप्रदेशानऽजानन् नयनाज्यां विहीनोंधः पुरुषः कथं मार्गं दर्शयेदपितु न दर्शयेदित्यर्थः ॥ ६ ॥

॥ मूलम् ॥—एवमगीयत्थो विहु । जिणवयणपईवन्नरुखुपरिहीणो ॥ दव्वाइं अयाणंतो नसग्गववाइयं चेव ॥ ७ ॥ व्याख्या—' एवमिति ' एवं अनेन दृष्टांतेनाऽगीतार्थोऽपि हु नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्चितं, जिनवचनानि जिनभाषितानि तान्येव प्रदीपो देदीप्यमानो दीपस्तद्रूपं चक्षुर्नेत्रं तेन परिहीनो रहितोंध इति यावत् ' दव्वाइंत्ति ' द्रव्यादिस्वरूपमजानन् ' चेवेति ' निश्चयेन नत्सर्गमार्गमपवादमार्गं चाऽजानन् स्वयमंधः कथमन्येषां मार्गं दर्शयेदित्यर्थः ॥ ७ ॥

॥ मूलम् ॥—कह सो जयउ अगीउ । कह वा कुणउ अगीयनिस्साए ॥ कह वा करेउ गच्छं । सबालवुड्ढाउलं सोउ ॥ ८ ॥ व्याख्या—' कह इति ' कथमेतादृशः सोऽगीतार्थो ' जयतित्ति ' यतनां कुर्यात्? कथं वा कर्त्तुं शक्यते, अगीतार्थनिश्रयाऽन्येनापि तपःसंयमविषये यतना? कथं वा कर्त्तुं शक्नोति ' गच्छं इति ' गच्छप्रवर्त्तनं? कीदृशं गच्छं? बालाश्च वृद्धाश्च बालवृद्धास्तैराकुलं सहितं ' सोउत्ति ' सोऽगीतार्थः ॥ ८ ॥

॥ मूलम् ॥—सुत्तेय इमं भणियं । अप्पच्छित्ते य देइ पच्छित्तं ॥ पच्छित्ते अइमत्तं । आसायणा तस्स महइ उ ॥ ९ ॥ व्याख्या—' सुत्ते य इति ' सूत्रे सिद्धांते इदमेतद्भणितं कथितं वर्त्तते, परस्य प्रायश्चित्ताऽभावे प्रायश्चित्तदानं तपोदानं पापाऽभावे तपो ददातीत्यर्थः, प्रायश्चित्ते सामान्ये पापेऽतिमात्रमधिकं तपो ददात्यगीतार्थः, तदा तस्याऽगीतार्थस्य महती आ- ॥ ५१९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शातना भवति, महती जिनाज्ञाविराधना भवति ॥ ए ॥

॥ मूलम् ॥—आसायणमिच्छत्तं । आसायणवज्जणा य सम्मत्तं ॥ आसायणानिमित्तं । कुव्वई दीहं च संसारं ॥ १० ॥ व्याख्या—' आसायण इति ' आसायणशब्देन जिनाज्ञाभंगो मिथ्यात्वमुच्यते, आशातनावर्जनं च सम्यक्त्वं कथितं, आशातनानिमित्तमाज्ञाभंगकारणेनेत्यर्थः, ' कुव्वइत्ति ' करोति दीर्घं बहुलं संसारं चतुर्गतिभ्रमणरूपं ॥ १० ॥

॥ मूलम् ॥—एए दोसा जम्हा—गीयजयंतस्सगीयनिस्साए ॥ वट्टावयगच्छस्स य । जो अ गणं देयगीयस्स ॥ ११ ॥ व्याख्या—' एए इति ' एते कथिता दोषा भवंति यस्मात्, कस्यैते दोषा भवंति ? अगीतार्थस्य, कीदृशस्य ? ' जयंतस्सत्ति ' तपःसंयमविषये यत्नं कुर्वाणस्यापि, अगीतार्थनिश्रयाऽगीतार्थवचनेन तपः कुर्वाणस्याऽन्यस्याऽप्येते दोषाः, च पुनर्गच्छप्रवर्त्तकस्याप्यगीतार्थस्य एते दोषा भवंति, यश्च पुनरगीतार्थस्य मूर्खस्य गणं ददाति आचार्यपदं ददाति, तस्याप्येते दोषाः ॥ ११ ॥

॥ मूलम् ॥—अबहुसुत्त तवस्सी । विहरिउंकामो अजाणिऊण पहं ॥ अवराहपयस-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

याइं । काऊणवि जो न याणेइ ॥ १२ ॥ व्याख्या —' अबहुसुउत्ति ' अबहुश्रुतोऽल्पश्रुतशास्त्र एतादृशः सन् यस्तपस्वी गाढतपःकारी भवति, यश्च पंथानं मोक्षमार्गमज्ञात्वा ' विहरिउंकामोत्ति ' विहारं कर्त्तुं वांछति, अपराधानामतीचाराणां पदानि स्थानानि, तेषां शतानि कृत्वापि कुर्वन्नपीत्यर्थः, यो न जानात्यल्पश्रुतत्वादित्यर्थः ॥ १२ ॥

॥ मूलम् ॥—देसियराइयसोहिं । वयाइयारे य जो न जाणेइ ॥ अविसुद्धस्स न वड्ढइ । गुणसेढी तत्तिया ताइ ॥ १३ ॥ व्याख्या—' देसिय इति ' दैवसिका दिवससंबंधिनः, ' राइयत्ति ' रात्रिसंबंधिनो येऽतीचारास्तेषां शुद्धिं न जानाति, व्रतानि मूलगुणोत्तरगुणास्तेषामतीचारान्न जानाति, अल्पश्रुतत्वान्न विशुद्धो भवति अतोऽविशुद्धस्य पापशुद्धिरहितस्य न वृद्धिं प्राप्नोति, गुणा ज्ञानादयस्तेषां श्रेणिः परंपरा वृद्धिं न प्राप्नोति. ' तत्तियात्ति ' यावती वर्त्तते, तावत्येव तिष्ठति, नाधिका भवतीत्यर्थः ॥ १३ ॥

॥ मूलम् ॥—अप्पागमो किलिस्सइ । जइवि करेइ अइदुक्करं तु तवं ॥ सुंदरबुद्धीइ कयं । बहुयंपि न सुंदरं होइ ॥ १४ ॥ व्याख्या—' अप्पागमो इति ' अल्पागमोऽल्पसिद्धां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तज्ज्ञानः ' किलिस्सइत्ति ' कष्टमेव सहते, यद्यपि करोत्यतिदुष्करं मासक्षपणादितपः, तथापि स क्लेशमेव सहते, तुः पुनरर्थे, सुंदरबुद्ध्या समीचीनबुद्ध्या कृतं बह्वपि तत्तपो न सुंदरं भवति, तदज्ञानकष्टतुल्यमित्यर्थः ॥ १४ ॥

॥ मूलम् ॥—अपरिन्नियसुयनिहसस्स । केवलमन्निन्नसुत्तचारिस्स ॥ सवुज्जमेणवि कयं । अन्नाणतवे बहु पमुइ ॥ १५ ॥ व्याख्या—' अपरिन्निय इति ' अज्ञातः ' सुयनिहसत्ति ' श्रुतनिकषः सिद्धांतरहस्यं येन तस्य, केवलमन्निन्नं टीकादिज्ञानरहितं यत्सूत्राक्षरमात्रं, तेन चरति तदनुसारेण गच्छतीत्येवंशीलस्तस्य, एतादृशस्य सर्वोद्यमेनापि कृतं क्रियानुष्ठानादि अज्ञानतपसि अज्ञानकष्टे पतति, तदुपरि दृष्टांतमाह ॥ १५ ॥

॥ मूलम् ॥—जह दायंमिवि पहे । तस्स विसेसे से पहस्सयाणंतो ॥ पहिन्न किलिस्सइ चिय । तह लिंगायारसुअमत्तो ॥ १६ ॥ व्याख्या—' जह इति ' यथा केनचित्पुरुषेण पांथस्य ' पहे इति ' पथि मार्गे ' दायंमित्ति ' दर्शितेऽपि, तस्य ' पहस्सत्ति ' पथो मार्गस्य विशेषान्, दक्षिणो वायं वामो वायमित्यादिरूपानजानन्, एतादृशः ' पहिन्नत्ति ' पथि- ॥ ५२२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कः क्लेशं प्राप्नोति. ' चिय इति ' निश्चयेन मार्गं भ्रष्टो भूत्वा महद्दुःखं प्राप्नोतीत्यर्थः, ' तह इति ' तथाऽनेन दृष्टांतेन लिंगशब्देन साधुवेषः, आचारशब्देन क्रिया, तयोर्धारको, लिंगाचारौ स्वबुद्ध्या करोतीत्यर्थः, ' सुअमित्तो इति ' सूत्राक्षरमात्रज्ञाता. ॥ १६ ॥

॥ मूलम् ॥—कप्पाकप्पं एसण–मणेसणं चरणकरणसेहविहिं ॥ पायच्छित्तविहिंपि य–दव्वाइगुणेसु अ समग्गं ॥ १७ ॥ व्याख्या—' कप्पाकप्पं इति ' कल्पं कल्पनीयमथवाऽकल्पनीयं, एषणामाहारशुद्धिं, अनेषणामाहारदोषान्, चरणसप्ततिकां, करणसप्ततिकां, नवदीक्षितशिक्षाविधिं, प्रायश्चित्तं दशविधालोचनादिन्नेदरूपं, तस्य विधिमजानन्निति सर्वत्र संबंधः, द्रव्यादयो द्रव्यक्षेत्रकालभावाः, गुणा जघन्यमध्यमास्तेषु विषये समग्रं संपूर्णमजानन् ॥१७॥

॥ मूलम् ॥—पव्वावणविहि नवट्ठा–वणं च अज्जाविहिं निरवसेसं ॥ नस्सग्गाववायविहिं । अयाणमाणो कहं जयउ ॥ १८ ॥ व्याख्या—' पव्वावयण इति ' प्रव्राजनविधिं नवीनानां दीक्षाव्यवहारमजानन्, उपस्थापना महाव्रतोच्चारणं, तद्विधिमजानन्, अज्जाशब्देन साध्वी, तस्या विधिमजानन्, निरवशेषं संपूर्णमुत्सर्गमार्गः शुद्धाचारपालनरूपः, अपवादमा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्गः कारणेनापन्नौ यदाश्रियते तत्, तयोर्विधिस्तं, एतान् सर्वान् गाथाद्वयोक्तप्रकारानजानन् अबहुश्रुतो लिंगधारी ' कहं जयउत्ति ' कथं यत्नं करोति मोक्षमार्गाराधने ? ॥ १८ ॥

॥ मूलम् ॥—सीसायरियकमेण य । जणेण गहिआइं सिप्पसत्थाइं ॥ नज्जंति बहुविहाइं । न चक्खुमित्ताणुसरियाइं ॥ १९ ॥ व्याख्या—' सीसायरिय इति ' शिष्याचार्यक्रमेण, शिष्यो विनयपूर्वकमाचार्यं कलाचार्यादिकं प्रसन्नीकृत्य विद्यां गृह्णातीति क्रमेण, विनयपूर्वकं गुरुसमीपादित्यर्थः, जनैर्लोकैर्गृहीतानि शिल्पानि चित्रादीनि, शास्त्राणि व्याकरणादीनि, तानि सम्यक् शिक्षितान्येव विज्ञानशास्त्राणि ज्ञायंते, नत्वन्यथेत्यर्थः, ' नज्जंतित्ति ' ज्ञायंते, बहुविधानि बहुप्रकाराणि, न इति न ज्ञायंते चक्षुर्मात्रेण चक्षुर्दर्शनमात्रेण ' अणुसरियाइं इइति ' अनुश्रुतानि स्वयं शिक्षितानि शोभां न प्राप्नुवंतीत्यर्थः, तदा लोकोत्तरमार्गस्य किमु कथनीयमिति भावः ॥ १९ ॥

॥ मूलम् ॥—जह नज्जमिउं जाणइ । नाणी तवसंजमे नवायविउ ॥ तह चक्खुमित्तदरिसण–सामायारी न याणंति ॥ २० ॥ व्याख्या—' जह इति ' यथोद्यमं कर्तुं जानाति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्ञानी पुमान्, सिद्धांतज्ञानेन यादृशमुद्यमं करोति, कस्मिन् विषये? तपसि अथ संयमे संयमविषये, कीदृशो ज्ञानी? ' उवायविउ इति ' उपायवित् ' तह इति ' तथा चक्षुर्मात्रदर्शनेन क्रियानुष्ठानादि कुर्वतामन्येषां समीपादर्शनेन सामाचारीं शुद्धाचारं न जानाति, स्वज्ञानेन यादृशं ज्ञायते, न तादृशं परस्माद्दर्शनेनेत्यर्थः ॥ २० ॥

॥ मूलम् ॥—सिप्पाणि य सत्थाणि य । जाणंतोवि न य जुंजइ जो से ॥ तेसिं फलं न भुंजइ । इअ अजयंतो जइ नाणी ॥ २१ ॥ व्याख्या—' सिप्पाणि इति ' शिल्पानि चित्रकर्मादीनि, शास्त्राणि व्याकरणादीनि, जानन्नपि यः पुरुषो न च नैव योजयति प्रवर्त्तयति, एतावता तत्क्रियां न करोतीत्यर्थः, स पुमान् तेषां शिल्पादीनां फलं धनलाभादिकं न भुनक्ति, न प्राप्नोतीत्यर्थः, ' इअ इति ' अनेन प्रकारेण ' अजयंतोत्ति ' अयतनां कुर्वन् ज्ञानवानपि यतिः साधुर्मोक्षरूपं फलं न प्राप्नोतीत्यर्थः ॥ २१ ॥

॥ मूलम् ॥—गारवतियपडिबद्धा । संजमकरणुज्जमंति सीअंता ॥ निग्गंतूण गणाउ । हिंडंति पमायरन्नंमि ॥ २२ ॥ व्याख्या—' गारव इति ' गारवत्रिके रसऋद्धिसातरूपे गारव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रये प्रतिबद्धा आसक्ताः, संयमकरणं षड्जीवनिकायरक्षाकरणं, तस्योद्यमे उद्यमविषये सीदंतः शिथिलाः, एतादृशा गणान्निर्गत्य गणाद्बहिर्भूय हिंडंति स्वेच्छया विचरंति, पश्चात्प्रमादरूपेऽरण्येऽटव्यां परिभ्रमंति ॥ २२ ॥

॥ मूलम् ॥—नाणाहिउ वरतरं । हीणोवि हु पवयणं पन्नावंतो ॥ न य दुक्करं करंतो । सुट्ठुवि अप्पागमो पुरिसो ॥ २३ ॥ व्याख्या—' नाणाहिउ इति ' ज्ञानेनाधिकः पूर्णो ज्ञानाधिको वरतरं श्रेष्ठः, हीनोऽपि चारित्रक्रियाहीनोऽपि हु निश्चितं प्रवचनं जिनशासनं प्रन्नावयन्, एतादृशः क्रियाहीनोऽपि ज्ञानी श्रेष्ठ इत्यर्थः, ' न य इति ' न च श्रेष्ठो दुःकरं मासक्षपणादि कुर्वन् सम्यक्प्रकारेण ' अप्पागमोत्ति ' अल्पश्रुतः पुरुषः क्रियावानपि ज्ञानहीनो न श्रेष्ठ इत्यर्थः ॥ २३ ॥

॥ मूलम् ॥—नाणाहियस्स नाणं । पुज्जइ नाणापवत्तए चरणं ॥ जस्स पुण दुज्झ इक्कंपि । नत्थि तस्स पुज्जए काइं ॥ २४ ॥ व्याख्या—' नाणाहियस्सत्ति ' ज्ञानाधिकस्य ज्ञानपूर्णस्य पुरुषस्य ज्ञानं पूज्यते, कथं ? यतो ज्ञानाच्चारित्रं प्रवर्त्तते, यस्य पुरुषस्य द्वयोर्ज्ञा- ॥ ५२६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नचारित्रयोर्मध्ये एकमपि नास्ति, तस्य पुरुषस्य किं पूज्यते? किं पूजयितुं योग्यं? अपि तु न किमपीत्यर्थः ॥ २४ ॥

॥ मूलम् ॥—नाणं चरित्तहीणं । लिंगग्गहणं च दंसणविहीणं ॥ संजमहीणं च तवं । जो चरइ निरत्थयं तस्स ॥ २५ ॥ व्याख्या—' नाणं इति ' ज्ञानं मत्यादि चारित्रहीनं चरति यः, लिंगग्रहणं वेषधारणं च तद्दर्शनविहीनं चरति, च पुनर्यः संयमहीनं षट्कायरक्षारूपचारित्रहीनं तपः समाचरति, एतत्सर्वमपि मोक्षसाधनं तस्य पुरुषस्य निरर्थकं निष्फलमित्यर्थः ॥ २५ ॥

॥ मूलम् ॥—जहा खरो चंदणभारवाही । भारस्स भागी न हु चंदणस्स ॥ एवं खु नाणी चरणेण हीणो । नाणस्स भागी न हु सुग्गईए ॥ २६ ॥ व्याख्या—' जहा इति ' यथेति दृष्टांते खरो रासभश्चंदनभारं वहतीत्येवंशीलो भारवाहनस्यैव भोक्ता विभागी भवति, न भवति हु इत्यलंकारे चंदनस्य चंदनपरिमलग्रहणस्य, एवममुना प्रकारेण ' खु इति ' निश्चितं ज्ञान्यपि ज्ञानवानपि चारित्रेण हीनो रहितो ज्ञानस्यैव केवलं भागी संविभागी भव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति, न तु सुगतेर्मोक्षरूपायाः संविग्नागी भवति. अतः क्रियायुक्तं ज्ञानं वरमित्यर्थः ॥ २६ ॥

॥ मूलम् ॥—संपागमपडिसेवी । काएसु वएसु जो न उज्जमइ ॥ पवयणपाभणपरमो । सम्मत्तं कोमलं तस्स ॥ २७ ॥ व्याख्या—' संपागड इति ' संप्रकटं लोकसमक्षं प्रतिसेवते निषिद्धमाचरतीत्येवंशीलः, ' काएसुत्ति ' षट्कायपालनेषु ' वएसुत्ति ' पंचमहाव्रतरक्षणेषु यो ' न उज्जमइत्ति ' नोद्यमं करोति, प्रमादं सेवते इत्यर्थः, प्रवचनस्य श्रीजिनशासनस्य पातनं लघुताकरणं, तस्मिन् परमस्तत्परः, य एतादृशस्तस्य सम्यक्त्वं कोमलमसारं बोधव्यं, अर्थात्तस्य मिथ्यात्वमित्यर्थः ॥ २७ ॥

॥ मूलम् ॥—चरणकरणपरिहीणो । जइवि तवं चरइ सुट्ठु अइगुरुअं ॥ सो तिल्लं च किणंतो । कंसियबुड्ढो मुणेयव्वो ॥ २८ ॥ व्याख्या—' चरण इति ' चरणं महाव्रताद्याचरणं, करणमाहारशुद्ध्यादिकं, ताभ्यां परिहीनो रहित एतादृशः पुमान् यद्यपि ' सुट्ठु इति ' अतिशयेनातिगुरुकमतिमहत्तपश्चरति तपः करोति, तथापि स पुमान् ' तिल्लं इति ' तिलानर्पयित्वा तैलं गृह्णन् बहूंस्तिलान् हारयति. ' कंसियत्ति ' आदर्शेन ददन् गृह्णन् वा, आ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दर्शपृष्टेन तिलान् ददाति, समेनादर्शेन च तैलं गृह्णाति, तदा स बहून् तिलान् हारयति. अत्र ' बुद्धो इति ' बोऽग्रामवासी मूर्खस्तस्य दृष्टांतो ज्ञेयः, यथा तेन स्वल्पतैललाभेन बहुतिला हारिताः, तथा स्वल्पेनापि चारित्रशैथिल्येन बह्वपि तपो हारयतीत्यर्थः ॥ २८ ॥

॥ मूलम् ॥—छज्जीवनिकायमहव्व–याण परिपालणाए जइधम्मो ॥ जइ पुण ताइ न रक्खइ ! ऩणाहि को नाम सो धम्मो ॥ २९ ॥ व्याख्या—' छज्जीवनिकाय इति ' षड्जीवनिकायानां पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाणां, महाव्रतानां प्राणातिपातविरमणादीनां या प्रतिपालना सम्यग्रक्षणं, तेनैव यतिधर्मः साधुधर्मो ऩवति. यदि पुनस्तानि जीवनिकायमहाव्रतानि न रक्षति, न पालयति, तदा हे शिष्य त्वं ऩणाहि कथय? नामेति कोमलामंत्रणे, स को धर्मः? अपितु न कोऽपीत्यर्थः ॥ २९ ॥

॥ मूलम् ॥—जीवनिकायदया–विवज्जिन नेव दिक्खिन न गीही ॥ जइधम्माउ चुक्को । चुक्कइ गिहिदाणधम्माउ ॥ ३० ॥ व्याख्या—' जीव इति ' षड्जीवनिकायदयारहितो वेषधारी, नैव दीक्षितः साधुः कथ्यते, नैव गृही गृहस्थः कथ्यते मस्तकमुंडत्वात्. यतिधर्मात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

'चुक्को इति' भ्रष्टः सन्, गृहिणां दानधर्मादपि 'चुक्कइत्ति' भ्रष्टो भवति. यतस्तद्दानं शुद्धसंयमवतां न कल्पते. ॥ ३० ॥

॥ मूलम् ॥—सव्वाणंगे जह कोइ । अमच्चो नरवइस्स घित्तूणं ॥ सेआणाहरणे पावइ । वहबंधणदव्वहरणं च ॥ ३१ ॥ व्याख्या—'सव्वाणंगे इति' यथा कोऽपि कश्चिदमात्यः प्रधानो नरपते राज्ञः सर्वानायोगानधिकारव्यापारान् 'घित्तूणं इति' पूर्वं गृहीत्वा पश्चाच्च आज्ञाहरणे कदाचिदुल्लंघिते सति प्राप्नोति, वधो लकुटादिना मारणं, बंधनं शृंखलादिना, द्रव्यहरणं सर्वस्यापहारः, चकारान्मरणमपि, आज्ञाभंगकारित्वात् ॥ ३१ ॥

॥ मूलम् ॥—तह छक्कायमहव्वय—सव्वनिवित्तीउ गिह्निऊण जई ॥ एगमवि विराहंतो अमच्चरण्णो हणइ बोहिं ॥ ३२ ॥ व्याख्या—'तह इति' तथा तेन दृष्टांतेन षट्काया महाव्रतानि च, तेषां सर्वनिवृत्तीः सर्वप्रत्याख्यानानि नियमान् 'गिह्निऊण इति' गृहीत्वा यतिः साधुस्तेषां मध्ये एकमपि जीवकायं, अथवैकमपि व्रतं विराधयन् अमर्त्यराज्ञस्तीर्थंकरदेवस्य बोधिं तदर्पितां बोधिं हंति नाशयति. जिननृपाज्ञाभंगे बोधिनाशेऽनंतसंसारित्वमित्यर्थः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—तो हयबोहि पत्ता । कयावराहाणुसरिसमियममियं ॥ पुणोवि भ-वोअहिपडिउं । भमइ जरामरणदुग्गंमि ॥ ३३ ॥ व्याख्या—' तो हय इति ' तदनंतरं हता बोधिर्येनैतादृशः, पश्चात् कृतो योऽपराधो जिनाज्ञाभंगरूपस्तस्य ' अणुसरिसमियं इति ' तस्यानुसारेणाऽनुमानेन सदृशमिदं प्रत्यक्षममितं मानरहितं फलं प्राप्नोति, किं तत्फलमित्याह—' पुणोवित्ति ' पुनः पुनर्भव एवोदधिः समुद्रस्तस्मिन् पतितः सन् भ्रमति, संसारभ्रमणरूपं फलं प्राप्नोतीत्यर्थः, कीदृशे भवसमुद्रे? जरा वृद्धत्वं, मरणं प्राणवियोगस्ताभ्यां दुर्गोऽतिगहनस्तस्मिन् ॥ ३३ ॥

॥ मूलम् ॥—जइयाणेणं चत्तं । अप्पणयं नाणदंसणचरित्तं ॥ तइया तस्स परेसु । अणुकंपा नत्थि जीवेसु ॥ ३४ ॥ व्याख्या—' जइया इति ' यदाऽनेन निर्भाग्येन जीवेन चत्यक्तं, किं? ' अप्पणयं इति ' आत्मनो हितकारकं ज्ञानदर्शनचारित्रं, ज्ञानं च दर्शनं च चारित्रं चेति समाहारद्वंद्वः, तदा इति तस्मिन्नवसरे तस्य परेष्वात्मभिन्नेषु जीवेषु अनुकंपा नास्ति, एतावता यः स्वात्मनो हितकारको न भवति, स परेषां कथं हितमाचरतीत्यर्थः, ॥ ५३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वात्मदयामूला परात्मदयेत्यर्थः ॥ ३४ ॥

॥ मूलम् ॥–छक्कायरिकुण असंजयाण । लिंगावसेसमित्ताणं ॥ बहुअसंजमपवहो । खारो मइलेइ सुट्ठुअरं ॥ ३५ ॥ व्याख्या—' छक्काय इति ' षट्कायरिपूणां षट्कायविराधकानामसंयतानां मुक्तलमुक्तमनोवाक्काययोगानां, लिंगावशेषमात्राणां केवलं रजोहरणादिवेषधारकाणां, बहुर्महान् योऽसंयमोऽनाचारस्तत्समुत्पन्नं पापमपि असंयमस्तस्य प्रवहः प्रवाहः, कीदृशः ? ' खारोत्ति ' खारशब्देन ज्वलिततिलरक्कासदृशः, ' मइलेइत्ति ' मलिनीकरोत्यात्मानं ' सुट्ठुअरं इति गाढं सम्यक्प्रकारेण वा ॥ ३५ ॥

॥ मूलम् ॥—किं लिंगविकूरीधारणेण । कज्जंमि अट्ठिए गाणे ॥ राया न होइ सयमेव । धारयं चामराछोवे ॥ ३६ ॥ व्याख्या—' किं लिंग इति ' किमिति किं भवति ? लिंगो यतिवेषस्तस्य विकूरीशब्देनाडंबरस्तस्य धारणं, तेन वेषाडंबरकरणेन किं भवति ? यदि ' कज्जंमित्ति ' कार्ये संयमयतनारूपेऽस्थिते, एतावता यदि मूलतो न पालयति, तदा किमाडंबरेणेत्यर्थः, तत्र दृष्टांतमाह–स्थाने समीचीने स्थितः स्वयमेव गजाश्वादिविना राजा न भव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ति चामराटोपधारणेऽपि. गुणं विनाऽमंत्रकरणं व्यर्थमेवेत्यर्थः ॥ ३६ ॥

॥ मूलम् ॥—जो सुत्तत्थविणिच्चय–कयागमो मूलउत्तरगुणोहं ॥ उव्वहइ सया खलिउ। सो लिक्कइ साहुलिक्कंमि ॥ ३७ ॥ व्याख्या—' जो सुत्तत्थ इति ' यः साधुः सूत्रार्थयोर्विनिश्चयो निश्चयस्तथाज्ञानमिति यावत्. तेन ' कयागमोत्ति ' सिद्धांतज्ञाता, एतादृशः सन् मूलगुणोत्तरगुणसमूहं ' उव्वहइत्ति ' वहति धारयति सदा निरंतरं, अस्खलितो निरतीचारः सन्, स लिख्यते साधूनां चारित्रिणां लेख्यके, साधुगणनायां स गण्यते इत्यर्थः ॥ ३७ ॥

॥ मूलम् ॥—बहुदोससंकिलिट्ठो। नवरं मइलेइ चंचलसहावो ॥ सुट्ठु वायामंतो। कायं न करेइ किंचि गुणं ॥ ३८ ॥ व्याख्या—' बहुदोस इति ' बहुभिर्दोषैः रागद्वेषरूपैः ' संकिलिट्ठो इति ' संक्लिष्टो भृतो दुष्टचित्त इति यावत्, एतादृशः सन्, नवरं केवलं ' मइलेइत्ति ' मलिनं करोति. चंचलो विषयादिषु लुब्धः स्वभावोऽभिप्रायो यस्य सः, एतादृशः ' सुट्ठुवित्ति ' अतिशयेन ' वायामंतोत्ति ' परिषहादिदुःखं सहमानः ' कायंत्ति ' कायेन कृत्वा ' न करेइत्ति ' न करोति किंचिदपि स्तोकमपि गुणं कर्मक्षयादिरूपं ॥ ३८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—केसिंचि वरं मरणं । जीवियमन्नेसिमुन्नयमन्नेसिं ॥ दहुरदेविड्ढाए । अहियं केसिं च नन्नयंपि ॥ ३९ ॥ व्याख्या—' केसिंचित्ति ' संसारे केषांचित्पुरुषाणां मरणमेव वरं श्रेष्टं, अन्येषामुन्नयमपि जीवितमपि मरणमपि च वरं श्रेष्टं, दुर्दुरांकनामा देवस्तस्येद्धायामिदं बोध्यं, च पुनः केषांचिदुन्नयमपि जीवितमपि मरणामपि चाऽहितमहितकारि वर्त्तते. ॥ ३९ ॥ अत्रार्थसंप्रदायः कथानकात्सविस्तरमवसेयः, तत्र प्रथमं दर्दुरांकदेवस्य पूर्वभवस्वरूपं लिख्यते—

कौशांब्यां महापुर्यां शतानीको नृपो राज्यं करोति. तत्रैकः सेडुकनामा दरिद्री द्विजः परिवसति, तद्गृहे गर्भवती पत्नी वर्त्तते, आसन्नप्रसवकालया तया स्वभर्त्तुः कथितं मम सूतिका समागता, ततो घृतगुडाद्यानीय ममार्पय? तदा सेडुकेनोक्तं मयि तादृशी कला नास्ति, द्रव्यमंतरा कुतो घृतगुडादि लभ्यते. तदा स्त्रिया प्रोक्तं यद्यपि काचित्कला नास्ति, तथाप्युद्यमे कृते कलाप्राप्तिर्भविष्यतीति. यदुक्तं—प्राणिनामंतरस्थायी । न ह्यालस्यसमो रिपुः ॥ न ह्युद्यमसमं मित्रं । यं कृत्वा नाऽवसीदति ॥ १ ॥ एतत्स्त्रीवाक्यं श्रुत्वा फलं गृही-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वा राजसभायां गत्वा स राज्ञोऽग्रे फलं ढौकयामास; एवं प्रतिदिनं स राजसभायां फलं गृहीत्वा गच्छति, शतानीकराज्ञश्च सेवां करोति.

एतस्मिन्नवसरे कुतश्चित्कारणाच्चंपापतिना दधिवाहनेनागत्य कौशांबी वेष्टिता, तदाऽल्पबलत्वाच्छतानीके दुर्गमध्ये स्थिते प्रतिदिनं च युद्धे जायमाने वर्षाकालः समायातः, तदा दधिवाहनसैन्यमितस्ततश्चलितं, तदवसरे सेडुको वाटिकायां पुष्पाद्यर्थं गतः, तदा स्तोकं सैन्यं दृष्ट्वा समागत्य तेन नृपाग्रे कथितं, राजन्नद्य भवतां जयो भविष्यतीति श्रुत्वा ससैन्यः शतानीको निर्गतः, युद्धे जायमाने दधिवाहनस्य सैन्यं भग्नं, पश्चात्तदीयानि हस्त्यश्वादीनि गृहीत्वा शतानीको नगरमागतः, सेडुकं च बहुमानयत्, कथयतिस्म च भो सेडुक मार्गय यथेप्सितं? तदा तेनोक्तं स्वामिन् गृहे गत्वा स्त्रियमापृच्छ्य मार्गयिष्यामीति कथयित्वा गृहमागत्य स स्त्रियं पृच्छतिस्म. भो प्रिये तुष्टो ममोपरि शतानीको नृपो यथेप्सितं ददाति, अतः किं मार्गयामि? तदा स्त्रिया विचारितं वृद्धिं प्राप्तोऽयं ममापमानं करिष्यतीति संचिंत्य सा कथयतिस्म.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नो प्राणेश्वर यदि तुष्टो नृपस्तदा प्रतिदिनमीप्सितमाहारं दीनारदक्षिणां च याचस्व ? किमन्येन निजविक्रयगृहीतोज्जागरतुल्येन ग्रामनगराद्याधिपत्येनेति स्त्रीवाक्यं श्रुत्वा निर्ज्ञाग्येन तेनापि तदेव मार्गितं, पश्चाज्ज्ञा प्रतिदिनं प्रतिगृहं स एव निर्देशः कृतः, तदा लोका नृपर्युपरि तमाकारयितुमागच्छंति, सेडुकोऽपि दीनारलोभेनैकगृहे भोजनं कृत्वा गृहमागत्यांगुलिप्रक्षेपेण वमनं कृत्वा पश्चाद् द्वितीये गृहे भोजनार्थं गच्छति; इच्छमतृप्ततया भोजनं कुर्वन् सेडुकस्त्वक्विकारतो गलत्कुष्ठाद्यभिभूतो जातः.

हस्तचरणनक्रादीन्यंगानि गलितुं लग्नानि, परं स धनेन पुत्रादिपरिवारेण चाऽतीववृद्धो जातः, पश्चात्तदंगे रोगे व्याप्ते सति मंत्रिप्रमुखैः सेडुकायोक्तमतःपरं त्वया भोजनार्थं नाऽागंतव्यं, प्रतिगृहं त्वदीयं पुत्रं प्रेषय ? अथ तत्पुत्रः प्रतिगृहं भोजनार्थं गच्छति, दीनारदक्षिणां च गृह्णाति. अथ सेडुकः सर्वेषामप्यनिष्टो जातः, एकस्मिन् भिन्ने गृहे तं स्थापयंति, काष्टपात्रे भिन्नं तस्य भोजनं समर्पयंति, कोऽपि तं न जल्पयति, सर्वेऽपि कथयंति म्रियस्वाऽदृश्यो भवेति वधूप्रमुखाणां वाक्यानि समाकर्ण्योत्पन्नक्रोधेन सेडुकेन चिंतितमहं तदा सत्यो यदा सर्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नपि कुष्टिनः करोमीति संचिंत्य स्वपुत्रमाहूय स वदतिस्म. भो सुत शृणु? अहं वृद्धो जातो, मम मरणमासन्नमस्ति, ततोऽहं तीर्थं गमिष्यामि. अथ चाऽस्मत्कुलानामयमाचारोऽस्ति, यस्तीर्थंकरणार्थं गच्छति स प्रथमं मंत्रेण तृणान्यभिमंत्र्याजापुत्राय ददाति, एवं तं पुष्टं कृत्वा तदीयमांसेन कुटुंबभक्तिं विधाय पश्चाद्गच्छति. तत एकं ममाप्यजापुत्रमानीय समर्पय? पुत्रेणापि तथैव कृतं, स तमजं पार्श्वे स्थापयति, पूयक्लिन्नानि च तृणानि तस्य भक्षयति, एवं सोऽप्यजः कियता कालेन तद्रोगाक्रांतो जातः।

पश्चात्तं निहत्य तन्मांसेन कुटुंबपोषणं कृत्वाऽज्ञां गृहीत्वा स तीर्थयात्रार्थं निर्गतः, मार्गे तृषातुरेण तेन क्वापि प्रदेशे सूर्यतापतप्तं बहुपत्राच्छादितं क्वाथसदृशं हृदजलं पीतं, तत्पानत एव तस्य विरेचनं जातं, रोगरहितश्च जातः, पश्चात्स सेडुकः स्वशरीरशोभादर्शनार्थं कौशांब्यां समागतः, लोकैः पृष्टं कथं तव रोगो गतः? तेनोक्तं देवप्रभावेण, पश्चाद्गृहमागत्य तेन कुष्ठाभिभूताय कुटुंबाय कथितं, यादृशी मदीयाऽवज्ञा कृता तादृशं युष्माभिः सर्वैरपि फलमवाप्तं, कीदृशं मया कृतमिति श्रुत्वा सर्वैरपि धिक्कृतस्तवाऽदर्शनं भवत्विति कुटुंबेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नगरलोकेन च निर्ज्ञत्स्यं नगरान्निष्कासितः, पश्चाद्भ्रमन् स राजगृहनगरप्रतोल्यामागत्य स्थितः, तस्मिन्नवसरे तत्र श्रीमन्महावीरसमवसरणं ज्ञात्वा द्वारपालैः सेडुकायोक्तं, यदि त्वमस्मदीयस्थाने तिष्ठसि तदा वयं वीरमभिवंद्य समागच्छामः, तेनापि तत्प्रतिपन्नं, तेनोक्तं बुभुक्षितोऽस्मि, द्वारपालैरुक्तमत्रागतं द्वारदेवीनैवेद्यं यथेष्टं त्वमुपभुंक्ष्व? परमत्रैव त्वया स्थेयं, कुत्रापि न गंतव्यमिति तं शिक्षयित्वा ते सर्वेऽपि श्रीजिनं नंतुं गताः, पश्चात्क्षुधातुरेण तेनापि लपनश्रीवट्टकप्रमुखं देवीनैवेद्यमाकंठं भक्षितं, तृषा लग्ना, परं निषिद्धत्वाज्जलपानार्थं स न गतः, तथैव कर्मोदयतस्तृषाक्रांतोऽसौ जलध्यानेन मृत्वा तदासन्नवाप्यां मंडुकत्वेनोत्पन्नः।

कियता कालेन पुनरपि श्रीमन्महावीरस्वामिनस्तत्र समवसृताः, तदा जलभरणार्थमागताः पौरवनिताः परस्परमेवं कथयंति, सत्वरा भवथ? अद्य श्रीमद्वीरवंदनाय गमनमस्ति, धन्योऽद्यतनो दिवसो यस्मिन् श्रीवीरविभुदर्शनं करिष्याम इति स्त्रीणां वाक्यानि श्रुत्वेहापोहतस्तस्य मंडुकस्य जातिस्मरणमुत्पन्नं, सेडुकभवस्वरूपं तेन ज्ञातं, भगवद्वंदनार्थं निर्गतो मार्गे श्रेणिकनृपसैन्याश्वखुरप्रहारमर्दितो भगवद्ध्यानतो मृत्वा प्रथमस्वर्गे स दर्दुरां- ॥ ५३८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कनामा देवो जातः, अवधिज्ञानेन पूर्वभवस्वरूपं दृष्ट्वा कुष्टिस्वरूपं विकुर्व्य श्रेणिकसम्यक्त्वपरीक्षार्थं स भगवद्वंदनार्थमागतः, स्वकीयदेहतः पूयं गृहीत्वा भगवद्शरीरे चंदनवल्लेपं करोति. तद् दृष्ट्वा राज्ञः क्रोधः समुत्पन्नः, कोऽयं पापिष्टो भगवदवज्ञां करोति? यदायं बहिर्गमिष्यति, तदा तस्य सम्यक् शिक्षां दापयिष्यामीति यावत्स चिंतयति, तावद्भगवतश्छिक्का समागता, तदा तेन देवेन म्रियस्वेत्युक्तं, तदैव राज्ञश्छिक्कायां समागतायां चिरं जीवेत्युक्तं. एवमभयकुमारस्य छिक्कायां जीवाऽथवा म्रियस्वेत्युक्तं.

तदवसरे कालसौकरिकस्यापि छिक्का समागता, तदा मा जीव मा म्रियस्वेत्युक्तं. एतेषां वचनानां मध्ये भगवतो म्रियस्वेति यत्कथितं, तत् श्रुत्वा श्रेणिकेन क्रोधातुरेण सेवकायोक्तमयं पापात्मा कुष्टी यदा समवसरणाद्बहिर्गच्छति तदा बध्ध्वा रक्षणीयः पश्चाद्देशनांते स सुभटैरावेष्टितोऽप्याकाशे समुत्पतितः, राज्ञो विस्मयः समुत्पन्नः, समागत्य तेन भगवतः पृष्टं, भो स्वामिन् कथयत? कोऽयं कुष्टी? भगवता सर्वोऽपि सेडुकावदातो निरूपितः, सोऽयं दर्दुरांकनामा नवीनोत्पन्नस्तव परीक्षायै तव कुष्टिस्वरूपं दर्शयित्वा ममांगे दिव्यचंदनवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लेपं कृतवान्. पुनरपि श्रेणिकेन पृष्टं, कथयत स्वामिन् नवतश्चिल्लकायां समागतायां म्रियस्वेति कथमुक्तं? तदा नगवतोक्तं हे श्रेणिक ममात्र वेदनीयादीनि चत्वारि कर्माणि वर्त्तंत, मरणानंतरं च मुक्तिसुखं प्राप्स्यामि, अतो मम म्रियस्वेत्युक्तं. पुनस्तव चिरं जीवेति यदुक्तं तत्कारणं शृणु? अधुना त्वं राज्यसुखमनुनवसि, पश्चान्मरणानंतरं च नरकं यास्यसि, अतस्तव चिरंजीवेत्युक्तं. अनयकुमारस्यात्रापि धर्मकार्यं कुर्वतो राज्यसुखमस्ति, परनवेऽप्यनुत्तरविमाने यास्यति, ततस्तस्य जीवाथवा म्रियस्वेत्युक्तं. कालसौकरिकस्तु जीवन्नत्र नवे बहुहिंसादिपापं समाचरति, मृतः सन् परनवे सप्तमीं यास्यत्यतोऽस्य मा म्रियस्वेत्युक्तं. इयं चतुर्नंगी सर्वजीवेष्वपि योजनीया. अयं दर्दुरांकदेवस्य मनोऽनिप्रायो ज्ञेयः, इदं श्रुत्वा श्रेणिकेन नगवते विज्ञप्तं, स्वामिन् नवादृशा मम शिरसि गुरवस्तदा मम नरकगमनं कथं युज्यते? तदा नगवतोक्तं त्वया सम्यक्त्वात्प्रथमं नरकायुर्बद्धं, तन्न केनापि दूरीकर्त्तुं शक्यते. परं मा विषादं कुरु? आगामिन्यां चतुर्विंशतिकायां त्वं पद्मनाननामा तीर्थंकरो नविष्यसि, तत् श्रुत्वा हृष्टः श्रेणिकः पुनरपि विनुमापृन्नतिस्म, नगवंस्तादृशः कोऽप्युपायो न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वियते ? येनोपायेनाहं नरके न गच्छामि.

तदा भगवतोक्तं यदि त्वदीया कपीलानाम्नी दासी साधूनां भावेन दानं ददाति, अथ च यदि कालसौकरिकः प्रतिदिनं पंचशतमहिषान्न मारयति, तदा त्वमपि नरकं न यायाः, इति भगवतो वाक्यं श्रुत्वा भगवतमभिवंद्य गृहंप्रति चलितः श्रेणिकः, पुनरपि दर्दुरांकनामा देवः श्रेणिकसम्यक्त्वपरीक्षार्थमेकं यतिरूपं विकुर्व्य बहुमत्स्यमृतं जालं गृहीत्वा सन्मुखमागतः, श्रेणिकेनोक्तं किमिदं तव वेषधारिणो जालग्रहणं ? अथ चेद्धारयसि तदा किं मत्स्याद्याहारं करोषि ? अत्र श्रेणिकदेवप्रश्नोत्तरयोः काव्यं—कंथाचार्य श्लथः किं ननु शफरवधे जालमभ्यासि मत्स्यान् । तान् वै मद्योपदंशात्पिबसि मधु समं वेश्यया यास्यवश्यं ॥ दत्वारीणां गलेंही न तु तव रिपवो येन प्राप्ता अनघ्रि । चौरस्त्वं द्यूतहेतोः कितव इति कथं येन दासीसुतोऽस्मि ॥ १ ॥ इत्यादि बहुपरीक्षितोऽपि स धर्मान्न चचाल. ॥५४१॥

पश्चात्स सगर्भासाध्वीस्वरूपं गृहीत्वा सन्मुखमागतो, राज्ञोक्तं किमिदं तव व्रतिन्या गर्भस्वरूपं ? तयोक्तं सर्वा अपि व्रतिन्य एतादृगेव कर्म कुर्वंति; तदा राज्ञोक्तं तवैवायं कर्मोद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यो वर्त्तते, परमन्ये साधवः साध्व्यश्च सर्वथैवैतादृशा न भवंतीत्यचलचित्तं राजानं ज्ञात्वा दर्दुरांकः प्रत्यक्षीभूय तत्प्रशंसापूर्वकं तस्मै एकं हारमथ गोलकद्वयं च समर्पयित्वा स्वर्गं गतः राज्ञापि स हारश्चिल्लणायै समर्पितः, गोलकद्वयं च नंदायै समर्पितं. तदोत्पन्नेर्ष्यया नंदया स्तंभे तद्गोलकद्वयमास्फालितं, तदैकस्माद्गोलकात्कुंडलद्वयं निःसृतं, द्वितीयाच्च क्षौमयुगलं निःसृतं. तदा नंदाराद्धयतीव हृष्टा. पश्चात्कपिलामाकार्य राज्ञोक्तं त्वं साधूनां दानं देहि ? तयोक्तं नैतत्कार्यं मम समर्पणीयं, अन्यत्सर्वमपि करिष्यामि. तदा राज्ञा बलात्कारेण दानं दापयितुमारब्धं, तदा तयोक्तमहं न ददामि, दर्वीयं ददाति. तां मुक्त्वा नृपः कालसौकरिकमाहूयोक्तवान्, महिषमारणं त्यजेति. तेनोक्तं नाहं प्राणवल्लभां हिंसां त्यजामि. तदा राज्ञा सौधकूपे प्रक्षिप्तः, तथापि स तत्र पंचशतसंख्याकान् कर्दममृत्तिकामयांश्चित्रमहिषानालेख्य मारयति, तदा राज्ञा ज्ञातं सत्यं जिनवचो नान्यथा भवति. परमहं तीर्थंकरो भविष्यामीति स मनसि महानंदं प्राप. ॥ इति दर्दुरांकदेवसंबंधः सप्तषष्टितमः ॥

॥ मूलम् ॥—केसिं चिय परलोगो । अन्नेसिं इत्थ होइ इह लोगो ॥ कस्सवि उन्नवि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लोगा । दोवि हया कस्सवि लोगा ॥ ४० ॥ व्याख्या—' केसिं इति ' केषांचिज्जीवानां परलोकः परभवः समीचीनः, अन्येषां केषांचिज्जीवानां ' इहत्ति ' अत्रैव इहलोकः समीचीनः, कस्यापि पुण्यवतो द्वावपि लोकौ समीचीनौ, कस्यापि पापकर्मकारिणो द्वावपि इहलोकपरलोकौ हतौ नष्टौ ॥ ४० ॥

॥ मूलम् ॥—छज्जीवकायविरओ । कायकिलेसेहिं सुट्ठुगुरुएहिं ॥ न हु तस्स इमो लोगो । हवइ तस्सेगो परलोगो ॥ ४१ ॥ व्याख्या—' छज्जीव इति ' षड्जीवकायानां पृथिव्यादीनां विराधने विरतो निवृत्तीत्यर्थः, सुष्ठु अतिशयेन गुरुकैर्महद्भिः कायक्लेशैः कष्टैः पंचाग्निमासक्षपणादिकैः ' नहुत्ति ' न भवति तस्य तापसादेरयं लोकः समीचीनः, ' हवइत्ति ' भवति ' तस्सेत्ति ' तस्यैकः परलोकः समीचीनस्तस्य परभवे राज्यादिसुखप्राप्तेः ॥ ४१ ॥

॥ मूलम् ॥—नरयनिरुद्धमईणं । दंडियमाईणं जीवियं सेयं ॥ बहुवायंमिवि देहे । विसुष्पमाणस्स वरमरणं ॥ ४२ ॥ व्याख्या—' नरय इति ' नरके नरकविषये निरुद्धा स्थापिता मतिर्यैस्ते, एतादृशानां ' दंडियमाईणंत्ति ' मंत्रिप्रमुखाणां राज्यचिंताकारकाणां जीवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तमेव श्रेयः, पापकर्माचरणेन परत्रवे नरकदुःखप्राप्तेरित्यर्थः, 'बहुवायंमित्ति' समुत्पन्ने बहुरोगे, वेदनां सोढुमसमर्थे, एतादृशेऽपि देहे कायविषये 'विसुध्यमाणस्सत्ति' विशुद्ध्यमानध्यानस्य पुरुषस्य मरणं वरं श्रेष्ठं, यतस्तस्य परत्रवे सद्गतिप्राप्तिर्भवति ॥ ४२ ॥

॥ मूलम् ॥—तवनियमसुट्ठियाणं । कल्लाणं जीवियंपि मरणंपि ॥ जीवंतज्जंति गुणा । मयावि पुण सुग्गइं जंत ॥ ४३ ॥ व्याख्या—'तव इति' तपसि द्वादशविधे, नियमे गृहीतव्रते सुस्थितानां दृढानामेतादृशानां सुसाधूनां कल्याणकारि जीवितमपि, अथ च मरणमपि, नन्नयमपीत्यर्थः, यतो जीवतां धर्मवृद्धेः, परत्रवे सद्गतेरवाप्तेश्चेति. तदेवोत्तरार्द्धेनाह—जीवंतः संतो गुणानर्जयंति समुपार्जयंति. पुनर्मृता अपि च सद्गतिं स्वर्गमोक्षादिरूपां गच्छंति प्राप्नुवंति ॥ ४३ ॥

॥ मूलम् ॥—अहियं मरणं अहियं च । जीवियं पावकम्मकारीणं ॥ तमसंमि पडंति मया । वेरं वड्ढंति जीवंता ॥ ४४ ॥ व्याख्या—'अहियं इति' मध्यमं मरणं प्राणवियोगश्च पुनर्जीवितमपि प्राणधारणमप्यहितमहितकारि, केषां पुरुषाणां? पापकर्मकारिणामिति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पापकर्मकारकाणां, कथमहितं? तदाह—मृताः संतः 'तमसंमित्ति' तमसि तमोरूपेऽर्थान्नरकरूपे पतंति परभवे, जीवंतः संतो वैरं वैरभावं च वर्द्धयंति, अनेकजीवानां मारणेनेत्यर्थः ॥ मूलम् ॥—अवि इच्छंति य मरणं । न य परपीडं करंति मणसावि ॥ जे य सुविइयसुगइपहा । सोअरियसुअ जहा सुलसो ॥ ४५ ॥ व्याख्या—'अवि इति' च पुनर्मरणमपीच्छंति वांछंति स्वयं, परं न च इति नैव परस्य पीडां कुर्वंत्युत्पादयंति, मनसापि चित्तेनापि, कथं तर्हि कायेन वचसा च वांछंतीत्यर्थः, ये च पुरुषाः सुविदितसुगतिपथाः सुज्ञातसुगतिमार्गा वर्त्तंते, ते पुरुषाः सौकरिकः कालसौकरिकस्तस्य सुतः पुत्रः सुलसो यथा यादृशस्तादृशा बोध्याः, यथा सुलसेन परपीडा न कृता, तथा तेऽपि न कुर्वंतीत्यर्थः ॥ ४५ ॥ अथ सुलससंबंधः सविस्तरं कथ्यते—

राजगृहे पुरे महाक्रूरकर्मकारकोऽधर्मी कालसौकरिकनामा पशुवधकारको वसति, स प्रतिदिनं पंचशतमहिषाणां वधं करोति, कुटुंबपोषणं च करोति. तद्गृहे सुलसनामा पुत्रः, स चाऽभयकुमारसंसर्गेण श्रावको जातः, अथ कियता कालेन कालसौकरिकस्यांगे महांतो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोगाः समुत्पन्नाः, तद्वेदनाः स सोढुं न शक्नोति, बहुविलापपूत्कारादि च करोति. स्वजना बह्वप्यौषधं कारयंति, परं तस्य वेदना न शाम्यति. तदा पितृदुःखदुःखितेन सुलसेनाऽन्यकुमाराग्रे कथितं, तदाऽन्यकुमारेण कथितं भो सुलस त्वदीयोऽयं पिता महापापी नरकगतिगामी वर्त्तते, ततस्तस्य समीचीनौषधे कृते सातं न भविष्यति, अत एतस्य मध्यमौषधं कारय? यथा तस्य सौख्यं भवेत. अनयाऽन्यकुमारबुद्ध्या सुलसो गृहमागत्य पितुरंगे विष्टादिदुर्गंधवस्तुविलेपनं चकार. बदरीबब्बूलादीनां कंटकेषु तस्य शयनं कारयामास. कटुककषायतिक्तौषधार्पणेन गोमहिषीमूत्रपानेन स्वग्रामसूकरादिविष्ठाधूपदानेन राक्षसवेतालादीनां रूपदर्शनेन च स तस्यांगे महत्सौख्यमुत्पादयामास. एतत्प्रकारकरणेन सोऽप्यतिशयेन सौख्यं मन्यतेस्म. पश्चात्कालसौकरिको मृत्वा सप्तमपृथिव्यां नारकत्वेनोत्पन्नः, तस्य प्रेतकार्यं कृतं. पश्चात्कुटुंबेन सुलसायोक्तं त्वमपि पितृवत्पंचशतमहिषमारणेन कुटुंबपोषणं कुरु? कुटुंबरीतिं प्रवर्त्तय? सर्वेषां वृद्धश्च भवेति कुटुंबवाक्यं श्रुत्वा सुलसो वदतिस्म. एतत्पापकर्माहं न करोमि. पापाचरणेन नरकं गच्छतो मम न कोऽप्याधारः, श्रमां हिंसां जिह्वास्वादेन ये-

॥५४६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऽधमाः समाचरंति, तेऽवश्यं दुर्गतिगामिनो भवंति. यदि कंटकेऽपि भग्ने महद्दुःखमवाप्यते तर्हि अनाथाऽशरणपशूनां शस्त्रादिना घाते कृते यद्दुःखं जायते, तस्य किं कथनीयं? अतः सृतमनेन पापकुटुंबपोषणेन, मम हिंसाकार्यं नास्ति. तदा कुटुंबवर्गेणोक्तं तत्पापसंविभागं वयमपि करिष्यामः, परं कुलक्रमो न त्याज्यः ।

इत्यादि बहु कुटुंबाग्रहं ज्ञात्वा तेषां प्रतिबोधनार्थं परशुमादाय स स्वपादस्योपरि क्षिप्तवान्, अचेतनश्च भूत्वा भूमौ पतितः, पश्चाच्चेतनावलनानंतरं पूत्कारं कुर्वन् स सर्वं कुटुंबमाकार्य कथयतिस्म, मम महती वेदना वर्त्तते, अतो यूयं पृथक् पृथक् विविच्य मे वेदनां गृह्णीतेति श्रुत्वा कुटुंबेनोक्तं कथं परकीया वेदना गृहीतुं शक्यते? तदा सुलसेनोक्तं यदि मदीयेयं वेदना भवद्भिः स्तोकापि गृहीतुं न शक्यते, तदा कथं मदीयपापग्रहणे समर्था भविष्यथेति बुद्ध्या स सर्वं कुटुंबं प्रतिबोधयामास. पश्चात्तं व्यतिकरं ज्ञात्वाऽभयकुमारः सुलसगृहमागत्य समाधिं च परिपृच्छ्य कथयतिस्म, धन्योऽसि त्वं, येन नीचकुलोत्पन्नेनापि त्वया हिंसा नाद्दतेति तस्य बहुप्रशंसां कृत्वाऽभयकुमारो गतः, क्रमेण सुलसोऽपि बहुकालं श्राद्ध-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धर्मं परिपाल्य स्वर्गंजाग्बभूव. एवमन्येऽपि ये परपीडां न कुर्वंति, तेऽपि स्वर्गसौख्यभाजो भवंतीति सुलसदृष्टांतोऽष्टषष्टितमः ॥ ६८ ॥

॥ मूलम् ॥—मूलगकुंदंडगादाम–गाणि उच्छुलघंटिआइय ॥ पिंडेइ अपरितंतो । चउप्पया नत्थि य पसूवि ॥ ४६ ॥ व्याख्या—' मूलग इति ' पशूनां बंधनार्थं मूलकीलकः ' कुदंडगात्ति ' लघुवत्सबंधनकीलः ' कोलीडो ' इति लोकभाषया. दामगाणित्ति ' पशूनां रज्जुमयानि बंधनानि. उच्छुलशब्देन पशूनां गलघंटिका, इत्यादिपशुयोग्यान्युपकरणानि अपरिश्रांतः सन् पिंडयति मेलयति, परं गृहे चतुःपदा न संति, गोमहिष्योऽपि न वर्त्तंते, अथ च पशवोऽजैडकादयोऽपि न विद्यंते. एवं यथा पशुंविना पशूपकरणमेलनं व्यर्थं ॥ ४६ ॥

॥ मूलम् ॥—तह वत्थपायदंडग–भवगरणे जयणकज्जमुज्जुत्तो ॥ जस्सट्ठाए किलिस्सइ । तंचिय मूढो नवि करेइ ॥ ४७ ॥ व्याख्या—' तह इति ' तथा तद्वदविवेकी पुमान् वस्त्राणि कल्पकादीनि, पात्राणि, दंड एव दंडक इत्याद्युपकरण इत्युपकरणमेलनविषये यतनायाः कार्यार्थं ' उज्जुत्तो इति ' उद्युक्तः सन्नुपकरणानि मेलयतीत्यर्थः, ' जस्सट्ठाए इति '

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यदर्थं ' किलिस्सइत्ति ' क्लेशं सहते, तामेव यतनां ' चिय इति ' निश्चयेन नैव करोति मूर्खः, तत्र पूर्वोक्तः पशूपकरणदृष्टांतो ज्ञेयः ॥ ४७ ॥

॥ मूलम् ॥—अरिहंता भगवंतो । अहियं व हियं व नवि इहं किंचि ॥ वारंति कारयंति य । घित्तूणं जणं बला हत्थे ॥ ४८ ॥ व्याख्या—' अरिहंता इति ' अर्हंतो रागद्वेषरहिताः, भगो ज्ञानं विद्यते येषां ते भगवंतः, अहितं वाऽाचरतां पुरुषाणां ' हियंवत्ति ' हितं वाऽाचरतां नैव ' इहंति ' अस्मिन् संसारे किंचित्स्तोकमात्रमपि, अहितं न वारयंति, हितं च न कारयंति. ' घित्तूणं इति ' गृहीत्वा जनं बलात् हस्ते. तर्हि किं कुर्वंतीत्याह—॥ ४८ ॥

॥ मूलम् ॥—नवएसं पुण दिंति य । जेण चरिएण कित्तिनिलयाइं ॥ देवाणवि हुंति पहू । किमंग पुण मणुअमित्ताणं ॥ ४९ ॥ व्याख्या—' नवएसं इति ' पुनस्तत्तादृशमुपदेशं धर्मोपदेशं ते ददति, येनोपदेशेनाचरितेन, यस्मिन्नुपदेशे समाचरिते सतीत्यर्थः, कीर्त्तिनिलयानां कीर्त्तिस्थानानामेतादृशानां देवानामपि स प्रभुः स्वामी भवति, किं पुनः ' अंगेति ' शिष्यामंत्रणे मनुजमात्राणां मनुष्याणां प्रभुर्भवति, तत्र किमाश्चर्यमित्यर्थः ॥ ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—वरमउमकिरीडधरो । चिंचइञ्ज चवलकुंडलाहरणो ॥ सक्को हिउवएसा । एरावणवाहणो जाउ ॥ ५० ॥ व्याख्या—' वर इति ' वरः प्रधानः ' मउडशब्देन ' अग्रेतनभागो यस्यैतादृशं यन्मुकुटं तस्य धरो धारको वरमुकुटधारीत्यर्थः, ' चंचइञ्जत्ति ' बाहुरक्षाद्याभरणोपशोभितः, कर्णयोश्चपलकुंडलाभरणः, एतादृशः शक्र इंद्रो हितोपदेशाश्रितकारिजिनोपदेशादैरावणवाहनो जातः समुत्पन्नः कार्त्तिकश्रेष्ठिभवे हितजिनोपदेशश्रवणादेव स इंद्रत्वं प्राप्त इत्यर्थः ॥ ५० ॥

॥ मूलम् ॥—रयणुज्जलाइं जाइं । बत्तीसविमाणसयसहस्साइं ॥ वज्जहरेण वराइं । हिउवएसेण लद्धाइं ॥ ५१ ॥ व्याख्या—' रयणुत्ति ' रत्नैरुज्ज्वलानि यानि देदीप्यमानानि द्वात्रिंशत्संख्याकानि विमानशतसहस्राणि, द्वात्रिंशल्लिमानलक्षाणीत्यर्थः, वज्रायुधधारकेणेंद्रेण वराणि प्रवराणि हितोपदेशेन वीतरागवचनाराधनेनैव लब्धानि प्राप्तानि ॥ ५१ ॥ ॥ ५५०॥

॥ मूलम् ॥—सुरवइसमं विभूइं । जं पत्तो नरहचक्कवट्टीवि ॥ मणुस्सलोगपहुत्तं । जाण हिउवएसेण ॥ ५२ ॥ व्याख्या—' सुरवइत्ति ' सुरपतिसमामिंद्रतुल्यां विभूतिं संपत्तिं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यत्प्राप्तो भरतनामा चक्रवर्त्यपि, मनुष्यलोकस्य षट्खंडभरतस्य प्रभुः स्वामी जातः, हे शिष्य तज्जानीहि हितोपदेशेन वीतरागवचनाराधनेनैव ॥ ५२ ॥

॥ मूलम् ॥—लद्धूण तं सुइसुहं । जिणवयणुवएसममयबिंदुसमं ॥ अप्पाहियं कायव्वं । अहियेसु मणं न दायव्वं ॥ ५३ ॥ व्याख्या—' लद्धूण इति ' लब्ध्वा प्राप्य तत्प्रसिद्धं श्रुतिसुखं कर्णसुखकारकं जिनवचनोपदेशं, कीदृशं ? अमृतबिंदुसदृशं जिनवचनं श्रुत्वेत्यर्थः, पंडितेनाऽऽत्मनो हितं हितकारिधर्मानुष्ठानादि कार्यं ' अहिएसुत्ति ' अहितेषु पापेषु मनोऽपि मनोमात्रमपि न दातव्यं, कायवचसोस्तु का कथेत्यर्थः ॥ ५३ ॥

॥ मूलम् ॥—हियमप्पणो करंतो । कस्स न होइ गुरुअ गुरु गणो ॥ अहियं समायरंतो । कस्स न विप्पच्चअ होइ ॥ ५४ ॥ व्याख्या—' हियमिति ' आत्मनो हितं धर्मानुष्ठानादि कुर्वन् कस्य गुरुको गुरुस्थानीयो गुरुः प्रधानो गुरुर्न भवति? अपि तु सर्वस्यापि भवतीत्यर्थः, कीदृशः ? गण्यो गणेयः पृष्ठांकर्तुं योग्यो भवति. अहितं पापं समाचरन् पुमान् कस्य न विप्रत्ययः? प्रत्ययरहितो न भवति ? अपि तु सर्वस्याप्यविश्वासभाजनं भवतीत्यर्थः ॥ ५५१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—जो नियमसीलतवसंजमेहिं । जुत्तो करेइ अप्पहियं ॥ सो देवयंव पुजो । सीसे सिद्धत्थव्व जणे ॥ ५५ ॥ व्याख्या—' जो इति ' यः पुमान् नियमाः प्रत्याख्यानानि, शीलं सदाचारः, तपः षष्ठाष्टमादि, संयमश्चारित्रं, एतैर्युक्तः सन् सहितः सन् आत्महितं धर्मानुष्ठानादि करोति, स पुमान् दैवतमिव पूज्यो भवति ' सीसे इति ' शीर्षे मस्तके वहति तदाज्ञां लोको मस्तके वहतीत्यर्थः, क इव ? सिद्धार्थक इव, यथा श्वेतसर्षपो मस्तके भ्रियते, जने इति लोकमध्ये ॥ ५५ ॥

॥ मूलम् ॥—सव्वो गुणेहिं गरुओ । गुणाहिअस्स जह लोए वीरस्स ॥ संभंतमणमविभवो । सहस्सनयणो सययमेइ ॥ ५६ ॥ व्याख्या—' सव्वो इति ' सर्वो गुणैर्गरुयः पूज्यो भवतीति शेषः, ' जह इति ' यथा ' लोएत्ति ' लोकमध्ये गुणाधिकस्य वीरस्य श्रीवर्द्धमानस्य संभ्रांतश्चपलो मुकुटविटपो मुकुटप्रांतो यस्येदृशः सहस्रनयन इंद्रः सततं निरंतरं ' एइत्ति ' आगच्छति वंदनार्थमित्यर्थः, अतो गुणत्वमेव पूज्यत्वहेतुरित्यर्थः ॥ ५६ ॥

॥ मूलम् ॥—चोरिक्कवंचणाकूड—कवमपरदारदारुणमइस्स ॥ तस्स चिय तं अहियं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुणोवि वेरं जणो वहइ ॥ ५७ ॥ व्याख्या—' चोरिक्क इति ' चोरिक्कं स्तेयकर्म, वंचनं, परेषां कूटशब्देनाऽलीकभाषणं, कपटं मायाकरणं, परदारशब्देन परस्त्रीसेवनं, एतेषु पापस्थानेषु दारुणा मलिना मतिः प्रवृत्तिर्यस्यैतादृशस्य तस्य पुरुषस्य ' चिय इति ' निश्चयेन ' तं इति ' तत्पूर्वोक्तपदार्थाचरणमहितं नरककारणं ज्ञेयं, पुनरपि तस्योपरि जनो लोको वैरं द्वेषं वहति धारयति ॥ ५७ ॥

॥ मूलम् ॥—जइ ता तणं कंचण । लेट्ठुरयणसरिसोवमो जणो जाउ ॥ तइया ननु वुच्छिन्नो । अहिलासो दव्वहरणंमि ॥ ५८ ॥ व्याख्या—' जइ इति ' यदि तावत्तृणं कंचनं, लेष्टुशब्देन पाषाणः ' रयणत्ति ' रत्नं, एतेषु सदृशमौपम्यं यस्य, तृणकंचनयोः साम्यं, लेष्टुरत्नयोश्च साम्यं यस्य मनसि वर्त्तते, एतादृशो जनो लोको यदा जातः ' तइयात्ति ' तदा ननु निश्चितं व्युच्छिन्नस्तुटितोऽभिलाषः ' दव्वहरणंमित्ति ' परद्रव्यहरणविषये ॥ ५८ ॥

॥ मूलम् ॥—आजीवगगणनेया । रज्जसिरिं पहिऊण य जमाली ॥ हियमप्पणो करिंतो । न य वयणिज्जे इह पमंतो ॥ ५९ ॥ व्याख्या—' आजीवग इति ' आजीवका वेष-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मात्रेण जीवंतीत्येवंशीला निह्नवा इत्यर्थः, तेषां गणः समुदायस्तस्य नेताऽधिकारी गुरुः 'र-
ज्जसिरिंत्ति ' राज्यलक्ष्मीं ' पहिऊणयत्ति ' त्यक्त्वा, च शब्दात्सिद्धांतं पठित्वापि ' जमाली-
त्ति ' जमालिनामा श्रीमहावीरजामाता, यद्यात्मनो हितं धर्मानुष्ठानाद्यकरिष्यत्तदा न च व-
चनीये निंदायां ' इहत्ति ' इह लोकेऽथ च शासनेऽपतिष्यत्. ॥ ५९ ॥ अत्र जमालिनिद-
र्शनं लिख्यते—

कुंडपुरे नगरे कश्चिन्महर्द्धिको जमालिनामा क्षत्रियः परिवसति, यौवनं प्राप्तः श्रीमहा-
वीरपुत्रीपाणिग्रहणं चकार. अन्या अपि राजकन्यास्तेन परिणीताः, पंचविषयानुपभुंजन्नेक-
दा श्रीमन्महावीरवंदनार्थं स गतः, देशनां श्रुत्वा संसारासारतां ज्ञात्वा राजकुमाराणां पंच-
भिः शतैः सार्द्धं समहोत्सवं स चारित्रं जग्राह. सुदर्शनयापि बहुस्त्रीपरिवारेण चारित्रं गृही-
तं, पंचशतान्यपि राजकुमारणां जमालेः शिष्यत्वेन समर्पितानि. स एकादशांगान्यधीतवा- ॥५५४॥
न्. षष्ठाष्टमादितपः कुर्वन् भगवत्समीपमागत्य भिन्नविहाराज्ञां मार्गितवान्, परं भगवता
न दत्ता. ततो भगवदाज्ञां विनैव पंचशतशिष्यपरिवृतोऽसौ बहिर्विजहार. विहरन्नेकदा श्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वस्त्यां कोष्टकवने समवसृतः, तत्र जमालिशरीरे महाज्वरः समुत्पन्नः, तेन वेदनामसहमानः शिष्यमाकार्य संस्तारयेत्यादिष्टवान्. तदा शिष्येणापि स प्रारब्धः, पुनरपि वेदनामसहमानः पृष्टवान्, संस्तारकः कृत? शिष्येणोक्तं कृतः, स्वयमागतो विलोक्य शिष्यमुक्तवान्, त्वया संस्तारकः क्रियते, कृत इत्यसत्यं कथमुक्तं? शिष्येणोक्तं भगवद्वाक्यं 'कडमाणे कडे' इति क्रियमाणं कृतमेवेति श्रुत्वा जमालिः प्रोवाच, हे शिष्य एतद्भगवद्वचनमसत्यं, यतः प्रत्यक्षेणेदं विरुद्धं दृश्यते, अतीतवर्त्तमानकालयोर्महान् विरोधः, अतः करणानंतरं कृतमित्युच्यते, न तु क्रियमाणं कृतमिति. तदा शिष्येणोक्तं यथा कश्चिच्चलनायोद्यतो ग्रामबहिःप्रदेशे स्थितोऽपि चलित इत्युच्यते, स्तोकेऽपि भग्ने भाजने भग्नमितिशब्दव्यवहारः श्रूयते, स्तोकेऽपि स्फटिते वस्त्रे स्फटितशब्दव्यवहारः, तथा क्रियमाणमपि कृतमिति कथ्यते, 'कडमाणे कडे' इति निश्चयसूत्रं. यदा प्रथमसमये कार्योत्पत्तिर्न मन्यते, तदा द्वितीयेऽपि न, एवं तृतीयादिष्वपि न, तदांत्यसमये कार्यसिद्धिरिष्टा, एवं सति प्रथमादिसमयानां वैयर्थ्यं स्यात्. न ह्यंत्यसमये एव सर्वकार्यसिद्धिर्दृश्यते, इत्यादियुक्त्या बोधितोऽपि स न कदाग्रहं मुमोच.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदा शिष्यैरयोग्योऽयं जिनवचनोत्थापकः स्वकीयमतस्थापको निह्नव इति ज्ञात्वा, केचन शिष्या भगवत्समीपमागताः, पश्चाज्जमालिरपि नीरोगी जातो विहारं कुर्वन् चंपानगर्यां भगवत्समीपमागत्य कथयतिस्म, नाहं भविष्यवद्यस्थः, अहं केवली भगवानस्मि. तदा श्रीगौतमेन पृष्टं, यदि त्वं केवली वर्त्तसे तदा कथय? लोकः शाश्वतोऽशाश्वतो वा? जीवः शाश्वतोऽशाश्वतो वेति. तदा जमालिः प्रत्युत्तरं दातुमसमर्थस्तूष्णीं स्थितः, गौतमेनोक्तं भो जमाले त्वं केवलीति नाम यदि धारयसि, तत्कथमुत्तरं दातुं न शक्नोषि? अहं छद्मस्थोऽप्येतज्जानामि, तच्छृणु? लोको द्विधा शाश्वतोऽशाश्वतश्च. तत्र द्रव्यतः शाश्वतो नित्यः, उत्सर्पिण्यवसर्पिण्यादिकालप्रमाणेनाऽशाश्वतश्च. तथा जीवोऽपि द्रव्यतो नित्यः, देवमनुजतिर्यग्नरकगतिपर्यायतोऽनित्यश्चेति. एतदश्रद्दधानो जमालिर्विहरन् श्रावस्त्यां गतः, सुदर्शनासाध्व्यापि जमालिमतमंगीकृतं, सापि तन्नगरमध्ये ढंकनाम्नो भगवदुपासकस्य कुंभकारस्य शालायां स्थिता लोकानामग्रे जमालिमतस्वरूपं कथयति. तद् ढंकेनापि श्रुतं, मनसि च स चिंतयति, विलोकयत कर्मवैचित्र्यं यदियं भगवत्पुत्र्यपि कर्मवशतोऽसत्यं प्ररूपयति; तदिमां ॥५५६॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चेत्केनाप्युपायेन प्रबोधयामि तदा महत्फलं भवतीति विचार्यैकदा पौरुषीमध्ये स्वाध्यायं कुर्वत्याः सुदर्शनासाध्व्याः शाटिकोपरि तेनैकोंगारो निक्षिप्तः, शाटिकायां च द्वे त्रीणि छिद्राणि जातानि. तानि दृष्ट्वा सुदर्शनयोक्तं भो श्रावक किमिदं कृतं? मदीयेयं शाटिका ज्वालिता. ढंकेनोक्तं मैवं वद? भगवन्मतमेतत्, भगवता हि ज्वलितुमारब्धं ज्वलितमिति कथितं, भवतां तु समग्रज्वलनानंतरं ज्वलितमिति मतं. अतो मन्यस्व भगवद्वचनं सत्यं. इति ढंकबुद्ध्या सुदर्शनयापि तत्सत्यमिति प्रतिपन्नं; जमालिसमीपमागत्य कथयतिस्म, भगवद्वाक्यं सत्यं, भवन्मतं तु प्रत्यक्षेणाऽसत्यं; इत्थमुक्तेऽपि कर्मवशतस्तेन न प्रतिपन्नं. पश्चात्सुदर्शनापि भगवत्समीपे समागत्य मिथ्यादुष्कृतं दत्वा चारित्रं प्रपाल्य केवलज्ञानमवाप्य मोक्षं जगाम. जमालिस्तु निह्नवः सन् बहुदिनानि कष्टं विधाय पंचदशदिवसान् यावदनशनं विधाय विराधकत्वात्किल्बिषदेवत्वेनोत्पन्नः, ततश्च्युत्वा स बहुकालं संसारपरिभ्रमणं करिष्यति. इत्थं यथा जमालिना जिनवचनोड्डापनेन बहुलसंसारित्वं प्राप्तं, तथाऽन्योऽपि जिनाज्ञाविराधकोऽमुत्र परत्र च निंदादुर्गतिभाजनं भवति, बहुसंसारं च परिभ्रमति. अतो जिनवचनं सत्यतया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रद्धेयमिति भावः ॥ इति जमालिसंबंध एकोनसप्ततितमः ॥ ६९ ॥

॥ मूलम् ॥—इंदियकसायगारव—मएहिं सययं किलिट्ठ परिणामो ॥ कम्मघणमहा-जालं । अणुसमयं बंधइ जीवो ॥ ६० ॥ व्याख्या—' इंदिअ इति ' इंद्रियाणि स्पर्शेंद्रियादीनि, कषायाः क्रोधादयः, गारवशब्देन रससातर्द्धिगारवत्रयं, मदा जात्यादयः, एतैः कारणभूतैः सततं निरंतरं क्लिष्टपरिणामो मलिनपरिणामो दुष्टपरिणामे वर्त्तमानः, एतादृशः सन्नयं जीवः संसारी, कर्माण्येव घना मेघास्तेषां महान् जालो महासमूहस्तमनुसमयं प्रतिसमयं बध्नाति, कर्ममेघपटलेन ज्ञानचंद्रमाच्छादयतीति भावः ॥ ६० ॥

॥ मूलम् ॥—परपरिवायविसाला । अणेगकंदप्पविसयभोगेहिं ॥ संसारत्था जीवा । अरइविणोअं करंति एवं ॥ ६१ ॥ व्याख्या—' पर इति ' परपरिवादेन परावर्णवादेन विशालाः प्रचुरा इत्यर्थः, अनेकैरनेकप्रकारैः कंदर्पविषयभोगैः, कंदर्पो हास्यादिकरणं, विषयाः शब्दादयस्तेषां भोगैरासेवनैः संसारस्थाः संसारवासिनो जीवाः ' अरइत्ति ' परेषामरतिसमुत्पादको यो विनोदस्तं कुर्वंति. एवममुना प्रकारेण परपरितापोत्पादनेन स्वात्मनः सुखमु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्पादयंतीत्यर्थः ॥ ६१ ॥

॥ मूलम् ॥ —आरंन्नपायनिरया । लोइयरिसिणो तहा कुलिंगिअ ॥ दुहउ चुक्का न वरं । जीवंति दरिद्द जियलोए ॥ ६२ ॥ व्याख्या—' आरंन्न इति ' आरंन्नः पृथिव्याद्युपमर्दैः, पाकः पाकक्रिया, तयोर्निरता आसक्ताः, एतादृशा लौकिका ऋषयस्तापसादयः, ' दुहउ इति ' यतिधर्मादश्च श्राद्धधर्माद् द्वाभ्यामपि ' चुक्का इति ' भ्रष्टाः, न वरं केवलं दरिद्रिणः संतो जीवंति जीवलोके संसारे ॥ ६२ ॥

॥ मूलम् ॥—सव्वो न हिंसियव्वो । जहमहिपालो तहेव दगपालो ॥ न य अन्नयदाणवइणा । जणोवमाणेण होयव्वं ॥ ६३ ॥ व्याख्या—' सव्वो इति ' सर्वोऽपि जीवमात्रो न ' हिंसियव्वोइति ' न मारणीयः, यथा महीपालो राजा, तथोदकपालोऽपि रंकोऽपि ज्ञेयः, राजानमथ रंकं च समतया गणयति, एकमपि नो परान्नवतीत्यर्थः, न चाऽन्नयदानव्रतधारकेण साधुना जनाः समान्यलोकास्तेषामुपमानेन भवितव्यं, कृते प्रतिकृतं कुर्यादितिन्यायं नाचरंतीत्यर्थः ॥ ६३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—पाविज्जइ इह वसणं । जणेण तं उगलउ असंतुत्ति ॥ न य कोइ सोणियबलिं । करेइ वग्घेण देवाणं ॥ ६५ ॥ व्याख्या—' पाविज्जइत्ति ' क्रमां कुर्वन्नेतादृशः प्राणी इहास्मिन् संसारे व्यसनं निंदारूपं कष्टं प्राप्यते जनेन लोकेन, लोकमध्ये इत्यर्थः, तं क्रमां कुर्वंतमयं ' असंतुत्ति ' असमर्थश्छागो वर्त्तते, इति लोकास्तमुपहसंति, यतः परेण पीड्यमानोऽप्ययं क्रमां करोति, अतोऽयमसमर्थोऽजापुत्रतुल्य इति लोका कथयंति, न च कोऽपि पुमान् शोणितेन रुधिरेण बलिदानं करोति. कस्य रुधिरेण ? ' वग्घेणत्ति ' व्याघ्रस्य रुधिरेण. केषां? देवानां. अतः कारणादसमर्थ एव हन्यते, न तु बलवानेति श्रुत्वा न क्रमां त्यजतीत्यर्थः ॥ ६६ ॥

॥ मूलम् ॥—वच्चइ खणेणं जीवो । पित्तानिलधाउसिंभिखोब्भेहिं ॥ उज्जमह मा विसीअह । तरतमजोगो इमो दुलहो ॥ ६७ ॥ व्याख्या—' वच्चइत्ति ' व्रजति गच्छति ' खणेणंति ' क्षणमध्ये अयं जीवः, ' पित्तं ' पित्तविकारः, अनिलो वायुः, धातुः, ' सिंभित्ति ' श्लेष्म, तेषां क्षोभा विकारास्तैः, पित्तादीनां बहुप्रकोपैरित्यर्थः, ' उज्जमहत्ति ' उद्यमं कुरुत ?

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्षमादिधर्मणि, ' मा विसीअहत्ति ' मा श्लथाचारा भवत? अयं तरतमयोगो वर्द्धमानधर्म-सामग्रीयोगः पुनरपि दुर्लभो वर्त्तते. ॥ ६५ ॥

॥ ५६१ ॥

॥ मूलम् ॥—पंचिंदियत्तणं माणु–सत्तणं आयरियजणे सुकुलं ॥ साहुसमागमसुणणा । सद्दहणारोगपव्वज्जा ॥ ५७ ॥ व्याख्या—' पंचिंदियत्तणं इति ' पंचेंद्रियत्वं पंचेंद्रियजाति-मत्त्वं दुर्लभं, पंचेंद्रियत्वे लब्धेऽपि मानुष्यं मनुष्यावतारो दुर्लभो, मानुष्ये सत्यपि ' आय-रियजणेत्ति ' आर्यदेशे मगधादिके भत्पत्तिर्दुर्लभा, आर्यदेशोत्पत्तावपि सुकुलमुत्तमकुलं दुर्ल-भं, सुकुलेऽपि साधुसमागमः साधुसंयोगो दुर्लभः, साधुसंयोगेऽपि सूत्रश्रवणं दुर्लभं, श्रव-णे लब्धेऽपि श्रद्धानं दुर्लभं, श्रद्धानेऽप्यारोग्यं नीरोगत्वं दुर्लभं, नीरोगत्वे सत्यपि प्रव्रज्याग्र-हणं दुर्लभं ॥ ६६ ॥

॥ मूलम् ॥—आउं संविलंतो । सविलंतो बंधणाइं सव्वाइं ॥ देहट्ठिइं मूअंतो । ऊायइ कलुणं बहुं जीवो ॥ ६७ ॥ व्याख्या—' आउं इति ' आयुः ' संविलंतोत्ति ' संक्षेपयन्, स-र्वाणि बंधनान्यंगोपांगादीनि श्लथयन् शिथिलीकुर्वन्, देहस्थितिं कायावस्थां मुंचन्, पश्चादं-

॥ ५६१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तकाले स धर्मरहितो ' जीवोत्ति ' जीवः करुणं दीनस्वरं यथास्यात्तथा बहु ध्यायति, हा मया धर्मो न कृत इति बहु शोचयतीत्यर्थः ॥ ६७ ॥

॥ मूलम् ॥—इक्कंपि नत्थि तं सुट्ठु । सुचरियं जह इमं बलं मज्झं ॥ को नाम दढक्कारो । मरणंते मंदपुण्णस्स ॥ ६८ ॥ व्याख्या—' इक्कंपित्ति ' एकमपि नास्ति तत्सुष्ठु समीचीनं सुचरितं सम्यगाचरणं, ' जह इति ' यदिदमावरणं मम प्रबलं वर्त्तते; नामेति संभावनायां ' को इति ' कः? ' दढक्कारोत्ति ' आधारो भविष्यति मरणांते मरणकाले मंदपुण्यस्य मे क आधारो भविष्यतीत्यर्थः ॥ ६८ ॥

॥ मूलम् ॥—सूलविसअहिविसूइआ । पाणियसत्थग्गिसंभमेहिं च ॥ देहंतरिसंकमणं । । करेइ जीवो मुहुत्तेणं ॥ ६९ ॥ व्याख्या—' सूल इति ' शूलं कुक्षिशूलादि, विषं विषप्रयोगः, अहिशब्देन सर्पविषं, विसूचिकाऽजीर्णं, पानीयशब्देन जलबुडनं ' सत्थत्ति ' शस्त्रप्रहारः ' अग्गित्ति ' अग्निना ज्वलनं, संभ्रमो भयस्नेहादिनाह्लादरोधः, एतैः प्रकारैरयं जीवो देहांतरसंक्रमणं भिन्नदेशे प्रवेशं करोति, परभवे यातीत्यर्थः, ' मुहुत्तेणंति ' मुहूर्त्तमध्ये. अति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चपलं प्राणिनामायुरित्यर्थः ॥ ६९ ॥

॥ मूलम् ॥—कत्तो चिंता सुचरिय–तवस्स गुणसुट्ठिअस्स साहूस्स ॥ सुगइगमपम्हि-हत्थो । जो अत्तइ नियमन्नरिअन्नरो ॥ ७० ॥ व्याख्या—' कत्तो इति ' कुतश्चिंता शोचनं मरणकाले ? एतादृशस्य शोचनं न भवति, कीदृशस्य ? सुचरितं क्षमासहितमाचरितं तपो येन तस्य, पुनः कीदृशस्य ? गुणे चारित्रादिके सुस्थितस्य दृढस्य, एतादृशस्य साधोर्मरण-काले चिंता न भवतीत्यर्थः, ' सुगइत्ति ' सद्गतिगमने ' पम्हिहत्थो इति ' दक्षः समर्थ इति यावत्. यः साधुः ' अत्तइत्ति ' तिष्ठति. नियमा अभिग्रहास्तैः ' नरिअत्ति ' नृतो धर्मको-शस्य नरो नारो येन सः, साधुरेतादृश आस्ते ॥ ७० ॥

॥ मूलम् ॥—साहंतिय फुडविअडं । मासाहससउणसरिसया जीवा॥ न य कम्मना-रगुरुअ–त्तणेण तं आयरंति तहा ॥ ७१ ॥ व्याख्या—' साहंति य इति ' परेषामुपदेशमर्प-यंति, स्फुटं प्रकटाक्षरं ' वियडंत्ति ' विस्तारयुक्तं, के जीवा उपदेशं ददति ? मासाहसनामा अचलगुहावासी यः पक्षी, तेन सदृशास्तुल्याः, एतादृशा जीवाः, सउणशब्देन पक्षी, न च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कर्मभारगुरुत्वेन गुरुकर्मवत्तया ' तहा इति ' तथा स्वोपदेशवत्तत्स्वयं नाचरंति, उपदेशकुशला नत्वाचरणपरा जीवाः, मासाहसपक्षितुल्या इत्यर्थः ॥ ७१ ॥

॥ मूलम् ॥—वग्घमुहंमि अहिगओ । मंसं दंतंतरं च कट्टेइ ॥ मासाहसंति जंपइ । करेइ न हु तं जहा भणिअं ॥ ७२ ॥ व्याख्या—' वग्घमुहंमि इति ' व्याघ्रमुखेऽधिगतः प्रविष्टो मासाहसनामा पक्षी मांसं दंतांतराद्दंतमध्यात्कर्षयति, मांसखंडं गृहीत्वा च वृक्षोपरिस्थितो मांसं भक्षयित्वैवं वदति. ' मासाहसंति ' एतादृशं साहसं विश्वासं मा कोऽपि करोत्विति स्वयं जल्पति; करोति न तद्यथा भणितं, यादृशं भणति तादृशं न करोतीत्यर्थः, एवमन्येऽपि ये स्वयं भाषंते न तथाऽाचरंति, तेऽपि तत्तुल्या विनाशं प्राप्नुवंतीत्यर्थः ॥७२॥

॥ मूलम् ॥—परियट्टिऊण गंथत्थ–विच्छरं निहिसीऊण परमत्थं ॥ तं तह करेइ जह तं । न होइ सव्वंपि नरूपढिअं ॥ ७३ ॥ व्याख्या—' परियट्टिऊण इति परावर्त्य ग्रंथार्थविस्तरं सूत्रार्थविस्तारं सम्यग् घोषयित्वेत्यर्थः, परमार्थं तत्वार्थं ' निहिसीऊणत्ति ' सम्यक् परीक्ष्य तत्तथा करोति, बहुलकर्मा जीवो यथा तन्न भवति, मोक्षरूपकार्यसाधकं न भवति. तर्हि की-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृशं भवति? नटपठितमिव भवति, यथा नटपठितं निष्फलं, तथा सूत्राध्ययनमपि स तादृशं करोतीत्यर्थः ॥ ७३ ॥

॥ मूलम् ॥—पढइ नडो वेरग्गं । निविज्जिज्जा बहु न जणो जेण ॥ पढिऊण तं तह सिढिलो । जालेण जलं समोअरइ ॥ ७४ ॥ व्याख्या—' पढइत्ति ' यो नटो भवति स वैराग्यं वैराग्यवार्त्तां पठति, येन वैराग्यवचनेन बहुजनो बहुलोको ' निविज्जिज्जा इति ' निर्वेदं प्राप्नुयादिति यावत्, पठित्वापि पश्चात्स्वयं ' तं तह इति ' तत्तथा न करोति शठो मूर्खः सन्, किं करोति? ' जालेणत्ति ' जालं गृहीत्वा जलं समवतरति, मत्स्यग्रहणार्थं जलप्रवेशं करोति, तथा मूर्खोऽपि विपरीताचरणेन सूत्राध्ययनं व्यर्थयतीत्यर्थः ॥ ७४ ॥

॥ मूलम् ॥—कह कह करेमि कहवा । न करेमि कह कह कयं बहु कयं मे ॥ जो हियइ संपसारं । करेइ सो अइ करेइ अप्पहियं ॥ ७५ ॥ व्याख्या—' कह कह इति ' कथं कथं धर्मानुष्ठानमहं करोमि? कथं वा न करोमि? कथं कथं वा कृतं धर्मानुष्ठानादि ' बहुकयंति ' बहुगुणकारि भवति? मे मम. यः पुमाननेन प्रकारेण हृदयसंप्रसारं हृदयालोचनं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

करोति, स पुमान् ' अइत्ति ' अतिशयेनात्महितं करोति ॥ ७५ ॥

॥ मूलम् ॥—सिढिलो अणायरकऊ । अवस्स वसकऊ तहा अकऊ ॥ सययं पमत्तसीलस्स । संजमो केरिसो हुज्जा ॥ ७६ ॥ व्याख्या—' सिढिलो इति ' श्लथः ' अणायरकऊत्ति ' अनादरकृत आदरं विना विहितः ' अवस्सत्ति ' गुरुपारवश्येन कृतः ' वसकऊत्ति ' किंचित्स्ववशेन कृतः, तथा किंचित्संपूर्णः कृतः ' अकऊत्ति ' किंचिद्विराधितः, एतादृशः, सततं निरंतरं प्रमत्तशीलस्य प्रमादाचरणस्वभावस्य संयमः कीदृशो भवेत्? अपि तु सर्वथा तस्य चारित्रं न भवतीत्यर्थः ॥ ७६ ॥

॥ मूलम् ॥—चंदुव्व कालपक्खे । परिहाइ पए पए पमायपरो ॥ तह नग्घरविग्घरनिरं-गणो अ न य इत्थियं लहइ ॥ ७७ ॥ व्याख्या—' चंदुव्वत्ति ' चंद्र इव ' कालपक्खे इति ' कृष्णपक्षसंबंधी ' परिहाइत्ति ' यथा दिने दिने हीयते, तथा प्रमादपरः प्रमादवानपि पदे पदे हीनो भवति. ' नग्घरत्ति ' गृहस्थगृहं त्यक्त्वा ' विग्घरत्ति ' गृहरहितः सन् ' निरंगणोअत्ति ' स्त्रियं त्यक्त्वा स्त्रीरहितः सन्, न च ईप्सितं वांछितं लभते प्राप्नोति. ॥ ७७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—न्नीनविग्गनिलुक्को । पागमपन्नन्नदोससयकरो ॥ अपच्चयं जणंतो । जणस्स धिइ जीविअं तस्स ॥ ७८ ॥ व्याख्या—' न्नीनविग्गइति ' न्नीनत्ति न्नीतः ' नविगत्ति ' मनःसमाधिरहितः, ' निलुक्कोत्ति ' स्वात्मपापाच्छादकः, पुनः ' पागमत्ति प्रकटं, अथ च प्रन्नन्नं दोषाणां शतान्यपराधशतानि, तेषां करः कर्त्ता, पुनर्जनस्य लोकस्याऽप्रत्ययमविश्वासं जनयन्नुत्पादयन्नेतादृशो यः पुमान् तस्य जीवितं धिगित्यर्थः ॥ ७८ ॥

॥ मूलम् ॥—न तिहं दिवसं पक्का । मासा वरिसावि संगणिज्जंति ॥ जे मूलउत्तरगुणा । अक्खलिया ते गणिज्जंति ॥ ७९ ॥ व्याख्या—' नतिहंत्ति ' न ते दिवसाः, न ते पक्षाः, नकारः सर्वत्र योजनीयः, न ते मासाः, न तानि वर्षाणि, संगण्यंते प्रमाणत्वेन न गण्यंते, निष्फला एवैते इत्यर्थः, ये मूलगुणैरथ चोत्तरगुणैरस्खलिता निरतिचारा आराधितास्ते दिवसा गण्यंते, धर्मदिवसा एव लेख्यके गणनीया इत्यर्थः ॥ ७९ ॥

॥ मूलम् ॥—जो नचि दिणे दिणे सं–किलेइ के अज्ज अज्जिया मि गुणा ॥ अगुणेसु अ न हु खलिउ । कहं सोउ करिज्ज अप्पहिअं ॥ ८० ॥ व्याख्या—' जो नचित्ति ' यः पु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मान् 'नचिंत्ति' नैव प्रतिदिनं निरंतरं संकलयति संकलनां करोति, 'मिइति' मयाऽद्य के गुणा अर्जिताः? मम को ज्ञानादिगुणोऽद्य संपन्न इति प्रतिदिनं यः सम्यग्नावलोकयति, अगुणेषु प्रमादातीचाररूपेषु यो न स्खलितोऽर्थात्तदाचरणतत्पर इत्यर्थः, 'कह इति' कथं 'सोनत्ति' स पुमानात्महितं 'करिज्जत्ति' कुर्यात्? अपि तु नैव कुर्यादित्यर्थः ॥ ८० ॥

॥ मूलम् ॥—इअ गणिअं इय तुलियं । इअ बहुआ दरिसिअं नियंतियं च ॥ जइ तहवि न पडिबुज्झइ । किं किरइ नूण नविअव्वं ॥ ८१ ॥ व्याख्या—'इअ इति' अनेन प्रकारेण श्रीऋषन्नवीराणामिव धर्मोद्यमः कार्य इति. 'इअत्ति' अनेन प्रकारेण 'तुलियंति' प्राणांतेऽपि धर्मो न त्याज्योऽवंतीसुकुमालादीनामिवेति तुलना विधेया. 'इअ बहुआ इति' इत्थं बहुधा दर्शितमार्यमहागिरिप्रमुखाणां दृष्टांतकथनेन, अथ च बहुधा नियंत्रितं समितिकषायादीनां दर्शनेन, अत्र गणिततुलितादि सर्वपदेषु योज्यं; यदि 'तहवित्ति' तथाप्ययं जीवो न प्रतिबुद्ध्यति, न प्रतिबोधं प्राप्नोति, तदा 'किं किरइत्ति' किं क्रियते? नूनं निश्चितं तस्य पुरुषस्य 'नवियव्वंति' नवितव्यता ज्ञेया, 'नावे नपुंसके क्तः' ॥ ८१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—किमंगं तु पुणो जेण । संयमसेढी सिढिलीकया होई ॥ सो तं चिय पडिवज्जइ । दुक्खेण पच्छा हु नज्जमइ ॥ ८२ ॥ व्याख्या—' किमंगं इति ' हे शिष्य किं तेन पुरुषेण ? येन पुनः ' संयमसेढीत्ति ' ज्ञानादिगुणश्रेणिः शिथिलीकृता, ' होइत्ति ' भवति. ' सोइति ' स पुमान् ' चिय इति ' निश्चयेन तत् शिथिलत्वं ' पडिवज्जइत्ति ' प्रतिपद्यते; नद्यमं न करोतीत्यर्थः, दुःखेन पश्चात् ' नज्जमइति ' किं नद्यमं कर्त्तुं शक्नोति ? शिथिलत्वानंतरं पश्चादुद्यमः कर्त्तुमशक्य इत्यर्थः ॥ ८२ ॥

॥ मूलम् ॥—जइ सव्वं नवलद्धं । जइ अप्पा भाविउ नवसमेण ॥ कायं वायं च मणं । नप्पहेण जह नेइ तह देहि ॥ ८३ ॥ व्याख्या—' जइसव्वं इति ' भो भव्य यदि त्वया सर्वं पूर्वोक्तं लब्धं, यदि त्वयोपशमेनात्मा भावितोऽस्ति वासितोऽस्ति, तदा त्वं भो भव्यजीव ! कायं काययोगं वायं वचनयोगं, मणं इति च मनोयोगं ' नप्पहेण ' नत्पथेनोन्मार्गेणेति यावत्, ' जह इति ' यथा ' नेइत्ति ' न याति, तथा ' देहत्ति ' देहि? तथा प्रवर्त्तयेति.

॥ मूलम् ॥—हत्थे पाए निरिक्खे । कायं चालिज्ज तंपि कज्जेण ॥ कुम्मव्व सए अंग-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मि अंगोवंगाइं गोविज्जा ॥ ७४ ॥ व्याख्या—' हत्थे इति ' हस्तावथ च पादौ निक्षिपेत्, कार्यविना न चालयेदित्यर्थः, यत्कायं काययोगं चालयति, तदपि कार्येण, कार्यं विना न चालयतीत्यर्थः, कूर्म इव कच्छप इव स्वकीयेंगे अंगोपांगानि भुजनयनादीनि गोपयेत्, कार्यविना न चालयेदित्यर्थः ॥ ७४ ॥ अत्र कूर्मदृष्टांतः—

वाणारस्यां महापुर्यां गंगानद्युपकंठे एको मृगंगनामा महान् हृदो वर्त्तते, तत्समीपे मालुयाकच्छ इति नाम्ना महगहनमस्ति. तत्र द्वौ पापशृगालौ वसतः, तौ महाचंमौ रौद्रकर्मकारिणौ स्तः. एकदा हृदमध्याद् द्वौ कच्छपौ निर्गतौ, पापशृगालाभ्यां च दृष्टौ, तयोर्वधाय तौ धावितौ, समापतंतौ पापशृगालौ दृष्ट्वा द्वावपि कूर्मौ स्वांगानि संगोप्य स्थितौ. पापशृगालाभ्यां बहुवारं तावूर्ध्वीकृतावधःकृतौ, बहुनखप्रहारा दत्ताः, बहूद्यमः कृतः, परं नेदं न प्राप्तौ. तदा मायाविनौ तौ द्वावपि शृगालौ श्रांतौ, प्रच्छन्नवृत्त्या च स्थितौ. तदैकेन कूर्मेण तौ गतौ ज्ञात्वा स्वांगानि बहिर्निष्कासितानि. पापशृगालाभ्यां दृष्टोऽनुक्रमेण प्रसारितचतुश्चरणः, सत्वरमागत्य तं ग्रीवायां गृहीत्वा, भूमौ पातयित्वा नखप्रहारान् दत्वा स व्यापादि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो भक्षितश्च. तं व्यापादितं ज्ञात्वा द्वितीयः कच्छपो विशेषेण स्वांगानि संगोपयामास. पापशृगालाभ्यां बहूपाये कृतेऽपि स न व्यापन्नः, बहुवारं विषण्णौ भूत्वा तौ दूरं गतौ, पश्चात्तेन कूर्मेण तौ दूरगतौ ज्ञात्वा प्रथमतः कोटिं निष्कास्य सर्वत्रावलोकितं. पश्चात्तौ दूरगतौ ज्ञात्वा समकालं चतुरोऽपि चरणानुत्पाट्य सत्वरं सत्वरं गत्वा मृगांगनाभिर्ह्रदे प्रविष्टः, स्वकीयकुटुंबस्य मिलितः, सुखभाक् च बभूव. अनेन दृष्टांतेनाऽन्योऽपि यः साधुः स्वकीयान्यंगानि संगोप्य रक्षति, कुमार्गे च न प्रवर्त्तयति, स मोक्षसुखं प्राप्नोति. अथ च यः स्वकीयांगसंगोपनं न करोति, स द्वितीयकूर्म इव दुःखभाजनं भवतीति कूर्मदृष्टांत एकसप्ततितमः ॥७१॥

॥ मूलम् ॥—विकहं विणोअभासं । अंतरभासं अवक्कभासं च ॥ जं जस्स अणिट्ठमपु–ब्भिन्न य भासं न भासिज्जा ॥ ७५ ॥ व्याख्या—' विकहं इति ' विकथां, विनोदभाषां कौतुकवार्त्तां, अंतरभाषां गुरोर्भाषमाणस्य मध्ये जल्पनं, अवाक्यभाषां मकारचकारादिरूपां, यद् यस्याऽनिष्टाऽप्रीतिकारिणी, एतादृशीं भाषामपृष्टः सन् न भाषेत सुसाधुः ॥ ७५ ॥

॥ मूलम् ॥–अणवट्ठिअं मणो जस्स । झायइ हिययंमि अट्टमट्टाइं ॥ तं चिंतिअं न ल-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हइ । संचिणयइ पावकम्माइं ॥ ८६ ॥ व्याख्या—' अणवट्ठिअं इति ' यस्य मनश्चित्तमनवस्थितमतिचपलं ध्यायति चिंतयति हृदयमध्ये ' अट्टमट्टाइंत्ति ' दुष्टचिंतनादीनि ' लोकज्ञापया आडात्रिमां आलजाल इत्यर्थः ' च पुनस्तच्चिंतितं मनोवांछितं न लभते न प्राप्नोति. प्रत्युत प्रतिसमयं पापकर्माणि संचिनोति वर्द्धयति. अतो मनः स्थिरीकृत्य सर्वार्थसाधके संयमे यतनीयमित्यर्थः ॥ ८६ ॥

॥ मूलम् ॥—जह जह सव्वमुवलहं । जह जह सुचिरं तवोधणे वच्छु ॥ तह तह कम्मभारगुरु । संजमनिव्वाहिरो जाउ ॥ ८७ ॥ व्याख्या—' जह जह इति ' यथा यथा सर्वं सिद्धांतरहस्यमुपलब्धं प्राप्तं, यथा यथा सुचिरं बहुकालं ' तवोधणे इति ' तपोधनेषु साधुषु विषये ' वत्थु इति ' न्यषितं, एतावता तेषां मध्ये वासः कृतः, तथा तथा कर्मणां भरः समूहस्तेन गुरुक्रांतः सन् संयमाच्चारित्रात् ' निव्वाहिरोत्ति ' बाह्यो जातः, एतदुपरि दृष्टांतमाह—॥ ८७ ॥

॥ मूलम् ॥—विज्जप्पो जह जह उसहाइं । पायेइ वाउहरणाइं ॥ तह तह से अहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अयरं । वाउणाऊरिअं पुट्टं ॥ ८८ ॥ व्याख्या—' विज्जप्पो इति ' यथा यथा अप्पो हितकारी ' विज्जत्ति ' वैद्य औषधानि सुंठीमरिचादीनि पाययति. कीदृशानि? वायुहरणानि वायुनिर्नाशकानि, तथा तथा ' से इति ' तस्याऽस्य रोगिणः पुरुषस्याऽधिकतरं वायुनाऽपूरितं ' पुट्टं इति ' उदरं भवति. तथा श्रीजिनवैद्योऽपि कर्मवायूपशमकं बहुसिद्धांतौषधं पाययति, परमसाध्यः कर्मरूपो वायुर्वृद्धिं यातीत्यर्थः ॥ ८८ ॥

॥ मूलम् ॥—दड्ढं जउमकज्जकरं । भिन्नं संखं न होइ पुणकरणं ॥ लोहं च तंबविद्धं। न एइ परिकम्मं किंचि ॥ ८९ ॥ व्याख्या—' दड्ढं इति ' दग्धं ज्वलितं जतु लाक्षाऽकार्यकरं, न कार्यसाधकं, ' भिन्नं इति ' भिन्नो यः शंखस्तस्य पुनःकरणं पुनःसंधानं न भवति. ताम्रेण विद्धं मिलितमेकीभूतमेतादृशं लोहं किंचित्स्तोकमपि परिक्रमणं संधानप्राप्यत्वं नेति न प्राप्नोति, तथाऽन्योऽप्यसाध्यकर्ममिलितो धर्मे संधातुमशक्य इत्यर्थः ॥ ८९ ॥

॥ मूलम् ॥—को दाहि उवएसं । चरणालसयाण दुव्विअड्ढाणं ॥ इंदस्स देवलोगो । न कहिज्जइ जाणमाणस्स ॥ ९० ॥ व्याख्या—' को दाहीत्ति ' को ददात्युपदेशं वैराग्यतत्वो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पदेशं ? केषां ? ' चरणालसयाणत्ति ' चारित्रे आलस्यवतां, कीदृशानां ? ' दुव्विअट्टाणं ' दुर्वाक्यानां, किमयमस्माकमुपदेशं दास्यति ? वयं स्वयमेव जानीम इति. ईदृस्याग्रे ' देवलोगोत्ति ' देवलोकस्वरूपं न कथ्यते, केनापि कथयितुं न शक्यते. कीदृशस्यैवंदृस्य? ' जाणमाणस्सत्ति ' स्वयं जानतः, तथा जानन् यः प्रमादी भवति, तस्योपदेशं दातुं कः समर्थो भवतीत्यर्थः ॥ ए० ॥

॥ मूलम् ॥—दो चेव जिणवरेहिं । जाइजरामरण विप्पमुक्केहिं ॥ लोगंमि पहा भणिया । सुसमणसुसावगोवावि ॥ ए१ ॥ व्याख्या—' दो चेव इति ' द्वावेव द्विसंख्ययैव जिनवरैस्तीर्थंकरदेवैः, कीदृशैः ? जातिजरामरणविप्रमुक्तैः, जातिरेकेंद्रियाद्या, जरा वयोहानिः, मरणं प्राणवियोगः, एतेभ्यो विप्रमुक्ता रहिताः, एतादृशैः, अस्मिन् लोके द्वावेव ' पहात्ति ' पंथानौ मोक्षगमनपद्धती भणितौ. किं तन्मार्गद्वयं ? एकः ' सुसमणत्ति ' सुश्रमणः सुसाधुधर्मः, द्वितीयश्च ' सुसावगत्ति ' सुश्रावको वा, अपिशब्दात्तृतीयः संविज्ञपक्षीयोऽपि ग्राह्य इत्यर्थः ॥ ए१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—भावच्चणमुग्गविहा—रया दव्वच्चणं तु जिणपूआ ॥ भावच्चणाय भट्ठो । हविज्ज दव्वच्चणुज्जुत्तो ॥ ए२ ॥ व्याख्या—' भावच्चण इति भावार्चनं भावपूजेत्यर्थः, उग्र-विहारता सत्यक्रियानुष्ठानकरणं, शुद्धयतिमार्गपालनं भावपूजा कथ्यते. द्रव्यार्चनं द्वितीया द्रव्यपूजा तु जिनबिंबानां पूजा, पुष्पादिभिः पूजनं द्रव्यपूजा कथ्यते. यदि भावार्चनाद्भ्रष्टो यदि यतिधर्मपालनाऽसमर्थस्तदा द्रव्यार्चने नयुक्तो भवेत्, श्राद्धधर्मं पालयेदित्यर्थः ॥ ए२ ॥

॥ मूलम् ॥—जो पुण निरच्चणुच्चिय । सरीरसुहकज्जमित्त लोलुत्र ॥ तस्स नहि बो-हिलाभो । न सुगइ नेव परलोगो ॥ ए३ ॥ व्याख्या—' जो पुण इति ' यः पुनर्निरर्चनो द्रव्यपूजाभावपूजाभ्यां रहितः ' चिय इति ' निश्चयेन, शरीरस्य यत्सुखं तस्य कार्यमात्रे ' लोलुत्रत्ति ' लोलुपः, शरीरपालनतत्पर इत्यर्थः, तस्यैतादृशस्य पुरुषस्य न च बोधिलाभो धर्मप्राप्तिरागामिनि भवे भवति, न च सद्गतिर्मोक्षगतिरूपा भवति, नैव परलोकः, परभवे देवत्वमनुष्यत्वादि न प्राप्नोतीत्यर्थः ॥ ए३ ॥

॥ मूलम् ॥—कंचणमणिसोवाणं । थंभसहस्सुसिअं सुवन्नतलं ॥ जो कारिज्ज जिण-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दरं । तनुवि तवसंजमो अहिउ ॥ ९४ ॥ व्याख्या—' कंचण इति ' अथ द्रव्यपूजाभावपूजयोर्भावपूजाविशेषमाह—कंचनं स्वर्णं, माणयश्चंद्रकांताद्याः, तेषां सोपानानि यत्रैतादृशं, स्तंभानां सहस्रेणोच्छ्रितं विस्तीर्णमेतादृशं, पुनः कीदृशं ? सुवर्णमयं तलमधोभागो यस्यैतादृशं जिनमंदिरं यः कोऽपि पुमान् कारयेत्तस्मादप्येतादृग्जिनमंदिरकरणादपि तपःकरणं ' संजमोत्ति ' चारित्रपालनमधिकमतो भावपूजाधिकेत्यर्थः ॥ ९४ ॥

॥ मूलम् ॥—निव्बीए दुन्निक्के । रन्ना दिवंतरान अन्नान ॥ आणेऊणं बीअं । इह दिन्नं कासवजणस्स ॥ ९५ ॥ व्याख्या—' निव्बीए इति ' निर्बीजे बीजमात्रमपि यस्मिन्न मिलत्येतादृशे दुर्भिक्षे दुष्टकाले ' रन्ना इति ' राज्ञा लोकार्थं द्वीपांतरादन्यद्वीपादानायितं ' आणेऊणंति ' आनाय्य पश्चात्तद्बीजं धान्यबीजं ' इह इति ' अस्मिन् लोके ' दिन्नं इति ' दत्तं ' कासवजणस्सत्ति ' कर्षुकलोकस्य ॥ ९५ ॥

॥ मूलम् ॥—केहिवि सव्वं खइयं । पइन्नमन्नेहिं सव्वमऽहं च ॥ नत्तुगयं च केइ । खित्ते खुड्डंति संतट्ठा ॥ ९६ ॥ व्याख्या—' केहिवित्ति ' कैश्चित्कृषीवलैः सर्वमपि तद्बीजं ' खइयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ' भक्षितं अन्यैः कैश्चित्कृषीवलैः सर्वं बीजं ' पइन्नमिति ' उप्त्वा निष्पादितं, कैश्चिदर्द्ध भक्षितं, अर्धं चोप्तं. केचित्कृषीवला उप्त्वा ' उत्तुगयंचत्ति ' उक्षन्नेव धान्यं क्षेत्रविषये ' खुडंतित्ति ' कुट्टयंति गृहे समानयनार्थं, संत्रस्ता भयभ्रांतलोचनाः संतः, पश्चाकृष्यंते राजसेवकैरित्यर्थः ॥ ९६ ॥ अत्रोपनयमाह—

॥ मूलम् ॥—राया जिणवरचंदो । धम्मविरहिउ य कालो निब्बीउ ॥ कम्मभूमी य खित्ताणि । चत्तारि पुरिसा कासववग्गु ॥ ९७ ॥ व्याख्या—' राया इति ' राजा तु जिनवरचंद्रस्तीर्थंकरदेवः धर्मविरहितो धर्मरहितः कालो निर्बीज इत्युच्यते. निर्गतं बीजं धर्मरूपं यस्मात्. अत्र क्षेत्राणि कानि ? पंचदशसंख्याकाः कर्मभूमयः क्षेत्राणि कथ्यंते. ' चत्तारित्ति ' चत्वारोऽसंयतसंयतदेशविरतपार्श्वस्थरूपाः पुरुषाः ' कासववग्गुत्ति ' कर्षुकवर्गः कथ्यते. तत्र—

॥ मूलम् ॥—असंजएहिं सव्वं । खइयं अद्धं च देसविरइए ॥ साहूहिं धम्मबीअं । भत्तं नीअं च निप्पत्तिं ॥ ९८ ॥ व्याख्या—' असंजएहिंत्ति ' असंयतैरविरतैः सर्वमेतद्धर्मरूपं बीजं ' खइयंत्ति ' भक्षितं, पुनर्देशविरतैः, देशेन विरता देशविरतास्तैः स्थूलप्राणातिपातवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रमणादिव्रतधारकैः श्राद्धैरर्हं बीजं नक्षितमर्हं चोप्तमित्यर्थः, साधुनिर्धर्मबीजं विरतिधर्मबीजमुप्तमात्मरूपे क्षेत्रे, च पुनर्निष्पत्तिं नीतं प्रापितं सम्यक्परिपालनेनेति. ॥ ९८ ॥

॥ मूलम् ॥—जे ते सबं लहिउं । पच्छा खुट्टंति दुब्बलट्ठिआ ॥ तवसंजमपरितंता। इह ते उहरिअसीलनरा ॥ ९९ ॥ व्याख्या—' जे ते इति ' ये पार्श्वस्थादयस्ते सर्वं विरतिधर्मरूपं बीजं लब्ध्वा प्राप्य, पूर्वं धर्ममवाप्य ' पच्छा इति ' पश्चात् ' खुट्टंतित्ति ' क्षेत्रमध्य एव कुट्टयित्वा विनाशयंति धर्मबीजं. कीदृशाः ? दुर्बला धृतिर्धैर्यं येषां ते, एतादृशास्तपःसंयमाढ्यां ' परितंता इति ' परिक्लिन्नास्तत्परिपालनेऽवसन्ना इत्यर्थः, ' इहत्ति ' अस्मिन् जिनशासने ते पार्श्वस्थादयः ' उहरियत्ति ' अवधूतस्त्यक्तः शीलनरः संयमनारो यैस्ते एतादृशाः.

॥ मूलम् ॥—आणं सबजिणाणं । नंजइ दुविहं पहं अइक्कंतो ॥ आणं च अइक्कंतो । नमइ जरामरणदुग्गंमि ॥ ५०० ॥ व्याख्या—' आज्ञां सर्वजिनानां सर्वतीर्थंकराणां ' नंजइत्ति ' ननक्ति, आज्ञाभंगं करोति. ' दुविहं पहंति ' द्विविधं मार्गं साधुधर्मश्रावकधर्मलक्षणमतिक्रमन् सन् आज्ञां च पुनरतिक्रमन् सन् ' नमइत्ति ' भ्रमति परिभ्रमणं करोति.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कस्मिन् भ्रमति? जरामरणदुर्गे जरामरणैर्दुर्गेऽतिगहनेऽनंतसंसारे चिरकालं भ्रमतीत्यर्थः ॥

॥ मूलम् ॥—जइ न तरसि धारेउं । मूलगुणभारं सउत्तरगुणभारं च ॥ तो मुत्तूण तिभूमं । सुसावगत्तं वरतरं नेयं ॥ १ ॥ व्याख्या—' जइत्ति ' यदि हे भव्यजीव न तरसि शक्नोषि धारयितुमुद्वोढुं न समर्थो भवसि, मूलगुणभारं पंचमहाव्रतभारं, कीदृशं? सउत्तरगुणभारमुत्तरगुणानां समित्यादीनां भारेण भारेण सहवर्त्तमानमेतादृशं ' तो ' तर्हि भूमित्रयं, जन्मभूमिर्विहारभूमिर्दीक्षाभूमिश्चेति भूमित्रयं ' मुत्तूणत्ति ' त्यक्त्वा सुश्रावकत्वं वरतरमतिशयेन वरं श्रेष्ठं वरतरं ज्ञेयं ॥ १ ॥

॥ मूलम् ॥—अरिहंतचेइआणं । सुसाहुपूआरउ दढायारो ॥ सुसावगोवि वरतरं । न साहुवेसेण चुअधम्मो ॥ २ ॥ व्याख्या—' अरिहंत इति ' अर्हच्चैत्यानां जिनबिंबानां पूजासु तत्परः, सुसाधूनां सम्यक् साधूनां पूजासु सत्कारसन्मानादिरूपासु रतः, दृढाचारोऽणुव्रतादिपालने कुशलः, एतादृशः सुश्रावको वरतरं अतिश्रेष्ठः, परं साधुवेषेण च्युतधर्मो भ्रष्टधर्मो वेषधार्यपि न समीचीनः, आचारभ्रष्टेन वेषधारणेन न किंचिदपि फलमित्यर्थः ॥ २ ॥ ॥ ५७९॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—सव्वंति भणिऊणं । विरइ खलु जस्स सव्विया नत्थि ॥ सो सव्वविरइवाई । चुक्कइ देसं च सव्वं च ॥ ३ ॥ व्याख्या—' सव्वंति इति ' ' सव्वं सावज्जं जोगं पच्चक्खामि ' इति भणित्वापि, सर्वसाद्ययोगप्रत्याख्यानं कृत्वापि यस्य खलु निश्चितं सर्विका संपूर्णा विरतिः षट्कायप्रतिपालनरूपा नास्ति, स सर्वविरतिवादीति प्रतिज्ञाकृत्, अहं सर्वविरतोऽस्मीति प्रलापकृत् ' चुक्कइत्ति ' भ्रश्यति हारयतीति यावत् ' देसं चेति ' देशविरतिं श्राद्धधर्मं, ' सव्वं चेति ' सर्वं सर्वविरतिरूपं साधुधर्मं ॥ ३ ॥

॥ मूलम् ॥—जो जहवायं न कुणइ । मिच्छदिट्ठी तओ हु को अन्नो ॥ वड्ढेइ अ मिच्छत्तं । परस्स संकं जणेमाणे ॥ ४ ॥ व्याख्या—' जो जहवायं इति ' यो यथावादं न करोति, यादृशं वचनं जल्पितं तादृशं क्रियानुष्ठानादि न करोतीत्यर्थः, ' तओत्ति ' तस्मात्पुरुषात् ' हु ' निश्चितं कोऽन्यो मिथ्यादृष्टिः ? अपि तु न कोऽपीत्यर्थः, स एव मिथ्यात्वधारी, यतः स पुमान् मिथ्यात्वं वर्द्धयति. किं कुर्वन् ? ' परस्सत्ति ' परेषामन्यलोकानां शंकां जनयन्नुत्पादयन्न.

॥ मूलम् ॥—आणाए चिय चरणं । तं भंगे जाणिहि किं न भंगंति ॥ आणं च अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इक्कंतो । कस्साएसा कुणइ सेसं ॥ ५ ॥ व्याख्या—' आणाएत्ति ' त्ति य इति ' निश्चयेन ' आणाएत्ति ' आज्ञयैव चरणं चारित्रं, जिनाज्ञापालनमेव चारित्रमित्यर्थः, तद्भंगे आज्ञाभंगे च कृते सति हे शिष्य जानीहि किं न भग्नमिति. आज्ञाभंगे सर्वमेव भग्नमित्यर्थः, आज्ञां जिनाज्ञामतिक्रांतो, यदि जिनाज्ञोल्लंघिता, तर्हि कस्यादिशात् शेषमनुष्ठानादि करोति? आज्ञांविनाऽनुष्ठानादिकरणं विडंबनैवेत्यर्थः ॥ ५ ॥

॥ मूलम् ॥—संसारो अ अणंतो । नट्ठचरित्तस्स लिंगजीवस्स ॥ पंचमहव्वयतुंगो । पागारो भिन्नित्तिन जेण ॥ ६ ॥ व्याख्या—' संसारो इति ' संसारश्चतुर्गतिभ्रमणरूपोऽनंतो ज्ञेयः, कस्यानंतः संसारः? भ्रष्टचारित्रस्य, कीदृशस्य? लिंगेन मुखवस्त्रिकारजोहरणादिरूपेण वेषेण यो जीवतीत्येवंशीलस्य. पंचमहाव्रतरूपस्तुंग भद्रः प्राकारो दुर्गो येन ' भिन्नित्तिन ' त्ति भेदितो भेदं प्रापितः, निर्भाग्यशेखरस्य तस्याऽनंतसंसारित्वं भवतीत्यर्थः ॥ ६ ॥

॥ मूलम् ॥—न करेमित्ति भणित्ता । तं चेव निसेवए पुणो पावं ॥ पच्चक्खमुसावाइ । मायानिगइपसंगो य ॥ ७ ॥ व्याख्या—' न करेमित्ति ' न करोमि, न कारयामि, कुर्वंतं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नानुजानामीति नवकोटिसहितं भणित्वा कथयित्वापि, तदेव च यत्प्रत्याख्यातं तदेव पापं यः पुनर्निषेवते, स प्रत्यक्षं मृषावादी ज्ञेयः, स यादृशं वदति तादृशं न करोतीत्यर्थः, च पुनर्मायाशब्देनांतरंगाऽसत्यत्वं, निकृतिश्च बाह्यासत्यत्वं, तयोः प्रसंगो यस्य स एतादृशो ज्ञेयः.

॥ मूलम् ॥—लोएवि जो ससुगो । अलिअं सहसा न भासए किंचि ॥ जइ दिक्खिउवि अलिअं । भासइ तो किंचि दिक्खाए ॥ ८ ॥ व्याख्या—' लोए इति ' लोकेऽपि यः सशूको भवति, पापभीरुर्भवति, स सहसाऽविमृश्य किंचिदप्यलीकं न भाषते. अथ यदि दीक्षितोऽपि सन्, गृहीतचारित्रोऽपि सन् अलीकमसत्यं ' भासइत्ति ' भाषते ' तो इति ' तर्हि दीक्षया किं? अपि तु न किमपीत्यर्थः ॥ ८ ॥

॥ मूलम् ॥—महव्वयअणुव्वयाइं । उज्झिउं जो तवं चरइ अन्नं ॥ सो अन्नाणो मूढो । नावाबुड्ढो मुणियव्वो ॥ ९ ॥ व्याख्या—' महव्वय इति ' महाव्रतानि साधूनां, अणुव्रतानि च श्राद्धानां, तानि ' उज्झिउंत्ति ' मुक्त्वा योऽन्यत्तपश्चरति, महाव्रताऽणुव्रताऽतिरिक्तं तपःकष्टादि करोति, सोऽज्ञानी मूर्खः पुमानज्ञानकष्टकारीत्यर्थः, नावा नौकया हस्तप्राप्तयापि ' बुड्ढोत्ति ' माला टी. ॥५८२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बुद्धितो ज्ञेयः, यथा कश्चिन्मूर्खो हस्तप्राप्तामपि नावं त्यक्त्वा तल्लोहकीलकेन समुद्रं तरीतुं वांछति, तद्वदयमपीत्यर्थः ॥ ए ॥

॥ मूलम् ॥—सुबहु पासत्थजणं । नाऊणं जो न होइ मज्झत्थो ॥ न य साहेइ स कज्जं । कागं च करेइ अप्पाणं ॥ १० ॥ व्याख्या—' सुबहु इति ' सुबहु बहुप्रकारं पार्श्वस्थजनसंबंधिशिथिलत्वं ' नाऊणंत्ति ' ज्ञात्वा ' जो इति ' यो मध्यस्थो न भवति, स पुमान् स्वकार्यं मोक्षरूपं न साधयति, च पुनः ' अप्पाणं इति ' स्वात्मानं ' कागं इति ' काकतुल्यं करोति.

॥ मूलम् ॥—परिचिंतिऊण निउणं । जइ नियमन्नरो न तीरए वोढुं ॥ परचित्तरंजणेणं । न वेसमित्तेण साहारो ॥ ११ ॥ व्याख्या—' परि इति ' परिताश्चिंतयित्वा ' निऊणं ' निपुणं सूक्ष्मबुद्ध्या, यदि नियमन्नरो मूलोत्तरगुणसमूहो ' वोढुं इति ' धारयितुं ' न तीरएत्ति ' न शक्यते यावज्जीवं, तर्हि परचित्तरंजनेन परचित्तप्रीतिकारकेणैतादृशेन वेषमात्रेण परभवे गच्छतां, दुर्गतौ निपततां साधारो न भवति, न वेषधारणं दुर्गतित्राणं भवतीत्यर्थः ॥

॥ मूलम् ॥—निच्छयनयस्स चरणस्स । वघाए नाणदंसणवहोवि ॥ ववहारस्स य चर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णे । इयंमि नयणा न सेसेणं ॥ १२ ॥ व्याख्या—' निच्चय इति ' निश्चयनयमते परमार्थवृत्त्या इत्यर्थः, चरणस्य चारित्रस्योपघाते जायमाने सति ज्ञानदर्शनविनाशोऽपि नवति. व्यवहारनये तु चारित्रनाशे आश्रवसेवनेन ज्ञानदर्शने नवतो वा न वा ॥ १२ ॥

॥ मूलम् ॥ —सुध्धइ जइ सुचरणो । सुध्धइ सुसावगोवि गुणकलिन ॥ नसन्नचरणकरणो । सुध्धइ संविग्गपक्करुई ॥ १३ ॥ व्याख्या—' सुध्धइत्ति ' शुद्ध्यति निर्मलो नवति यतिः साधुः सुचारित्रः, शुद्ध्यति शुद्धो नवति सुश्रावकोऽपि गुणकलितो ज्ञानादिगुणसहितः, अवसन्नं शिथिलं चरणमथ च करणं यस्यैतादृशः संविग्नपक्करुचिः, संविग्ना मोक्षाभिलाषिणः साधवस्तेषां पक्षे तत्क्रियायां रुचिर्यस्य, सोऽपि शुद्ध्यति शुद्धो नवति ॥ १३ ॥

॥ मूलम् ॥—संविग्गपक्खियाणं । लक्खणमेयं समासन नणियं ॥ नसन्नचरणकरणावि । जेणवि कमं विसोहंति ॥ १४ ॥ व्याख्या—' संविग्ग इति ' संविग्ना मोक्षाभिलाषिणः साधवस्तेषां पक्षो विद्यते येषां ते, तत्क्रियानुष्ठानरक्ता इत्यर्थः, तेषां पुरुषाणामेतल्लक्षणं समासतः संक्षेपतो नणितं कथितं, तीर्थंकरदेवैरित्यर्थः, ये ' नसन्नत्ति ' चरणकरणयोरव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सन्ना अपि श्लथा अपि, प्राकृतत्वादवसन्नशब्दस्य पूर्वनिपातः, येन कृत्वा कर्म ज्ञानावरणीयादि ' विसोहंतित्ति ' प्रतिक्षणं क्षपयंति. ॥ १४ ॥

॥ मूलम् ॥—सुद्धं सुसाहुधम्मं । कहेइ निंदइ य नियमायारं ॥ सुतवस्सिआणं पुरउ । होइ सव्वोमरायणीउ ॥ १५ ॥ व्याख्या—' सुद्धं इति ' शुद्धं निरवद्यं सुसाधुधर्मं क्षांत्यादिदशभेदं कथयंति लोकानामग्रे ' निंदइत्ति ' निंदति निजकं स्वकीयमाचारं शिथिलत्वादिकं, ' सुतवस्सियाणंति सुतपस्विनां सुसाधूनां ' पुरउत्ति ' पुरतोऽग्रे ' होइत्ति ' भवति, ' सव्वोमरायणिउत्ति ' सर्वेभ्योऽप्यवमरात्रिको लघुः, अद्यदीक्षितेभ्योऽपि स्वमात्मानं लघुमेव मन्यते इत्यर्थः ॥ १५ ॥

॥ मूलम् ॥—वंदइ नवि वंदवेइ । किइकम्म कुणइ कारये नेय ॥ अत्तट्ठा नवि दिक्खइ । देइ सुसाहूण बोहेउं ॥ १६ ॥ व्याख्या—' वंदइत्ति ' वंदते संविग्नान् लघून् साधूनपि, परं ' नवि वंदवेइत्ति ' तेषां पार्श्वादात्मनो वंदनं न कारयति. कृतिकर्म विश्रामणादि करोति स्वयं संविग्नसाधूनां, ' कारये नेयत्ति ' न च, न कारयति तेभ्यो विश्रामणादि; ' अत्तट्ठा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति ' आत्मार्थमागतं शिष्यं ' नवि दिक्खइत्ति ' न दीक्षयति, तस्य दीक्षां न ददातीत्यर्थः, ' देइत्ति ' ददाति सुसाधूनां ' बोहेइत्ति ' बोधयित्वा सुसाधुसमीपे तं दीक्षयति, न तु स्वयं तस्य दीक्षां ददातीत्यर्थः ॥ १६ ॥

॥ मूलम् ॥—जसन्नो अत्तट्ठा । परमप्पाणं च हणइ दिक्खंतो ॥ तं छुहइ दुग्गइए । अहिअयरं बुडइ सयं च ॥ १७ ॥ व्याख्या—' जसन्नो इति ' अवसन्नः शिथिलः सन्नात्मार्थं स्वकीयार्थं स्वकीयात्मनिमित्तं परं शिष्यं ' अप्पाणं इति ' आत्मानं हंति नाशयतीति भावः, दीक्षां ददन् ' तं छुहइत्ति ' क्षेपयन् ' दुग्गइएत्ति ' दुर्गतावधिकतरं पूर्वावस्थातः, ' सयं चत्ति ' स्वयमपि बुडति संसारसमुद्रमध्ये ॥ १७ ॥

॥ मूलम् ॥—जह सरणमुवगयाणं । जीवाणं निकत्तइ सिरे जो उ ॥ एवं आयरिउवि हु । उस्सुत्तं पन्नवंतो यं ॥ १८ ॥ व्याख्या—' जह इति ' यथेति दृष्टांतोपन्यासे यथा शरणमागतानामाश्रितस्वशरणानामेतादृशानां जीवानां प्राणिनां यः पुमान् शिरो मस्तकं निकृंतति छिनत्ति, एवममुना प्रकारेणाऽऽचार्योऽपि शरणमागतानां भव्यजीवानां ' हु ' इत्यलं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कारे उत्सूत्रं प्रज्ञापयन् भाषयन् कुमार्गे प्रवर्त्तयन्नेतादृशो ज्ञेयो विश्वासघातकतुल्य इत्यर्थः.

॥ मूलम् ॥—सावज्जजोगपरिव-ज्जणाउ सव्वुत्तमो जइधम्मो ॥ बीउ सावगधम्मो । तउ संविग्गपक्खपहो ॥ १९ ॥ व्याख्या—' सावज्ज इति ' सावद्ययोगाः सपापयोगास्तेषां ' परिवज्जणा इति ' परिवर्जनेन सर्वसावद्ययोगत्यागेनेत्यर्थः, सर्वोत्तमः सर्वोत्कृष्टो यतिधर्मो भवति, स प्रथममार्गः १ द्वितीयः श्रावकधर्मोऽपि मोक्षमार्गः २ तृतीयः संविग्नपक्षः संविग्नपक्षमार्गः ३ एते त्रयोऽपि मोक्षमार्गा इत्यर्थः ॥ १९ ॥

॥ मूलम् ॥—सेसा मिच्छदिट्ठी । गिहिलिंगकुलिंगदव्वलिंगेहिं ॥ जह तिन्नि मुक्कपहा । संसारपहा तहा तिन्नि ॥ २० ॥ व्याख्या—' सेसा इति ' एतद्व्यतिरिक्ताः शेषा अन्येऽपि मिथ्यादृष्टयो ज्ञेयाः, ते के? इत्याह—गृहिलिंगा गृहिलिंगधारिणः, कुलिंगा नरमृकादयः, द्रव्यलिंगा द्रव्यतो यतिवेषधारकाः ' जह इति ' यथा ' तिन्नित्ति ' त्रयोऽनंतरगाथायां मोक्षमार्गा उक्तास्तथैतेऽपि त्रयो गृहिलिंगादयो मिथ्यादृष्टिभेदाः ' संसारपहा इति ' संसारमार्गा ज्ञेयाः ॥ २० ॥ ॥ ५८७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—संसारसागरमिणं । परिभ्रमंतेहिं सव्वजीवेहिं ॥ गहीआणि अ मुक्काणि य । अणंतसो दव्वलिंगाइं ॥ २१ ॥ व्याख्या—' संसार इति ' इमं प्रसिद्धमनाद्यनंतं संसारसमुद्रं परिभ्रमद्भिः संसारे परिभ्रमणं कुर्वद्भिः सर्वजीवैः सर्वप्राणिभिर्गृहीतान्यंगीकृतानि च पुनर्मुक्तानि गृहीत्वा त्यक्तानि ' अणंतसोत्ति ' अनंतवारान् द्रव्यलिंगानि गृहीतानि च मुक्तानि, परं न काऽप्यर्थसिद्धिरभूदिति भावः ॥ २१ ॥

॥ मूलम् ॥—अच्चणुरत्तो जो पुण । न मुअइ बहुसोवि पन्नविज्जंतो ॥ संविग्गपक्खिअत्तं । करिज्ज लहिज्ज तेण पहं ॥ २२ ॥ व्याख्या—' अच्चणुरत्तो इति ' अत्यनुरक्तोऽतिशयेन रक्तो गाढं स्वोपरक्षणे प्रतिबुद्ध इत्यर्थः, एतादृशो यः पुनर्न मुंचति, न त्यजति ' बहुसोवित्ति ' बहुवारमपि ' पन्नविज्जंतोवित्ति ' प्रज्ञाप्यमानो गीतार्थैर्हितशिक्षां ग्राह्यमाणः संविग्नपक्षकत्वं संविग्नपाक्षिपातित्वं ' करिज्जत्ति ' कुर्यात्, स ' लहिज्जत्ति ' लभते प्राप्नोत्यागामिभवे ' तेणत्ति ' तेन संविग्नपक्षित्वेन मोक्षमार्गं ॥ २२ ॥

॥ मूलम् ॥—कंतारुत्तारमज्झाण । जमगेलन्नमाइयकज्जेसु ॥ सव्वायरेण जयणाइ । कु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णइ जं साहुकरणिज्जं ॥ २३ ॥ व्याख्या—' कंतारेत्ति ' कांतारो महाटवी, ' रोहत्ति ' रोधो राजविग्रहादौ दुर्गरोधः, ' मक्खणत्ति ' विषममार्गचलनं ' नमत्ति ' दुर्भिक्षकालः ' गेलन्नं इति ' ग्लानत्वं, इत्येवमादिषु कार्येषु विषये ' सव्वायरेणत्ति ' सर्वादरेण सर्वशक्त्या ' जयणाइत्ति ' यतनया यतनापूर्वकं ' कुणइत्ति ' करोति यत्साधुकरणीयं, साधूनां कर्त्तव्यं भवति तत्.

॥ मूलम् ॥—आयरतरसंमाणं । सुदुक्करं माणसंकडे लोए ॥ संविग्गपक्खिअत्तं । जसन्नेन फुडं कांउं ॥ २४ ॥ व्याख्या—' आयर इति ' आदरतरेणाऽत्यादरेण संविज्ञत्वेन सन्मानं सुसाधूनां सन्मानकरणं सुदुःकरमतिशयेन दुर्लभं, मानोऽहंकारस्तेन ' संकडे इति ' भृते, एतादृशे लोके संसारे संविग्नपक्षिकत्वं संवेगपक्षानुरागित्वं. अवसन्नेन श्लथाचारेण ' फुडं इति ' स्फुटं प्रकटं ' कांउंत्ति ' कर्त्तुं दुर्लभं भवति ॥ २४ ॥

॥ मूलम् ॥—सारणवग्गा जे । गच्छनिग्गया पविहरंति पासत्था ॥ जिणवयणबाहिरावि य । ते अ पमाणं न कायव्वा ॥ २५ ॥ व्याख्या—' सारण इति ' सारणं विस्मृतस्य स्मारणं, इदमित्थं कुर्वित्यादि पुनः पुनः शिक्षा. तयोद्विग्नाः संतो ये गच्छनिर्गताः समुदायाद्ब-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिर्भूताः ' पविहरंतित्ति ' स्वेच्छया विचरंति पार्श्वस्थादयः प्रमादिनः, जिनवचनं जिनवाक्यं, तस्मात् ' बाहिरावि यत्ति ' बाह्याः, पूर्वं शुद्धं चारित्रं प्रपाल्य पश्चात्प्रमादिनो जाताः ' तेन्नत्ति ' तेऽपि ' पमाणंत्ति ' प्रमाणं न कर्त्तव्याः, साधुत्वेन न गणनीया इत्यर्थः ॥ २५ ॥

॥ मूलम् ॥—हीणस्सवि सुद्धपरू–वगस्स संविग्गपक्खवायस्स ॥ जा जा हविज्ज जयणा । सा सा से निज्जरा होइ ॥ २६ ॥ व्याख्या—' हीणस्स इति ' हीनस्यापि, किंचिदुत्तरगुणेन शिथिलस्यापि शुद्धप्ररूपकस्य शुद्धन्नाषकस्य संविग्नानां संवेगमार्गिणां पक्षपातो यस्यैतादृशस्य ' जा जा इति ' या या यतना बहुदोषवस्तुवर्जनाऽल्पदोषवस्तुग्रहणरूपा न्नवेत्, सा सा यतना ' से इति ' तस्य पुरुषस्य निर्जरा कर्मक्षयकारिणी न्नवति. ॥ २६ ॥

॥ मूलम् ॥—सुक्काइयंपरिसुद्धं । सइ लाभे कुणइ वाणिन्न चिट्ठं ॥ एमेवय गीयन्नो । आयं दिट्ठं समायरइ ॥ २७ ॥ व्याख्या—' सुक्काइ इति ' शुल्कादिना राजदेयद्रव्यादिना परिशुद्धं, राजदेयद्रव्यादिनिष्कासनपूर्वकं पश्चाल्लाभे जायमाने सति ' कुणइत्ति ' करोति ' वाणिन्नत्ति ' वणिक् चेष्टां व्यापाररूपां, एवमेव च गीतार्थः शास्त्रज्ञोऽपि आयं लाभं दृष्ट्वा स-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माचरति, स्वल्पदोषं बहुलाभं वस्तु यतनया करोतीत्यर्थः ॥ २७ ॥

॥ मूलम् ॥—आमुक्कजोगिणुच्चिय । हवइ थोवावि तस्स जीवदया ॥ संविग्गपक्कजयणा । तो दिट्ठा साहुवग्गस्स ॥ २८ ॥ व्याख्या—' आमुक्क इति ' आ समंतान्मुक्ताः संयमयोगाः संयमव्यापारा येनैतादृशस्य ' चिय इति ' निश्चयेन यदि भवति स्तोकापि स्वल्पापि तस्य मनसि जीवदया भवति ' संविग्गपक्कत्ति ' संविग्नपक्षस्य मोक्षाभिलाषिणः सतो यतना जीवदया ' तोत्ति ' सा दिष्टा तीर्थंकरैः, मोक्षाभिलाषित्वात्तदीययतना प्रमाणमित्यर्थः, कस्य यतना ? साधुवर्गस्य ॥ २८ ॥

॥ मूलम् ॥—किं मूसयाण अत्थेण । किं वा कागाण कणगमालाए ॥ मोहमलखवलिआणं । किं कज्जुवएसमालाए ॥ २९ ॥ व्याख्या—' किं मूसयाणत्ति ' मूषकाणामर्थेनाऽर्थनामर्थेन स्वर्णादिकेन किं ? अपि तु न किमपि प्रयोजनमित्यर्थः, वाऽथवा काकानां कनकमालया किं ? स्वर्णमालया किं कार्यं ? अपि तु न किमपीत्यर्थः, इति दृष्टांतौ, ' मोहमलखवलिआणंत्ति ' यो मिथ्यात्वादिकर्ममलस्तेनाऽवलिप्तानामेतादृशानां पुरुषाणामुपदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शमालयोपदेशपरंपरया किं कार्यं ? बहुकर्मणामियमुपदेशमालापि न कार्यकारीत्यर्थः ॥२९॥

॥ मूलम् ॥—चरणकरणालसाणं । अविणयबहुलाण सययमजोगमिणं ॥ न मणी स-
यसहस्सो। आबध्नइ कुत्तनासस्स ॥ ३० ॥ व्याख्या—चरणे पंचमहाव्रतादिके, करणे पिंड-
विशुद्ध्यादिरूपेऽलसानामालस्यवतामेतादृशानां, पुनरविनयो दुर्विनीतत्वं, तेन बहु, एतादृशा-
नां पुरुषाणां ' मिणं इति ' इदमुपदेशमालाप्रकरणं ' सययमजोगमिति ' सततं निरंतरम-
योग्यं, एतादृशेभ्यो न देयमित्यर्थः, ' न इति ' निषेधे न मणिर्मणिनामरत्नं शतसहस्रमूल्यं
आबद्ध्यते कुत्सितनासस्य कुत्सितकांतेः काकस्येत्यर्थः, काकस्य लक्षमूल्यमणेः परिधापनं
न योग्यं, यतः काकस्य मणेरयोग्यतैवेत्यर्थः ॥ ३० ॥

॥ मूलम् ॥ —नाऊण करयलगया—मलंव सप्पावनं पहं सव्वं ॥ धम्मंमि नाम सिज्जइ
। इइ कम्माइं से गरूआइं ॥ ३१ ॥ व्याख्या—' नाऊणत्ति ' ज्ञात्वा करगतामलकवत् सज्ञा-
वतः सत्यबुद्ध्या सर्वं ज्ञानादिरूपं ' पहं इति ' मोक्षमार्गं ज्ञात्वाप्ययं जीवो धर्मविषये, ना-
मेति संभावनायां ' सिज्जइत्ति ' विषीदति प्रमादी भवति, इत्यत्रार्थे किं कारणमित्याह—क-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्माणि तस्य प्राणिनो ज्ञानावरणीयादीनि कर्माणि गुरूणि वर्त्तते, अतो जानन्नपि स धर्मं न करोतीत्यर्थः ॥ ३१ ॥

॥ मूलम् ॥—धम्मत्तकाममुक्केसु । जस्स न्नावो जहिं जहिं रमइ ॥ तो वेरग्गरसमयं । न इमं सव्वं सुहावेइ ॥ ३२ ॥ व्याख्या—' धम्म इति ' धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मध्ये यस्य प्राणिनो न्नावोऽभिप्रायो ' जहिं जहिंत्ति ' यत्र यत्र भिन्नभिन्नपदार्थेषु रमते वर्त्तते, तस्माद्वैराग्यस्यैकांतो रसो यस्मिन् तद्वैराग्यरसमयमिममुपदेशमालाप्रकरणं ' सव्वं इति ' सर्वप्राणिनां ' न सुहावेइत्ति ' न सुखयति, सर्वेषां सुखं नोत्पादयति, किंतु वैराग्यवतामेवेत्यर्थः ॥ ३२ ॥

॥ मूलम् ॥—संजमतवालसाणं । वेरग्गकहा न होइ कन्नसुहा ॥ संविग्गपक्खिआणं । हुज्ज व केसिंचि नाणीणं ॥ ३३ ॥ व्याख्या—' संजम इति ' संयमे सप्तदशविधे, अत्र च तपसि अलसानां प्रमादिनामेतादृशानां पुरुषाणां वैराग्यकथा वैराग्यवार्त्ता न भवति कर्णसुखा, प्रमादिनां वैराग्यवार्त्ता न रोचते इत्यर्थः. संवेगपक्षवतां मोक्षाभिलाषवतामित्यर्थः ' हु- ॥५९३॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जव ' भवति वा केषांचिद् ज्ञानिनां कर्णसुखकारिणी वैराग्यकथा, न तु सर्वेषां ॥ ३३ ॥

॥ मूलम् ॥—सोऊण पगरणमिणं । धम्मे जाउ न उज्जमो जस्स ॥ न य जणियं वेरग्गं । जाणिज्ज अणंतसंसारी ॥ ३४ ॥ व्याख्या—' सोऊणत्ति ' श्रुत्वेदं प्रकरणमुपदेशमालारूपं ' धम्मेत्ति ' धर्मविषये यस्योद्यमो न जातो नोत्पन्नः, न च जनितमुत्पन्नं वैराग्यं पंचेंद्रियविषयत्यागरूपं, तदैवं ज्ञेयं यदयमनंतसंसारी वर्त्तते, अनंतसंसारिणां बहूपदेशेनापि वैराग्यं नोपजायते इत्यर्थः ॥ ३४

॥ मूलम् ॥—कम्माण सुबहुआणु—वसमेण भवगच्छइ इमं सव्वं ॥ कम्ममलचिक्कणाणं । वच्चइ पासेण न मत्तं ॥ ३५ ॥ व्याख्या—' कम्माणत्ति ' सुबहूनां कर्मणामुपशमेन क्षयोपशमेन, तज्जातीयावरणक्षयेनेत्यर्थः, ' इमंत्ति ' प्रत्यक्षं सर्वमुपदेशमालारूपं तत्वार्थसंदोहं ' भवगच्छइत्ति ' प्राप्नोति. कर्ममलेन निबिडं लिप्तानां गाढावबद्धकर्मणामित्यर्थः, एतादृशानां पुरुषाणां ' वच्चइत्ति ' बहिर्व्रजति पार्श्वेन भूत्वा, हृदये तु न प्रविशतीत्यर्थः ' नत्तंत्ति ' कथ्यमानमप्युपदेशमालाप्रकरणं ॥ ३५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ मूलम् ॥—उवएसमालमेअं । जो पढइ सुणइ कुणइ वा हिअए ॥ सो जाणइ अप्पहिअं । नाऊण सुहं समायरइ ॥ ३६ ॥ व्याख्या—' उवएसत्ति ' उपदेशमालामेतां यः पठति, यः शृणोति, वाऽथवा हृदये करोति, तदर्थं हृदये भावयतीत्यर्थः, स पुमानात्महितमिहपरलोकसाधनरूपं जानाति, ज्ञात्वा च हितं शुभं समाचरति, सम्यक्प्रकारेणात्महितमाचरतीत्यर्थः ॥ ३६ ॥

॥ मूलम् ॥—धंतमणीदामससिगणिहिं–पयपढमक्करान्निहाणेणं ॥ उवएसमालपगरणं । मिणमो रइअं हियट्ठाए ॥ ३७ ॥ व्याख्या—' धंतत्ति ' धंतशब्द १ मणिशब्द २ दामशब्द ३ शशिशब्द ४ गणितशब्द ५ एतेषां पदानां यानि प्रथमाक्षराणि, धकारमकारदकारसकारगकाराणिकारलक्षणानि, तैरन्निधानं यस्य तेन, एतावता धर्मदासगणिनेत्यर्थः ' मिणमो इति ' इदमुपदेशमालाप्रकरणं ' रइअंत्ति ' रचितं ' हियट्ठाएत्ति ' आत्महितार्थं परेषां हितार्थं चेत्यर्थः ॥ ३७ ॥

॥ मूलम् ॥—जिणवयणकप्परुक्खो । अणेगसुत्तत्थसाहाविचित्तो ॥ तवनियमकुसुमगु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्नो । सुगइफलबंधणो जयइ ॥ ३८ ॥ व्याख्या—' जिणवयणत्ति ' जिनवचनं द्वादशांगरूपं, तदेव कल्पवृक्षो मनोऽभीष्टदायकस्तरुः, कीदृशः? अनेकसूत्रार्थरूपा याः शाखास्तान्निर्विस्तीर्णो विशालः, पुनः कीदृशः? तपोनियमरूपाः कुसुमगुच्छाः पुष्पस्तबका यस्मिन्नेतादृशः, पुनः कीदृशः? सद्गतिर्देवमनुजरूपा, तद्रूपं यत्फलं तस्य बंधनं निष्पत्तिर्यत्रैतादृशो जिनवचनकल्पवृक्षो जयति, सर्वोत्कर्षेण वर्त्तते इत्यर्थः ॥ ३८ ॥

॥ मूलम् ॥—जुग्गा सुसाहुवेर–ग्गिआण परलोगपन्थिआणं च ॥ संविग्गपक्खिआणं । दायव्वा बहुसुआणं च ॥ ३९ ॥ व्याख्या—' जुग्गा इति ' इयमुपदेशमाला योग्या, केषां योग्या? सुसाधूनामथ च वैराग्यवतां सुश्रावकाणां योग्या, परलोकसाधने प्रस्थितानामुद्यमवतामेतादृशानां संविग्नपक्षिकाणां साधूनां योग्या, च पुनर्बहुश्रुतानां दातव्या, पंडितानामेवानंददायिनी, न तु मूर्खाणामित्यर्थः ॥ ३९ ॥

॥ मूलम् ॥—इय धम्मदासगणिणा । जिणवयणुवएसकज्जमालाए ॥ मालव्व विविह-कुसुमा । कहिआ सुसीसवग्गस्स ॥ ४० ॥ व्याख्या—' इयत्ति ' इत्यमुना प्रकारेण धर्मदा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सगणिनाम्नाऽऽचार्येण, जिनवचनानां य उपदेशस्तस्य यत्कार्यं, तस्य माला श्रेणिः परंपरेति यावत्. तया कृत्वा मालेव स्रगिव, विविधानि विविधप्रकाराणि उपदेशरूपाण्यक्षराणि, तान्येव कुसुमानि यस्यां सा, एतादृशी कथिता, सुशिष्यवर्गस्य, शोभनाः शिष्यास्तेषां वर्गः समूहस्तस्य, तेषां पठनार्थमित्यर्थः ॥ ४० ॥

॥ मूलम् ॥—संतीकरी वुड्ढीकरी । कल्लाणकरी सुमंगलकरी अ ॥ होइ कहगस्स परिसाए । तहा य निव्वाणफलदाई ॥ ४१ ॥ व्याख्या—' संतीत्ति ' क्रोधादीनां शांतिकरी, ज्ञानादिगुणानां वृद्धिकरी, कल्याणकरी, इह लोके धनादिसंपत्तिः, परभवे वैमानिकर्द्धिस्तस्याः करी, सुमंगलकरी मांगल्यदायिनी भवति. कस्य ? कथकस्य वक्तुः, अथ च पर्षदः श्रोतुरपि मांगल्यकारिणी भवति. तथा परलोके निर्वाणफलदायिनी भवति. एतत्कथनात् श्रवणादपि च महत्फलं जायते. इत्यर्थः ॥ ४१ ॥

॥ मूलम् ॥—इह समप्पइ इणमो । मालाभवएसपगरणं पयड ॥ गाहाणं सव्वाणं । पंचसया चेव चालीसा ॥ ४२ ॥ व्याख्या—' इहत्ति ' इदं कथितमुपदेशमालाप्रकरणं ' इ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्ति ' अत्रास्मिन् स्थले ' समप्पइत्ति ' संपूर्णीक्रियते, ' पयत्ति ' प्रथमत आरभ्यात्रपर्यंतं यदा गण्यते, तदा सर्वासां समग्राणां गाथानां छंदोविशेषाणां संख्या ' चेवत्ति ' निश्चयेन, पंचशतानि चत्वारिंशदधिकानि गाथानां भवंति. उपरितनास्तु प्रक्षेपगाथा इत्यर्थः ॥४२॥

॥ मूलम् ॥—जावय लवणसमुद्दो । जावय नक्खत्तमंडिउ मेरु ॥ तावय रइया माला । जयंमि थिरथावरा होउ ॥ ४३ ॥ व्याख्या—' जावय इति ' यावत्पर्यंतं लवणसमुद्रः शाश्वतो वर्त्तते, यावत्पर्यंतं च नक्षत्रेण मंडितः शोभितो मेरुपर्वतस्तावत्पर्यंतं रचितेयमुपदेशमाला ' जयंमित्ति ' जगतिविषये स्थिरमिव शाश्वतद्रव्यमिव स्थावरा स्थिरा भवतु ॥ ४३ ॥

॥ मूलम् ॥—अक्खरमत्ताहीणं । जं चिय पढियं अयाणमाणेणं ॥ तं खमह मज्झ सव्वं । जिणवयणविणिग्गया वाणी ॥ ४४ ॥ व्याख्या—' अक्खर इति ' अक्षरेण मात्रयाऽथवा हीनं न्यूनमुपलक्षणादधिकं वा, अत्र ग्रंथे यत्किंचिन्मया पठितं भणितं, कीदृशेन मया ? अजानता, तंशब्देन तद् हीनाऽधिकाक्षरत्वादिदूषणं मम संबंधि, सर्वं समग्रं क्षमतां ? जिनवदनाज्जिनमुखाद्विनिर्गता निःसृता, एतादृशी वाणी श्रुतदेवी ॥ ५४४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इति श्रीधर्मदासगणिविरचितं श्रीउपदेशमालाप्रकरणं समाप्तं ॥ श्रीरस्तु ॥

॥ इति श्रीरामविजयगणिविरचिता श्रीउपदेशमालाटीका समाप्ता ॥

॥ आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना प्रेसमां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ इति श्रीउपदेशमालाटीका समाप्ता ॥

For Private And Personal